CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्री ५ महाराजाधिराजमहेन्द्रवीरविक्रमशाहदेवाननां
पञ्चचत्वारिंशत्तमशुभजन्मोत्सवावसरे प्रकाशितम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जगन्मोहनम्

भट्टश्रीलक्ष्मणाचार्यविरचितम्

श्रीनारायणप्रसादशर्मण अध्यक्षतायाम्

ज्यौतिषाचार्य महेन्द्रविद्याभूषण पण्डित देवीप्रसादलंसालेन सम्पादितम्

श्री ५ सर्वकारस्य

पुरातत्वविभागान्तर्गत नेपालराष्ट्रियपुस्तकालयतः प्रकाशितम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुरातत्वप्रकाशनमाला २४

प्रथमं संस्करणम् १०००

अस्य ग्रन्थस्य टीका टिप्पण्यादयः पुनर्मुद्रणादयश्च सर्वेऽधिकारा राजकीयनियमानुसारेण प्रकाशकाधीनाः।

संवत् २०२१

श्री ५ को सरकार एजुकेशन प्रेसमा मुद्रित

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विचार

श्री ५ को सरकार, पुरातत्व विभाग, राष्ट्रियपुस्तकालयद्वारा "जगन्मोहनम्" को पहिलो भाग यस भन्दा अघि २०२० सालमा प्रकाशित गरि विद्वत् वर्गको सेवामा सर्पापित गरिसकिएको छ। प्रस्तुत पुस्तक द्वितीय भागको रूपमा प्रस्तुत गरिदैछ। यस भागमा बावन्न अध्यायहरू समावेश भएका छन्। "जगन्मोहनम्" को विशालता र ज्ञानको क्षेत्रमा यसको अद्वितीय महत्वको मूल्यांकन पूर्व भागमा पनि गरिसकिएको छ। यसमा रहेको सारगर्भित तत्वहरूको विषद् व्याख्या गर्नु अब सबै अनुसन्धानकर्ताहरूको कर्तव्य हुन गएको छ। जबसम्म यसको अग्रिम विवेचना गर्ने कार्यलाई अनुसन्धानकर्ताहरूबाट प्रेरणा र बल प्रदान गरिदैन तवसम्म यसको प्रकाशनको उद्देश्य अपूर्ण नै रहन जाने छ।

श्रीभट्टलक्ष्मणाचार्यद्वारा रचित जगन्मोहनम्को यस द्वितीय भागमा धर्मानुयायीहरूका निमित्त व्यवहारमा चाहिने विषयहरू सबै छन्। उदाहरणकालागि ग्रहयज्ञ, तिथिनिर्णय, पुरूषत्वउत्पादन गराउने रसायन, सेतो कपाललाई कालो बनाउने तेलको विधान, विवाहका सम्वन्धमा विस्तार पूर्वकको निर्णय, राजयोगको वर्णन वास्तु वर्णन आदि सबै यसमा परेका छन्। व्यवहारमा चाहिने र अत्यावश्यक विषयहरूको यो सुन्दर संकलन उपयोगिताको दृष्टिकोणले सर्वोपरि ठहरिने कुरामा दुई मत हुन सक्दैन। जस्तो कि मैले अगि नै उल्लेख गरिसकेको छु कि केवल प्रकाशित पुस्तक मात्रले हाम्रो उद्देश्यको प्राप्ति संभव न होला। तसर्थ आवश्यकता यस कुराको देखिन्छ कि यस पुस्तकलाई आधारमानि यसमा उल्लिखित विषयहरू

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

माथि अझै सूक्ष्मविश्लेषण गरियोस् र अझै मार्मिक ढंगले यसको अध्ययन गर्ने दिशामा विद्वत् वर्गद्वारा सत्प्रयास गरियोस् ।

यसको प्रकाशनमा अमूल्य समय दिनु हुने पुस्तकालयका र छापाखानाका सबै योग्य कर्मचारीहरू धन्यवादका पात्र हुनुहुन्छ ।

रमेशजंग थापा
निर्देशक
श्री ५ को सरकार
पुरातत्व विभाग

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दुइशब्द

राष्ट्रिय पुस्तकालयको हैसियतले—

हाम्रो प्राचीन सभ्यता र संस्कृतिको प्रतिनिधित्व गर्ने अमूल्य निधिहरुको संरक्षण, अनुसन्धान तथा प्रकाशनको साथै जनपुस्तकालयको कार्यसम्पादन समेत यस पुस्तकालयले गर्दै आएको छ। हुनता आजको विश्वमा राष्ट्रियपुस्तकालयको कर्तव्य यतिमा मात्र इति श्री हुंदैन। यसमा सवै सभ्यताहरुको विशाल प्रतिनिधित्व गर्ने संकलन हुनु पर्ने हो। स्वदेश सम्बन्धमा लेखिएका सवै प्रकारका कृतिहरूको प्राप्ति तथा संरक्षणको साथै देशका अन्य पुस्तकालयहरुलाई उचित सहयोग, सहायता तथा नेतृत्व प्रदान गर्नु पनि राष्ट्रियपुस्तकालयको प्रमुख कर्तव्य हो। यस दिशामा पूर्ण सफलता प्राप्त गर्न नसकेको भएता पनि पुस्तकालयका सीमित साधन तथा कार्यकर्त्ताहरूको सतत प्रयास बाट केन्द्रमा मात्र सुरक्षित रहेका अमूल्य हस्तलिखित कृतिहरुको रसास्वादन सवैलाई सुलभ होस् भन्ने हेतुले महत्वपूर्ण पुस्तकहरुको चुनाव गर्दै प्रकाशित गर्दै लैजाने सिलसिलामानै 'जगन्मोहनम्' को यो दोश्रो र अन्तिम भाग विज्ञ पाठक वर्गको सामु राख्न पुस्तकालय सफल भएको छ।

प्रस्तुत ग्रन्थको महत्व र ज्योतिष शास्त्रमा यसको स्थानका सम्बन्धमा श्री निर्देशक, रमेशजंग थापाज्यूद्वारा सारगर्भित पदावलीहरुमा विवेचन भैसकेकोले यसमा मलाई अधिक भन्नु केहि छैन। यो ग्रन्थ संस्कृत भाषामा भएकोले- सर्वसाधारणले यस बाट विषेश लाभ उठाउन न सकेता पनि संस्कृत विद् मर्मस्पर्शी पाठक, अनुसन्धानकर्ता तथा टीकाकारहरुले यसको महत्व अवश्य वुझ्नु हुनेछ र यसमा रहेको सारगर्भित तत्वहरुको विषद् व्याख्याद्वारा सर्व साधारणलाई पनि हृदयंगम गराउनमा योगदान गर्नु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हुनेछ भन्ने पूर्ण आशा र विश्वास पुस्तकालयले लिएको छ। यसको विषय वस्तुलाई ध्यानमा राख्दा सम्बन्धित विभाग र संस्थाका सम्मान्य अधिकारीवर्गले महाविद्यालयका छात्रहरुको ज्योतिष विषयको पाठ्यपुस्तकको रूपमा स्थान दिने तर्फ विचार गरि दिनु भए नेपालमा सर्वप्रथम प्रकाशित भएको यो नेपाली विरुवा नेपाली माटोमानै फल्न फुल्न र हुर्कन पाउंदो हो भन्ने पुस्तकालयको धारणा छ।

यसको प्रथम भाग आज भन्दा ठीक एक वर्ष पूर्व राष्ट्रनायक श्री ५ महाराजाधिराज सरकारको ४४ सौं जन्मोत्सवका उपलक्षमा प्रकाशित गरिएको थियो र आज मौसूफको ४५ सौं शुभजन्मजयन्तिको उपलक्षमा यो दोश्रो र अन्तिम भाग प्रकाशनमा ल्याउन पाउदा पुस्तकालय आफुलाई गौरवान्वित भएको ठान्दछ। अन्तमा पुस्तकालयका सबै सहयोगी साथीहरुलाई शतसः धन्यवाद दिन्छु कित्तकि उहांहरू सबैले सीमित साधन भएता पनि पुस्तकालयको उन्नतिका लागि भरमग्दूर परिश्रम र प्रयास गर्नु भएको छ। यस पुस्तकको सम्पादन गर्ने श्री पं. देवीप्रसाद लंसाल र उहांका सहयोगी पं. यज्ञानन्द गुभाजु विशेष धन्यवादका पात्र हुनु हुन्छ।

नारायणप्रसाद शर्मा
अध्यक्ष
नेपालराष्ट्रियपुस्तकालय
संवत् २०२०।१।२१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भूमिका

इह खलु जगति सकलपुमर्थसाधकेषु शास्त्रपुञ्जेषु ज्योतिषशास्त्रमेव श्रेष्ठमित्यत्र–

यो वेद वेद वदनं सदनं हि सम्यग्
ब्राम्ह्याः स वेदमपि वेद किमन्यशास्त्रम् ।
यस्मादतः प्रथममेतदधीत्य धीमान्
शास्त्रान्तरस्य भवति श्रवणेऽधिकारी ।।

तद्यथा शिक्षायाम्—

छन्दः पादौ, शब्दशास्त्रं च वक्त्रं,
कल्पः पाणी, ज्योतिषं चक्षुषी च ।
शिक्षा घ्राणं, श्रोत्रमुक्तं निरुक्तं,
वेदस्याङ्गान्याहुरेतानि षट् च ।।

तत्र पठनमनन धारणोपयुक्त प्रेक्षा प्रेक्षणीयेना प्यधुना नात्यादृतेन ज्योतिः शास्त्रेण मुख्यस्यैवाङ्गस्य स्थानं समधिष्ठितम् । तथा चाह वसिष्ठः—

वेदस्य चक्षुः किल शास्त्रमेतत्प्रधानताङ्गेषु ततोऽस्य जाता ।
अङ्गैर्युतोऽन्यैः परिपूर्ण मूर्ति श्चक्षुर्विहीनः पुरुषो न कश्चित् ।।

वस्तुतः पक्षपात रहितया धिया एतच्छास्त्राध्ययनस्य सकल शास्त्राध्ययनापेक्षयाऽऽवश्यकत्वाधिक्यमिति कथने नाल्पीयस्यपि धृष्टता

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भवति । यतः एतद्विना लौकिकं वैदिकञ्च किमपि कृत्यं न सिद्ध्यति । अल्पीयसि महीयस्यपि विषयेऽस्य प्रयोजनं पदे पदे जायते ।

यतः आह कश्यपः—

ग्रहणं ग्रह संक्रान्ति यज्ञाध्ययन कर्मणाम् ।
प्रयोजनं, व्रतोद्बाह क्रियाणां कालनिर्णयः ।।

किं च ज्योतिः शास्त्रस्य श्रौतस्मार्त कर्मौपायिकत्वं, सार्वत्रिकं प्रसिद्धमेव ।

तथाहि—

अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीत । इति ।

तथा च—

'वसन्ते ब्राह्मणोऽग्नीनादधीत दर्शपूर्णमासाभ्यां यजेत' इति । वर्षज्ञानमप्यादित्यादिग्रहचार परिच्छेद साध्यम् ।

श्रीमद्भागवते सूर्यस्तुतौ—

नमो भगवते आदित्यायाखिल जगतामात्मस्वरुपेण काल स्वरुपण चतुर्विध भूतनिकायानां ब्रह्मादि स्तम्बपर्यन्तानामन्तर्हृदयेषु बहिरपि चाकाश इवोपाधिना व्यवधीययानो भगवानेक एव क्षणलवनिमेषावयवोपचित संवत्सर गणेनायामादानविसर्गाभ्यामिमां लोकयात्रामनु वहति । यदुह वाव विबुधर्षभ सवितरदस्तपत्यनु सवनमहरहराम्नायविधिनो पतिष्ठमानानामखिल दुरित वृजिन बीजावभर्जन भगवतः समधीमहि तपन मण्डलम्' ।। इति ।

वसन्ताघृतूनां दर्श पौर्णमासयोश्च ज्ञानं ज्यौतिषं विना सर्वथैव न सिद्ध्यतीत्यवश्यमधेतव्यं ज्योतिः शास्त्रम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एतच्छास्त्रय प्रथम प्रचारकपितामह एव ।

यथा चोक्तं सिद्धान्ततत्वविवेके--

ब्रह्मा प्राह च नारदाय हिमगुर्यच्छौनकायामलम् ।
माण्डव्याय वसिष्ठसंज्ञकमुनिः सूर्यो मयायाह यत् ।

तथा चैतत्प्रवर्तका मुनयः--

सूर्यः पितामहो व्यासो वसिष्ठोऽत्रि पराशरः ।
कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिरा, ।।
लोमशः पौलिशश्चैव च्यवनो यवनो भृगुः ।
शौनकोऽष्टादश ह्येते ज्योतिः शास्त्र प्रवर्तकाः ।।

ज्यौतिषशास्त्राऽध्ययनस्य न केवलं पूर्वोक्तं प्रयोजनमपि तु पारमार्थिक शास्वतपदप्राप्तिरपि ।

यतः, उक्तं सूर्यसिद्धान्ते —

दिव्यं चक्षुग्रहर्क्षाणां दर्शितं ज्ञानमुत्तमम् ।
विज्ञायार्कादि लोकेषु स्थानं प्राप्नोति शाश्वतम् ।।

एवं गर्गाचार्योऽपि —

ज्योतिश्चक्रे तु लोकस्य सर्वस्योक्तं शुभाशुभम् ।
ज्योतिर्ज्ञानं तु यो वेद स याति परमाङ्गतिम् ।।

वस्तुतो गणित– गोलविषयकंज्ञानं त्वेतच्छास्त्राध्यायनस्याऽऽनुसङ्गिकफलम् । शास्त्राराध्यदैवतं मुक्तिमार्गरूपं भगवन्तं भास्करं ध्यायन्, जनो मोक्षपदवीभूषितोऽपि भवति ।

यत उक्तं वेदेऽपि —

'सूर्य आत्मा जगतस्तस्थुषश्च' ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तथोक्तं वराहेणाऽपि —

'मूर्तित्वे परिकल्पितः शशभृतो वर्त्माऽपुनर्जन्मनाम्' । इत्यादि । एवं यत्किञ्चन जगतितलगतं चरमचरं वा दृश्यते तत्सकलमपि केवलं रवि किरण संयोगेनैव जीवनं स्थैर्यं चावहतीति ।

तत्र तावदस्य स्कन्धत्रयम् —

ज्योतिः शास्त्रमनेक भेद विषयं स्कन्धत्रयाधिष्ठितं
तत्कात्स्न्योंपनयस्य नाम मुनिभिः संकीर्त्यते संहिता ।
स्कन्धेऽस्मिन् गणितेन या ग्रहगति स्तन्त्राभिधानस्त्वसौ
होराद्यङ्ग विनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः ।।

अस्य शास्त्रस्य संबन्धाभिधेय विषये यथाह नारदः —

अस्य शास्त्रस्य सम्बन्धो वेदाङ्गमिति कीर्तितः ।
अभिधेयं च जगतः शुभाशुभ निरूपणम् ।।

त्रिस्कन्धात्मकेऽपि शास्त्रेऽत्र संहिता ग्रन्थेष्वयं जगन्मोहन ग्रन्थो मूर्धन्यत्वेन वरीवर्ति ।

ज्योतिषशास्त्रस्य प्राचीनग्रन्थानां टीकासु मृदुमनोरम पदविन्यास भरितानि प्रामाणिकानि भट्टलक्ष्मणाचार्य वचनानि बहून्येव बिलोक्यन्ते ।

आचार्यस्याविर्भावकालःस्त्रयोदशशत शकाब्दकाल एवानुमीयते । तद्यथाह आचार्य :—

बाणाग्नि शशि संख्याभिः (१३५) र्वजिताः शालिवाहनाः ।
बाणाब्ध्यक्षि मही संख्या (१२४५) रहिताश्च प्रतापकाः ।।

इत्यान्ध्रप्रदेशे कृष्णागोदावरी मध्ये, एकशीलाधिपतेः सूर्य वंशान्वयस्य नवलक्ष धनुर्धराधिपतेः श्रीप्रतापरुद्रस्य गतवर्ष ज्ञानमिति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अत्र प्रथमं पुस्तकं "प्र" संज्ञकं द्वितीयं 'अ' तृतीयं 'क' चतुर्थं 'च' इति संज्ञकं कल्पितम् ।

संशोधने च स्वमतिमान्द्याद्व्यासङ्गात्, आयसाक्षरनियोक्तृकृत वर्ण वैपरीत्यान्मुद्रणावस्थायामक्षर स्खलन प्रभृति दोषाद्वा बहुत्र 'व्य' स्थाने 'ब्य' इति 'व' स्थाने 'ब' इति 'ब' स्थाने 'व' इति 'त्त' स्थाने 'त' इति 'ष' स्थाने 'प' इति पतितं तत्र च पाठक महोदयै रवधातव्यम् पूर्वोक्ताना-मन्यासां च कतिपयानामशुद्धीनां ज्ञापकं शुद्धिपत्रं चोपन्यस्तमिति । कृतेऽपि भूयसि परिश्रमे यत्र तत्र बहुस्खलनं स्यादिति तेषु कृतबुद्ध्या विद्वांस एव शरणं भागद्वयस्य कृते इति ।

कृतेऽपि बंहीयसि प्रयासे स्वमतिमान्द्यात् उपायान्तराभावाच्च कुत्रचित् यथोपलब्ध एव पाठ उपन्यस्तः । कथं कथमप्यस्माभिः समुपा-द्यं ग्रन्थः। ग्राहक महानुभागा ? तदित्थं भूयसा प्रयत्नेन समुद्रित दुष्प्राप मिमं ग्रन्थरत्नं संगृह्य सफलयन्तु पुरातन ग्रन्थरत्न प्रकाशन गृहीत धियं नेपाल राष्ट्रिय पुस्तकालयस्य प्रकाशन विभागम् ।

अस्मिन् प्रकाशन विषये पं. देवराज पौड्यालः, पं. भोलानाथ पौड्यालः, पं. यज्ञानन्द गुभाजु प्रभृति यैर्यै विद्वद्भिः सहयोगः कृत स्ते शतशो धन्यवादार्हाः, इति

विनीतः
देवीप्रसाद लंसालः
संवत् २०२१ ज्येष्ठ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जगन्मोहनीयद्वितीय भागात्मकस्य
विषयानुक्रमणिका

विषयः	अध्यायसंख्या	पृष्ठसंख्या
	४४	
ग्रहयज्ञः		१
मण्डपकुण्डादिमानम्		
सूर्यादिग्रहाणां ध्यानादिकथनम्		
सूर्यादिग्रहाणां कपिलादानादिमन्त्राः		
सूर्यादिदेवतानां शान्तिमन्त्राः		
सूर्यादिग्रहाणां दानद्रव्यादिकथनम्		
	४५	
अष्टवर्गप्रयोगः		२१
तत्रैव चक्रोद्धारः, विन्दूफलं च		
चन्द्राद्यष्टकवर्गाः		
अष्टवर्गजनितो राजयोगः		
अष्टवर्गन्यासः		
	४६	
अष्टवर्गफलानि		२६
प्रत्येकाष्टकवर्गरेखाविन्दूफलनिरूपणम्		
	४७	
प्रस्ताराष्टकवर्गफलम्		४२
	४८	
अश्लेषामूलगण्डान्तजा-		४९
तानां शान्त्यादिकथनम्		
कुहूसिनीवालीजन्मफलम्		

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जगन्मोहनीयद्वितीय भागात्मकस्य
विषयानुक्रमणिका

विषयः	अध्यायसंख्या	पृष्ठसंख्या
	४४	
ग्रहयज्ञः		१
मण्डपकुण्डादिमानम्		
सूर्यादिग्रहाणां ध्यानादिकथनम्		
सूर्यादिग्रहाणां कपिलादानादिमन्त्राः		
सूर्यादिदेवतानां शान्तिमन्त्राः		
सूर्यादिग्रहाणां दानद्रव्यादिकथनम्		
	४५	
अष्टवर्गप्रयोगः		२१
तत्रैव चक्रोद्धारः, विन्दूफलं च		
चन्द्राद्यष्टकवर्गाः		
अष्टवर्गजनितो राजयोगः		
अष्टवर्गन्यासः		
	४६	
अष्टवर्गफलानि		२९
प्रत्येकाष्टकवर्गरेखाविन्दूफलनिरूपणम्		
	४७	
प्रस्ताराष्टकवर्गफलम्		४२
	४८	
अश्लेषामूलगण्डान्तजा- तानां शान्त्यादिकथनम्		४९
कुहूसिनीवालीजन्मफलम्		

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बिषयः	अध्यायसंख्या	पृष्ठसंख्या
	४९	
तिथिनिर्णयः		६३
नक्तादितिथिनिर्णयः		
नक्षत्रव्रतम्		
उपवासव्रतम्		
मलमासनिरुपणम्		
शुक्रास्तनिरुपणम्		
	५०	
प्रथमरजोदर्शनम्		११६
प्रथमरजोदर्शने फलम्		
रजोदर्शनसमये प्रावृट्वस्त्रादिफलम		
रजस्वलाशुद्धिः		
निन्द्यतिथ्यादौ शान्तिः		
गर्भाधानयोग्यरसायनम्		
	५१	
आधानाऽध्यायः		१३२
	५२	
पुंसवनाऽध्यायः		१३५
	५३	
सीमन्तोनयनाऽध्यायः		१३६
	५४	
सीमन्तकाष्टकाऽध्यायः		१४१
	५५	
सीमन्तानन्तरं विष्णुपूजा		१४३
जातकर्माऽध्यायः		
जन्मदिनकृत्यम्		

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विषयः	अध्यायसंख्या	पृष्ठसंख्या
ग्रहयोनिभेदाऽध्यायः	५६	१४८
बलनिरूपणाऽध्यायः	५७	१५०
नैसर्गिकफलानि		
गर्भप्रश्नाऽध्यायः	५८	१५५
वामनादियोगः		
प्रसवकालज्ञानम्		
अरिष्टाध्यायः	५९	१६३
उपसूतिकाऽध्यायः	६०	१६९
उपसूतिकाज्ञानम्		
दीप–गृहादिज्ञानम्		
अरिष्टाऽध्यायः	६१	१७६
अरिष्टभङ्गाऽध्यायः	६२	१७९
योगारिष्टाऽध्यायः	६३	१८३
अमितायुर्लक्षणम्		
राजयोगाऽध्यायः	६४	१९०
राजयोग भङ्गाऽध्यायः	६५	२०१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विषयः	अध्यायसंख्या	पृष्ठसंख्या
लग्नांशगुणाऽध्यायः	६६	२०३
भावफलाऽध्यायः	६७	२०५
दशाफलानि		
दीप्तादिफलम्		
अन्तर्दशाफलानि		
उच्चादिग्रहाणांफलानि		
स्त्रीजातकाऽध्यायः	६८	२१३
सामुद्रिकलक्षणाऽध्यायः	६९	२१९
प्रमाणलक्षणम्		
पादाङ्गुलीलक्षणम		
नखलक्षणम्		
पार्ष्णिलक्षणम्		
गतिलक्षंणम्		
जानुलक्षणम्		
वस्तिलक्षणम्		
हृदयलक्षणम्		
हस्तलक्षणम्		
गण्डादिलक्षणम्		
सामुद्रिके स्त्रीपुरुषयोर्ल-क्षणाऽध्यायः	७०-७१	२२४
स्त्रीलक्षणम्		
भगलक्षणम्		

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विषयः	अध्यायसंख्या	पृष्ठसंख्या
नाभ्यादिलक्षणम्		
केशादिलक्षणम्		
नामकरणाऽध्यायः	७२	२४७
कर्णवेधाऽध्यायः	७३	२५१
निष्क्रमणम्		
अन्नप्राशनचूडाकरणाऽ— ध्यायः	७४	२६०
स्त्रीसंस्कारः		
सामान्यक्षौरनिर्णयः		
अङ्कुरार्पणम्	७५	१७१
उपनयनम्		
वेदारम्भः		
अर्थशास्त्रम्		
शब्दशास्त्रम्		
गणितविद्या		
ज्योतिः शास्त्रम्		
वैद्यशास्त्रम्		
अनध्यायः		
उपनयनाष्टकम्		
सूपविद्या		
गणितविद्या		

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विषयः	अध्यायसंख्या	पृष्ठसंख्या
शास्त्रविद्या		
शिल्पविद्या		
वैतालविद्या		
सारस्वतयोगः		
समावर्तनाऽध्यायः	७६	२९८
विवाहप्रश्नशकुनाऽध्यायः	७७	२९९
विवाहे क्षुतम्		
विवाहे मरीच्यादिमतेन योग्यवरलक्षणम्		
विवाहे कालशुद्ध्यायः	७८	३०५
विवाहे महादोषनिरूपणाऽध्यायः	७९	३१३
विवाहे लग्नाष्टमशुद्धिः		
विवाहे लग्नास्तशुद्धिः		
विवाहे संक्रान्तिलक्षणम्		
विवाहे पापषड्वर्गलक्षणम्		
विवाहे भृगुषट्क दोषः		
विवाहे कुजाष्टमदोषः		
विवाहे अष्टमलग्नदोषः		
विवाहे दोषस्यापवादः		
विवाहे वारदोषः		
विवाहे ग्रहदोषः		
विवाहे एकविंशतिमहादोषाः		
विवाहे कृत्याकृत्यविचाराऽध्यायः	८०	३३२

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विषयः	अध्यायसंख्या	पृष्ठसंख्या
	८१	
विवाहे कूटाऽध्यायः		३४०
माहेन्द्रकूटम्		
गणकूटम्		
दिनकूटम्		
दिनकूट राशिकूटापवादः		
योनि कूटम्		
स्त्रीदीर्घ कूटम्		
रज्जूकूटम्		
रज्जूकूटापवादः		
राशिवश्यम्		
राशिकूटम्		
वर्णकूटम्		
ग्रहमैत्रम्		
ग्रहमैत्रापवादः		
वेधकूटम्		
वश्यकूटम्		
नाडीकूटम्		
भूतकूटम्		
लिङ्गकूटम्		
जातिकूटम्		
गोत्रकूटम्		
पक्षीकूटम्		
योगिनी कूटम्		
	८२	
विवाहे दशदोषाः		३६१
अभिजिन्मुहूर्त फलम्		

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बिषयः	अध्यायसंख्या	पृष्ठसंख्या
विवाहे तिथिनक्षत्रादिफलं–गोधूलिका लक्षणंच		
विवाहे देशविशेषगोधूलि फलम्		
	८३	
विवाहे वेदी लक्षणम्		३६८
शङ्कुलक्षणम्		
विच्छाया		
नक्षत्रनाडी		
मृत्युयोगाः		
विवाहे लग्नम्		
विवाहे भावफलम्		
लग्नाष्टमदोषभङ्गः		
विवाहे मङ्गलाष्टकम्		
	८४	
गृहप्रवेशाऽध्यायः		३८३
	८५	
वास्तु प्रकरणम्		३९०
वास्तुत्पत्तिः		
द्वारनिर्णयः		
प्रश्नशल्यम्		
वास्तुशल्यप्रमाणम्		
अंशफलम्		
वास्तोर्मण्डुकाक्षपदम्		
वास्तुपूजाविधिः		
वास्तु वलिनामानि		
	८६	
यात्राऽध्यायः		४३३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विषयः	अध्यायसंख्या	पृष्ठसंख्या
	८७	
विजययात्राप्रश्नाऽध्यायः		४३७
यात्रायामष्टवर्गः		
नवविधायात्रा		
यात्रालक्षणम्		
प्रतिशुक्रादिशान्तिः		
	८८	
राजयोगयात्रा		४६६
यात्रायांफणिचक्रम्		
समरयात्रा योगः		
यात्रायां दिग्योगेनभक्षण विचारः		
यात्रायां वारतोभक्षण विचारः		
	८९	
देवादिप्रतिष्ठा		४८१
	९०	
उत्तमराज लक्षणम्		४९०
	९१	
सेव्यसेवक चक्रम्		४९५
गजबंधादिनिर्णयम्		
आन्दोलनम्		
गजकर्म		
तुरगकर्म		
गोकर्म		
महिष्यादि नीराजनम्		
नीराजनम्		
अश्वेराज्याभिषेकः		

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विषयः	अध्यायसंख्या	पृष्ठसंख्या
शान्तिकपौष्टिकम्		
दोषषट्वर्गः		
स्वामिसेव्वन विधिः		
भोज्यादिकर्मः		
नीराजनादि		
वाहनविधिः		
भूप्रवेशः		
कृष्यारम्भः		
बीजरोपणम्		
वृक्षरोपणम्		
लवणम्		
उद्यानवनौषधादिरोपणम्		
धान्यसंग्रहः		
धान्याग्रयणम्		
नवान्नभोजनम्		
गृहग्रामवलि		
वर्षोत्थापनम्		
अथ कुट्टनम्		
अथ विभागः		
क्रयविक्रयविधिः		
पशुसंग्रहः		
राज्याशनादि		
अग्निपरिग्रहः		
अग्न्याधानम्		
दन्तधावमम्		
तैलाभ्यङ्गः		

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विषयः	अध्यायसंख्या	पृष्ठसंख्या
रोगनिवृत्तिस्नानम्		
शताभिषेकः		
	६१	
		५०८
मन्त्राभिषेकः		
	६२	
चित्रवस्त्रफलम्		
नववस्त्रपरिधानम्		
	६३	
रात्रिविधिः		
		५१२
अथाङ्गभूषणम्		
अथ देवतादिनमस्कारः		
ताम्बूलदानभक्षणम्		
अर्थ निःक्षेपः		
अथ चौरकर्म		
सर्पदंष्टम्ः		
अभिचारः		
सुकृतबृद्धिः		
रससंग्रहः		
रोगोत्पत्तिः		
भैषज्यकर्म		
त्रिपुस्करयोगः		
	६४	
		५२३
महालयादिश्राद्धविचारः		
दीक्षाकालः		
	६५	
गृहगोधिका शान्तिः		

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ चतुश्चत्वारिंशोऽध्यायः

ग्रहयज्ञमाह वसिष्ठः—

अखिलानपि लोकानां वृद्धिस्तस्माद्ग्रहास्वपूज्यतमा ।
उच्छ्र्यपतनानिनृणां खचराधीनं विशेषतो यस्मात् ॥१॥

मासि मास्ययने चन्द्रसूर्ययोर्ग्रहणेऽपि वा
विसुवत्यर्कसंक्रान्तौ व्यतीपाते दिनक्षये ॥२॥

पुण्येऽह्नि चन्द्रताराणां बलयुक्ते च जन्मभे ।
गृहस्यैशानभागे तु मण्डपं कारयेद्बुधः ॥३॥

षड्द्वादशाष्टभिर्हस्तैः षोडशैर्वा: समन्ततः ।
चतुर्द्वारिसमायुक्तं तोरणाद्यैरलङ्कृतम् ॥४॥

कुण्डं तन्मध्यभागे तु कारयेच्चतुरस्रकम् ।
वितस्तिद्वयखातं यत् कुण्डं स चतुरङ्गगुलम् ॥५॥

विप्राणां क्षत्रियाणां तदङ्गुलत्रयसंयुतम् ।
वैश्यानां द्व्यङ्गुलाधिक्यं शूद्राणां हस्तमात्रकम् ॥६॥

प्रथमा मेखला तत्र द्वादशाङ्गुलविस्तृता ।
चतुर्भि[१]रङ्गुलैस्तत् स्यात् सोन्नतं च समन्ततः ॥७॥

---

१ चतुर्भिरङ्गुलैस्तस्या श्चोनत्यं च समन्ततः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तस्याश्चोपरि वप्रः स्याच्चतुङ्गुरलमुन्नतः ।
अष्टभिरङ्गुलैः सम्यग् विस्तीर्णां सुसमन्ततः ॥८॥

तस्योपरि पुनः कार्यो वप्रः सोऽपि तृतीयकः ।
चतुरङ्गुलविस्तीर्णश्चोन्नतश्च तथाविधः ॥९॥

योनिश्च पश्चिमे भागे प्राङ्मुखा मध्यसंस्थिता ।
षडङ्गुलैश्च विस्तीर्णा चायता द्वादशाङ्गुलैः ॥१०॥

पृष्ठोन्नता गजोष्ठेव सच्छिद्रा मध्यमोन्नता ।
एवं लक्षणसंयुक्तं कुण्डमिष्टार्थसिद्धिदम् ॥११॥

अनेन दोषदं कुण्डं यत्र न्यूनाधिकं यदि ।
तस्मात् सम्यक् परीक्ष्यैवं कर्तव्यं शुभमिच्छता ॥१२॥

कुण्डस्यैशानभागे तु पूजावेदीं प्रकल्पयेत् ।
हस्तोन्नतां[1] च विस्तीर्णां चतुरस्रां समन्ततः ॥१३॥

स्नात्वादौ कायशुद्ध्यर्थं[2] द्विजानुज्ञां लभेत च[3] ।
आशिषो वाचनं कार्यं मधुपर्कपुरः सरम् ॥१४॥

ऋत्विजो वाचयेत् पश्चाद् वृत्तविद्यासमन्वितान् ।
षोडश ब्राह्मणान् शुद्धान् दम्भानृतविवर्जितान् ॥१५॥

एषां मध्ये श्रेष्ठतममाचार्यार्थं प्रकल्पयेत् ।
लिखेदष्टदलं पद्मं वेदिकोपरि तण्डुलैः ॥१६॥

---

१ हस्तोत्तरं प्र. । २ कार्यशुद्ध्यर्थं क. । ३ लभेत्ततः लि.पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आदित्यादि ग्रहाणां च प्रतिमाः कल्पयेत् तदा ।
ताम्रेण कारयेत् सूर्यं स्फटिकेन निशाकरम् ॥१७॥

कुजं कुचन्दनेनज्ञं सुवर्णेन गुरुं तथा ।
रजतेन सितं सौम्यं लोहेन च विधून्तुदं ॥१८॥

लोहेन शुद्धकांशेन केतुं कुर्यात् प्रयत्नतः ।
यथारुचिप्रमाणेन प्रतिमा कल्पयेत् सुधी : ॥१९॥

अथ सूर्यस्य

वेदीमध्ये ललितकमले कर्णिकायां रथस्थः[१]
सप्ताश्वाऽर्कोऽरुणरुचिरवपुः सप्तरज्जुर्द्विबाहुः ॥

गोत्रेरम्ये बहुविधगुणे काश्यपाख्ये प्रसूतः
कालिङ्गाख्ये विजयजनितः प्राङमुखः पद्महस्तः ॥२०॥

आकृष्णेनेति मन्त्रेण रविं ध्यात्वा समर्चयेत् ।
अस्य मन्त्रस्य च ऋषिर्हिरण्यस्तूप संज्ञकः ॥२१॥

त्रिष्टुब्छन्दो देवताऽर्को मन्त्रोऽसौ सर्वकामदः ।
अस्याऽधिदैवतान् रूद्रांस्थापयेद्दक्षिणे ततः ॥२२॥

मन्त्रस्त्र्यंवककुम्भास्य छन्दोऽ नुष्टुप् तथर्षयः[२]।
वामदेववसिष्ठाद्या देवतापरमेश्वरः ॥२३॥

---

[१]कर्णिकायाम्बरस्थ अ. क. च. प. । [२]ततो ऋषिः लिपु ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तस्याश्चोपरि वप्रः स्याच्चतुङ्गुरलमुन्नतः ।
अष्टभिरङ्गुलैः सम्यग् विस्तीर्णां सुसमन्ततः ॥८॥

तस्योपरि पुनः कार्यो वप्रः सोऽपि तृतीयकः ।
चतुरङ्गुलविस्तीर्णश्चोन्नतश्च तथाविधः ॥९॥

योनिश्च पश्चिमे भागे प्राङ्मुखा मध्यसंस्थिता ।
षडङ्गुलैश्च विस्तीर्णा चायता द्वादशाङ्गुलैः ॥१०॥

पृष्ठोन्नता गजोष्ठ्येव सच्छिद्रा मध्यमोन्नता ।
एवं लक्षणसंयुक्तं कुण्डमिष्टार्थसिद्धिदम् ॥११॥

अनेन दोषदं कुण्डं यत्र न्यूनाधिकं यदि ।
तस्मात् सम्यक् परीक्ष्यैवं कर्तव्यं शुभमिच्छता ॥१२॥

कुण्डस्यैशानभागे तु पूजावेदीं प्रकल्पयेत् ।
हस्तोन्नतां[1]च विस्तीर्णं चतुरस्रां समन्ततः ॥१३॥

स्नात्वादौ कायशुद्ध्यर्थं[2] द्विजानुज्ञां लभेत च[3] ।
आशिषो वाचनं कार्यं मधुपर्कपुरः सरम् ॥१४॥

ऋत्विजो वाचयेत् पश्चाद् वृत्तविद्यासमन्वितान् ।
षोडश ब्राह्मणान् शुद्धान् दम्भानृतविवर्जितान् ॥१५॥

एषां मध्ये श्रेष्ठतममाचार्यार्थं प्रकल्पयेत् ।
लिखेदष्टदलं पद्मं वेदिकोपरि तण्डुलैः ॥१६॥

---

१ हस्तोत्तरं प्र. । २ कार्यशुद्ध्यर्थं क. । ३ लभेत्ततः लि.पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आदित्यादि ग्रहाणां च प्रतिमाः कल्पयेत् तदा ।
ताम्रेण कारयेत् सूर्यं स्फटिकेन निशाकरम् ॥१७॥

कुजं कुचन्दनेनज्ञं सुवर्णेन गुरुं तथा ।
रजतेन सितं सौम्यं लोहेन च विधून्तुदं ॥१८॥

लोहेन शुद्धकांशेन केतुं कुर्यात् प्रयत्नतः ।
यथारुचिप्रमाणेन प्रतिमा कल्पयेत् सुधी : ॥१९॥

अथ सूर्यस्य

वेदीमध्ये ललितकमले कर्णिकायां रथस्थः[१]
सप्ताश्वाऽर्कोऽरुणरुचिरवपुः सप्तरज्जुर्द्विबाहुः ॥

गोत्रेरम्ये बहुविधगुणे काश्यपाख्ये प्रसूतः
कालिङ्गाख्ये विजयजनितः प्राङमुखः पद्महस्तः ॥२०॥

आकृष्णेनेति मन्त्रेण रविं ध्यात्वा समर्चयेत् ।
अस्य मन्त्रस्य च ऋषिर्हिरण्यस्तूप संज्ञकः ॥२१॥

त्रिष्टुब्छन्दो देवताऽर्को मन्त्रोऽसौ सर्वकामदः ।
अस्याऽधिदैवतान् रूद्रांस्थापयेद्दक्षिणे ततः ॥२२॥

मन्त्रस्त्र्यंवककुम्भास्य छन्दोऽ नुष्टुप् तथर्षयः[२] ।
वामदेववसिष्ठाद्या देवतापरमेश्वरः ॥२३॥

---

[१]कर्णिकायाम्बरस्थ अ. क. च. प. । [२]ततो ऋषिः लिपु ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सूर्यस्य स्थापयेद् वह्नि नाम प्रत्यधिदेवता ।
ग्रहाधिदेवतास्त्वेवं स्थापनीयाः परास्ततः ॥२४॥

मन्त्रोऽग्निन्दूतमित्यस्य ऋषिर्मेधातिथिः सदा ।
अग्निस्तु देवता छन्दो गायत्री पापमोचनी ॥२५॥

अथ चन्द्रस्य

आग्नेयभागे सरथो दशाश्वश्चात्रेयजो यामुनदेशजश्च ।
प्रत्यङ्मुखस्थश्चतुरस्रपीठे गदाधरोऽभूद् द्विभुजः शशांकः ॥२६॥

आप्यायस्वेति मन्त्रेण यजेच्चन्द्रमसं सदा ।
अस्य ऋषिर्गौतमाख्यो गायत्री देवता शशी ॥२७॥

गौरीमिमायमन्त्रेण गौरीं त्वस्याधिदेवता ।
ऋषिर्दीर्घतमश्चास्य जगती देवता उमा ॥२८॥

अत्रान्या देवता त्वापस्त्वापोहिष्टा मयो भुवः ।
सिंधुद्वीपोऽस्य मंत्रस्य गायत्री वारिदेवता ॥२९॥

अथ कुजस्य

याम्ये जगच् शक्तिगदासशूलोवरप्रदोयाम्यमुखोऽतिरक्तः ।
कुजस्त्ववन्तीविषयस्त्रिकोणस्तस्मिन् भरद्वाजकुले प्रसूतः ॥३०॥

अग्निमूर्धेति मन्त्रेण सम्यग् ध्यात्वा कुजं यजेत् ।
ऋषिर्विरूपोगायत्री देवताऽङ्गारकस्य च ॥३१॥

स्कन्दोऽधिदेवता त्वस्य गायत्रीदेवता गुहा ।
मन्त्रस्य स्कन्दगायत्री स्कन्दस्य प्रतिदेवता ॥३२॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्योनापृथिव्यसौ मन्त्रस्त्विवतरो देवता मही ।
गायत्री देवता भूमिस्त्वस्य मेघातिथिर्ऋषिः ॥३३॥

अथ बुधस्य

उदङ्मुखो मागधजो हरिस्थश्चात्रेयगोत्रः शरमण्डलस्थः ।
सखड्गचर्मोरूगदाधरोज्ञ त्वीशानभागे वरदः सुपीठः ॥३४॥

अग्नेविवश्वदूखजरित्वति मन्त्रेण चन्द्रजम् ।
प्रस्कण्ववृहतीछन्दस्त्वस्यस्मिन् देवता बुधः ॥३५॥

मन्त्रेणेदं विष्णुरिति विष्णुपूजाधिदेवता ।
ऋषिर्मेधातिथिछन्दो गायत्री देवता हरि ॥३६॥

विष्णुं च देवतामन्यां पुरूषसूक्तेनार्चयेत् ।
ऋषिर्नारायणोऽनुष्टुप् यस्यस्मिन् देवता हरिः ॥३७॥

अथ गुरोः

सौम्ये च दीर्घे चतुरस्रपीठे रथेऽङ्गिराः सौम्यमुखश्चपीतः ।
दण्डाक्षमालाजलपात्रधारी सिंध्वाख्यदेशो वरदश्च जीवः ॥३८॥

बृहस्पते परिधीयेत्यनेन गुरुमर्चयेत् ।
ऋषिरस्यप्रतिरथस्त्रिष्टुब् जीवोऽत्रदेवता ॥३९॥

अस्याधिदेवता ब्रह्मा ब्रह्मज्ञानमिन्यृचः ।
तमर्चयेदृशि भर्गस्त्रिष्टुब् ब्रह्मैव देवता ॥४०॥

इन्द्रायन्दोमरुत्वन्तस्त्वनेनेतरदेवता ।
इन्द्र ऋषिः कश्यपोऽस्य गायत्री देवता हरिः ॥४१॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ शुक्रस्य

प्राच्यां भृगुर्भोजकटे प्रजात: सभार्गव: पूर्वमुख: सिताभ: ।
स पञ्चकोणे स रथाधिरूढो दण्डाक्षमालावरदाम्बुपात्र: ॥४२॥

ध्यात्वा समर्चयेच्छुक्रं शुक्रं ते अन्यदित्यृचा ।
त्रिष्टुवृषिर्भरद्वाजो देवता धनुर्रचित: ॥४३॥

अस्याधिदेवता शुक्रन्त्वनेनैवार्चयेत् तु ताम् ।
इन्द्रमिद्देवता तस्य इति मेधातिथिर्ऋषि: ॥४४॥

छन्दोऽस्य बृहती नाम देवता चामरेश्वर: ।
अस्य शुक्रस्य चेन्द्राणी त्वत्र प्रत्यधिदेवता ॥४५॥

मन्त्रेणोत्तानपर्णेन[1] चास्य मेधातिथिर्ऋषि: ।
इन्द्राणी देवता त्वत्र अनुष्टुब् छन्दसंज्ञक: ॥४६॥

अथ शने:

चापासनो[2] गृध्ररथ: सनील: प्रत्यङ्मुख: कश्यपज: प्रतीच्याम् ।
सशूलचापेषुवरप्रदश्च सौराष्ट्रदेशप्रभवश्च सौरि: ॥४७॥

शन्नोदेवीरित्यनेन मन्त्रेण शनिमर्चयेत् ।
अस्य सिन्धुद्वीपऋषिर्गात्री देवता शनि: ॥४८॥

यमाधिदेवता पूज्या आयङ्गौरित्यनेन च ।
रार्थराज्ञे ऋषिश्चास्य गायत्री देवता यम: ॥४९॥

---

१ मन्त्रेणोत्तानपत्रेण । ४ बाणासने प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रजापतिस्त्वस्य शनेः प्रतिपूर्वाधिदेवता ।
प्रजापते नत्वदेता अनेनैव यजेतु[3] ताम् ॥५०॥

त्रिष्टुब् छन्दोऽस्य मन्त्रस्य स्वर्गगर्भरितिस्तथा ।
प्रजापतिदेवतयोर्मन्त्रः पापादिमोचकः ॥५१॥

अथ राहोः

पैठीनसौ वर्वरदेशजातः सूर्यासन सिंहगमः सधूम्रः ।
याम्याननो नैर्ऋतिगः करालो वरप्रदः शूलसचर्मखड्गः ॥५२॥

कयानश्चित्र आभुव इतिमन्त्रेण चार्चयेत् ।
गायत्री वामदेवोऽस्य ऋषी राहोश्च देवता ॥५३॥

कालाधिदेवता ब्रह्मजज्ञानमिति चार्चयेत् ।
त्रिष्टुब् छन्दो वामदेव ऋषिः कालोऽस्य देवता ॥५४॥

अपरा देवताः सर्पा नमोऽस्त्विवति प्रपूजयेत् ।
अग्निर्ऋषिर्विराट्छन्दः सर्पाश्चास्य च देवताः ॥५५॥

अथ केतोः

ध्वजासनो जैमिनिगोत्रजातो नर्वेदिदेशः सुविचित्रवर्णः ।
याम्याननो वायुदिशि प्रखड्गचर्मा शिखी चाष्टशतोत्तरेकः ॥५६॥

केतु कृण्वन्ननेनैव चार्चयेत्तं प्रयत्नतः ।
मधुच्छन्द ऋषिरस्य गायत्री देवता शिखी ॥५७॥

---

३ यजेत्तु अ. क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अस्याधिदेवता चित्रगुप्तोस्याज् जातमर्चयेत् ।
छन्दोऽनुष्टुब् सोम ऋषिश्चित्रगुप्तोऽत्र देवता ॥५८॥

इतरा देवता ब्रह्मयज्ञानमित्यृचा ।
विश्वेदेवा ऋषिनिभृद् गायत्री ब्रह्मदेवता ॥५९॥

शनेः पश्चिमतो देवं [1] विनायकमथार्चयेत् ।
गणानान्त्वेति जगति भर्गर्षिर्देवता स्वयम् ॥६०॥

तस्य दक्षिणतो दुर्गां जातवेदस इत्यृचा ।
त्रिष्टुब्छन्दः कश्यपोऽस्य ऋषिर्दुर्गात्रदेवता ॥६१॥

वायुं तद्दक्षिणेकोणे शिशुर्मन्त्रेण चार्चयेत् [2] ।
गौराविति ऋषिश्चास्य गायत्री देवता मरुत् ॥६२॥

दक्षिणे तस्य चाकाशं आदित्रान्तस्य चार्चयेत् ।
ऋषिर्भर्गोऽस्य गायत्री चाकाशो देवता ततः ॥६३॥

अश्विनौ दक्षिणे तस्य कार्पाविष उषा रुचा ।
ऋणिः कण्ठोऽस्य गायत्री छन्दावश्विन्यौ देवता ॥६४॥

इन्द्रश्चैरावतारूढोवज्रपाणिः सचीप्रियः ।
स्वर्णवर्णसहस्राक्षो नाकपस्त्वमरेश्वरः ॥६५॥

पद्मपूर्वदलाग्रे च इन्द्रमिन्द्र इव तृचः ।
मधुच्छन्द ऋषिरस्य गायत्री देवता स्वयम् ॥६६॥

---

१ स्थाप्य लि.पु. । २ शिशुं मन्त्रेण चार्चयेत् प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अग्निः स्ववर्णसप्तार्चिं सप्तहस्तो ध्रुवऋक्के ।
स्वाहास्त्रियो मेषगमः षडक्षसृक् श्रुवायुधः ॥६७॥

आग्नेयामर्चयेदग्निमग्निन्दूतमनेन च ।
ऋषिर्मेधातिथिश्छन्दो गायत्री देवता नदे ॥६८॥

संप्रीतये दण्डधरोयमोमहिषवाहन ।
रक्तवर्णो हि लोकानां स्वस्वकर्मफलप्रदः ॥६९॥

यमं यजेद् याम्यदले यमाय सोममितृचा ।
ऋषीयशोस्तारकोऽनुष्टुप्छन्दोऽसौ यमदैवतः[1] ॥७०॥

खड्गचर्मधरोनीलोनिर्ऋतिर्नरवाहनः ।
उर्ध्वकेशो विरूपाक्षः करालः काठिकांप्रियः ॥७१॥

मेषूणस्त्विति मन्त्रेण नैर्ऋत्यां निर्ऋतिं यजेत् ।
गायत्री घोरकण्ठोऽस्य निर्ऋतिर्देवता स्वयम् ॥७२॥

नागपाशधरो रत्नभूषणः पद्मिनीप्रियः ।
वरुणोऽम्बुपतिः स्वर्णवर्णो मकरवाहनः ॥७३॥

वरुणं पश्चिमे भागे त्वन्नो अग्न इतित्यृचा ।
वामदेव इति त्रिष्टुप् वरूणो देवताऽस्य च ॥७४॥

प्राणरूपो हि जगतो वायुः कृष्णमृगासनः ।
हेमदण्डधरः श्यामवर्णोऽसौ मोहिनीप्रियः ॥७५॥

---

१ यमदेवता क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वेपवायुर्वृत्त इति यजेद्वायुं मरुद्दिशि ।
वायुः स्वंदेवता त्वस्य गायत्री ऋषिरङ्गिरा ॥७६॥

अश्वारुढः कुन्तपाणिः कुवेरश्चित्रिणीप्रियः ।
निधीश्वरः स्वर्णवर्णः स्वर्णदो रूपवान् प्रियः ॥७७॥

सोमोधेनुमनेनैव उदीच्यां धनदेश्वरम् ।
त्रिष्टुब्छन्दो गौतमोऽस्या देवता सोमसंज्ञकः ॥७८॥

शुद्धस्फटिकसंकाशो गौरीशो वृषवाहनः ।
वरदाभयशूलाक्ष सूत्रभृत् परमेश्वरः ॥७९॥

कद्रुद्रायेति मन्त्रेण ऐशान्यां रुद्रमर्चयेत् ।
गायत्रीघोरकण्ठोऽस्य देवता चन्द्रशेखरः ॥८०॥

अर्कपलाशखदिरापामार्गाश्वत्थसंभवाः ।
उदुम्बरशमीदूर्वा कुशजाः समिधः क्रमात् ॥८१॥

सत्वचो निविडा आर्द्रा[1] स्निग्धाः प्रादेशसंमिताः ।
कनिष्ठिका तुल्यवृत्ता होमकर्मणि कामदाः ॥८२॥

लिखिताष्टदले पद्मे तस्मिन् कुण्डे हुताशनम् ।
आचार्यः स्थापयेत् सम्यक् स्वगृह्योक्तविधानतः ॥८३॥

मुखान्ते चार्चयेत् साधिदेवताश्चाखिलग्रहान् ।
पूर्वोक्तमन्त्रैः स्वैः स्वैश्च लोकपालान् समर्चयेत् ॥८४॥

---

१ आर्द्राः सत्वक्का निविड़ा क । आर्द्राः सत्वचा निविडाः लि. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तस्याश्चेशानभागे तु पूर्णकुम्भं नवं न्यसेत् ।
पञ्च त्वक्पल्लवोऽपेतं शतौषध समन्वितम् ॥८५॥

स्वर्णरक्तफलोपेतं मृत्तिकावस्त्रसंयुतम् ।
अब्लिङ्गैर्वारुणैर्मन्त्रैरर्चयेद् बीजसंयुतम्[१] ॥८६॥

उदुम्बरवटाश्वत्थप्लाक्षाम्लकुजसंभवम्[२] ।
तिलमाषाव्रीहियवगोधूमान्नप्रियङ्गुभिः ॥८७॥

गजाश्वगोकुलस्थानाद् रथ्यावल्मीकसंगमात् ।
प्रासादाद् नगरद्वारात् संभूताश्चाष्टमृत्तिकाः ॥८८॥

श्रीवृक्षविल्ववदरीविष्णुक्रान्तापुनर्नवाः ।
देवदारुजटामासीसहदेवीमुराशिवाः ॥८९॥

फलिनीवकुलाजातिफलमांजिष्टसंज्ञकाः ।
वटप्लक्षाम्रनीवारखदिरा मल्लिकार्जुनाः ॥९०॥

मदयन्ती महाजाती निंवोशीरहरिद्रकाः ।
सर्पाक्षी तुलसी रौद्रजटादाडिमचम्पकाः ॥९१॥

मातुलुङ्गयवा३म्बष्ठाकणिकारोर्णकाञ्चनाः ।
सेवन्तीपनसा द्राक्षाविश्वाक्षीश्वेतसर्षपाः ॥९२॥

राजीवकुन्दकुमुदनीलोत्पलकरञ्जकाः ।
घनागचन्दनद्रोणमन्दारो हेमदुग्धकाः ॥९३॥

---

१ देवसयुतम् प्र. । २ कुजसम्भवम्= वृक्षोद्भूतम् । ३ जवा क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रक्तचन्दनजम्बीर[1] यूथिकोग्रहमल्लिकाः ।
शन्यर्कसिन्दुवारेन्द्ररक्तधत्तूरशाण्डिलाः ॥९४॥

अपामार्गोरुपालाशवृहतीकरवीरकाः ।
नद्यावर्तकुवेराक्षीपाटलाहेमपुष्पिकाः ॥९५॥

शिरीषामलकाशोकवर्णागस्तिकपित्थकाः ।
वन्धूकमृगराजाख्यकृष्णवीमाधवीलताः ॥९६॥

चातुर्जातार्वाहिशिखौ कूटजो मधुविम्बकः ।
तमालमरुपुष्पौ तु पुष्पास्या चक्रमर्दिनी[2] ॥९७॥

बाकुचीशाल्मलीमाण्डीरास्नाखर्वपटोलकाः ।
महाखर्जूरिकानारिकेलाख्यास्ते शतद्रुमाः ॥९८॥

एषां मूलानि सर्वाणि नृणामेनोनुदानि यत् ।
शान्तिकर्मणि सर्वत्र निक्षिपेत् कलशोदके ॥९९॥

देवदारुर्निशा चैषां त्वक् पत्राणि च निक्षिपेत् ।
उपचाराणि सर्वेषामपिशुक्लाक्षतैः सदा[3] ॥१००॥

ग्रहवर्णश्च दातव्या गन्धपुष्पयुवध्वजाः ।
कर्पूरागुरुकस्तूर्यः कुङ्कुमं गन्धगुग्गुलू ॥१०१॥

कृष्णागुर्वक्षकर्पूरा दुर्वा स्युर्भास्करादितः ।
उक्ते समिध्यभावे तु पालाशं तत्र कल्पयेत् ॥१०२॥

---

१ मञ्जीर प्र. । २ तमालमरुपुष्पोरुपुष्पाप्या चक्रवर्धनी प्र. ।
३ सकृत् प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गन्धाभावे शुक्लगन्धं पुष्पाभावे सुगन्धकम् ।
धूपाभावे गुग्गुलः स्याद् द्रव्याभावे तु मिश्रकम् ॥१०३॥

चम्पाकृते गव्यमेव मिश्रकं न कदाचन ।
घृतान्नं पायसाऽपूपक्षीरमिश्रगुडौदनाः ॥१०४॥

दधिमिश्रतिलैर्मिश्रं सामिषं चित्रितोदनः ।
संस्कारार्थं चरूणां च सोभा गौ स्थापयेच्चरुन् ॥१०५॥

अग्नये जुष्ट मन्त्रेण उद्धृतेष्वपि हावयेत् ।
आदौ च समिधाज्यान्नैः पृथगष्टोत्तरं शतम् ॥१०६॥

स्वस्वमन्त्रैश्च जुहुयाद् ग्रहोद्देशेन भक्तितः ।
चित्राश्चैवाधिदैवत्याः पञ्चानां चैव पञ्च वा ॥१०७॥

इन्द्रादिलोकपालानां नकुर्यात् समिधादियत् ।
हुनेदाज्योक्त समिधश्चोपस्तरणपूर्वकम्[१] ॥१०८॥

अपादानं सकृत्कुर्यात्पश्चाच्चैवाभिपूरणम् ।
प्रमाणमाहुस्तेचात्राऽमलकीफलसंयुतम् ॥१०९॥

चरुशेषं च नैवेद्यं विविधान्नं समर्पयेत् ।
ततो व्याहृतिभिः कार्यस्तिलहोमः प्रयत्नतः ॥११०॥

प्रथमोऽयुतहोमश्च लक्षहोमो द्वितीयकः ।
तृतीयः कोटिहोमः स्यात् त्रिविधो ग्रहयज्ञकः ॥१११॥

१भूते दाप्योक्तसमिधश्चोपस्तरणपूर्वकम् अ.क.च.प. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एकरात्रं त्रिरात्रं वा पञ्चरात्रमथापि वा ।
शिवगाथां विष्णुगाथां शान्तिं ब्राह्मणभोजनम् ॥११२॥

समाचरेत्प्रतिदिनमेवं भक्त्या समन्वितः ।
ततो जयादि जुहुयाऽपूर्णाहुत्यन्तमाचरेत् ॥११३॥

स्वस्तिकं कल्पयेत् पश्चात् कुण्डस्येशानभागतः ।
यजमानाभिषेकार्थं तत्र भद्रासनंन्यसेत् ॥११४॥

प्राङ्मुखस्योपविष्टस्य यजमानस्य तत्र च ।
अभिषेकं ततः कुर्यात् सभार्याः षोडशर्त्विजः ॥११५॥

विविधैर्मङ्गलैर्घोषैः सूतमागधिकैः सह ।
वक्षमाणैः स्वमन्त्रैश्च अब्लिङ्गैर्वेदमन्त्रकैः ॥११६॥

कुम्भोदकैः पुण्यजलै रक्तद्रव्यसमन्वितैः ।
ग्रहाणामादिरादित्यो लोकरक्षणकारकः ॥११७॥

विषमस्थानसंभूतां पीडां दहतु मे रविः ।
रोहिणीशः सुधादीप्तिः सुधागात्र सुधाशनः ॥११८॥

विषमस्थानसंभूतां पीडां दहतु मे विधुः ॥११९॥

भूमिपुत्रो महातेजा जगतां भयकृत् सदा ।
वृष्टिकृद् वृष्टिहर्ता च पीडां दहतु मे कुजः ॥१२०॥

उत्पातरूपो जगतां चन्द्रपुत्रो महाद्युतिः ।
सूर्यप्रियकरो विद्वान् पीडां दहतु मे बुधः ॥१२१॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

देवमन्त्री विशालाक्ष सदालोकहिते रतः ।
अनेकशिष्यसंपूर्णः पीडां दहतु मे गुरुः ॥१२२॥

दैत्यमन्त्री गुरुस्तेषां प्राणदश्च महामतिः ।
प्रभुस्ताराग्रहाणां च पीडां दहतु मे भृगुः ॥१२३॥

सूर्यपुत्रो दीर्घदेहो विशालाक्षः शिवप्रियः ।
मन्दवारः प्रसन्नात्मा पीडां दहतु मेऽर्कजः ॥१२४॥

महाशिरो महावक्त्रो दीर्घदंष्ट्रो महाबलः ।
अतनुश्चोर्ध्वकेशस्य पीडां दहतु मे तमः ॥१२५॥

अनेकरूपवर्णश्च शतशोऽथ सहस्रशः ।
उत्पातरूपो जगतः पीडां दहतु मे शिखी ॥१२६॥

ततो राज्ञो भिषक् तस्य रक्षार्थं बलिमुत्क्षिपेत् ।
दिग्विदिक्षु विचित्रान्नैर्दीप्तैर्नीराजयेत् ततः ॥१२७॥

शुक्लमाल्याम्बरधरः शुक्लगन्धानुलेपनः ।
ततो मण्डपमागत्य ध्यायेदग्निं ग्रहान् सुरान् ॥१२८॥

प्रत्येकं प्रति मन्त्रैश्च दद्यात् पुष्पाञ्जलिं ततः ।
मन्त्रतन्त्रक्रियालोपप्रायश्चित्तार्थमेव च ॥१२९॥

यदस्य कर्मण ति स्विष्टकृज्जुहुयात्तत
अस्य मन्त्रस्यातिधृतिस्वर्णगर्भं ऋषिस्ततः ॥१३०॥

देवताग्निस्विष्टिकृच्च व्याहृतिर्विहितं ततः ।
समिधादिद्रव्यवस्तु[1] व्यवधाय सकृत् सकृत् ॥१३१॥

---

१ चरू प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संमेल्य[1] स्रुक्श्रुवं तत्र निक्षिपेदभिपूर्वतः ।
मन्त्रेण सप्त ते अग्ने इति पूर्णाहुतिं हुनेत् ॥१३२॥

आचार्येभ्यो नवभ्यश्च ग्रहार्चनफलं ततः ।
··········तिलहोमफलं च यत् ॥१३३॥

ब्रह्मत्वं कुम्भपूजायां चार्चनस्य फलं च यत् ।
गणपक्षे त्रपार्केशदुर्गा इत्यङ्गदेवता[2] ॥१३४॥

तासां जपफलं सम्यग् गृह्णीयाज्जलपूर्वकम् ।
एवं षोडशऋत्विग्भ्यो दातव्या दक्षिणा ततः ॥१३५॥

धेनुं शङ्खं रक्तवृषं हेमपीताम्बरद्वयम् ।
श्वेताश्वं कृष्णधेनुं च कृष्णलोहमजं क्रमात् ॥१३६॥

स्वर्णेन वाससी कृत्वा दातव्या दक्षिणा ततः ।
आचार्यार्थं दायकेभ्यो[3] ब्राह्मणे चार्थशक्तितः ॥१३७॥

गोदानमन्त्रः

गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश ।
यस्मात् तस्मात् शिवं मे स्यादतः शान्तिं प्रयच्छ मे ॥१३८॥

कपिलादानमन्त्रः

कपिले सर्वदेवानां पूजनीया तु रोहिणी ।
तीर्थदेवमयी यस्मादतः शान्तिं प्रयच्छ मे ॥१३९॥

---

१ मिलित्वा लि.पु. । २ हयङ्गदेवता लि. पु. । ३ दापकेभ्यः प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शङ्खदानमन्त्रः

पुण्यस्त्वं शङ्ख पुण्यानां मङ्गलानां च मङ्गलम् ।
विष्णुना विधृतो नित्यमतः शान्ति प्रयच्छ मे ॥१४०॥

वृषभदानमन्त्रः

धर्मस्त्वं वृषरूपेण जगदानन्दकारकः ।
अष्टमूर्तेरधिष्ठानमतः शान्ति प्रयच्छ मे ॥१४१॥

स्वर्णदानमन्त्रः

हिरण्यगर्भगर्भस्थं हेम वीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्ति प्रयच्छ मे ॥१४२॥

पीतवस्त्रदानमन्त्रः

पीतवस्त्रयुगं यस्माद् वासुदेवस्य वल्लभम् ।
प्रदानात् तस्य मे विष्णुरतः शान्ति प्रयच्छ तु ॥१४३॥

अश्वदानमन्त्रः

विष्णुस्त्वमश्वरूपेण यस्मादमृतसंभवः ।
चन्द्रार्कवाहनो नित्यमतः शान्ति प्रयच्छ मे ॥१४४॥

(कृष्णधेनोः प्रदानेन दानाच्च काञ्चनस्य च ।
सर्वे शान्ति प्रयच्छन्ति विशेषेण शनिश्चरः[१]) ॥१४५॥

कृष्णधेनुदानमन्त्रः

यस्मात् त्वं पृथिवी सर्वा धेनु कृष्णेन सन्निभा ।
सर्वपापहरा नित्यमतः शान्ति प्रयच्छ मे ॥१४६॥

---

१ श्लोकोऽयम् अ पुस्तके प्रक्षिप्तो वर्तते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लोहदानमन्त्रः

यस्मादायसकर्माणि त्वदधीनानि सर्वदा ।
लाङ्गलाद्यायुधादीनि तस्माच् शान्ति प्रयच्छ मे ॥१४७॥

छागदानमन्त्रः

यस्मात् त्वं छागयज्ञानां मङ्गलत्वे ब्यवस्थितः ।
योनिर्विभावसोर्नित्यमतः शान्ति प्रयच्छ मे ॥१४८॥

शय्यादानमन्त्रः

यस्मादशून्यशयनं केशवस्य शिवस्य च ।
(शय्या ममाप्यशून्या स्यु दत्ता जन्मनि जन्मनि[1]) ॥
तदा मे शयनं शश्वद् भवेज्जन्मनि जन्मनि ॥१४९॥

रत्नदानमन्त्रः

यस्माद् रत्नप्रदानेन स्वर्गभोगं लभेन्नरः ।
तस्मादेतेन दानेन स्वर्गभोगश्च मे भवेत् ॥१५०॥

भूदानमन्त्रः

सर्वभूताश्रया पृथ्वी वराहेण समुद्धृता ।
अनन्तफलदा यस्मादतः शान्ति प्रयच्छ मे ॥१५१॥

अत्र काशीखण्डे —

दशहस्तेन दण्डेन त्रिंशद् दण्डं निवर्तनम् ।
निवर्तनद्वयमपि भूमे र्भागीरथीतटे ॥१५२॥

---

१ चापान्नर्गतः पाठः अ पुस्तके प्रक्षिप्तो वर्तते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दश तान्येव गोचर्म दत्वा पापैः प्रमुच्यते ।
नरो ददाति यो भक्त्या तस्य पुण्यफलं शृणु ॥१५३॥

तद्भूमि त्रसरेणूनां संख्यया युगमानया ।
महेन्द्रचन्द्रलोकेषु भुक्त्वाभोगान् मनः प्रियान् ॥१५४॥

सप्तद्वीपपतिर्भूत्वा महाधर्म परायणः ॥१५५॥

वस्त्रदानमन्त्रः

शीतवातोष्णसंत्राणं लज्जाया रक्षणं परम् ।
देहालङ्करणं वस्त्रमतः शान्ति प्रयच्छ मे ॥१५६॥

अवशिष्टं द्विजेभ्यश्च यावच्छक्त्या च दक्षिणाम् ।
दीनान्धकृपणादिभ्यः किञ्चित् किञ्चित् प्रदापयेत् ॥१५७॥

आज्यावेक्षणमन्त्रः

वन्दे सर्वरसश्रेष्ठं त्वामहं भगवन्नज ।
अत आज्य सुधारूप नरश्रेष्ठं कुरूष्व माम् ॥१५८॥

याऽलक्ष्मीर्यच्च मेदौस्थ्यं सर्वगात्रेष्ववस्थितम् ।
तत्सर्वं शमयाऽज्य त्वं लक्ष्मीं पुष्टि च वर्धय ॥१५९॥

उद्वासयेत्ततो वह्निं ग्रहान् देवान् द्विजान् क्रमात् ।
ब्राह्मणान् भोजयेत् पश्चात् स्वयं भुञ्जीत बन्धुभिः ॥१६०॥

एवं यः कुरुते सम्यग् ग्रहाणां पूजनं च सः ।
सर्वान् कामानवाप्नोति सुस्थानस्थफलं भवेत् ॥१६१॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रीपतिः—

माणिक्यं तरणेः सुजातममलं मुक्ताफलं शीतगो-
र्माहेयस्य च विद्रुमं मरकतं सौम्यस्य गारुत्मकम् ।
देवेज्यस्य च पुष्परागमसुरामात्यस्य वज्रं शने-
र्नीलंनिर्मलमन्ययोश्च गदितं गोमेदवैडुर्यकम् ॥१६२॥

सूर्यस्य

मनः शिलैलासुरदारुकुङ्कुमैरुशीरयष्ट्यैर्मधुपद्मकान्वितैः ।
सताम्रपुष्पैर्यिषमस्थिते रवौ शुभावहं स्नानमुदाहृतं बुधैः ॥१६३॥

चन्द्रस्य

पञ्चगव्यगजदानविमिश्रैः शङ्खशुक्तिकुमुदैः स्फटिकैश्च ।
शीतरश्मिकृतदोषविनाशं स्नानमेतदुदितं नृपतीनाम् ॥१६४॥

कुजस्य

विल्वचन्दनबलारुणपुष्पैर्हिङ्गुनीलफलिनीवकुलैश्च ।
स्नानमद्भिरिह मांसिजटाभिर्भौमदोषविनिवारणमाहुः ॥१६५॥

बुधस्य

गोमयाक्षतफलैः सलोचनैः क्षौद्रशुक्तिघनमूलहेमभिः ।
स्नानमेवमिदमत्र भूभृतां बोधनाऽशुभविनाशनं बुधैः ॥१६६॥

गुरोः

मालतीकुसुमशुभ्रसर्षपैः काञ्चनैश्च मदयन्तिकोद्भवैः ।
मिश्रमम्बुमधुयष्टिरोचनैर्विकृतं[1] गुरुकृतं निकृन्तति ॥१६७॥

---

१ वैकृतं प्र.क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शुक्रस्य

एलया च शिलया समन्वितैर्वारिभिश्च फलमूलकुङ्कुमैः ।
स्नानतो भृगुसुतोपपादितं दुःखमेतिविलयं नसंशयः ॥१६८॥

शनेः

असित तिलाञ्जनलोध्रजटाभिः शतकुसुमाघनलाजयुताभिः ।
रवितनये कथिते विषमस्थे दुरितहृदाप्लवनं मुनिमुख्यैः ॥१६९॥

देवब्राह्मणवन्दनाद् गुरूवचः संपादनात् प्रत्यहं
साधूनामभिभाषणाद्[1] हरिकथालापात्[2] तथाऽऽकर्णनात् ।
होमादध्वरदर्शनाच् शुचिमनोभावाज्जपाद् दानतो
नो कुर्वन्ति कदाचिदेव पुरुषस्यैवं ग्रहाः पीडनम् ॥१७०॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीवक्ष्मणाचार्य विरचिते
जगन्मोहने ग्रहयज्ञोनाम चतु चत्वारिंशोऽध्यायः ॥ ॥

अथ पञ्चचत्वारिंशोऽध्यायः

अथाष्टवर्गप्रयोगः

उपनयनं विप्राणां गोदानविवाहमङ्गलादीनि ।
कुर्याद् बलवति चन्द्रे जीवे च नियमेन ॥१॥

गोधूमयावनालास्तुवरीमुद्गाः प्रियङ्गवश्च चणकाः
माषतिलाश्चित्रधान्यं रव्यादीनां क्रमेण धान्यानि ॥२॥

---

१ साधूनामभिलाषणाद् अ.क. । २ हरिकथालाभात प्र.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उपनयनं गोदानं पाणिग्रहणं क्रिया च यज्ञस्य।
पुण्यवतामेव भवेद् बलवति विमले च सुरसचिवे ॥३॥

नारदः–

गोचरोक्तमफलं सति वेधे सोऽष्टवर्गजबलं सुसमाद्ये।
तस्य पाकजबलं प्रबलं स्यादित्थमेव मुनयश्च वदन्ति ॥४॥

लघुनारदः–

गोचरं वेधजं चाष्टवर्गजं रूपजं बलम्।
यथोत्तरबलाधिक्यं स्थूलं गोचरमार्गजम् ॥५॥

चकारलोके चतुराननस्य मुखारविन्दादुदितः प्रसिद्धः।
वर्गोऽष्टको येन भविष्यदर्थो जनेन साक्षात्क्रियते सुखेन ॥६॥

पुरा शुकाद्या मुनयः समस्ताः प्रसाद्य चैनं [1] किल पद्मयोनिम्।
नारायणोक्ताष्टकवर्गमस्मात् सिद्धान्तमूलं कृपया लभन्ते ॥७॥

कालेष्वतीतेषु कियत्स्वपीमं शुकः खिलीभूतमुदग्रबुद्धिः।
शिवोक्तसूत्राश्रयणेनसम्यग् [2] भुवं यथैवोद्धृतवान् वराहः ॥८॥

इममेवाष्टकं वर्गं वेदव्यासोप्य वर्णयत् ॥९॥

विद्वान् द्विगुणित नवशतसंख्यान्याहृत्य प्राह सूत्राणि।
अष्टावक्रमुनीन्द्रः कृतवानेतस्य विस्तरं सूत्रैः ॥१०॥

---

१ पप्रच्छुरेनं प्र.। २ शिवोक्तमन्त्राश्रयणेन प्र.।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्वादशसप्तसंख्यैर्व्याख्यानाम्ना च केवलज्ञानम् ।
आदौ चक्रोद्धारं तदनुप्रत्येकखेटविन्दूफलम् ॥११॥

आदौ चक्रोद्धारो विन्दुना स्फोटनं ततः ।
प्रस्ताराष्टकवर्गेण प्रत्येकाष्टक वर्गतः ॥१२॥

आयुर्दायस्ततो भाव फलं तस्य च कारणम् ।
देशकालविभागोऽपि कालाकालमृती ततः ॥१३॥

परिहारोऽपमृत्योश्च स्मरणं मृत्युनिर्णयः ।
शवस्य परिणामोऽपि तत्तल्लोक विलङ्घनम्[१] ॥१४॥

भाविजन्मान्यदत्र प्रसंगेन विचार्यते ॥१५॥

शुभेह्निलग्ने गणकः प्रवीणः सिन्दूरसंपूरितरूक्मपात्रे ।
शलाकया भास्वररूक्ममय्या चक्रं लिखेदष्टकवर्गसञ्ज्ञम् ॥१६॥

नवोर्द्धरेखाः प्रविलिख्य सम्यक् त्रयोदशोस्मिन्[२] विनिधाय खेटान् ।
मन्दामरेज्यारखराशुशुक्र शशाङ्कजेन्दूनपि जन्मलग्नम् ॥१७॥

जीवश्चतुर्विंशतिरेतदेव समस्तसिद्धान्तनिदानभूतम् ।
चक्रं समाश्रित्य हि वर्तमानाः प्रपञ्चमेनं परिधारयन्ति ॥१८॥

अष्टवर्गः

सर्वाष्टवर्गेषु शनैश्चरादीन् भूगोलवत् तत्र लिखेदधोधः ।
विन्यस्य विन्दूनपि तत्तदैव दैवज्ञवर्यो भृतविन्दुतुल्यान् ॥१९॥

---

१ तत्तल्लोकविलम्बनम् अ. क. । २ त्रयोशास्मिन् प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सूर्यस्य

रव्यष्टवर्गे रविजस्य चन्द्रद्विवेदशैलाष्टनवांशरुद्राः ।
वृहस्पते पञ्च ऋतुग्रहेशाः कुजोष्णरश्म्योःशनिवत् प्रकल्प्याः ॥२०॥

शुक्रस्य षट्सप्तदिनाधिनाथाः ज्ञेऽग्नीषुषट्खेटदिगीशसूर्याः ।
त्रिषट्दशैषा हिमगोर्विलग्ने त्रिवेदषट्दिक् शिववासरेशाः ॥२१॥

चन्द्रस्य

चन्द्राऽष्टवर्गेऽग्निशराहितायाश्चन्द्राब्धिजायाष्टदिगीशसूर्याः ।
द्वित्रीषुषट्खेटदिगीश्वराश्च रामर्तुसप्ताष्टदशेश्वरा :स्युः ॥२२॥
त्र्यब्धीषुसप्तग्रहदिग्महेशाः क्वग्न्यब्धिपञ्चाद्रिगजादिगीशाः[1] ।
एकत्रिषट्सप्तदशेश्वराश्च लग्ने च रामाहितकर्मरुद्राः ॥२३॥

भौमस्य

भौमाऽष्टवर्गेष्टनवेशकेन्द्रास्तथैवदिग्रुद्रषडर्यमाणः
महेशकेन्द्रोरगबाहवोऽपि तथा त्रिपञ्चर्तुदिगीश्वराश्च ॥२४॥
रसाष्टरुद्रोष्णमरीचयश्च तथा हुताशार्थविपक्षरुद्राः ।
त्रिषट्शिवाश्चन्द्रमसो विलग्ने शशाङ्क रामर्तुदिगीश्वराः स्युः॥२५॥

बुधस्य

बुधोऽष्टवर्गे युगलैकरामवेदेषु सर्पाङ्कशिवाः शनेःस्युः
गुरोःषडष्टायदिनाधिनाथा गजाङ्ककेन्द्राश्विभवाः कुजस्य ॥२६॥

शिवेषुषट्धर्मदिनाधिनाथाः सूर्यात्मजस्येव भृगोः प्रकल्प्याः ।
क्वग्नीषुषट्सूर्यदिगङ्करुद्रा द्विवेदषट्मृत्युदिगीश्वराश्च ॥२७॥
चन्द्राश्विवेदर्त्वहिदिग्महेशाः प्रकल्पनोया विबुधैर्विलग्ने ।

---

१ क्वग्न्यब्धिपञ्चाद्रिवसुर्दिगीशाः लि. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गुरोः

गुर्वष्टवर्गे त्र्यरिपञ्चसूर्या भूर्द्वित्रिवेदाद्यूहिकर्मरुद्राः ।
(चन्द्राश्विवेदाद्यूहिदिग्महेशा धर्मेण साकं गुरुवद् भवेयुः ॥२८॥

द्विपञ्चषट्धर्मदिगीश्वराश्च भूद्व्यब्धिपञ्चारिदशाङ्करुद्राः)
नेत्रेषुशैलाङ्कमहेश्वराश्च लग्ने सशैलावुधवत् प्रदिष्टाः ॥२९॥

शुक्रस्य

शुक्राष्टके रामकृतेषुसर्प नवांशरुद्रा गदिताः क्रमेण ।
भूताष्टनन्दांशभवास्त्रिपञ्चरसाङ्करुद्रार्क मितप्रदिष्टाः ॥३०॥

व्यालोग्रसूर्याः शशिपक्षरामवेदेषुवस्वङ्कदिगीश्वराश्च ।
लोकेषुतर्काङ्क भवाः ससूर्यं दैत्येन्द्रवच्च विदशं तनोश्च ॥३१॥

शनेः

मन्दाष्टके लोकरसेषुरुद्रापञ्चर्तुकामारिदिवाकराश्च ।
रामेषुतर्काम्बररुद्रसूर्या भूपक्षवेदाद्यूहिदिग्महेशाः ॥२३॥

रसेशसूर्या रससर्पनन्द दिगीशसूर्याः शशितर्करुद्राः
चन्द्राग्निवेदारिदिगीश्वराश्च भिन्नाष्टकोऽयं मुनिभि प्रदिष्टः ॥३३॥

इति वादरायणः

अथाक्षरसंज्ञयाष्टवर्गमाह

शुकः–

रवेष्टकवर्गसूत्राणि ॥ शा । कौरवः ॥ सदाधनिकः ॥ गु ॥
माबोधान्यम् ॥ कु ॥ पठित्वा सन्दिग्धं ज्ञेयं ॥ र ॥ पात्रं वेत्य
दुग्धान्नस्य ॥ शु ॥ तत्सौरम् ॥ बु ॥ गोशताढ्चेनुः परा ॥ च ॥
लोचनैः किम् ॥ ल ॥ लेटि स्तनं पुत्रः ॥३४॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ चन्द्राष्टकवर्गः

गौः । शतायुः ।। शु ।। परा वर्शादानयः ।। कु ।। रोगशान्तिर्धनं स्यात् ।। र ।। ग्लौस्ते सदा नष्टः ।। शु ।। गर्भो मासार्धे ज्ञेयः ।। बु ।। कालवशाच्छन्दो नष्टम् ।। च ।। कागतिः श्येनायाः ।। ल ।। वस्तो नष्टः ।।३५।।

अथ भौमाष्टकवर्गः

श । व्यवस्थां दधु नस्था ।। गु ।। चिह्नं कपटे ।। कु ।। पुरवासी जनोऽयम् ।। र ।। गौः क्ष्मातनयः ।। शु ।। तदोंकारः ।। बु ।। क्लेशात्तपः ।। च ।। लता स्यात् ।। ल ।। युगान्ते नष्टः ।।३६।।

अथ बुधाष्टकवर्गः

श।।कण्ठे श्वासं दधौ नष्टः ।।गु।। तदप्युग्रम् ।कु। कोत्र भो सोऽहं धानुष्कः ।र। शिक्षाधिकारी[1] ।शु। पुरा गवां महो धूपः ।बु। पालाशस्ते धानुष्काठचम्[2] ।च। ब्रवीति जनोऽयम् ।ल। परिवेषी दिनपः ।।३७।।

अथ गुरोरष्टकवर्गः

श । क्लेशत :श्रीः ।गु। पुरश्लाघी सदा नटः[3]।कु। कौरवः सदा नष्टः। र। सुवलद्वाक् स दधौ नाकम् ।शु। रमन्ते धनाढ्याः ।बु। परभिमतो धानुष्कः ।च। प्रेमः सधेयम् ।ल। पुरं प्रविशति सन्धानाय ।।३८।।

अथ शुक्रस्याष्टकवर्गः

शः । लोभी महाधनोऽयम् ।गु। मन्दधीर्नष्ट ।कु। लभतेऽधिकारम्[4] । र । दैत्य श्री ।शु। पुरा[5] गर्भमादधे नद्याम् ।बु। गोमन्तो धन्याः । च खड्गवान् मन्दाधिकारी ।ल। पुत्रलाभो मर्दयेत्[6] ।।३९।।

१रक्षाधिकारी पु । २ धानुःकाष्ठम् पु । ३ । पुराश्लाघी सदानटःअ क
४लभते विकारम् । ५ सुरा पु । ६ मर्दयन् क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ शनेरष्टकवर्गः

श । गां मोचय ।गु। शेते व्याघ्रः ।कु। गुणश्चेन्नात्युग्र ।र। कण्ठावस्थो जनेऽर्कात् ।शु। तस्करः ।बु। तनु हि धनी पुत्रः ।च। गतिका । ल । कालो वञ्चनस्य ॥४०॥

गर्गः—

शून्यशेषे समैकत्वे पादहीनं द्वये सति ।
अर्धदोषं तृतीये तु पाददोषं विदुर्बुधाः ॥४१॥

चतुर्थफलसंभावे गुणदोषौ न किंचन ।
पञ्चमे तु शुभं पादं षष्ठेऽर्धं गुणमादिशेत् ॥४२॥

(सप्तमेषु त्रिभागं स्यादष्टमे सर्वमादिशेत्) ।
तेषु द्वादशभावेषु मूर्त्यादिषु यथाक्रमात् ॥४३॥

स्वोच्चे वक्रे त्रिकोणे वा पापेऽपि शुभमृच्छति ॥४४॥

अरिनीचगतो यस्तु शुभो वा पापमृच्छति ।
त्रिंशान्तं पञ्चविंशादिराशयो मध्यमाःस्मृताः ॥४५॥

त्रिंशाधिकफला येस्यु[१] राशयस्ते शुभप्रदाः ।
धृत्यादितत्वपर्यन्ताः शत्रवः केचिदूचिरे ॥४६॥

अतिक्षीणफला ये स्यु राशयोऽत्यन्तवैरिणः ॥४७॥

चापान्सरस्थः पाठ पृ. पुस्तके नास्ति

१ यैस्तु अ. क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अष्टकवर्गजनितो राजयोगः[1]

मध्यात्फलाधिके लाभे लाभाद्हीनफले व्यये[2] ।
यस्य व्ययाधिके लग्ने भोगवानर्थवान् हि सः ॥४८॥

अस्यार्थः

मध्यलग्नं दशमलग्नं, दशमं दशमलग्नविन्दुभ्यः एकादशविन्दव अधिका एकादशविन्दुभ्यः, द्वादशभावविन्दवः न्यूनाः पुनरपि द्वादशविन्दुभ्यः लग्नविन्दवः अधिकाश्चेत्, एवं विधाः योगाः यस्य जन्मकाले संभवन्ति, स तु आजन्म धनाढ्यो नीरोगी पुत्रवान् च ।

रव्यादिग्रहाणामष्टकवर्गन्यासो लिख्यते

यवनाचार्यः—

सर्वाष्टकग्रहयुतैर्विनियुज्य चक्रे मूर्त्यादि गण्यमशुभं शुभतत्समानम्[3] ।
जन्मादितफलमशेषदशां समीक्ष्य यात्रा विवाह समये बहुवर्गयुक्तम् ॥

शुकः—

प्रादक्षिण्यादि राशीनां फलान्येकत्र योजयेत् ।
पृथक् पृथक् चर्तुदिक्षु भवनानां शुभाशुभम् ॥५०॥

अधिके शोभनं विद्याच्छुभयुक्ते विशेषतः ।
सर्वेषां हीनभागेषु तद्भागं वर्जयेत्सदा ॥५१॥

गोष्ठं क्षेत्रं कृषिर्मन्त्रः श्रेष्ठराशौ स्थितं शुभम् ।
क्षीणराशौ स्थितं द्रव्यं तद्द्रव्यं नाशतां व्रजेत् ॥५२॥

---

१ अष्टर्गवजनितयोग २८ प्र. २ द्वये पू. । ३ शुभतत्प्रमाणम् पू. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वित्तेश्वरस्य दिग्भागे वित्तमाप्नोति निश्चयम् ।
रन्ध्रेश्वरस्य दिग्भागे देहस्तस्य[1] विनश्यति ॥५३॥

अष्टवर्गफलं प्रोक्तं सर्वेषामुत्तमोत्तमम् ॥५४॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने अष्टवर्गलक्षणं नाम पञ्चचत्वारिंशोऽध्यायः ॥

षट्चत्वारिंशोऽध्यायः

अथाष्टकवर्ग–फलान्याह

वृद्धयवन :—

तत्कालसर्वग्रहयुक्तभानां विहाय रेखाश्च विमिश्र इष्टः ।
सप्तावशेषेण मितो ग्रहश्च स्वाष्टस्त्वसंज्ञाफलमादधाति ॥१॥

हन्यात्फलस्वाष्टकवर्गनाथजं फलं बलिष्ठो यदि तस्य पार्श्वतः ।
अतोऽन्यथा तस्य फलं निहन्यते तेनैव साम्ये फलदो निसर्गजम् ॥२॥

रेखास्थितस्तीक्ष्णकरः प्रगल्भं करोति मर्त्यं गजवाजियुक्तम् ।
मित्राङ्गसाधुर्जनसंप्रयुक्तं स्थानेज्यके रोगविवर्जितं च ॥३॥

द्वितीयसंस्थे प्रचुरप्रतापं प्रभूतवित्तं जितशत्रुपक्षम् ।
विद्यानुरक्तं नृपतेरभीष्टं प्रशान्तचित्तं कुरुते सदैव ॥४॥

---

१ देहस्तत्र अ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तृतीयगः शत्रुपरं विभूतिं व्ययेन युक्तं स्वजनैः प्रपूज्यम् ।
हिरण्यपुत्रार्थविविक्तयुक्तं नरं प्रसूते सततं सुशीलम् ॥५॥

चतुर्थगः सर्वजनस्य पूज्यं करोति मर्त्यं सततं सुशीलम् ।
नरेन्द्रपूज्यं शुभदं सुशीलं धर्मान्वितं दानपरं प्रसूते ॥६॥

करोति संज्ञं खलु पञ्चमस्थो नरं रविर्गोमहिषोष्ट्रयुक्तम् ।
कुलप्रधानं कुरुते त्वभीष्टं सुसंयतं ब्राह्मणदेवभक्तम् ॥७॥

हतारिपक्षं प्रकरोति षष्ठे स्थितो विवस्वानधिकं त्रिलोके ।
स्त्रीणामभीष्टं गुरुदेवभक्तं प्रभूतवित्तं प्रचुरान्नपानम् ॥८॥

स्त्रीलाभयुक्तं खलु सप्तमस्थो नरं विधत्ते किल तीक्ष्णरश्मिः ।
उदारचित्तं प्रभुतासमेतं विज्ञानशीलं समरे प्रचण्डम्[1] ॥९॥

स्थानेऽष्टमे पुत्रधनैः समेतं सुरक्तनेत्रायतमप्रमेयम् ।
विख्यातकीर्तिः सततं सुदान्तं हतारिपक्षं प्रकरोति भानुः ॥१०॥

विन्दुस्थितोऽर्कः प्रकरोति पापं स्थानेऽष्टमे दुर्जनमुग्ररोगम् ।
कृशं कृतघ्नं परदाररक्तं विवेकशून्यं खलु साहसं च ॥११॥

मूर्खं कृतघ्नं च तथा द्वितीयं कुमित्ररक्तं धनधान्यहीनम् ।
शिरोर्त्तिजाद्याज्वरपित्तमुख्यैः प्रपीडितं वक्त्रगतैश्च रोगैः ॥१२॥

नयेन हीनं पुरुषं तृतीयं सुतार्थधान्यैः परिवर्जितं च ।
सदाभिभूतं बहुशत्रुपक्षं क्रियाविहीनं तु फलं प्रसूते ॥१३॥

---

१ ह्यमर प्रचण्ड़म् लि. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निन्द्य कृतघ्नं परदेशरक्तं करोति स्वार्थे नियतं चतुथ ।
इष्टैर्वियुक्तं परदाररक्तं पराजितं सर्वजनैः सदैव ॥१४॥

करोति भानुः खलु पञ्चमस्थितो[२] रुग्वैरिदारिद्रय धनेन पीडितम् ।
दौर्भाग्यवन्तं परदीनभाषणं नरं तथा क्लीवमलं च निष्ठुरम् ॥१५॥

षष्ठे स्थितः शत्रुगणैः पराजितं नरं प्रसूतेऽपि न धर्म सेवितम् ।
मायासमेतं मलिनं मलिम्लुचं च्युतं स धर्मागत सत्यमातुरम्[१] ॥१६॥

श्रिया विहीनं विकृतं गतत्रपं परान्नपुत्रार्थसमीहकं सदा ।
करोति भानुः खलु सप्तमस्थः प्रपञ्चशीलं चपलं सुनिष्ठुरम् ॥१७॥

स्थानेऽष्टमे तीक्ष्णमयूखमाली नरं विधत्ते वहुपापचेष्टितम् ।
इष्टैर्विमुक्तं परदाररक्तं पापात्मकं दुःखयुतं करोति ॥१८॥

अथ चन्द्रस्य

रेखास्थितोऽङ्के हिमरश्मिमाली स्थाने विधत्ते शुभगंमनुष्यम् ।
प्रियं नृपाणां गुरुविप्रभक्तं तीर्थाश्रयं सर्वजनोपसेव्यम् ॥१९॥

हस्त्यश्वदानैः सहितं द्वितीये वैडुर्यमुक्तामणिभिस्तथैव ।
नरं सुसौख्यैः सहितं प्रगल्भ प्रशान्तचित्तं प्रणयान्वितं च ॥२०॥

चन्द्रस्तृतीये कुरुते सनाथं नरं विनीतं बहुधर्मभाजम् ।
श्रियान्वितं सर्वगुणोपपन्नं धत्ते सदा बन्धुजनस्य पूजाम् ॥२१॥

---

२ पञ्चमस्थो लि. पु. । १ धर्मागतसत्यमागतम् प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सोमश्चतुर्थे प्रकरोति मानं नरं प्रसिद्धं विविधार्थयुक्तम् ।
तडागकूपाश्रयरक्तचित्तं[1] महामनुष्यं सुतसौख्ययुक्तम् ॥२२॥

विद्याविनीतं सुविवेकयुक्तं नरं प्रसूते बहुभोग्यभाजम्[2] ।
क्षपादिनाथः खलु पञ्चमस्थः प्रियातिथिं सर्वसहं सुविज्ञम् ॥२३॥

षडङ्गयुक्तं सुभगं मनोज्ञं करोति चन्द्रः सुतदारयुक्तम् ।
धनाश्रयं[3] शान्तसुतं विनीतं नरेन्द्रपूज्यं बहुमानभाजम् ॥२४॥

करोति चन्द्रः खलु सप्तमस्थः प्रभासमेतं प्रणतं सुशीलम् ।
व्रतोपवासादिरतं विधिज्ञं मनोज्ञहारिसुसुखं सदैव ॥२५

स्थानेऽष्टमे सौम्यहिरण्ययुक्तं विद्यान्वितं सत्यपरं प्रगल्भम् ।
करोति चन्द्रः सुखिनं मनुष्यं प्रियातिथिं ब्राह्मणवल्लभं च ॥२६॥

स्थानाष्टके विन्दुगतः शशाङ्कः सरोगदेहं कुरुते मनुष्यम् ।
पापानुरक्तं स्वजनैर्वियुक्तं दीनं कृशं सत्यविहीनमेव ॥२७॥

करोति चन्द्रो नियतं द्वितीये नरं सुदीनं कृतजाल्मयुक्तम् ।
प्रभूतशत्रुं प्रभुताविहीनं विवर्जितं बन्धुजनेन नित्यम् ॥२८॥

सपीडितं भूपतिना सदैव महाव्ययैः संयुतमुग्ररोगम् ।
कफानिलाभ्यां परिपीडितं च चन्द्रस्तृतीये कुरुते मनुष्यम् ॥२९॥

कुसंगतं सत्यविहीनमेव सौख्येन हीनं बहुरोगयुक्तम् ।
सुदुर्लभं दुष्टरतं सदैव चन्द्रश्चतुर्थे बहुरोगयुक्तम् ॥३०॥

---

१ तडागकूपाश्रयरक्तवित्तम् प्र. । २ वहुभोग्यभाजनम् लि.पु. ।
३ धर्माश्रयं प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रनष्टशीलं प्रचुरारिपक्षं निशाधिनाथः खलु पञ्चमस्थः ।
करोति दीनं व्यसनैः समेतं विवर्जितं भूपतिमानदैन्यम् ।।३१।।

विदेशसेवानिरतं कृतघ्नं षष्ठेऽरिवर्गैर्विजितं नितान्तम् ।
करोति मर्त्यं नृपपीडितं च[1] कालत्रयेणाभिभवेन युक्तम् ।।३२।।

भयान्वितं तं व्रतजं विधत्ते स्यात् सप्तमे वैरिमनल्पमुग्रम् ।
चन्द्रो भृशं भूरिमलिम्लुचोत्थं रोगं नराणां जठरे प्रभूतम् ।।३३।।

धनस्य नाशं प्रियविप्रयोगं चन्द्रोऽष्टमेऽनिष्टफलं विधत्ते ।
शोकं धनार्तिं विविधं च दुःखं महाभयं दैन्यमनर्थमुग्रम ।।३४।।

अथ भौमस्य

रेखास्थितोऽङ्के क्षितिवित्तलाभं करोति भौमः पशुवृद्धिमेव ।
सौख्यं च भोगं विविधं च पूर्वं महाजनोऽर्थं सततं सुखानि ।।३५।।

आरोगितां पुत्रकलत्रवृद्धिं मतेर्विकाशं प्रियतां च लोके ।
समुन्नतं शत्रुविनाशनं च करोति भौमो नियतं द्वितीये ।।३६।।

खरोष्ट्रजातानि पृथग्विधानि नृणां विधत्ते क्षितिजस्तृतीये ।
विभूतिमभ्युन्नतिमिष्टलाभं भूरिप्रतापं विविधं च नित्यम् ।।३७।।

भौमश्चतुर्थे कुरुते प्रतापं सौभाग्यसौख्याभ्युदयं नितान्तम् ।
प्रियाविधिज्ञं सुरविप्रभक्तिं नरेन्द्रमानं विविधं च लाभम् ।।३८।।

सुतार्थलाभं खलुपञ्चमस्थः क्षोणीसुतो यच्छति मानवानाम् ।
हिरण्यलाभं बहुयानसौख्यं व्याधेर्विनाशं खलु बर्धनं च ।।३९।।

---

१ भवेत्मनुष्यं नृपति प्रपीडितं लि.पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

षष्ठेऽरिनाशं कुरुते महीजः समागमं बन्धुजनेन नित्यम् ।
नित्यं च शय्यासनभोजनानि धर्मार्थसिद्धि सततं नराणाम् ॥४०॥

क्षोणीसुतो यच्छति सप्तमस्थो विज्ञानविद्यागममिष्टलाभम् ।
शय्यासनाच्छादनभोजनानि रत्नोपलब्धं जगतीशलाभम् ॥४१॥

भौमोऽष्टमे भूतिमथोऽत्र चिन्ता[1] नृणां विधत्ते खलु कर्मसिद्धिम् ।
वाणिज्यलाभं कृषिकर्मसिद्धिमत्युन्नतिं सर्वसुखैः प्रजुष्टम्[2] ॥४२॥

विन्दुस्थितो भूतनयो यदाद्ये स्थाने दयां यच्छति मानवानाम् ।
तदार्थहानीं गतदृष्टिरोगं मतेर्विनाशं कुरुते न सौख्यम् ॥४३॥

शिरोर्त्तिदाद्यंज्वरपित्तमुग्रं प्रमोषणं चौरकृतं सदैव ।
प्रियावियोगं मतिमित्रनाशं[3] भौमो द्वितीये कुरुते नराणाम् ॥४४॥

भौमस्तृतीये विषमार्त्तलौल्यं धत्ते नराणां च तथापवादम् ।
कुबुद्धिभिः संगममुग्रवैरं पराजितं प्राणभृतां सदैव ॥४५॥

विवाद वैराणि पृथग्विधानि भौमश्चतुर्थे कुरुते नराणाम् ।
द्यूतं च वेश्याव्यसनं महान्तं पराजयं साध्वसमेव हानिम् ॥४६॥

असौख्यमोजः क्षयमिष्टनाशं पुत्रार्थहानिं सुतरां वियोगम्
करोति भौमः खलु पञ्चमस्थः प्रतापहानिं सततं नराणाम् ॥४७॥

चौरार्थहा व्यालसरीसृपोत्थं भयं विधत्ते क्षितिजो नराणाम् ।
सदाभिघातं खलु षष्ठसंस्थो नरेन्द्रपीडां खलुसंगमं च ॥४८॥

---

१ न चिन्ता अ. क. । २ प्रपुष्टम् अ. क. । ३ मतिवित्तनाशम् १. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्ययं विरागं भयमिष्टवैरं भयं विधत्ते खलु सप्तमस्थः ।
जिह्वाक्षिरोगोद्भवमेव दुःखं सदा नराणां विषयप्रलौल्यम् ॥४९॥

पराभवं मृत्युसमानरोगान् कलत्रहानिं परवञ्चनानि ।
भौमोऽष्टमस्थः कुरुते नराणां शस्त्रातिपातं[1] परतः सुतं वा ॥५०॥

बुधस्य

रेखास्थितः सोमसुतो यदाऽद्ये स्थाने यदा शीलधनं प्रसूते[2]
विद्याविवेकादिभिरन्वितेन प्रभूतमित्रं विगतारिपक्षम् ॥५१॥

स्थानस्थितो देवसमं प्रसूतं विज्ञानशीलं बहुमानपानम् ।
स्थाने द्वितीये शशिजो विधत्ते नरं सुरुपं सुभगं सुकान्तम् ॥५२॥

तृतीयके सोमसुतः करोति प्रसन्नवाक्यं नृपलोकपूज्यम् ।
नरं विधिज्ञं सुभगं मनोज्ञं हतारिपक्षं बहुधर्मभाजम् ॥५३॥

बुधश्चतुर्थे कुरुते सुरुपं प्रियातिथिं बन्धुजनस्य मान्यम् ।
मेधाविनं शास्त्ररतं विधिज्ञं व्रतोपवासादिरतं सदैव ॥५५॥

षष्ठेऽरिनाशं प्रकरोति सौम्यो नृणां पुरग्रामकृतं च लाभम्
देशाधिपत्यं प्रचुरान्नपानं यशः प्रतापं विजयं सदैव ॥५६॥

कलत्रलाभं रतिसौख्यभोगं कलत्रसंस्थः प्रकरोति सौम्यः ।
तीर्थाश्रयं सौख्यसमृद्धयुक्तं प्रसन्नमूर्तिं सततं सुशीलम् ॥५७॥

चतुष्पदाच्छादनवित्तयुक्तं नर प्रसूते शशिजोऽष्टमस्थः ।
कलत्रपुत्रोद्भवसौख्ययुक्तं सर्वत्रपूज्यं महिमासमेतम् ॥५८॥

---

१ शस्त्राभिघातं क. । २ प्रतीते लि. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विन्दुस्थितः सोमसुतोऽतिपापं करोतिमर्त्यः प्रथमे खलं च ।
मायान्वितं बान्धवविप्रयुक्तं सदाकुशीलं विनयेन हीनम् ॥५९॥

प्रभूतदुःखं स्वजनैर्विरोधं पराभिभूतं कठिनं कृतघ्नम् ।
द्वितीयसंस्थो हिमरश्मिपुत्रो नरं प्रसूते बहुरोगयुक्तम् ॥६०॥

तृतीयगःपुत्रकलत्रनाशं करोति सौम्यः सततं कुचैलम् ।
तेजोविहीनं मलदिग्धदेहं संपीडितं भूपतिना सदैव ॥६१॥

चतुर्थगः शीतकरस्य पुत्रः प्रभूतदुःखं कुरुते मनुष्यम् ।
शीलेन मुक्तं विनयेन हीनं सेवात्मकं सौख्यविवर्जितं च ॥६२॥

नष्टात्मजं नष्टधनं कुशीलं रोगाभिभूतं परतर्ककं च ।
परैर्जितं देवगुरुप्रयुक्तं करोत्यसौख्यं खलु पञ्चमस्थः ॥६३॥

षष्ठे स्थितः शीतकरस्य पुत्रो नरं प्रसूते धनवर्जितं च ।
पराजितं शत्रुजनेन नित्यं विद्याविहीनं विनयेन मुक्तम् ॥६४॥

कलत्रगः सोमसुतो विधत्ते भोगेन हीनं परदाररक्तम् ।
जनापवादेन युतं सुदीनं कुबुद्धिभाजं सभयं सदैव ॥६५॥

द्यूतप्रसक्तं गणिकानुरक्तं रजोधिकं सत्यधनेन हीनम् ।
सौम्योऽष्टमस्थः प्रभया विहिनं करोति मर्त्यं सततं नृशंसम् ॥६६॥

गुरोः

रेखागतो देवगुरुः प्रसूतं नरं विधत्ते विनयेन युक्तम् ।
आद्ये महाबुद्धिधनान्वितं च धर्मप्रियं ब्राह्मणवल्लभं च ॥६७॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्वितीयगः सौख्ययुतं प्रसूतं नरं सुरेज्यः सुभगं मनोज्ञम् ।
वित्तेन पुत्रेण धिया समेतं नरेन्द्रपूज्यं प्रथितं त्रिलोके ॥६८॥

तृयीयसंस्थः कुरुते प्रधानं सुरेशमन्त्री बहुपुत्रपौत्रम् ।
दयान्वितं जन्तुहितेषु युक्तं कुलप्रधानं सततं धनाढ्यम् ॥६९॥

सुपुण्यवित्तादिसुबुद्धियुक्तं करोति मर्त्यं त्रिदशेन्द्रमन्त्री ।
चतुर्थसंस्थश्चतुरं धनान्वितं विवेकिनं बान्धवसंमतं च ॥७०॥

करोति जीवःखलु पञ्चमस्थो नरं नितान्तं नृपतेरभिष्टम् ।
पुत्रान्वितं प्रीतिकरं नृपाणां सदा सुशीलं बहुधर्मयुक्तम् ॥७१॥

हतारिपक्षं नियतं प्रसूते नरं सुरेज्यःखलु षष्ठसंस्थः ।
हृष्टं सुपूज्यं प्रणतं गुरूणां प्रशान्तवैरं प्रथितं प्रियं च ॥७२॥

अभीष्टनारीरितिसंप्रहृष्टं करोति मर्त्यं सततं सुरेज्यः ।
श्रियान्वितं देवगुरुः प्रभक्तं सुभाषितं च स्वजनैः समेतम् ॥७३॥

जीवोष्टऽमस्थः कुरुते विदग्धं प्रियातिथिं सर्वकलासु दक्षम् ।
नरं नृपेन्द्रं बहुशास्त्रलब्धं पराक्रमप्राणसमन्वितं च ॥७४॥

विन्दुस्थितो देवगुरुः प्रसूते नरं नृशंसं बहुदुःखयुक्तम् ।
लुब्धं कृतघ्नं मलिनं स्वभावाद् विहीनसत्यं कृपया विहीनम् ॥७५॥

द्वितीयगो भूमिपतस्कराणां भयं सुरेज्यःकुरुते नराणाम् ।
नृशंसतां रोगमनिष्टसंगे प्रभूतदुःखं वधिरोद्भवं[1] च ॥७६॥

---

१ वाधिरोद्भवमितिभाव्यम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तृतीयसंस्थस्तृदशेशपूज्यो विहीनवित्तं कुरुते मनुष्यम् ।
सदा कुमित्रं परदाररक्तं दौर्भाग्ययुक्तं त्वलसं कृतघ्नम् ॥७७॥

चतुर्थगेदेवगुरौ प्रसूतो विहीनवित्तो बहुशत्रुगम्यः ।
विर्चाचिकाद्यैः परिपीडितश्च नरेषु मायी कुटिलोधनी च ॥७८॥

पामाज्वरार्तं परदारक्तं नरं प्रसूते सुरराजपूज्यः ।
प्रभूतशोकं सुतगः [१] सुपापचौर्यं महाकष्टसमन्वितं च ॥७९॥

षष्ठे सुरेज्यः कुरुतेऽक्षिरोगं संपीडितं म्लेच्छसमानरुपम् ।
प्रपञ्चशीलं सुतदारहीनं धर्मक्रियाहीनमनन्तशोकम् ॥८१॥

करोतिजीवःखलु सप्तमस्थो नरं कफादिप्रचुरं सदैव ।
हिक्काज्वरार्तं [२] प्रभुमानहीनं धनव्ययादल्पसुखं सकष्टम् [३] ॥८१॥

स्थानेऽष्टमे देवगुरुः प्रसूते सदातिगर्वं कुटिलं मनुष्यम् ।
द्वेष्यं नृपाणां स्वकुलस्य मध्ये गतप्रतापं विकृतं सदैव ॥८२॥

अथ शुक्रस्य

रेखास्थितो दैत्यगुरुः प्रसूते नरं मनोज्ञं सुभगं सुशीलम् ।
जितेन्द्रियं दानपरं कृतज्ञं धर्मानुरक्तं प्रचुरान्नपानम् ॥८३॥

द्वितीयगः सौख्ययुतं प्रसूते नरं विधिज्ञं धनिकं च धन्यम् ।
सुधर्मशीलं विनयेन युक्तं प्रभासमेतं जनबल्लभं च ॥८४॥

---

१ सततं लि. पु. ।
२ धनुषोरन्तरवर्तीपाठः प्र. पुस्तके नास्ति । ३ च कष्टम् लि. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्वितीयसंस्थो वहुभूषणाढ्यं नरं प्रसूते सततं प्रगल्भम् ।
मेधाविनं धर्मपरं विनीतं देवद्विजानामनुवल्लभं च ॥८५॥

शुक्रश्चतुर्थे कुरुते धनाढ्यं सद्भोजनाच्छादनपानयुक्तम् ।
वैडुर्यमुक्ताफलकर्मलाभैः सन्तुष्टचितं सुखिनं मनुष्यम् ॥८६॥

सुतार्थपानादिकलत्रलाभैर्युक्तं नरं दैत्यगुरुर्विधत्ते ।
चतुष्पदाढयं खलु पञ्चमस्थः प्रियं त्रिलोके परमं प्रधानम् ॥८७॥

शुक्रस्तु षष्ठे कुरुते मनुष्यं विद्यासु निष्ठं वहुमित्रभाजम् ।
श्रीवित्तलाभैः सहितं सुरूपं विचक्षणं सर्वकलासु दक्षम् ॥८८॥

शुक्रो विधत्ते खलु सप्तमस्थो नरं नितान्तं सुरतप्रगल्भम् ।
सुकुङ्कुमाद्यैः सहितं सुसौख्यं नरेन्द्रपूजासहितं सदैवम् ॥८९॥

स्थानेष्टमे दैत्यगुरुः प्रसूते नरं नितान्तं बहुभाग्ययुक्तम् ।
प्रभासमेतं बहुकीर्तिभाजं सुकर्मिणं धर्मसमन्वितं च ॥९०॥

विन्दुस्थितो दैत्यगुरुः प्रसूते नर सपापं बहुरोगयुक्तम् ।
नृपाभिभूतं सुतवित्तहीनं विर्वाजितं बान्धवसज्जनैश्च ॥९१॥

शुक्रो द्वितीये सरुजं विधत्ते धनव्ययं शत्रुजनाभिभिभूतम् ।
सदाविरक्तं स्वकुटुम्बवर्गे [1]शोकाभिभूतं रतिलालसं च ॥९२॥

तृतीयसंस्थः कुरुते नृशंसं शुक्रः सदा रोगकदर्थितं च ।
पराभिभूतं सततं कुचैलं ज्वरार्दितं मानधनेन हीनम् ॥९३॥

---

१ इतः परं षट्चत्वारिंशाध्यायस्य सपाद त्रयोदशश्लोगपर्यन्तं प्र पुस्तके नाष्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चतुर्थगः शोकयुक्तंप्रसूते नरंमहाव्याधियुतं दरिद्रम् ।
चतुष्पदाद्यैर्धनवर्जितं च प्रेष्यं खलं पार्थिवमानहीनम् ॥६४॥

करोति शुक्रः खलु पञ्चमस्थः सदा दरिद्रं विकृतं मनुष्यम् ।
सुतार्थहीनं व्यसनैः समेतं कुमित्रसंगं च धनेन हीनम्[१] ॥६५॥

षष्ठे सितः सर्वजनाभिभूतं नरं प्रसूते प्रणयेन हीनम् ।
विवर्जितं सत्यसुखेन नित्यं विदेशरक्तं परतर्ककं च ॥६६॥

करोति शुक्रः खलु सप्तमस्थो वातादिदोषैः सततं मनुष्यम् ।
नृशंसचेष्टाव्यसनानुरक्तं सदा कृतघ्नं मतिवर्जितं च ॥६७॥

शुक्रोऽष्टमस्थः कुरुते शुशीलं नरं महाव्याधियुतं कृतघ्नम् ।
नित्यं विहीनं बहुपापयुक्तं चिन्तान्वितं वैरयुतं सदैव ॥६८॥

अथ शनेः

रेखास्थितः सूर्यसुतः प्रसूते स्थिरप्रभावं शुभगं मनुस्यम् ।
प्रियातिथिं सर्वजनप्रधानं विनीतवेषाभरणं सदैव ॥६९॥

द्वितीयसंस्थो रविजः प्रसूते नरं महाव्याधिविवर्जितं च ।
सर्वत्र सौख्यं रिपुरोगहीनं बलेन युक्तं सुतसंयुतं च ॥१००॥

सौरस्तृतीये कुरुते धनाढ्यं स्वधर्मविद्यागमशास्त्रलुब्धम् ।
खरोष्ट्रलोहाढ्यमनल्पपुत्रं नरं सदाशान्तमतिप्रभावम् ॥१०१॥

---

[१] कुमित्रसंयोगधनेन हीनम् लि.पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चतुर्थगः सूर्यसुतः प्रसूते नरं सुताढ्यं बहुभोज्यपानम् ।
कर्पूरगन्धादिशुभाङ्गभाजं प्रभूतधर्मार्थसमेतहर्षम् ॥१०२॥

करोति सौरः खलु पञ्चमस्थो नरं कुलीनं सुखिनं च नित्यम्
श्रिया समेतं विगतारिपक्षं नृपाश्रयं श्रीदयितं सदैव ॥१०३॥

षष्ठे शनिः शीलधरं प्रसूते नरं विधिज्ञं वसुभूमिलाभम् ।
यथाप्रतिज्ञं कनकार्थयुक्तं महाप्रभावं नरनाथपूज्यम् ॥१०४॥

शनैश्चरः सप्तमगो विधत्ते नरं धनाढ्यं प्रमदाविधानम् ।
विचक्षणं कीर्तिकरं मनोज्ञं कलासु दक्षं प्रथितं नृलोके ॥१०५॥

स्थानेऽष्टमे सूर्यसुतः प्रसूते वृथाश्रमं पापमतिं मनुष्यम् ।
स्वबान्धवैस्त्यक्तमनल्पदुः खं दीनं नृशंसं नृपपीडितं च ॥१०६॥

विन्दुस्थितः सूर्यसुत प्रसूते स्थाने यदाऽऽद्ये खलुमानवानाम् ।
तदार्थहानि बहुनेत्ररोगं मतेर्विनाशं बहुदुःखयुक्तम् ॥१०७॥

द्वितीयसंस्थः कुरुतेऽर्कपुत्रः पापात्मकं पापसुखं मनुष्यम् ।
कुक्षिस्थरोगैः परिपीडिताङ्गं चलस्वभावं सुमहाकदर्यम् ॥१०८॥

तृतीयसंस्थः कुरुतेऽर्कपुत्रो नरं नृशंसं वितथक्रियं च ।
बह्वासिनं सत्यदयाविहीनं चौरं खलं सर्वजनाभिभूतम् ॥१०९॥

चतुर्थगः सूर्गसुतः प्रसूते सुखैर्धनैर्बन्धुबिर्वाजितं च ।
विहीनवर्गं गतबुद्धिवीर्यं प्रेष्यं खलं दीनमनर्थयुक्तम् ॥११०॥

सौरस्तथा पञ्चमगः प्रसूते विरक्तपौरं मलिनं स्वभावात् ।
द्वेष्यं कुबुद्धि हतकर्मसिद्धि कुपात्रदानं कुलधर्महीनम् ॥१११॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

षष्ठे शनि पापरतं प्रसूते प्रभावहीनं परदाररक्तम् ।
गुदाक्षिरोगोपहतं सशोकं प्रभूतवैरं प्रियसाध्वसं च ।।११२।।

सौरो विधत्ते खलु सप्तमस्थो नरं क्रियाहीनमनल्पवैरम् ।
सदा सरोगं निजबन्धुहीनं हतात्मजं बन्धुविवर्जितं च ।।११३।।

सौरोऽष्टमस्थः कुरुते दरिद्रं नरं सरोगं बहुनीचरक्तम् ।
पित्तोद्भवैः षीडितमुग्ररोगैर्विदेशभाजं परतर्ककं च ।।११४।।

अष्टवर्ग दशामार्गः सर्वेषामुत्तमोत्तमः ।
अष्टवर्गस्य माहात्म्यं यो जानाति स ईश्वरः ।।११६।।

गोचरादिबलानामष्टकवर्गक्षितीशयोगबलम् ।
तस्माद् बलदं नृणां बलद्वयं सूरिभिः कथितम् ।।११६।।

इतिश्रीसारङ्ग साधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने प्रत्येकाष्टकवर्गरेखाविन्दुफलनिरूपणं नाम षट्चत्वारिंशोऽध्यायः

सप्तचत्वारिंशोऽध्यायः

अथ प्रस्ताराष्टकवर्गफलम्

(गर्गपराशराभ्यां निर्मितं विन्दुस्थाने शुभफलं रेखास्थाने शून्यफलमिति कल्पियम्[१])

सप्तभिर्विन्दुभिर्युक्ते मासे मृत्युर्भवेन्नृणाम् ।
अपमृत्युप्रहाणाय दद्याद् वै तिलपर्वतम् ।।१।।

---

१ कथितं अ. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सुवर्णं विंशतिपलं तदर्धं वा स्वशक्तितः ।
वसुभिर्हीनतां (जाति) याति शीघ्रं मृत्युवशं नरः ॥२॥

स कर्पूरतुलां दत्वा तन्मूलार्धमथापि वा ।
इतरेषां दशपलं चन्द्रप्रीत्यै प्रकल्पयेत् ॥३॥

तद्दोषाद् मुच्यते सद्यः लभेत वाञ्छितं फलम्[१] ।
नवभिर्विन्दुभिः सर्पाद् म्रियते मनुजो ध्रुवम् ॥४॥

ततस्तार्क्षरथंप्रीत्यै रथं दद्याच्चतुर्हयम् ।
दशभिर्विन्दुभिः शस्त्रात् प्राणांस्त्यजति मानवः ॥५॥

बहुहीरकनीरन्ध्रं कवचं तत्र दापयेत् ।
रुद्रैः प्राप्याभिशापं च प्राणैर्मुक्तो भवेन्नरः ॥६॥

मुक्ताहारान्वितं चन्द्रं रौप्यस्य दशभिः पलैः ।
निर्मितं श्रद्धया दद्याद् ब्राह्मणायाग्निहोत्रिणे ॥७॥

आदित्यैर्जलदोषेण मानवस्य मृतिं वदेत् ।
भूमिं दद्याद् द्विजेन्द्रेभ्यो भोग्यां शतकुटुम्बिभिः ॥८॥

त्रयोदशमितैर्व्याघ्राद् मानवो मृतिमाप्नुयात् ।
रण्यहिगर्भदानेन तस्माद् दोषात् प्रमुच्यते ॥९॥

अचिराज्जीवितं जह्याच्छक्रैः कालेन भक्तितः ।
मूर्तिं वरवराहस्य दद्यात् कनकनिर्मितान् ॥१०॥

---

१ वाञ्छितं च फलं लभेत् लि.पू. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पञ्चेन्दुभिः प्रमीयेत गजदानमिहोच्यते ।
अशक्तैस्तु यथाशक्तिं हेममहस्ती प्रदीयते ॥११॥

तिलगर्भमहादानमथवा परिकीर्तितम् ।
मासे षोडभिर्युक्ते नरोरिष्टमवाप्नुयात् ॥१२॥

तत्र कल्पतरुं दत्वा तेनदोषेण मुच्यते ।
दशापि वा सुवर्णानां तदर्धं वा प्रदापयेत् ॥१३॥

ऋषिचन्द्रैराधियुतो व्याधिना परिपीडिते ।
स्थानाच्च चलितो भूत्वा मिताहारी दिने दिने ॥१४॥

गुडधेनुप्रदानेन तद्दोषं परिवर्जयेत् ।
पापग्रहदशा स्याच्चेद् महादानं प्रदीयते ॥१५॥

वस्विन्दुसंयुते मासे निर्दयः कलहप्रियः ।
निर्धनोऽसत्यवादी स्याद् रिष्टेन परिभूयते ॥१६॥

रत्नगोभूहिरण्यानि दातव्यानि शुभेप्सुभिः ।
नवेन्दुभिर्भवेद्देशत्यागो वा मृत्युरेव वा ॥१७॥

तत्र शान्तिर्गजरथं गजं वाऽश्वमथापि वा ।
संप्रदाय विधानेन तद्दोषाद् मुच्यते सुखी ॥१८॥

विंशत्या बुद्धिरहितो नीचकर्मरतः सदा ।
श्वेताश्वदानमथवा गोदानं संप्रदीयते ॥१९॥

लक्षायुतसहस्त्रं वा कुर्याद् ब्राह्मणभोजनम् ।
भूमिपक्षैर्निरुद्योगस्त्वथवा रोगपीडितः ॥२०॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ऐश्वर्याधिक्यरहितो भवेदक्लिष्टमानसः ।
धान्यपर्वतदानं वा ब्रह्मस्थापनमेव वा ॥२१॥

कुर्याद् भक्त्या विधानेन तद्दोषस्यापनुत्तये ।
आकृत्या च परिक्षीणः क्षीणैर्बन्धुभिरर्दितः ॥२२॥

दुःखमेव सदा विन्देद् देयोभयमुखीं ततः ।
अथवा दशदानानी प्रदद्याच्छान्ति काम्यया ॥२३॥

रामपक्ष(२३)युते मासे नानाक्लेशं प्रपद्यते ।
सौवर्णीं प्रतिमां भानोर्निर्मितां सप्तभिः पलैः ॥२४॥

तदर्धेनाथ वा शक्त्या तथार्धार्धेन वा पुनः ।
प्रदद्याद् ब्राह्मणेन्द्राय दोषस्य क्षयकाम्यया ॥२५॥

चतुर्विंशति(२४)युक्ते तु मासे स्त्रीबुद्धिमोहितः ।
अगम्यागमनं वापि क्रूरग्रहदशायुते ॥२६॥

निरस्तो बन्धुभिः प्राणी स्थानभ्रष्टो धनक्षयः ।
गोसहस्त्र प्रदातव्यमथवापि गवां शतम् ॥२७॥

दश वापि प्रदातव्या गावस्तद्दोषशान्तये ।
क्रूरग्रहदशायुक्तं मासे कुर्याद् यथोदितम् ॥२८॥

शुभग्रहदशायां तु यथाशक्तिं विधीयते ।
संयुक्ते विन्दुभिस्तत्वै (२५) र्मासैफलमिदं वदेत् ॥२९॥

ग्रहपीडातिसाराभ्यां वातरोगादिभिस्तथा ।
दीर्घकालं च मन्दाग्निरुदरव्याधिमान् भवेत् ॥३०॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कारयेज्जपहोमादि ब्राह्मणानपि तर्पयेत् ।
प्रीतये भास्करादीनां ग्रहाणां वर्धते ततः ॥३१॥

ऋतुपक्षसमायुक्ते (२६) मासे जाड्यं प्रपद्यते ।
उक्तमप्यसकृत् सद्यो विस्मरेदति चञ्चलः ॥३२॥

तत्र वागीश्वरीपूजां ब्राह्मणैः सह कारयेत् ।
सर्करापायसाद्यैश्च हावयेद् मधुसंयुतैः ॥३३॥

मुक्तो जाड्यादिभिर्दोषैः प्रज्ञावैमल्यमाप्नुयात् ।
नक्षत्रै (२७) श्च समायुक्तं बहुवित्तव्ययो भवेत् ॥३४॥

मलिनश्चिन्तयाग्रस्त आज्ञामन्दश्च जायते ।
तत्र सम्पत्प्रदांदेवीं महालक्ष्मीं प्रपूजयेत् ॥३५॥

श्रीसूक्तादि विधानेन जपहोमादि कारयेत् ।
लक्ष्मीप्रसाद सम्पन्नो धनधान्यैः समन्वियात् ॥३६॥

वसुपक्ष (२८) युते मासे न लाभो हानिरेव च ।
उद्योगो विफलं याति लभ्यते न फलं क्वचित् ॥३७॥

सूर्योपसेवनव्यग्रो जपहोमादि कारयेत् ।
अशेषदोषनिर्मुक्तस्तेजस्वी सुखमाप्नुयात् ॥३८॥

एकोनत्रिंशता (२९) चापि चिन्तयार्थाकुलो भवेत् ।
घृतचन्द्रसुवर्णानि दत्त्वा दोषाद् विमुच्यते ॥३९॥

त्रिंशता विन्दुभिश्चापि प्राप्नुयाद् मानसीं व्यथाम् ।
सुवर्णं वा तदर्धं वा ब्राह्मणाय निवेदयेत् ॥४०॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कुटुम्बिने वेदविदे श्रीसूर्यः प्रीयतामिति ।
तेजस्वी नित्यमानन्दी नीरोगी जीवते[१] चिरम् ॥४१॥

दुष्टग्रहदशायुक्ते मासे दोषा विनिश्चिताः ।
शुभग्रहदशायां तु तथा दोषवता भवेत् ॥४२॥

मतान्तरम्–

संयातो माससंयुक्ते विन्दुभिस्त्रिशदादिभिः ।
शुभमेव फलं विद्यादिति जातकनिर्णयः ॥४३॥

त्रिशद्‌विन्दुयुते मासे जायते धनवान् नरः ।
भूवह्निभि (३१) र्महोद्योगो धनवान् संप्रजायते ॥४४॥

पक्षवह्नि (३२) युते मासे पुत्रसम्पत् प्रजायते ।
रामवह्नि (३३) युते मासे व्यापाराद्धनमाप्नुयात् ॥४५॥

उद्योगसिद्धिश्च भवेद् मन्यते च नृपैरपि ।
सहेमवस्त्रलाभश्च चतुस्त्रिंश (३४) त्समन्विते ॥४६॥

कीर्तिं च महतीं विद्याद् धार्मिकस्तीर्थभक्तिमान् ।
पञ्चरामै (३५) र्भवे श्रीमान् षड्त्रिंशद्विन्दुभिःपुनः ॥४७॥

सुपुत्रलाभं कथयेज्जातकागमदर्शने ।
सप्तत्रिंशद् (३७) युते मासे कन्यालाभः प्रजायते ॥४८॥

---

१ भ्वादौ पठितो जी धातुः परस्मैपदी वर्तते । अस्मात् 'जीवति' इति भाव्यम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

युवतेर्ष्टात्रिशता (३८) मासे चिन्तितं फलमाप्नुयात् ।
रत्नद्रव्याणि चैकोनचत्वारिंशति (३९) विन्द्यते ॥४९॥

धनवान् कीर्तिमांश्चैव चत्वारिंशति (४०) वर्तते ।
भूवेद (४१) विन्दुयुक्ते तु नानालाभं प्रपद्यते ॥५०॥

पक्षवेदैः (४२) पुनः श्रीमानुदारो बहुसेवितः ।
महाधनो महाभोगो महीमण्डलसंस्थितः ॥५१॥

पञ्चवेदा (४५) न्विते मासे नृपभोग समन्वितः ।
रसवेद (४६) समायुक्ते धनतीर्थादिसंयुतः ॥५२॥

पुण्यतीर्थाभिलाषी च पुराणश्रवणे रतः ।
सप्तसागर (४७) मासे तु ज्ञानवान् धनिको भवेत् ॥५३॥

पुण्यसागरसंयुक्तः परमात्मा स्वयं भवेत् ।
वसुवेद (४८) मिते मासे पुण्यश्रीरुपचीयते ॥५४॥

राजलक्ष्मगुणैर्युक्तः[1] सर्वजीवदयापरः ।
ज्ञानिनां धनिकानां च पुण्यमार्गानुवर्तिनाम् ॥५५॥

मध्ये श्रेष्ठतरो मर्त्यस्तारामध्ये शशी यथा ॥५६॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने प्रस्ताराष्टकवर्गफलाऽध्यायः

---

१ राजलक्षणगुणैर्युक्त अ. प्र, ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ नक्षत्र-तिथि-लग्नगण्डान्तानां फलान्याहुः

वसिष्ठ–गर्ग–पराशर–च्यवनात्रि–भागुरि–ब्रह्मादयः–

मूलाद्यपादजनितः पितरं निहन्ति
द्वितीयजः स्वजननीं तृपदोऽर्थवृन्दम् ।
चतुर्थजः[1] शुभकरः फलमेतदेव
वैलोमतो भुजगधिष्ण्यभवस्य सर्वम् ॥१॥

गण्डान्तसंज्ञसन्धिप्रमाणमुदितं हि याममात्रमिह ।
जातस्य सकलजन्तोरनिष्टमुन्नेयमन्वये पित्रोः ॥२॥

इतरेऽष्टादावन्ते घटिकाद्वयमेव निर्मितं मानम् ।
तत्रापि जातजन्तोरनिष्टमम्भोजसंभवः प्राह ॥३॥

भुजङ्गपौरन्दरपौष्णभानां तदग्रजानां च यदन्तरालम् ।
अभुक्तसंज्ञं प्रहरप्रमाणं त्यजेत् सुतं तत्रभवं सुतां च ॥४॥

भुजङ्गपित्रोरथ चेन्द्रमूलयोः पौष्णाश्वयोश्चापि यदन्तरालम् ।
नाडीचतुष्कं खलु गण्डसंज्ञं तज्जन्मपुत्रं सहसा विजह्यात्[2] ॥५॥

वृहन्नारदीये–

चित्राद्यर्धे पुष्पमध्ये द्विपादे पूर्वाषाढर्क्षे च पादे तृतीये ।
जातः पुत्रश्चोत्तरार्धे विधत्ते मातापित्रोर्भ्रातृवर्गस्य नाशम्[3] ॥६॥

अत्रिः–

उत्तरे प्रथमे पादे पुष्ये चैव तु मध्यमे ।
पूर्वाषाढात्रिपादे च चित्रार्धे पूर्वमेव च ॥७॥

---

१ तुरीयज लि. पु. । २ विहाय लि. पु. । ३ भ्रातरं चात्मनाशम् लि. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पितृमातृभ्रातृहा स्यादात्मानं च विनाशयेत् ।
द्विमासस्थोत्तरे दोष पुष्पे चैव त्रिमासके ॥८॥

पूर्वाषाढाष्टमे मासि चित्राषाण्मासिकं फलम् ।
नवमासं तथा श्लेषा मूले चाष्ठमवर्षकम् ॥९॥

ज्येष्ठा पञ्चदशे मासि पुत्रदर्शनर्वाजिताः ॥१०॥

पराशरः—

मूलजा श्वशुरं हन्ति व्यालजाऽपि तदङ्गनाम् ।
ऐन्द्रे तदग्रजं हन्ति देवरं तु द्विदैवजा ॥११॥

मूलादिषु विशाखासु माहेन्द्रेषूद्भवः पुमान् ।
नदोषकृद्[1] विवाहे तु स्त्रियः सर्वत्र गर्हिताः ॥१२॥

द्विदैवजश्चान्त्यपादे विवाहं नैव कारयेत् ।
इतरेषु त्रिपादेषु विवाहो मङ्गलप्रदः ॥१३॥

ब्रह्मसिद्धान्तेऽपि—

ज्येष्ठाश्लेषारेवतीनामन्त्याः पादा भसन्धयः ।
तेषां च तत्परर्क्षाणामन्त्या आद्याश्च षोडशः ॥१४॥

गण्डान्तकर्कमीनालि लग्नाश्चानवमांश्च यत् ।
पूर्णाख्यानां तिथीनां च नाड्यन्त्या एव तन्मुने ॥१५॥

भसन्धयश्च गण्डान्ताः सर्वकर्म वहिष्कृताः ।
तथैव तिथिगण्डान्तो नास्ती जीवे वलान्विते ॥१६॥

---

१ तद्दोषकृद् अ. क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तथैव तिथिगण्डान्तो नास्तीन्दौ बलशालिनि ।
नक्षत्रतिथिलग्नान्ता गण्डान्ता स्त्रिविधाः स्मृताः ॥१७॥

नवपञ्चचतुर्थान्त्यास्ते[१] द्व्यैकार्धघटी क्रमात् ।
पूर्णनन्दाख्ययोस्तिथ्योः सन्धिर्नाडीद्वयं तथा ॥१८॥

गण्डान्तमन्तरालं स्याद् घटिकार्धं मृतिप्रदम् ॥

नारदः—

मूलादौ च द्विघटिका ज्येष्ठान्ते च तथैव च ।
अभुक्तमिति संज्ञेयं तत्र जातं शिशुं त्यजेत् ॥१९॥

अभुक्तजातपुत्रस्य दशसंवत्सरं त्यजेत् ।
दैवाद् दर्शनतो मृत्युः[२] षण्मासाभ्यन्तरे भवेत् ॥२०॥

अभुक्तमिति तं नास्ति[३] न दोषं दर्शनेन च ।
अश्लेषामूलगण्डान्तजातानां शान्तिकर्मणि ॥२१॥

कमलासनसंहितायाम्—

ज्येष्ठामतीत्य चेज्जन्म मूलमप्राप्य तं त्यजेत ।
मासाष्टकं पिता तस्य न पश्येदथ चाननम् ॥२२॥

भागुरिः—

भर्तृभ्रातरमधिकं तनुमथवा कन्यकेति केऽप्याहुः ।
ज्येष्ठसुतस्तु जातः स्वाग्रजमिति नारदादयो जगुः ॥२३॥

---

१ न च पञ्चचतुर्थांशाः शुद्धैकार्धघटी क्रमात् पू. ।
२ यदि दर्शनतो मृत्युः पू. । ३ अभूक्तमिति तेनास्ति अ. क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अष्टचतुरेकाब्दानभुक्तमूलोद्भवं त्यजेद्बालम् ।
ज्येष्ठामूलभसन्धेरर्धघटी चोभयत्र शान्तिकरी ॥२४॥

अर्धघटीगण्डान्तो वीर्यग्रहवीक्षिते यदा लग्ने ।
कथमप्यपरिहार्यो न शान्तिमुसृज्य शङ्करेणापि ॥२५॥

च्यवनः–

शुभदृष्टिलग्नमध्ये यद्यर्धघटीमितो भवेद् गण्डः ।
शान्त्यैकनिरसनीयो निरपेक्षा दोष एव निर्घातः ॥२६॥

चरणव्यवस्थितस्तु ग्रहानुकुले च संयुते लग्ने ।
दोषो न महानुक्तः पापग्रहवीक्षिते तु दोषः स्यात् ॥२७॥

अब्दान्तशान्तियुक्तः शुभफलदायी निरुपितो मुनिभिः ॥२८॥

तत्रैव विशेषमाह पराशरः–

स्याद् गण्डान्तो यदा लग्ने शुभग्रहयुतेक्षिते ।
तदा शुभफलं विद्याद् यद्वा क्रूरविर्वजिते ॥२९॥

आर्यभटीये

यामं यवनाधिपतिस्तदर्धमर्धं च भागुरिः प्राह ।
गण्डं गिरिस्तु[१] दण्डं तदर्धमर्धं च गिरामीशः ॥३०॥

ज्योतिषमागमशास्त्रं विप्रतिपत्तौ नयोग्यमस्माकम् ।
अत एव मतं वक्ष्ये किन्तु वहुनां मतं ग्राह्यम् ॥३१॥

---

[१] गिरेस्तु प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इह नक्षत्रगण्डान्तविषये घटिकाद्वयव्यवस्था बहुमुनिसंमता दृश्यते अत एषैव व्याख्या साध्वी तद् यथा, अत्र व्यवस्थात्रयम् एका घटिकाद्वयव्यवस्था द्वितीया चरण व्यवस्था तृतीया चरणव्यवस्थेति ।।

ज्येष्ठान्तेघटिकायुग्मं मूलादौ च घटीद्वयम् ।
स्यादभुक्तं चतुर्नाडी त्येजेत् संवत्सराष्टकम् ।।३२।।

दिनजः पितरं हन्ति रात्रौ मातरमेव च ।
सन्ध्ययोश्चात्मनाशः स्याद् नास्ति गण्डो विपर्ययः ।।३३।।

पुत्रोत्पत्तिः पितृगण्डे दिवा चैव यदा भवेत् ।
मातुर्गण्डे यदा रात्रौ कन्यकासम्भवस्तदा ।।३४।।

इतीश्वरसंहितावचनम् ।

मरीचिः--

सन्ध्ययोऽर्धेनगण्डे च सुतोवा कन्यका तथा ।
पितृमातृशिशूनां च क्रमादेष च पञ्चता ।।३५।।

मध्ये दोषो भवेदेषां विपरिते तु संभवे ।
गण्डे यस्य सुतो जातः सोब्दादर्वाग्[१] विनश्यति ।।३६।।

वसिष्ठः--

ज्येष्ठान्यपादघटिकाद्वयमेत्र केचित्
शंसन्त्यभुक्तमपरे पुनरामनन्ति ।
मूलाद्यपादघटिकां द्वितयेन सार्धं
मस्टौसमा परिहरेदिहजन्म भाजम्[२] ।।३७।।

---

[१] सोव्र्धादिर्धाद् प्र. । [२] जन्मभागम् लि. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अभुक्तमलव्यतिरिक्तगण्डदोषेषु शान्ति विदधीत धीमान् ।
शास्त्रोक्तरीत्या खलु सूतकान्ते मासे तृतीयेऽप्यथ वत्सरान्ते ॥३८॥

कमलाशनः--

मातृ गण्ड सुते जाते सूतकान्ते विचक्षणः ।
कुर्याच् शान्ति तदृक्षे वा तद्दोषस्यापनुत्तये ॥३९॥

भगवान् गर्गः--

भसन्धित्रितयोऽन्तेषु गण्डान्तेषु सुतो भवेत् ।
सूतकान्ते तदृक्षे वा शान्ति कुर्यादुदारधीः ॥४०॥

दोषे गुरौ गुरुं शान्ति कुर्याल्लघ्वीं लघावपि ।
गुरौ दोषे लघुंशान्ति कुर्वाणो नैव दोष हा ॥४१॥

दोषाऽभावेऽपि यो दोषो मोहाल्लाभाच्च कल्प्यते ।
स कल्पितः शान्तिंशतैरपि नैव विनश्यते[1] ॥४२॥

येषां गण्डान्तदोषाणां शान्तिकालो न चोदितः ।
तेषां शान्तिर्विधातव्या वर्षमध्ये विधानतः ॥४३॥

रोमशः--

धनगण्डो दरिद्रोऽपि शान्ति कुर्यात् स्वशक्तितः ।
अकृत्वा शान्तिकं मूढो ध्रुवं तस्य विनाशनम् ॥४४॥

गृहं क्षेत्रं धनं धान्यं गृहोपकरणानि च ।
पशुवस्त्रादिकं चैव धनमीत्युच्यते बुधैः ॥४५॥

---

१ निरस्यते प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यजनं देवतानां च ग्रहाणां चैव पूजनम् ।
दीपं शिवालये भक्त्या घृतेनैव प्रदाययेत् ॥४६॥

अभिषेकः शङ्कराय अश्वत्थस्य प्रदक्षिणम् ।
आयुर्वृद्धिकरं जप्यं शान्तिपाठस्तथैव च ॥४७॥

तर्पणं बन्धुवर्गाणां ब्राह्मणानां च भोजनम् ।
इत्थं कुर्याद् विधानेन गण्डदोषप्रशान्तये ॥४८॥

आयुर्वृद्धिकरं पुण्यं सर्वारिष्टविनाशनम् ।
गुरुदैवतविप्राणां भोजनं गोत्रवर्द्धनम् ॥४९॥

शिवाय विधिवद् भक्त्या दीपदानं करोति यः
अखण्डं गोघृते नैव सर्वं मृत्यु जयेन्नरः ॥५०॥

विष्णुमूर्तिं महापुण्यमश्वत्थं श्रीकरं तथा ।
प्रदक्षिणं नरो भक्त्या रुद्रं मृत्युञ्जयं जपेत् ॥५१॥

मूले वा सार्पगण्डे वा कुर्यादेतानि यत्नतः ।
आयुर्वृद्धिकरार्थाय गडण्दोषप्रशान्तये ॥५२॥

नारदः–

ज्येष्ठं ज्येष्ठाद्यजो हन्ति द्वितीयेऽप्यथ सोदरम् ।
तृतीये मातरं हन्ति स्वयं जातश्चतुर्थके ॥५३॥

भगवान् गर्गः–

वासवर्क्षे चतुर्थांशे पुत्री पुत्रस्तु जायते ।
पीडारिष्टनिवृत्यर्थं शान्ति कुर्याच्च मूलवत् ॥५४॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मरीचिः—

वासवे प्रथमे पादे द्वितीये च तृतीयके ।
स्वल्पदोषइति प्रोक्तः पितरं हन्ति तुर्यके ॥५५॥

ज्येष्ठर्क्षे कन्यका जाता हन्ति शीघ्रं तदग्रजम् ।
ज्येष्ठान्त्यपादजाता तु पितृनाशाय जायते ॥५६॥

व्यासः—

ज्येष्ठं ज्येष्ठान्त्यपादे तु हन्ति बालो न बालिकाः ।
सा बालिका तु मूलर्क्षे पितरं[1] मातरं तथा ॥५७॥

पराशरः—

ज्येष्ठान्त्यपादसंयुक्ते प्रहरार्धे निशाकरे ।
पितरं मातरं भ्रातृनात्मानं च विनाशयेत् ॥५८॥

कमलासनः—

ज्येष्ठं ज्येष्ठान्त्यके हन्ति तृतीये वाऽनुजं तथा ।
द्वितीये धनहानिः स्यादाद्यपादे शुभावहम् ॥५९॥

नारदः—

ज्येष्ठाजः श्रेष्ठजं हन्ति द्वितीये धनहानिदा ।
तृतीये मातरं हन्ति पितरं हन्ति तुर्यके ॥६०॥
ज्येष्ठानक्षत्रे प्रत्येकं घटिकाषट्कस्य फलान्याह

भरद्वाजः—

ज्येष्ठादौ मातृजननीं मातामहं द्वितीयके ।
तृतीये मातरं हन्ती पितरं हन्ति तुर्यके[2] ॥६१॥

---

१ वप्तारं प्र. अ. । २ तृतीये मातुलं हन्ति चतुर्थे जननीं तथा पृ. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आत्मानं पञ्चमे हन्ति षष्ठे गोत्रक्षयस्तथा ।
सप्तमे कुलनाशः स्यादष्टमे ज्येष्ठभ्रातरम् ॥६२॥

नवमे श्वशुरं हन्ति दशमे हन्ति सर्वकम् ।

ब्रह्मसंहितायाम् —

सार्पेन्द्रपौष्णधिष्ण्यानामन्त्याः पादाः भसन्धयः ।
तदग्रभेषु पादार्धं गण्डातानोत्तरः स्मृतः ॥६३॥

इदं विशेषवचनम् ।

भृगुः—

मूलाद्यङ्घ्रिः पितृगण्डो दिवाचेत् + तस्य नाशकः ।
द्वितीयो यदि रात्रौ स्यात् तज्जातो मातरं तथा ॥६४॥

पितृगण्डो यदा रात्रौ तज्जो न पितृनाशकः ।
मातृगण्डो दिवा चेत्स्यात् + तज्जो मातुर्न नाशकः ॥६५॥

कश्यपः—

मूलाद्यपादे दिवसे यदि स्यात् तज्जः पितुर्नाशनकारणं स्यात् ।
द्वितीयपादे यदि रात्रिभागे तदा भवो मातृविनाशकः स्यात् ॥६६॥

मूलाद्यपादो यदि रात्रिभागे[१] तदुद्भवे नास्ति पितुर्विनाशः ।
द्वितीयपादो दिनगो यदि स्यान्न मातुरल्पोऽपि तदस्ति दोषः ॥६७॥

+ एतच्चिह्नान्तरालगतः पाठः पृ. पुस्तके नविद्यते ।
१ दिन रात्रिभागे, तदात्मजो, लि.पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्यासः—

दिवा जातस्तु पितरं रात्रौ तु जननीं तथा ।
उभयोः[1] सन्ध्ययो हन्ति नास्ति गण्डो विपर्यये ॥६८॥

इत्थं विचार्य दैवज्ञः शान्तिं सौख्याय कारयेत् ।
द्रव्यानुसारतो दोषगुरुलाघवमानसः ॥६९॥

मूढधीलोभयुक्तो वा कल्पयेद् यदि दूषणम् ।
सत्यं तदा दूषणं स्यात् स शान्त्याऽपि न शाम्यति ॥७०॥

वसिष्ठः—

नैर्ऋत्यभोद्भूतसुतः सुता वा क्षिपादवश्यं श्वशुरं निहन्ति ।
तदन्त्यपादाज्जनितो निहन्ति नैवोत्क्रमेणाहि भवः कलत्रम् ॥७१॥

सुरेशताराजनिताऽग्र्यवाग्रजं द्विदैवताराजनितातु देवरम् ।
पुरन्दरर्क्षे जनितः सुतस्तदा स्वस्याग्रजं हन्ति न पुत्रिका यदि ॥७२॥

पुनः पुनः पञ्चमषष्ठतिथ्योर्यदन्तरालं प्रहरार्धकालः ।
यल्लग्नजातं गुणसंचयं यत् क्षणो यथा हन्ति नरं हि नूनम् ॥७३॥

लग्नान्तरालं घटिकार्धमेतत् कुलीरहर्योरलिचापयोश्च ।
मीनाजयोः सर्वं गुणान्निहन्ति दारिद्र्यमेकं गुणसंहतिं यत् ॥७४॥

केवलं गण्डान्तस्य न दोषत्वं किन्तु दोषान्तरसहायवशादतिदोषत्वमाह ।

मनुः—

दिनत्रये व्यतीपाते गण्डान्ते विष्टि वैधृतौ ।
शूले गण्डेऽतिगण्डे च परिघे यमकण्टके ॥७५॥

---

[1] उभौ च लि. पु.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कालदण्डे मृत्युयोगे दग्धयोगे च दारुणे ।
व्यतीपाते महापाते वैधृतौ महदादिके ॥७६॥

विषनाडीषु संक्रान्तौ दिव्योत्पातादि सम्भवे ।
ग्रामदाहे नृपक्षोभे ब्रह्मक्षोभे तथैव च ॥७७॥

परिवेषेन्द्रचापे च चन्द्रार्कग्रहणे तथा ।
दुर्दिने मेघनिर्घाते गुरुपातेऽतिकारणे ॥७८॥

राश्यन्तगेषु खेटेषु दुरितेषु विशेषतः ।
गण्डान्तदिवसे प्राप्ते प्रसूतिर्यस्य जायते ॥७९॥

अतिदोषस्तदा प्रोक्तो गण्डान्तोऽत्यन्तदूषणम्[1] ।

ब्रह्मसंहितायाम्

उक्तत्रिविधगण्देषु देशभेदव्यवस्थया ।
गुणदोषव्यवस्थानं नारद त्वं निबोध मे ॥८०॥

कलिङ्गदेशे कार्तिक्ये रोहिण्यां च त्रिलिङ्गके ।
जातस्य सौम्येऽवन्त्यां च रौद्रे माहिष्मतीभवः ॥८१॥

महाराष्ट्रे पुनर्वसौः पुष्ये विन्ध्योद्भवस्य तु ।
औरगेभे मध्यदेशे पारशीके मघासु च ॥८२॥

फल्गुन्यामङ्गविषये, उत्तरायां तु पाटले ।
हस्ते मिथिलदेशे च त्वाष्ट्रे विन्ध्याद्रिपार्श्वयोः ॥८३॥

---

१ गण्डान्तोत्पत्तिदूषणम् अ. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सारसे विषये स्वात्यां विशाखासु विदर्भके ।
सौराष्ट्रे मित्रनक्षत्रे पाञ्चाले चेन्द्रदूषणम् ॥८४॥

अभुक्तमूलसंभूतः पितृमातृकुलान्तकः ।
स त्याज्यः सर्वदेशेषु क्षपायां दिवसेऽपि वा ॥८५॥

मूले लोष्टकदेशे स्यादाप्यर्क्षे दर्दुरस्य तु ।
आवन्त्यां चोत्तराषाढे विदेहे श्रवणे तथा ॥८६॥

धनिष्ठासु विदेहेषु पाञ्चाले शततारके ।
पूर्वभाद्रे च कुरुषु पूर्वतश्चोत्तराभिधे ॥८७॥

सिन्धुदेशे च रेवत्यामश्विन्यां लोकपालने ।
भरण्यामर्कविषये जननं भजतां नृणाम् ॥८८॥

तत्र तत्रैव गण्डान्तदोषो नान्यत्र नारद ।
अथ कुहूसिनीवालीजन्मिनां फलमाह भगवान् गर्गः-

कुहूप्रसूतिरत्यर्थं सर्वदोषकरी नृणाम् ।
यस्यां प्रसूश्च वैतेषां सर्वायुष्यविनाशनम् ॥८९॥

सर्वगण्डे समं तत्र दोषं तद्वत्फलं भवेत् ।
नारीं विनाऽवशेषाणां [1] परित्यागो विधीयते ॥९०॥

परित्यागात्तत्र शान्तिं कुर्याद्धीमान् विचक्षणः ।
कुलस्य रक्षणार्थाय [2] पुनरेवानुपालनम् ॥९१॥

---

१ विना च शेषाणां प्र. । २ तत्कुलं रक्षणार्थाय लि. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न त्यजेद् य:पिता मोहाद् दर्पादज्ञानतोऽ[1]पि वा ।
तद्यूथं नाशयेत् किंचित् स्वयं वा नाशमश्नुते ॥९२॥

गजाश्वमहिषादीनां स्त्रीणां चैव विशेषत:
कल्पोक्तशान्तिः कर्तव्या, शीघ्रं कुर्यात् स्वशक्तितः ॥९३॥

गोदानं वस्त्रदानं च सुवर्णं च व्रतानि च ।
दश दानानि चोक्तानि क्षोद्रमाज्यं गुडं तथा ॥९४॥

आज्यावेक्षणमेतानि तत्तन्मन्त्र समन्वितम् ।
समिदाज्यं चरूंहोमस्तिलमाषाश्च सर्पिसा[2] ॥९५॥

अश्वत्थप्लक्षपालाशसमिधं खादिरैर्युतम् ।
अष्टोत्तरशतं मुख्यं प्रत्येकं जुहुयात्ततः ॥९६॥

त्रयम्बकेति मन्त्रेण आज्येन व्याहृतिं पुनः ।
चतुर्भिः कलसैर्युक्तं वृहत्कुम्भसमन्वितम् ॥९७॥

शान्तिवत् सकलं कार्यमभिषेकं च कारयेत् ।
पितृमातृशिशूनां च कुम्भकाद्भिश्च वारुणैः ॥९८॥

शिशोस्तस्याभिषेकं च कुर्याद् ब्राह्मणभोजनम् ।
अन्येषां चैव सर्वेषां भोजनं कारयेद् सुधीः ॥९९॥

यथा शक्त्यानुसारेण द्विजवाचनपूर्वकम् ।
अमावास्याप्रसूतानां गजानां वाजिनां तथा ॥१००॥

---

१ मोहादर्थादज्ञानतो अ. क. ।
२ समिदाज्यैश्चरोर्होमस्तिलमाषैश्च सर्पिसा पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गवां च महिषीणां च मनुष्याणां विशेषतः ।
कृष्णपक्षे चतुर्दश्यां प्रसूतिर्यदि जायते ॥१०१॥

कुरुते तत्रषड्भागं प्रथमो दोषवर्जितः ।
द्वितीये पितरं हन्ति तृतीये मातरं यथा ॥१०२॥

चतुर्थे मातुलान् हन्ति पञ्चमे भ्रातरं तथा ।
षष्ठे च धनहानिः स्यादित्येतद्भूतजन्मनि ॥१०३॥

सिनीवालीप्रसूता स्यादिति भार्या पशुस्तथा ।
गजाश्वमहिषाद्यैश्च शक्रस्यापि श्रियं हरेत् ॥१०४॥

अन्यान्यपि च सर्वाणि स्वप्रसादोपजीविनाम् ।
वर्जयेत्तानि सर्वाणि पशुपक्षिमृगादयः ॥१०५॥

वसिष्ठः–

नक्षत्रे यस्यदर्शान्तो विषनाड्यां भवेद्यदि ।
कुहुयोग इति ख्यातो व्याधिमृत्युभयादि कृत् ॥१०६॥

कुहुःस्याद् यदि जन्मांशे षण्मासान्मृत्युमाप्नुयात् ।
जन्मलग्नेऽथ जन्मांशे मृत्युर्मासत्रयं भवेत् ॥१०७॥

धर्मशास्त्रेऽपि–

यस्य जन्मर्क्षगश्चन्द्रो विषनाड्यां कुहू भवेत् ।
अभिचारेण किं तस्य स्वयमेव मरिष्यति ॥१०८॥

शतमानसुवर्णेन कृत्वेन्दोः प्रतिमां बुधः ।
वस्त्रैरलङ्कृतं कुम्भं स्थापयित्वा तु मन्त्रवित् ॥१०९॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मृतसंजीवनं मन्त्रमथवा जातवेदसम् ।
अष्टोत्तरशतं जप्त्वा सौरमन्त्रं तथैव च ॥११०॥

अष्टाविंशतिसंख्या वा सूक्तेन पुरुषेण च ।
औषधादीन् विनिक्षिप्य साधयेदमृतेन वा ॥१११॥

दर्भासने गुरुः शिष्यं प्राङमुखं स्थापयेत्ततः ।
स्थापितेन जलेनैव स्नापयेज्जातवेदसम् ॥११२॥

आचार्यान् पूजयेद् विप्रान् दैवज्ञं च विशेषतः ।
गोभूहिरण्यवस्त्रादीन् ब्राह्मणेभ्यः समर्पयेत्[1] ॥११३॥

एवं शान्तिकरं कर्म कुर्यादायुः प्रवृद्धये ॥११४॥
इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्य विरचिते जगन्मोहने गण्डान्तफलंनामाष्टचत्वारिंशोऽध्यायः

अथ तिथिनिर्णयऽध्यायः

बिज्ञानेश्वरयोगिना भगवताऽनन्तेन भट्टेन च
श्रीमद्भोजमहीभुजा तिथिगणे योगीकृतो निर्णयम् ।
सोऽयं संप्रति वैद्यनाथविदुषा संक्षेपतः कथ्यते
ज्योतिर्वेदविदामतन्द्रितधियामानन्दसंभूयते ॥१॥

अत्रैकभक्तादीनामङ्गभूतासु प्रतिपदादितिथिषु साधारणो निर्णयः ।

एकभक्तलक्षणमाह ।

दिनार्धसमयेऽतीते भुज्यते नियमेन यत् ।
एकभक्तमिति प्रोक्तमतस्तत् स्याद् द्विधैव हि ॥२॥

---

१ प्रयच्छति लि.पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तच्च मध्याह्नव्यापिन्या कार्यं । पञ्चधा विभक्तस्याह्नस्तृतीयो भागो मध्याह्नो ग्राह्यः । मध्याह्नव्यापिन्यामेकभक्ततिथौ सन्ध्यापरतिथिसंबन्धिन्यौ ह्रासवृद्धी न ग्राह्ये ।

कर्मणा यस्य यः कालस्तत्कालव्यापिनी तिथिः ।
तया[1] कर्माणि कुर्वीत ह्रासवृद्धी नकारणम् ॥३॥

इति तयोः प्रतिषेधमेकभक्तं च यद्यपि त्रयोदशीघटिकामारभ्याष्टादशीघटिका पर्यन्तं षड्घटिकात्मको मध्याह्नस्तथाप्युत्तरस्मिन् घटिकात्रये कर्तव्यम् । 'दिनार्धसमयेऽतीत' इति वचनात् । यदा मध्याह्नादूर्धमेक भक्त तिथिः प्रवर्तते । तदा तस्यामेकभक्तं कार्यम् । यदा पुनर्नैकस्मिन् दिने कृत्स्नमध्याह्नव्यापिनी लभ्यते । किं पूर्वा स्वल्पं मध्याह्नं स्पृशति, उत्तरापि तिथ्यन्तमेव । तदा खर्वः स्यादुत्तरैव ग्राह्या भक्तं च ।

खर्वो दर्पस्तथा हिंसा त्रिविधं तिथिलक्षणम् ।
खर्वदर्पौ परौ पूज्यौ हिंसा स्यात् पूर्वकालिकी ॥४॥

खर्वो नाम तिथेः साम्यं दर्पो वृद्धिर्हिंसा क्षयः । यद्येकभक्तादितिथिः खर्वा तदा परदिनगता ग्राह्या । खर्वदर्पौ परौ पूज्यावित्युक्तत्वात् । अथैकस्मिन् पूर्वतिथिभूयसी । एकस्मिनल्पा मानेन तिथाविति विप्रतिषेधः समये भूयसी स्यात् सर्व इति न्यायेन । भूयसी ग्रह्या सेयमेकभक्तादितिथिषु कर्मकालव्यापिनीषु, उपचारव्यतिरिक्तासु साधारणो न्यायोऽनुवर्तव्यः ।

नक्तादितिथिनिर्णयः ।

प्रदोषव्यापिनीग्राह्या तिथिर्नक्तव्रते सदा ।
एकादशीं विना सर्वा शुक्ले कृष्णे च सा स्मृता ॥५॥

---

१ तथा प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रदोषपरिमाणं तु

उदयात् प्राक्तनी सन्ध्या घटिकात्रयमुच्यते ।
सायं सन्ध्या त्रिघटिका अस्तादुपरि भानुतः ॥६॥

त्रिमुहूर्तं प्रदोषः स्याद् रवावस्तं गते सति ।

यद्यपि षट्घटिकात्मके प्रदोषे, आहारमैथुननिद्रास्वाध्यायनं निषेधः स्यात् । तदप्युत्तरघटिकात्रये सर्वं प्राप्नोतीत्येषः पक्षः ।

मुहूर्तो न दिनं नक्तं प्रवदन्ति मनीषिणः ॥७॥

नक्षत्रदर्शनान्नक्तमहमन्ये गणाधिप ॥ इति,

भविष्योत्तरोक्तं नक्तम् —

यदा तु परमह्लासे दिनद्वये प्रदोषव्यापिनी न लभ्यते । तदा स्कन्द-पुराणोक्तदिनान्तिमे मुहूर्ते नक्ततिथिमध्ये नक्तं न करणीयम्[१] ।

प्रदोषव्यापिनी न स्याद् दिवा नक्तं विधीयते ॥८॥

आत्मनो द्विगुणीच्छाया मन्दीभवति भास्करे ।
तं नक्तं नक्तमित्याहु र्न नक्तं निशिभोजनम् ॥६॥

एतदपि निषिद्धरात्रिभोजनं संक्रान्त्यादि । तद्दिनप्राप्तसन्ध्या भोजन-विषयकं वेदितव्यम् ।

याचितम्

न याचितमयाचितं भोजनम् । तदहर्द्वयव्यापिन्यां तिथौ । याम मध्या-ह्नव्यापिनी तस्यामेकभक्तं करणीयम् । तच्च भविष्योत्तरपुराण व कुशब्रह्मवृक्षादिव्रतविषयं वेदितव्यम् । प्रायत्यादौ[२]यथा तथा स्यात् ।

---

१ नक्तं तत्करणीयम् प्र. । २ प्रायश्चित्तादौ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नक्षत्रव्रतम्

तत्र विष्णुः—

उपोषितव्यं नक्षत्रं यस्मिन्नस्तमयाद् रविः ।
यत्र वा युज्यते राम निशीथे शशिना सह ॥१०॥

तथा च सुमन्तुः—

यदार्धरात्रादर्वाग् नक्षत्रं प्राप्यते तिथौ ।
तन्नक्षत्रव्रतंकुर्यादतीते पारणं भवेत् ॥११॥ इति

अतोऽन्यथा पारणं तु व्रतभङ्गमवाप्नुयात् । इति
तिथियुक्तोपवासविषयं नक्षत्रयुक्तानां तिथौ विष्णुपुराणोक्तम्
याः काश्चित् तिथयः प्रोक्ताः पुण्या नक्षत्रयोगतः ।
तास्वेव तद्व्रतं कुर्याच्छ्रवणद्वादशीं विना ॥१२॥ इति
तत्रैककामुपोष्यं हरेरर्चनमिति । तत्र, एकादश्यामेव प्राधान्यात् ।

उपवासव्रतम्

तिथिः सशल्या परिवर्जनीया धर्मार्थकामेषु बुधैर्मनुष्यैः
विहीनशल्यापि विवर्जनीया यद्यग्रतो वृद्धिमुपैति पक्षः[1] ॥१३॥

यथा मलिम्लुचः पूर्वा दैवो मासस्तथोत्तरः ।
त्याज्या तिथिस्तथा पूर्वा वृद्धौ ग्राह्या तथोत्तरा ॥१४॥

प्रतिपत्

प्रतिपत् प्रमुखाः[2] सर्वा उदयादुदयं रवेः ।
संपूर्णा चेति विख्याता हरिवासर वर्जिताः ॥१५॥

---

१ वृद्धियुतोऽपि पक्षः प्र. । २ प्रतिपत्प्रभृतयः लि. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यत्र तु क्षयवृद्धिभ्यां दैवं भवति ———— ।
युग्माग्निर्युगभूतानि षण्मुन्योर्वसुरन्ध्रयोः ॥१६॥

रुद्रेण द्वादशी प्रोक्ता पूर्वविद्धा विपश्चिता ।
इति वाक्यात्तु द्वितीयादि नवमान्ता संयुक्ताः कार्याः ।

द्वितीयाः

अशून्यशयनादि नक्तमेव प्रयोजनम् । तत्पूर्वकमेव नक्तं तथा ।
प्रतिपत् तु द्वितीया स्याद् द्वितीया प्रतिपद्युता ।

इति पुराण स्मरणात् । प्रतिपद्द्वितीयायुक्तं त्वनुक्तम् । तत्तिलकाशोक करवीरादिविषयं पूर्वमुक्तत्वात् । तिलकं यमद्वितीयायाम् भगिनीभिर्भ्रातृणां कर्तव्यम् । अशोक इति अशोकाष्टमी । करवीरमिति–

भाद्रे मासि सिते पक्षे चतुर्थ्यं नरपुङ्गवः ।
गणनाथं पूजयित्वा करवीरादिभिर्बुधः ॥१७॥

करवीरादिव्रतविशेष इति केचित् । तानि पूर्वाह्न एव विधीयन्ते । द्वितीयायाः प्रतिपद्युक्तत्वमुक्तम् । तच्च यमद्वितीया विषयम् । तस्यां भगिनीभिर्भ्रातरो भोज्यन्ते ।

ब्रह्माण्डपुराणे

यातु भोजयते नारी भ्रातरं युग्मके तिथौ ।
अर्च्चयेच्चापि ताम्बूलैर्न सा वैधव्यमाप्नुयात् ॥१८॥

भ्रातुरायुः क्षयो राजन् न भवेत् तत्र कर्हिचित् ।
तृतीयां तु सुवासिन्यः पूजनीयाः प्रयत्नतः ॥१९॥
वस्त्रालङ्कारभोज्याद्यैस्तत्र संनिहिता ह्युमा ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तेनैकभक्तादिव्रतादि व्रतानामयमेव च विषयो बोधव्यः। उपवासोऽपि कृष्णप्रतिपत्पूर्वविधैव।

पैठीनसीवचनात्–

द्वितीया तृतीयान्वितोपोष्या।
एकादश्यष्टमीषष्ठी द्वितीया च चतुर्दशी ॥२०॥
त्रयोदश्यप्यमावास्या सदोपोष्या परान्विता। इति।

तृतीया

तथा तृतीया चतुर्थी युक्तैव। यथाह बृहस्पतिः–
एकादश्यष्टमीषष्ठी पौर्णमासी चतुर्दशी ॥२१॥
अमावास्या तृतीया च ता उपोष्याः परान्विताः।
यस्तु युग्माग्नीत्यादिवाक्ये तृतीया द्वितीया कार्येत्युक्तं तद् रम्भाव्र-
तविषयम्। तथाह ब्रह्मवैवर्ते–

रम्भाख्यं वर्जयित्वा तु तृतीयां द्विजसत्तम ॥२२॥
अन्येषु सर्वकार्येषु गणयुक्ता प्रशस्यते।

गण[1]चतुर्थीति वचनान्तरम्। रम्भाव्रतस्तु–
पौषे मासि सिते पक्षे तृतीया यदि लभ्यते ॥२३॥

साधु भित्वा तु कृशरां शिरः पात्रं निधापयेत्।
अनावृते तु कर्तव्यं भोज्यं तेन द्विजोत्तम ॥२४॥

---

१ गणरुष्टी प्र.।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रम्भायै कथितं ह्येतत् पुरावृत्त मनुत्तमम्[१] ।
पार्वत्या तुष्टया तेन रम्भाव्रतमुदाहृतम्[२] ॥२५॥

वचनान्तरम् च–

कृष्णाष्टमी वृहत्यल्पवटसावित्रिपैतृकी ।
काम त्रयोदशीरम्भा[३] उपोष्या पूर्वसंयुता ॥२६॥ इति ।

कृष्णाष्टमीति जन्माष्टमीप्रभृतिर्ज्ञातव्या । महद्दिति महाभरसंज्ञका । वटसावित्रीति प्रसिद्धा पैतृकी पितृपूजोदिता[४] ।

यथाह ब्रह्माण्डपुराणे—

आषाढ प्रभृतिचतस्रो या अमाः ।
आसुकल्कं तिलस्यान्नं सघृतं यः प्रयच्छति ।
पितृभ्यो वा तृतीयायां पितरो ब्रह्मभागिनः ॥२७॥
संवत्सरकृतं पापं तत्क्षणादेव नश्यति ।

स्कन्दपुराणे—

पैतृकीं यः समासाद्य तिलकल्कं गुणान्वितम् ॥२८॥
पितृभ्यो यो ददातीह मुच्यते ब्रह्महत्यया ॥

अनङ्गत्रयोदशी

चैत्रे मासि, अनङ्गपूजा कर्तव्या । यथाह शिवपुराणे—
चैत्रे मासि सिते पक्षे सस्त्रियः पुरुषा द्विजा ॥२९॥

---

१ पुरा वृतमनुत्तमम् प्र. । २ रम्भातदमुदाहृतम् अ. ।
३ अनङ्गत्रयोदशी रम्भा लि. पु. । ४ प्रसिद्धं पैतृकी पितृपूजादि लि. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अनङ्गं पूजयित्वा तु सर्वत्र सुखमेधते ।
तृतीया तु प्रकर्तव्या द्वितीयोपहता विना ॥३०॥

द्वितीयया युतां राम यः करोति नराधमः ।
संवत्सरकृतेनेह नरो धर्मेण मुच्यते ॥३१॥

द्वितीयाशेषसंयुक्ता या करोति विमोहिता ।
सा वैधव्यममवाप्नोति प्राहुरेवं मनीषिणः ॥३२॥

द्वितीयाशेषसंयुक्तां तृतीयां कुरुते तु यः ।
स याति नरकं घोरं कालसूत्रं भयंकरम् ॥३३॥

ब्रह्मवैवर्ते—

द्वितीयायुक्ता तृतीया प्रतिषिद्धा । तत्रैव चतुर्थीयुक्ता प्रशस्यते ।
चतुर्थीसहिता या तु सा तृतीया फलप्रदा ।
अवैधव्यकरास्त्रीणां पुत्रपौत्रप्रदायिनी ॥३४॥
एता गौरीकज्जलहरितालिकादितृतीया बोधव्या ।

चतुर्थी

(षष्ठ्या पञ्चमीविद्धेत्युपोष्येति, तात्पर्यार्थः । पञ्चविधोपवास विधानं तु शुक्लपक्षविषयमिति । यदाहरापस्तम्भवचनात् । नाप्यर्थात् १ प्रतिभासत इति । उत्प्रेक्षामात्रमुपेक्षणीयमिति न संयोगः । फलदमिति मीमांसा वचनात् ।)

---

१ नार्थात् प. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ब्रह्मवैवर्ते—

चतुर्थीसंयुता यातु सा तृतीया फलप्रदा ।
चतुर्थी तु तृतीयायां महापुण्यफलप्रद ॥३५॥

कर्तव्या विबुधैर्यत्नाद् गणनाथ सुतोषणे[१]
गणनाथं सुतरां तोषयातीति गणेश्वरः ॥३६॥

व्रतसंबन्धिनीतृतीयायुक्तायाश्चतुर्थ्या विधानात् । तस्माद् विनायक व्रते चतुर्थी तृतीयायुक्तैवोपोष्यः[२] शिष्टसमाचारश्च तथैव दृश्यते । अन्य-देवता सम्बन्धिनी चतुर्थी परिविद्धोपोष्येत्यविरोधः ।

गारुडपुराणे—

अङ्गारकेण सयुक्तो गणनाथो यदा भवेत् ।
गणभौमेति विख्याता पूर्वा वा यदि वा परा ॥३७॥

अभीष्टदायिनीनाम चतुर्थी सा प्रकीर्तिता ।
गणेश पूजनीयश्च घृतयज्ञं समाचरेत् ॥३८॥

उदयास्तमयोर्मध्ये पक्वान्नैर्विविधैस्तथा ।
भोजयेदागतान सर्वांश्चातुर्वर्ण्य महीयते ४ ॥३९॥

सर्वान् कामानवाप्नोति ब्रह्मणो वचनं यथा ।
भौमस्य प्रीतये तद्वद् दद्याद् गोमिथुनं नर ॥४०॥

सप्तजन्मकृतं पापं दानादेव विमुच्यते ।
एतद् गणेश्वरव्रत व्यतिरिक्तविषयम् ।

---

१ गणनाथमुपोषिणाम् अ क. । २ व्रतसंबन्धिन्यांस्तृतीया युक्तायाश्चतुर्थ्या विधानात् अ. क. । ४ तृतीयायुतैवोपोष्या पू. । ४ प्र महीपते क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पञ्चमीनिर्णयः

पञ्चमी तु प्रकर्तव्या षष्ठ्या युक्ता तु नारद ।
नहि षष्ठी नागविद्धा कर्तव्या च कदाचन ॥४१॥ इति ।

तन्नागपूजा विधेयमेकभक्तं वा

षष्ठी

नागविद्धा तु या षष्ठी शिवविद्धा तु सप्तमी ।
दशम्येकादशी विद्धा हन्ति पुण्यं पुराकृतम् ॥४२॥

तथा–

तृतीयैकादशी षष्ठी, अष्टमी च चतुर्दशी ।
कर्तव्या परसंयुक्ता अपराः पूर्वसंयुताः ॥४३॥

षष्ठ्येकादश्यमावास्या पूर्वविद्धा तथाष्टमी ।
सप्तमी शिवविद्धा च नोपोष्यं तिथिपञ्चकम् ॥४४॥

नागविद्धा तु या षष्ठी दशम्येकादशी तथा ।
भूतविद्धा सिनीवाली न तु तत्र व्रतं चरेत् ॥४५॥

नागविद्धा तु या षष्ठी तामुपोष्यन्ति ये नरा ।
सन्तानाः सन्ततं तेषां नश्यन्ति पूर्वजैः सह[1] ॥
षष्ठ्यश्चैककला यत्र तत्र सन्निहितो रविः ॥४६॥

तत्र क्रतुशतं पुण्यमष्टम्यां पारणेन तु ।

---

१ सन्तानं तेषां नश्यन्ति पूर्वजै सहेति योज्यम् अ. क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तत्र हरिव्रतम्

षष्ठ्याश्चैककला यत्र परतः सप्तमी भवेत् ।
उपोषितव्या यत्नेन सा वृद्धिस्वर्गदायिनी ॥४७॥

षष्ठी च सप्तमी चैव रात्रिशेषे यदाऽष्टमी ।
त्रिस्पृशानाम सा प्रोक्ता तथा चैकादशी पुनः ॥४८॥

शुद्धा तु सप्तमी ब्रह्मन् उपोष्या फलकाङ्क्षिभिः ।
अष्टम्यां पारणं कुर्याद् व्रतमेतन्नराधिपः ॥४९॥

नागविद्धा तु या षष्ठी नोपोष्या चेति भारत ।
सगरेण कृता पूर्वं पञ्चम्यां सह भारत ॥५०॥

हताः पुत्राः सहस्राणि तस्माद्विद्धां न कारयेत् ।
कला काष्ठा निमेषोऽपि यदि स्यादपरेऽहनि ॥५१॥
षष्ठ्यां कथंचिद्विप्रेन्द्र सैवोपोष्या प्रयत्नतः ।

कपिला षष्ठी

मासे भाद्रपदे पक्षे कृष्णे षष्ठ्यां तु भूमिजे ।
सा ज्ञेया कपिला षष्ठी तिथिः परमदुर्लभा ॥५२॥

न केवलायां षष्ठ्यां तु न भोगस्कन्धयोगयोः ।
संयोगेन चतुर्णां हि निर्दिष्टा परमेष्ठिना ॥५३॥

चन्द्रषष्ठी

तद्वद् भाद्रपदे मासि षष्ठ्यां पक्ष सितेतरे ।
चन्द्रषष्ठी तत्र कुर्यात् पूर्वविद्धा प्रशस्यते ॥५४॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चन्द्रोदये यदा षष्ठी पूर्वे वा प्यपरे हनि ।
चन्द्रषष्ठ्यसिते पक्षे सैवापोष्या प्रयत्नतः ।।५५।।

पञ्चमीवेधसंयुक्ता षष्ठी त्याज्या सदा बुधैः ।
कृष्णां भाद्रपदे षष्ठीं सवेधां समुपोषयेत् ।।५६।।

गौरी सौरी तथा दुर्गा अव्यक्ता च महेश्वरी ।
पूर्वविद्धा न कर्तव्या कर्तव्या परसंयुता ।।५७।।

गौरी तृतीया । सौरी षष्ठी । अव्यक्ता एकादशी । महेश्वरी चतुर्दशी । अथवा सौरी । किं च

नागविद्धा तु या षष्ठी रुद्रविद्धो दिवाकरः ।
कामविद्धो भवेद् विष्णुर्नग्राह्यास्तेन वासराः ।।५८।।

इति नाग पञ्चमी । रुद्र, अष्टमी । दिवाकर सप्तमी । काम त्रयोदशी । विष्णु द्वादशी । एतेन विमुक्तम् । चन्दनषष्ठी पूर्वविद्धा कार्या । अपराः परसहिता इति ।।

अथ सप्तमी

सप्तमी नाष्टमी युक्ता न सप्तम्या युताष्टमी ।
सर्वेषु व्रतकल्पेषु अष्टमी परतः शुभा इति । ।।५९।।

ब्रह्मवैवर्त्ते । सप्तम्या अष्टमी विद्धायाः[1] प्रतिषेधः । षण्मुन्योरिति । युग्म वाक्यात् षष्ठीयुक्ता सप्तम्युपोष्या । अस्य वाक्यस्योपवास एव विषयः पूजादि ।

---

१ अष्टमीमिश्रायाः अ. क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथाचलासप्तमी

सूर्य ग्रहण तुल्या स्यात् शुक्ला माघस्य सप्तमी ।
अरुणोदय वेलायां तस्यांस्नानं महाफलम् । ६०।।

माघमासस्य सप्तम्यामुदयत्येव भास्करे ।
विधिवत्तु कृतं स्नानं महापातकनाशनम् ।।६१।।
सापि षष्ठी विद्धा न कार्या ।

अथाष्टमी

नहि सप्तमी विद्धाष्टमी[1] कार्या । वसुरन्ध्रयोरित्यनेन च नवमी विद्धाकार्या । एतच्च शुक्लपक्षाभिप्राययुक्तम्—
शुक्लपक्षेष्टमी चैव शुक्लपक्षे चतुर्दशी ।
पूर्व विद्धा नतर्कव्या कर्तव्या पर संयुता ।।६२।।

युक्तपादा चतुर्दशीति वा पाठः । कृष्णपक्षे पूर्वविद्धैवोपोष्या—
(कृष्णपक्षेष्टमी चैव कृष्णपक्षे चतुर्दशी ।
पूर्व विद्धा च कर्तव्या) पर विद्धा न कुत्रचित् ।।६३।।

यत्तु शुक्लपक्षेऽष्टम्याः पर विद्धाया एवमुक्तं तद्दुर्वाष्टमी व्यतिरिक्त-विषयं । सुमन्तुः—
श्रावणी दुर्गानवमी दुर्वा चैव हुताशनी ।
पूर्वविद्धा तु कर्तव्या शिवरात्रिर्वलेर्दिनम् ।।६४।।

अष्टमी नवम्योर्युग्मत्वं यथोक्तम्—
अष्टम्या नवमी विद्धा नवम्या चाष्टमी तथा ।
अर्धनारीश्वर प्राया, उमामाहेश्वरी तिथिः ।।६५।। इति ।

---

१ समीमिश्राष्टमी अ. क. । चापान्तर्गतः पाठ प्र पुस्तके नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ दूर्वाष्टम्यां विशेषः—

शुक्लाष्टमी तिथिर्यातु मासि भाद्रपदे भवेत् ।
दूर्वाष्टमीति सा ज्ञेया नोत्तरा वा विधीयते ।।६६।।

उत्तरा श्रेष्ठा विज्ञेया । न पुनर्नवम्या सह । दूर्वा चैव हुताशनीति वचनात्[1] ।

प्राप्ते भाद्रपदे मासि शुक्लाष्टम्यां च सुव्रत :
दूर्वायामर्च्चयेद्भक्त्या[2] ज्येष्ठां मूलञ्च वर्जयेत् ।।६७।।

ऐन्द्रर्क्ष पूर्वं या दूर्वा हन्त्यपत्यानि नान्यथा ।
भर्तुरायु हरो मूले तस्मात्तां परिवर्ज्जयेत् ।।६८।।

मुहूर्त्ते रोहिण्यष्टम्यां पूर्वा वा यदि वा परा ।
दूर्वाष्टमी तु सा कार्या ज्येष्ठां मूलं विवर्जयेत् ।।३९।।

पतिं हन्तीहवै मूलं ज्येष्ठां पुत्र विनाशिनी ।
एवं विज्ञाय कर्तव्या दुर्वार्च्चनविधिं शुभम् ।।७०।।

कर्तव्या, एक भक्तेन ज्येष्ठा मूलं यदा भवेत् ।
पूर्वमभ्यर्च्चयेद्भक्त्या न वन्ध्यं दिवसं नयेत् ।।७१।।

यदिज्येष्ठामूले भवतः तदा अग्निपक्वमस्नीयादिति गम्यते—

या न पूजयते मोहाद्दूर्व्वामिह यथाविधि ।
त्रिषु जन्मेषु वैधव्यं लभते सा न संशयः ।।७२।।

---

१ पूर्वविद्धैव हुताशनीति वचनात् प्र. ।
२ दूर्वामभ्यर्चयेद् अत्त्या अ. । दुर्वांम समर्चयेद् भक्त्या प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तस्मात्तां पूजनीया स्यात् प्रतिवर्षं प्रपूजनैः[1] ।
सुखसन्तानजननी भर्त्तुःसौख्यकरी सदा ।।७३।।

सुप्ते नारायणे देवे पूर्वायां कमला स्थिता ।
कुम्भे तां स्थापयित्वा तु या पूजयति सुव्रता ।।७४।।

रक्ताम्बरधरा साध्वी भर्त्तुराज्ञापरायणा ।
आवाह्य कमलां देवीं लक्ष्मीनाम उदीरयेत् ।।७५।।

पुष्पैर्धूपैश्च नैवेद्यैर्गन्धवासोभिरेव च ।
द्विपलं सप्तवै दद्यात् सांकुरं तं नियोजयेत् ।।७६।।

आणूघण्टाजमाषांश्च तुवरीश्च कुलुत्थकान् ।
तथा मुद्गान् मसूरांश्च दद्याद्भोज्या वधूजनैः ।।७७।।

अथ महासप्तमी

ततोनीराजनं कर्म्म प्रतिपाद्याश्विने सिते ।
प्रारम्भो नवरात्रस्य हित्वा चित्रां च वैधृतिम् ।।७८।।

देवीपुराणे—

अहं भद्रा च भद्राहं नावयोरन्तरं क्वचित् ।
सर्वसिद्धिं प्रदास्यामि भद्रायामर्चिता ह्यहम्[2] ।।७९।।

भद्राया भद्रकाल्याश्च मध्ये स्यादर्चनक्रिया[3] ।
तस्माद्वै सप्तमी विद्धा कार्या दुर्गाष्टमी बुधैः ।।८०।।

---

१ पूजयेत् अ. क. । २ भद्रायामर्चितामहम् प्र. ।
३ मध्येस्याद्दर्शनक्रिया अ. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विष्टिं त्यक्त्वा महाष्टम्यां मम पूजां करोति यः ।
तस्य पूजाफलं नस्यात् तेनाहमपमानिता ॥८१॥

मूलेषु स्थापनं देव्याः पूर्वाषाढासु पूजयेत् ।
उत्तरासु बलिं दद्यात् श्रवणेचापराजिता[1] ॥८२॥

हयानां शान्तिकं स्नानं शस्त्रघातं च तत्वतः ।
भद्रायामेव कर्तव्यं तस्मात्पूर्व्वं विधीयते ॥८३॥

सप्तम्यां च तथाष्टम्यां नवम्यां चैव चन्द्रमाः ।
पूजयेद्योगिनीं तत्र हरिपादे[2] प्रवर्त्तनम् ॥८४॥

आदिभागे निशाभागे श्रवणस्य यदा भवेत् ।
संप्रेषणं[3] तदा देव्याः दशम्यां च वरोत्सवम् ॥८५॥

रौद्राद्यपादेऽश्वयुजि प्रसुप्ता विवोधिता हैमवती सुराद्यैः ।
मूलेऽर्च्चिता तिष्ठति सा नवम्यां हर्याद्यपादो जगतो हिताय ॥८६॥
एतत्कृष्णपक्षे देव्याः प्रवोधनार्थविषयम्[4] ।

ब्रह्माण्डपुराणे—

सप्तम्यां नृप पूजयेद्भगवतीं चण्डां प्रचण्डाकृतिं ।
अष्टम्यामुपवास संयतमना भक्तः समाराधयेत् ॥८७॥

तामुद्दिश्य पशून्निहत्य रुधिरैः कृत्वा नवम्यां बलिम् ।
संप्राप्ता श्रवणे तिथिञ्च दशमीं संपूज्य संप्रेषयेत् ॥८८॥

१विसर्जन मितिपाठः २श्रवणः ३विसर्जनम् ४प्रवोधनविषयम् प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एतेन किमुक्तं भवति ।। प्रायेण तिथिद्वैधे पूर्व्वविद्धाष्टमी भवति । तिथित्रयं विदार्येति । उक्तस्यान्यथाकरणे दूषणमाह ।।ब्रह्माण्डपुराणे ।।

योन्यथा कुरुते राजन् दुर्गोत्सवविधिं पुनः ।
तस्य राज्यप्रजानाशमवाप्नोति न संशयः ।।८६।।

उक्त नक्षत्राणामभावेपि यथा दशम्यां पशुवधो न भवति । एकादश्यां च विसर्ज्जनं तथा तिथि सद्भावो ग्राह्यः ।

यथाह लल्लः—

तिथिः शरीरं तिथिरेव कारणं
तिथि प्रमाणं तिथिरेव साधनम् इत्यादि ।

किञ्च—

सप्तम्यामुदिते सूर्ये परत श्चाष्टमी भवेत् ।
तत्र दुर्गोत्सवं कुर्य्यान्नकुर्यादपरेऽहनि ।।९०।।

शिवा च शिवदुर्गा च दुर्भरा च हुताशनी ।
वत्सपूजा वटुश्चैव कर्तव्या प्रथमेऽहनि ।।९१।।

ब्रह्माण्डपुराणे—

यदाष्टमीं च संप्राप्य अस्तं याति दिवाकरः ।
तत्र दुर्गोत्सवं कुर्यान्नकुर्यादपरेऽहनि ।।९२।।

ब्रह्मवैवर्त्ते—

कुलं पुत्रं पशून् राज्यं दीर्घमायुस्तथैव च ।
प्रथमा चाष्टमीपूज्या यदीच्छेच् श्रेयमात्मनः ।।९३।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दुर्भिक्षं तत्र जानीयाद् नवम्यां यत्र पूजयेत् ।
देवी निवसनं यत्र नवम्यां च नराधिप ।।
राज्यपीडा भवेत्तत्र नात्र कार्या विचारणा ।।९४।।

नन्दायां दर्शनं रक्षावर्तिदानं[1] दशासु च[2] ।
भद्रायां गोकुले क्रीडा प्रतिपद्वह्नि वर्ज्जनम् ।।९५।।

देव्याः प्रवेशकाले तु अष्टमी नैव लभ्यते ।
पूर्वेऽहनि तदाकुर्यादिति ब्रह्मर्षयो विदुः ।।९६।।

धनुः संस्थे निशानाथे पूजयेदम्बिकां बुधः ।
नैरृत्ये चाम्बुदैवत्ये नान्यथा स्यात्कथंचन ।।९७।।

कन्यां समाश्रिते भानौ यस्मान्मूले न चाष्टमी ।
सा महत्यष्टमी ज्ञेया न तु या नवमीयुता ।।९८।। इति ।

अथ चौलोत्तरे–

आश्विनस्य सिताष्टम्यामर्द्धरात्रे तु पार्वती ।
भद्रकाली समुत्पन्ना पूर्वाषाढसमायुते ।।९९।।

तत्र संपूजयेद्दुर्गां जागरैर्वलिसंयुताम् ।
अन्यथा नैव कर्तव्यामित्याज्ञा पारमेश्वरी ।।१००।।

अष्टम्युपेतां नवीं नरेन्द्र ये प्राप्य मूढाः पशु घातयन्ति[3] ।
देव्योनगृह्णन्ति वलिं न पूजामसृक्प्रलिप्ता च भवेद्धरित्री ।।१०१।।

---

१ रक्षावलिदानं क. । रक्तावर्तिदानं प्र. । २ जयासु च पा ।
३ 'पशून् घातयन्ति' इति भाव्यम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ब्रह्मवैवर्त्ते —

श्राश्विनस्यसिताष्टम्यां पूज्यादेवी प्रयत्नतः ।
महिषोरभ्रच्छागाश्च दातव्याः पशुकांक्षिभिः ।।
बलेरुत्सर्ज्जनं चापि कर्त्तव्यं हिंसनं तथा ।।१०२।।

अत्र उत्सर्गो ब्राह्मणास्तिथयः । तथा च देवीपुराणे ।

अथ महालक्ष्म्यष्टमी

पद्मपुराणे — दत्तात्रेय कार्त्तवीर्यसम्वादे —

कन्यागेऽर्के समारभ्य कर्त्तव्यं च श्रियोऽर्चयेत् ।
हस्तप्रान्तदलस्थेऽर्के[१] तत्र तत्र क्षमापयेत् ।।१०३।।

ब्रह्माण्डपुराणे —

सप्तमी पुष्यसंयुक्ता कर्त्तव्या चाश्विनेऽष्टमी ।
दुर्गा तावसिते पक्षे वहुले शीघ्र तं शुभम् ।।१०४।।

वहुले—कृष्णपक्षे । कन्याऽगेर्के समारम्य हस्तनक्षत्रस्य प्रान्तवले समाप्य हस्तस्य तृतीय चतुर्थ चरणस्थिते सूर्येणप्राप्येत्यर्थः —

अर्द्धरात्रिमतिक्रम्य वर्धते चोत्तरातिथिः ।
तदा तस्यां तिथौ कार्यं महालक्ष्मीव्रतं शुभम् ।।१०५।।

पूर्वा वा परविद्धा वा ग्राह्या चन्द्रोदये सदा ।
त्रि मुहूर्त्ता च सा ग्राह्या पुरतश्चोर्ध्वगामिनी ।।१०६।। इति ।

त्रिमुहूर्त्तं दिवसस्य पंचमः सायं लक्षणकाल स्तत्र गामिनी यद्यष्टमी भवति तदा सा योज्येत्यर्थः ।

---

[१] हस्तप्राप्तबलस्थेऽर्के वा ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुत्रसौभाग्यनाशाय, अन्यथा च प्रकीर्त्तिता ।
तस्मात्सर्वप्रयत्नेन त्याज्या कन्यागते रवौ ॥१०७॥

विशेषेण परित्याज्या नवमी द्वेषिता यदि ।
त्रिदिने वा च मे चैव अष्टमी नोपवासयेत् ॥१०८॥

पुत्रघ्नी नवमी विद्धा प्राह हस्तार्धगे रवौ ।
धर्मघ्नी त्रिदिने प्रोक्ता त्याज्या वै वा मे हिसा ॥१०९॥

स्वं द्रव्यं घ्नन्तीति स्वघ्नी ।

पूजनीया प्रयत्नेन अष्टम्याञ्च व्रते श्रियः ।
दोषै श्चतुर्भिः संत्यक्ता सर्व संपत्करी तिथिः ॥११०॥

एका त्रिदिनं एका तिथिर्वार त्रयं स्पृशति त्रिदिनम् द्वितीया तृतीयः पर लक्षणः । चतुर्थो हस्तः प्राग्दलमनाख्यः ।

वामनपुराणे —

कृष्णाष्टमीमाश्वयुजि प्राप्य तामुपवासयेत् ।
सप्तमीशेषसंयुक्ता यावन्नोदयते शशी ॥१११॥

श्रियोर्चनं भाद्रपदे सिताष्टमीप्रारभ्य कन्यार्कसमागते च ।
समाप्यते तत्र तिथौ च यावत् तिग्मांशु पूर्वार्द्ध गते युवत्यः ॥११२॥

गरुडपुराणे —

महालक्ष्मी व्रतं नाम आश्विने बहुले चरेत् ।
षोडशैतानि पक्षीन्द्र गीतवाद्यादिना यदि ।
रात्रौ जागरणं कुर्यात् दद्याद् विप्राय दक्षिणाम् ॥११३॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ जन्माष्टमी

विष्णु :—

प्राजापत्यर्क्षसंयुक्ता कृष्णे नभसि चाष्टमी ।
मुहूर्तमपि लभ्येत उपोष्या सा महा फला ॥११४॥

अर्द्धरात्रादधश्चोर्द्धं कलया तु यदा भवेत् ।
जयन्तीनाम सा प्रोक्ता सर्व पापहरा परा ॥११५॥

रोहिण्यामनिमित्तं चैतस्यामकुर्वत्यातिनिरयं यावदिन्द्रा श्चतुर्दशेति-वाक्यात् —

अर्धरात्रे तु रोहिण्यां यदा कृष्णाष्टमी भवेत् ।
तस्यामभ्यर्चनं सौरेर्हन्ति पापं त्रिजन्मकम् ॥११६॥

सा यदि रोहिणीरहिता तदा सम्पूर्णां तामुपोष्य द्वितीयेऽह्नि तिथ्यन्ते पारणं विधेयम् । सा यदि रोहिणीसहिता पूर्वेऽह्नि परेऽह्नि वा भवति तामुपवासयेत् ।

मुहूर्त्तमप्यहोरात्रे यस्मिन्नुवतं[1] हि लभ्यते ।
कर्तव्या सा प्रयत्नेन पूर्व विद्धां च वर्जयेत् ॥११७॥
जयं पुण्यं च लभ्येत कारयेदुत्तरां च । इति ।

विष्णुरहस्ये —

कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी ।
पूर्वविद्धा तु कर्त्तव्या परविद्धा न कुत्रचित् ॥११८॥

इत्यादि वचनेभ्यो यदि विद्धापि कापि रोहिणीसहिता पूर्वस्मिन्नपर-स्मिन्दिने तदा पूर्वविद्धैव कार्या ।

---

१ यस्मिन् युक्तं हि. क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कार्या विद्धापि सप्तम्यां रोहिणीसहिताष्टमी ।
तत्रोपवासं कुर्वीत तिथिभान्ते च पारणम् ॥११९॥

तथाच --

कृष्णाष्टमीत्येव निराद्धनीया दुर्वाष्टमी चाश्विनशुक्लपक्षे ।
एताः सशल्यास्तिथयश्चकार्या शेषाः प्रशस्याः परि वर्जनीयाः ॥१२०॥

इति ।

यदा उदये किञ्चिन्मात्राप्यष्टमी रोहिणी युक्ता उपरि सकला च नवमी सोमबारे वा बुधवारे वा भवति तदाप्यष्टमी स्वल्पाप्युपोष्या न पूर्वा ।

यथोक्तं स्कन्दपुराणे —

उदये चाष्ठमी किञ्चित् सकला नवमी भवेत् ।
यदा च बुधसंयुक्ता प्राजापत्यर्क्षसंयुता ।
अपि वर्षशतेनापि लभ्यते मानवैर्विभो ॥१२१॥

पद्मपुराणे —

प्रेतयोनिगतानां तु प्रेतत्वं नाशते[1]परैः ।
यैः कृता श्रावणे मासि अष्टमी रोहिणी युता ॥१२२॥

किं पुनर्बुधवारेण सोमेनापि विशेषतः ।
किं पुर्ननवमीयुक्ता कुल कोट्या स्तु मोक्षदा ॥१२३॥

दिवा वा रोहिणी यत्र मृगशीर्षं ततो निशि ।
सापीह करणीया च पूर्वविद्धापि पार्थिव ॥१२४॥

---

१ नाशने प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अन्यच्च —

सप्तमी नवमी यत्र यदा भवति रोहिणी ।
त्रयाणां संगमो यत्र मुक्तिस्तत्र न संशयः ॥१२५॥

अथ नवमी

नवमी पूर्व विद्धा ग्राह्या वसुरन्ध्रयोरिति । युग्माभिधानात् ॥

यथाह ब्रह्मवैवर्त्ते --

अष्टम्या नवमी विद्धा कर्तव्या फलकांक्षिभिः ।
न कुर्यान्नवमी सापि दशम्यां तु कदाचन ॥१२६॥ इति

विशेषतश्च नवमी, अतएव न विसृता यतः सा महासप्तमी कथयत एव कथिताश्मन्तकनवमी प्रभृतयश्चैकभक्तैव कार्या ॥

अथ दशमी

दशमी यदि, आद्योदयात्प्रवृत्ति रात्रिप्रति एकादशी विद्धा ॥ अथ नवमी विद्धा ।

द्वितीयामुदयं प्राप्ता तयोरिच्छया एका, उपवास ब्रते ग्राह्यायथोक्तम्
सम्पूर्णा दशमी ग्राह्या परया पूर्वयापि वा ।
युक्ता न दूषिता यस्मादत सर्वतो .. .. .. ॥१२७॥

यदात्वेकस्मिन्दिने उपयोगिनी लभ्यते । तदा दशमी चैव कर्तव्या सदुर्गा द्विज सत्तमेति ।

विजयादशमीनिर्णयः

काश्यपः—

उदये दशमी किञ्चित्संपूर्णैकादशी यदि ।
श्रवणर्क्षे यदा काले सा तिथिर्विजयाभिधा ॥१२८॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ कृष्णैकादशीनिर्णयः

यथा भविष्योत्तरे । उभय द्वादशीप्रारम्भे युधिष्ठिरवचनात् —

कृष्ण कृष्णा नमेख्याता द्वादशी केन हेतुना ।
किं सा न ते प्रियादेव किं चाख्यातुं न युज्यते ॥१२९॥

कृष्णउवाच—

यथा शुक्ला तथा कृष्णाद्वादशी मे प्रिया सदा ।
शुक्ला गृहस्थैः कर्तव्या गो सन्तानविवर्द्धिनी ॥
मुमुक्षुभि स्तथा कृष्णा तेन ते नोपदेशिता ॥१३०॥

तथाच—

एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ।
ब्रह्मचारी यतिश्चैव शुक्लासेव सदा गृही ॥१३१॥

एकादश्यां न भुञ्जीतेति पर्युदासो भोजनसंकल्पः । उपवासाख्यं व्रतं विधत्ते । तत्र च स्मृत्यन्तरोक्तिविशेषः, स्मृत्यन्ते गृह्यत । गृह्यान्तरोक्तो गृहान्तरोक्ती यथैकस्यां शाखायां, अग्निहोत्रादि विहितं । तदन्यस्यामपि विधीयते, एकादशीमुपोष्येत इति विशेषः ।

अतः कृष्णा वा शुक्ला वा कर्तव्यैव वानप्रस्थयतिधर्मोयमित्यर्थ विशेषः । एतेन वनस्थेन यतिना च द्वे द्वे, उपोष्ये न गृहस्थेन । यदुक्तं

कृष्णेनैव—

नित्या शुक्ला समाख्याता कृष्णा नैमित्तिको स्मृता । ।
शुक्ला पार्थ सदा कार्या न त्याज्या संकटेष्वपि ॥१३२॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निमित्तेभवा नैमित्तिकी शयनी, बोधिनी मध्य वर्तित्वात् —

शयनीबोधिनीमध्य या कृष्णैकादशी भवेत् ।
सैवोपोष्या गृहस्थेन नान्या कृष्णा कदाचन ।।१३३।। इतिवचनात् ।

अत्रानुवादो नारदोक्तः—

संक्रान्तावपवासं तु कृष्णैकादशीवासरे ।
सूर्यचन्द्रग्रहे चैव न कुर्यात्पुत्रवान्गृही ।।१३४।।

इन्दुक्षयेऽर्कसंक्रान्तावसितैकादशीदिने ।
व्यतीपाते कृतश्राद्धे नो पोष्ये[१] त्पुत्रवान्गृही ।।१३५।।

इन्दुक्षये- इत्यादिनी वहुनि वचनानिसन्ति । यानि श्रुत्वा गृहिणो वैष्णवे व्रते विचिकित्सा स्यात् । ततो नो क्तानि कृष्णैकादश्यामुपवास प्रतिषेध इति । यथा च त्रिस्पृशायां । यथा—

एकादशी द्वादशी च रात्रिशेषे त्रयोदशी ।
उपवासं न कुर्वीत पुत्रपौत्रसमन्वितः ।।१३६।।

एकादशी द्वादशी च रात्रिशेषे त्रयोदशी ।
अहस्पृश्यदहोरात्रं तं नोपोष्यं सुतार्थीभिः ।।१३७।।

तत्र वायुपुराणे—

उपवासनिषेधे तु भक्षं किंचित्प्रकल्पयेत् ।
नदुष्यत्युपवासेन उपवासफलं लभेत्[२] ।।१३८।।

---

[१] नच पाष्यं प्र. । [२] लभ धातुरात्मनेपदी वर्तते । अतो 'लभते'

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भक्ष प्रकल्पना च तत्रैवोक्ता—

नक्तं हविश्यान्नमनोदनं[१] वा फलं तिलक्षीरमथाम्बु वाज्यम् ।
यत्पंचगव्यं यदि वा च वायुः प्रशस्तमत्रोत्तरमुत्तरं यत्[२] ॥१३९॥

गृहीपुत्रवान् यदि कृष्णैकादश्या उपवासेन तदानेन प्रकारेण युक्तवचनानीत्यनिर्णीतेत्यर्थः । समुखप्रतिप्रतिपत्तये कथ्यते- इत्यर्थः ।

सर्वेषां सर्वदा पक्षयोरुभयोरपि भोजननिषेधात् गृहस्थः शुक्लायामेव शयनीबोधिनीमध्ये कृष्णायामपि पुत्रवतो गृहस्थस्य तस्यामेव कृष्णायां किञ्चित्प्रागुक्तमध्ये नक्तं कल्पयित्वोपवास कर्तव्यो भवति । वोधिन्या उत्तरासु कृष्णासु पुत्रवत : पुत्रयोर्भोजननिषेधमात्रमेव वा यस्तु पुत्रवतो व्रतनिषेधः स संक्रान्त्यादि —

[३]निमित्तस्योपवासस्थं निषिद्धोऽयमुदाहृतः ।
नानुषंगकृतो ग्राह्यो यतो नित्यमुपोषणम् ॥१४०॥ इति ।

तन्निमित्तत्वादित्यवारादिनिमित्तस्य तस्यायं प्रतिषेधो न पुनरेकादश्यादित्यवाराद्ययननिबन्धनोपवास निषेधः । संक्रान्त्यादि निमित्तस्योपवासः सम्वर्त्तेनोक्तः ।

अमावास्या द्वादशी च संक्रान्तिश्च विशेषतः ।
एता प्रशस्तास्तिथयो भानुवार स्तथैव च ॥१४१॥

अत्र स्नानं जपो होमो ब्राह्मणानां च भोजनम् ।
उपवासस्तथादानं एकैक पावनं स्मृतम् ॥१४२॥

---

१ मथोदनम् प्र. २ मत्रोत्तरमेव यद्वत् ।
३ निमित्तस्थोपवासस्य निषेधोऽय मुदाहृतः प्र ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तथा—

एकादश्यां यदाराजन् वारश्च सवितुर्भवेत् ।
उपोष्या सा महापुण्या पुत्रपौत्र प्रवर्धिनी ॥१४३॥

श्राद्धं कुर्यात्तु यो विप्रो न भुङक्ते पितृ सेवितम् ।
हव्यं देवा न गृह्णन्ति कव्यं च पितरस्तथा ॥१४४॥

एतदुपवासव्यतिरिक्तविषयम् ।

उपवासो यदानित्यः श्राद्धं नैमित्तिकं भवेत् ।
उपवासं तदा कुर्यादाघ्राय पितृसेवितम् ॥इति॥१४५॥

यद्यप्येवं तथापि मुनीन्द्रैरेकादशीद्वयेऽपि पुत्रवतो गृहिण उपवास उच्यते ।
तदाह—

न शङ्खेन पिवेत्तोयं न हन्यात्मत्स्यसूकरौ ।
एकादश्यां पुत्रवतो गृहिणोऽपि न दुष्यति ॥१४६॥

तदा यदि शङ्खोदक निवृत्तिः वानप्रस्थयतिनोरेव । न गृहिणस्तु कृष्णैकादश्यां निवृत्तिस्तु तथापि च वैष्णवव्रतेक्रियमाणे यदि पुत्रादिभिर्लाभः केनकर्मणा भवति तत्र पुत्राणां सम्पदा श्रियः सन्ततिविच्छेद इत्युक्तमस्ति । अतः पुत्रवतामुभयद्वादशीव्रताभिधानम् । ननु पुत्रवतां भवति । किन्तु पुत्रसन्ततिकामिनां कालप्राप्तफलानामेव भवति । प्राप्तकामानां तस्मात्पुत्रवतामेवोभयद्वादशीव्रतविधानं न विरोधोऽस्ति ।

किञ्च– "अहस्पृष्यदहोरात्रं तत्रोपोष्यं सुतार्थिभि' इत्यादि वाक्येषु कामना विशिष्टेषु पुत्रवतामेवाधिकार इति निश्चीयते ।

१अहस्पृग् यदहोरात्रं तत्रोपोष्यं सुतार्थिभिः पु॰ क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संक्रान्तौ रविवारे च सूतके मृतके पिवा ।
एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ॥१४७॥

इत्यादिवाक्येषु पृत्यभिज्ञानात् पुत्रवत एवाभिधानम् । न तस्यापि पुनर्विषयाभिधानमस्ति । तथाच–

यदिच्छेद् विष्णुनावासं यदित्छेत्पुत्र सन्ततिम् ।
एकादश्यां न भोक्तव्यं पक्षयोरुभयोरपि ॥१४८॥

परित्यजति यो मोहादेकादश्यो सितासित ।
उपवासं स मूढात्मा विष्णुलोकं न गच्छति ॥१४९॥

इत्यादि वाक्यानि निष्पादयितुं समर्थोऽहं ग्रन्थ गौरव भयादिति । अथ नित्यैकादशी द्वैधे निर्णयमाह तत्र नारदः–

नित्यं भक्तिसमायुक्तैः परैर्विष्णुपरायणैः ।
पक्षे पक्षेपि कर्तव्यमेकादश्यामुपोषणम् ॥१५०॥

इत्यादि वचनानि च येन पक्षद्वये, एकादश्यामुपोषणं नित्यम् । अत एवाकरणे दोषः पुराणे दर्शितः—

पूतिग्रासं स भुक्ङतेतु किल्विषं श्वान विण्मयं ।
एकादश्यां द्विजश्रेष्ठ यो भुङक्तेऽन्नं नरोऽघभाक् ॥१५१॥

भृगोरपि—

संपूर्णैकादशी यत्र पूभाते पुनरेव सा ।
तत्रोपोष्या द्वितीया तु परतो द्वादशी यदि ॥१५२॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यदा तु दशमी विद्धैकादशी च शुद्धैव त्रयोदश्यां द्वादशी नास्ति, तदा दशमी विद्धैकादशी सर्वैरुपोष्या, यथा मत्स्यपुराणे—

"विद्धा प्येकादशी कार्या परतो द्वादशी न चेत् ।

कूर्मपुराणे—

मुहूर्तं द्वादशी नस्यात्त्रयोदश्यां यदा मुने ।
उपोष्या दशमीविद्धा सदाप्येकादशी तदा ॥१५३॥

नारदोपि—

त्रयोदश्यां यदा नस्याद् द्वादशी घटिका द्वयम् ।
दशम्येकादशी मिश्रा सैवोपोष्या सदा तिथिः ॥१५४॥

दशमी शेषसंयुक्तामुपोष्यैकादशीं नरः ।
सन्दत्सरकृतेनेह नरोधर्मेण मुच्यते ॥१५५॥

इति नारदादि वचनानि तानि त्रयोदश्यां द्वादशीप्राप्तौ दशमीमिश्रैकादश्युपवासनिषेधपराणि । तथा च भविष्यपुराणे—

एकादशीं दशाविद्धां वर्धमानेपि वर्जयेत् ।
पक्षहानौ तिथेः साम्ये लङ्घयेद्दशमीयुताम् ॥१५६॥

यदा तु दशमीविद्धैकादशी द्वादशीशुद्धा त्रयोदशींनिःसरति तदा द्वादश्येव सर्वैरुपोष्या । यथाह स्कन्दपुराणे—

शुद्धैव द्वादशी ग्राह्या परतो द्वादशी यदि ॥१५७॥

वराहपुराणे—

द्वादश्यामुपवासं तु ये कुर्वन्ति च ते नराः ।
वत्स मामेव पश्यन्ति मम व्रत परायणाः ॥१५८॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भविष्येपि—

दशम्या सहिता पूर्वा रुद्यतेकादशी परा ।
उपोष्या दशमी तत्र न द्वादश्यां कथञ्चन ॥१५९॥

दशमीवेधश्च उदयात्प्रभृत्येव ग्राह्यः । यदाह गोभिलः—

विद्धोदयोदयात्पूर्वं दशम्येकादशी तिथिः ।
दानवेभ्यः प्रीणनाय दत्तवान् पाकशासनः ॥१६०॥

यदा तु पूर्वैकादशी दशमीविद्धा, उत्तरैकादश्यां च द्वादशी रात्रि शेषे च त्रयोदशी वेधशंकाभावादुत्तरैव सर्वै रुपोष्या । यथाह सौरधर्मोत्तरे—

एकादश्यां द्वादशी च तच्छेषे च त्रयोदशी ।
त्रिस्पृशा सा तिथि:प्रोक्ता सर्वपापहरा शुभा ॥१६१॥
उपवासकृतस्तत्र महापातक नाशिनी ।

भविष्ये तु । किञ्च—

एकादशीं द्वादशीयुक्तां वर्द्धमाने विवर्जयेत् ।
क्षयमार्गस्थिते सोमे कुर्वीत दशमी युताम् ॥१६२॥

एकादशी दशायुक्ता परतोपि न वर्धते ।
यतिभिर्गृहिभिश्चैव सैवोपोष्या सदा तिथिः ॥१६३॥

ऋष्यशृङ्गः—

पारणेनेह लभ्येत द्वादशी कलयापि चेत् ।
तदानीं दशमीविद्धा उपोष्यैकादशी तिथि ॥१६४॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एकादशी यदा विद्धा परतोपि न वर्द्धते ।
यतिभिर्गृहिभिश्चैव सैवोपोष्या सदा तिथिः ॥१६५॥

एकादशी न लभ्येत कलया द्वादशी भवेत्
उपोष्या दशमीविद्धा ऋषिरुद्दालकोऽब्रवीत् ॥१६६॥

दशम्यासंयुता यत्र भवत्येकादशी कला ।
दिनक्षयेपि सापुण्या न द्वादश्या कथञ्चन ॥१६७॥

तृस्पृशैकादशी यत्र तत्र संनिहितो हरिः ।
पुण्यं क्रतुशतस्योक्तं त्रयोदश्यां तु पारणम् ॥१६८॥

अत एव त्रयोदश्यां पारणकरणप्रतिषेध वाक्यम्—

तद्द्वादश्यां सम्भवन्त्यां तामतिक्रम्य त्रयोदशीपारणे वोद्धव्यमिति विद्यमानद्वादशीपारणसंभवे स्नानादिनापि नो तत्र लङ्घनीयम् ॥१६९॥

यथाह नारदीये—

अल्पायामपि विप्रेन्द्र द्वादश्यामरुणोदये ।
स्नानार्चनक्रिया कार्या होमदानादिसंयुता ॥१७०॥

तस्माच्च कारणाद्विप्रः प्रत्युषे स्नानमाचरेत् ।
पितृतर्पणसंयुक्ता स्वल्पा दृष्ट्वा तु द्वादशी ॥१७१॥

महा हानिकरी ह्येषा द्वादशी लङ्घिता नृणाम् ।
करोति धर्म हरणमस्नातेव सरस्वती ॥१७२॥ इदमेकादशीव्रतम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सूतकादपि न त्याज्यं, यथाह वराहपुराणे—

सूतके मृतके हर्षे कष्टे वा समुपस्थिते ।
परचक्रागते[1] रोगे न त्याज्यं द्वादशी व्रतम् ॥१७३॥

सूतके मृतके स्नात्वा प्रणम्य मनसा हरिम् ।
एकादश्यां न भुञ्जीत व्रतमेवं न लुप्यते ॥१७४॥

द्वादश्यां च ततो भुक्त्वा सूतकान्ते जनार्दनम् ।
पूजयित्वा विधानेन पूजयेच्च द्विजोत्तमान् ॥१७५॥

यदा तु व्याध्यादिना शरीरासामर्थ्यं तदा पुत्रादिकं कारयेत् । यथाह वराहपुराणे—

असामर्थ्ये शरीरस्य व्रतेपि समुपस्थिते ।
कारयेद्धर्मपत्नीं वा पुत्रं वा विनवान्वितम् ॥१७६॥

स्कन्दपुराणे—

भार्या भर्तुर्व्रतं कुर्याद् भार्यायाश्च पतिस्तथा ।
असामर्थ्ये तयोस्ताभ्यां व्रतभङ्गोनजायते ॥१७७॥

स्मृत्यन्तरेपि—

उपवासेष्वशक्तं च प्रसूतेरूर्ध्वं जीवितम्[2] ।

मार्कण्डेयपुराणे—

एक भक्तेन नक्तेन[3] तथैवायाचनेन च ।
उपवासेन दानेन न निर्द्वादशिको भवेत् ॥१७८॥

---

१ परचक्रागमे प्र. । २ नूर्ध्वजीविनम् क. । ३ नक्तभोजनेनेत्यर्थः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एकादशीयदा राम प्रदोष समये भवेत् ।
भवेज्जागरणं तत्र कार्तिके क्रियते नरैः ॥१७६॥

अन्यथा कुरुते यस्तु प्रयाति नरकं नरः ।
प्रस्थाप्येऽवेवमेकं स्यादेष धर्म सनातनः ॥१८०॥

अथ द्वादशी निर्णयः

तत्र ब्रम्हपुराणे--

द्वादश्यां श्रवणपृष्ट्वा कृष्णपूजां समाचरेत् ।
न तु सा तेन संयुक्ता[१] मुक्ता नैव प्रशस्यते ॥१८१॥

मत्स्यपुराणे—

इयं यद्विद्धा न चैकादशीन्यूना[२] कदाचिद्युक्ता पूर्वस्मिन्पक्षे एकादशीमुपोषितः स्नानादिकं कुर्यान्नतूपवासः ।

यथाह विष्णुपुराणे—

द्वादशी शुक्लपक्षे तु नक्षत्रं श्रवणं यदि ।
उपोष्येकादशीं तत्र द्वादश्यां पूजयेद् हरिम् ॥१८२॥

उत्तरेस्मिन्पक्षेतूपवासः, इत्येक पक्षः ।

द्वादशी श्रवणंपृष्ट्वा स्पृशेदेकादशीं तिथिः ।
स एव वैष्णवो योगी विष्णुशृङ्खलसंज्ञकः ॥१८३॥

तस्मिन्नुपोष्य विधिवद् नरः संक्षीणकिल्विषः[३] ।
प्राप्नोत्यनुत्तमां सिद्धि पुनरावृत्तिदुर्लभम् ॥१८४॥

---

१ न तु साधनन समायुक्ता प्र. ।

२ इयं च विद्धा नैकादशीन्यूना प्र । ३ स क्षीणकिल्विषः ज. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आ.भा.का. सितपक्षेषु[1] मैत्रश्रवणरेवती ।
संगमे न हि भोक्तव्यं द्वादशद्वादशीर्हरेत् ॥१८५॥

कृते पुनर्वसुर्ज्ञेयत्रेतायां मैत्रमेव च ।
रेवत्यां द्वापरे चैव कलौ श्रवण उच्यते ॥१८६॥

किञ्च—

श्रवणर्क्षेण संयुक्ता द्वादशी यदि लभ्यते ।
उपोष्या द्वादशी तत्र त्रयोदश्यां तु पारणम् ॥१८७॥

एकादशीमुवोष्यैव द्वादशीं समुपोषयेत् ।
न चात्र विधिलोपः स्यादुभयोर्दैवतं हरिः ॥१८८॥

ननुः "असमाप्ते व्रते पूर्णे नैव कुर्याद्व्रतं नरः"। तत्कथमुपवासे क्रियमाणे पूर्वव्रतस्यासमाप्ति लक्षणे न दोषः। एकादशी द्वादशी परस्परैकस्यविष्णोर्दैवतत्त्वात् । अयं च विशेषः—श्रवणस्यैकादश्यां वामनः पूज्यः श्रवण द्वादश्यां जनार्दन इति ॥

अथ त्रयोदशी

कृष्णपक्षे या त्रयोदशी सा न परत उपोष्या—

षष्ठचष्टमी तथादर्शः कृष्णपक्षे त्रयोदशी ।
परविद्धा तु कर्तव्या अपराः पूर्वं संयुता ॥१८९॥इति।

अन्यच्च—

एकादशी तृतीया च षष्ठी चैव त्रयोदशी ।
पूर्वं विद्धा तु कर्तव्या यदि स्यादपरे हनि ॥१९०॥ इति ।

---

१ आषाढभाद्र कार्तिक शुक्लपक्षेष्वित्यर्थः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्रयोदश्यपि कर्तव्या द्वादशी सहिता मुने ।
भूत विद्धा नकर्तव्या दर्शः पूर्णा कदाचन ॥१९१॥ इति ।

ब्रह्मवैवर्त्ते—

"द्वितीया पञ्चमी विद्धा दशमी च त्रयोदशी" ।
चोपवासेह पूर्वेण करणीया तिथिः । इति वृद्ध वसिष्ठ वचनात् ।
एवमुभयमपि शुक्लपक्षे त्रयोदशी विषयं माघत्रयोदशी विषयम् ।
अपराह्ण व्यापिनी ग्राह्या पार्वणे तु सदा तिथिः ।
विशेषेणापरपक्षे क्षया प्रोक्ता मनीषिणाम् ॥१९१॥

अनङ्ग त्रयोदश्यपि, उपवासतिथिवत् । एकभक्तनक्तादौ[1] च प्रोक्त-विधिवदिति—

व्रते च पितृरात्रं वा, पूर्वविद्धा त्रयोदशी ।
कार्तिकस्यासितेपक्षे प्रारभ्य समुपोषयेत्[2] ॥१९३॥

रात्रौयामद्वयादर्वाग् यदि पश्येत्त्रयोदशी ।
वर्जयेत् सर्वकर्माणि महेशाराधनं विना ॥१९४॥

जन्माष्टमी शिवरात्रि नक्षत्रं श्रवणोत्तरम् ।
सप्रदोषमुपोष्यं च तेषामन्ते च पारणम् ॥१९५॥

श्रवणोत्तरं सर्वनक्षत्रं च तथा च सप्रदोषमुपोष्यं तासां तिथीनां, भानां, नक्षत्राणामन्ते तु पारणं स्यादित्यर्थः । श्रवणर्क्षेण युक्तामित्युक्तम् ।

---

१ एकभक्तनक्तभोजनादावित्यर्थः । २ उपवसेदित्यर्थः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ चतुर्दशी

शुक्ला चतुर्दशी द्वितीयोपोष्या कृष्णा पूर्वेति प्रागुक्तम् ।
निशि भ्रमति भूतानि शक्तयः शूलभृद्यतः ।
अत स्तस्यां चतुर्दश्यां निशि तत्पूजनं भवेत् ॥१९६॥

अथ शिवरात्रिः

प्रदोषव्यापिनि ग्राह्या शिवरात्रिः सदा प्रिये ।
रात्रौ जागरणं यस्मात् तस्मात् तां परिवर्जयेत् ॥१९७॥

कृष्णाष्टमी स्कन्दषष्ठी शिवरात्रि चतुर्दशी ।
एता पूर्वयुताः कार्या तिथ्यन्ते पारणं भवेत् ॥१९८॥

जन्माष्टमी रोहिणी च शिवरात्रि स्तथैव च ।
पूर्व विद्धैव कर्तव्या तिथिभान्ते च पारणम् ॥१९९॥

श्रावणी दुर्गनवमी तथा दुर्वाष्टमी च या ।
पूर्व विद्धातु कर्तव्या शिवरात्रिर्बलेर्दिनम् ॥२००॥

इत्यनेन चतुर्दशी, शुक्लापि वा शिवरात्रिः सा च पूर्वविद्धैवोपोष्या ।
शुक्लापि दूर्वाष्टमी पूर्वविद्धैव कार्येति ।
माघफाल्गुनयोर्मध्ये या स्यात् किल चतुर्दशी ।
अनङ्गेन समायुक्ता कर्तव्या सा सदा तिथिः ॥२०१॥

एतद्वचनं विरुद्धं दृश्यते ।—

माघासिते भूतदिने च राजन्नुपैति योगो यदि पञ्चदश्याः ।
जया प्रयुक्ता नतु जातु कुर्याच् शिवस्य भक्तःप्रियकृच् शिवस्य ॥२०२

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विरोधपरिहारार्थमिदं वचनम्—

त्रयोदशी यदादेवी दिनभुक्ति प्रमाणतः ।
जागरेच्[1] शिवरात्रिः सा निशि पूर्वा चतुर्दशी ॥२०३॥

त्रयोदशीसंभिन्ना यदा चतुर्दशी तं भवति तदा जागरणोपवासादि कर्तव्यम् । त्रयोदश्यां तु रक्षितायां चतुर्दश्यां न कर्तव्यमिति । भर्वातनिषेधार्थवाक्यार्थेऽप्येवार्थं य या प्रयुक्ता रात्रितः कुर्यादिति । यतः—

अर्द्धरात्रिमतिक्रम्य भूतसंज्ञा यदा तिथिः ।
उपोष्य शिवरात्रिः सा पुराणेषु विनिश्चितम् ॥२०४॥

अथानन्तव्रतम्

यदा भाद्रपदस्यान्ते चतुर्दश्यां द्विजोत्तमः ।
पौर्णमास्याः समायोगे व्रतञ्चानन्तकं चरेत् ॥२०५॥
अथवा पूर्वमेकभक्तकालव्यापित्वमेवेति ॥

अथ श्रावणीनिर्णयः

तस्माद्दैव कर्म पूर्वाह्णे कर्तव्यम् "पूर्वाह्णो वै देवानामिति" श्रुतेः । ततश्च पूर्वाह्णव्यापिनीश्रवणादावुपाकर्म भवति । वह्वृचपरिशिष्टकारिकासु च —

पर्वण्यौदयिकेकुर्युः श्रावणीं तैत्तिरीयकाः ।
वह्वृचः श्रवणे कुर्युग्रहसंक्रान्तिवर्जिते ॥२०६॥

१ जागृयादित्यर्थः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संप्राप्ते श्रवणस्यान्ते पौर्णमास्यां दिनोदये ।
कुर्वीत ब्राह्मणः स्नानं देवानुद्दिश्य भक्तितः ॥२०७॥

ब्राह्मणरन्युपलक्षणं, क्षत्रियवैश्या श्चापि कुर्युः । तथा च ब्रह्मवैवर्ते —

ब्राह्मणक्षत्रियविशामुपाकर्म प्रशस्यते ।
न करोति यदा मोहाच्चाण्डालत्वं हि जायते ॥२०८॥

श्रवणेन तु यत्कर्म उत्तराषाढसंयुते ।
सम्वत्सरकृतोऽघौघस्तत्क्षणादेव नश्यति ॥२०९॥

धनिष्ठासंयुते कुर्याच्-श्रवणे कर्म यद् भवेत् ।
तत्कर्म फलदं विद्यादुपाकर्मेति संज्ञितम् ॥२१०॥

यजुषां पूर्णिमा याज्या मासनक्षत्रसंयुता ।
श्रवणं च धनिष्ठा च मासर्क्षे श्रवणे स्मृते ॥२११॥

व्रत स्नानोपवासादौ घटिकैका यदा भवेत् ।
उदये सा तिथिर्ज्ञेया श्राद्धदानास्तगामिनी ॥२१२॥

दिनार्धात्परतश्चेत्स्याच् श्रावणी कालयोगतः ।
रात्रौ भद्रावसाने तु, रक्षाकर्म प्रशस्यते ॥२१३॥

प्रहरत्रयमात्रं स्याद् द्वितीये दिवसे यदा ।
प्रतिपद्वर्धमाना च तदा सा परि कीर्तिता ॥२१४॥

भागवतपुराणे–

माससंज्ञे यदा ऋक्षे चन्द्रः संपूर्ण मण्डलः ।
पौर्णमासीति गुरुणा तदा सा परिकीर्तिता ॥२१५॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ब्रह्माण्डपुराणे–

भद्रायां द्वे न कर्तव्ये फाल्गुनी श्रावणी तथा ।
श्रावणी नृपतिं हन्ति ग्रामं दहति फाल्गुनी ॥२१६॥

[1]गरुडं पूजयेत्तत्र गृहद्वारि निवेशितम् ।
पक्वान्नैर्विविधैर्धूपैः पुष्पताम्बूलचन्दनैः ॥२१७॥

सगुडाभिर्वर्तिभिश्च तथा घृतविधारितैः ।
क्षीरेण स्नापयेद्देवं पक्षिराजं महाबलम् ॥
सम्वत्सरकृतो दोष स्तस्य नास्तीति निश्चितम् ॥२१८॥

अथापरपक्षश्राद्धतिथिनिर्णयः

उपयोगितयातासां विभागा अपि निरुप्यन्ते, तत्राह्नोभागाः पञ्चेति शतपथश्रुतिः ॥ पिण्डपितृपक्षे त्रिभागमाहुः ।–

पूर्वाह्नो वै देवानां मध्यन्दिनं मनुष्याणां, अपराह्णः पितृणामिति समस्तदिन त्रिधैव विभजति । यथा द्वेधा परपक्षः पूर्वे देवाद्विशिष्यते । तथा श्राद्धस्य पूर्वाह्नादपराह्नो विशिष्यते । तत्र श्राद्धं विशिष्यते, श्राद्धविशेषेण काल विशेषो विधीयते ।

---

१ क्षीरेण स्नापयेद् देवं गरुडं विनतासुतम् ।
नमो गरुडाय नमो विनता तनयाय ते नमः ॥
नमः शकुनराजाय विष्णुवाहाय ते नमः ।
एवं यः पूजयेद् देवं पक्षिराजं महाबलम् ॥
एष पाठ अपुस्तके प्रक्षिप्तो वर्तते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पूर्वाह्णे दैविकं श्राद्धमपराह्णे तु पैतृकम् ।
एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकम् ॥२१९॥

अथ कालरूपम्–

गोपतिर्गोभिराक्रान्तो यदापतति दक्षिणे ।
सकालः कुतपस्तत्र पितृणां दत्तमक्षयम् ॥२२०॥

अथ श्राद्धतिथिनिर्णयः । तत्र बृद्धमनुः–

यस्यामस्तंरविर्याति पितरस्तामुपासते ।
तिथिस्तेभ्योयतोदत्ता त्वपराह्णे स्वयम्भुवा ॥२२१॥

नत्वस्तसमयमात्रयोगिणीऋद्धिः, पुराहि दिविदेवैर्गीयते, यजुर्वेदेति मध्यमेऽह्णेः, सामवेदे चास्तमिते, स्वयं वेदैरशून्यै स्त्रिभिरेव शून्याः । तस्मा दस्तमितेऽस्तसमीपे, रोहिणे श्राद्धं कर्तव्यमिति ।

अथ पुनःसम्वत्सरश्राद्धे–

दर्शं च पौर्णमासीं च पितुःसाम्वत्सरं दिनम् ।
पूर्वविद्धमकुर्वाणो नरकं प्रतिपद्यते ॥२२२॥

नारदीयपुराणे पूर्वविद्धमभिहितम् । तद्दिवस पूर्वार्द्धव्यापिन्यां पूर्वतिथौवेदितव्यम् । दर्शममावास्या पौर्णमास्यो श्राद्धं विहितमस्ति ।

अथामावास्या निर्णीयते । साच विद्धा चतुर्दशीविद्धा प्रतिपत्मिश्राचेति यस्यामुदयात्प्राक्चन्द्रोदृश्यते सासिनीवाली प्रतिपन्मिश्रा कुहुरिति ।

अत्रव्यासः–

दृष्टचन्द्रा सिनीवाली नष्टचन्द्रा कुहुर्मता ।
सिनीवाली सदा पित्रे कुहुर्दैवे च कर्मणि ॥२२३॥

इतिसाग्नेः कार्ष्णायिनि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भूतविद्धाप्यमावास्या मोहादज्ञानतोपिवा ।
श्राद्धकर्माणि ये कुर्युरायुस्तेषां प्रहीयते ।।२२४।।

एवं सति हव्य व्यवस्थामाह--

भूतविद्धाप्यमावास्या प्रतिपन्मिश्रिता पिवा ।
प्रतिकर्मणि विद्वद्भिर्ग्राह्या कुतपकालिनी ।।२२५।।

इतिवौधायनः ।

मध्याह्नात्परतोयत्र चतुर्दश्यनुवर्तते ।
सिनीवाली तु सा ज्ञेया पितृकर्मणि निष्फला ।।२२६।।

तथाहलौगाक्षि –

सिनीवाली द्विजैः कार्या तथा चानग्निकैर्द्विजैः ।
विशेषत कलौमांसं श्राद्धं गर्हित मित्याह नारद ।।२२७।।

समुद्रयात्रास्वीकारः कमण्डलुविधारणम् ।
द्विजानाम सवर्णासु कन्यासूपयमस्तथा ।।२२८।।

देवरेण सुतोत्पत्तिर्मधुपर्के पशोर्वधः ।
मांसादनं तथा श्राद्धे वानप्रस्थाश्रमं तथा ।।२२९।।

दत्ताक्षतायाः कन्यायाः पुनर्दानं परस्य च ।
दीर्घकालब्रह्मचर्यं नरमेधाश्वमेधकौ ।।२३०।।

महाप्रस्थानगमनं गोमेधं च तथा मरवम् ।
इमान् धर्मान् कलियुगे वर्ज्यानाहु मनीषिणः ।।२३१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पराशरः–

यस्तु प्राणिवधं कृत्वा मांसेन तर्पयेत्पितॄन् ।
स विद्वांश्चन्दनं दग्ध्वा कुर्यादङ्गारविक्रयम् ॥२३२॥

क्षिप्त्वा कूपे यथा किञ्चिद्बाल आदातुमिच्छति ।
पतत्यज्ञानतः सोपि मांसेनश्राद्धकृत्तथा ॥२३३॥

आदित्यपुराणेः–

अहिंसा तु परो धर्मः सर्वेषां प्राणिनां यतः ।
तस्मात्सर्वप्रयत्नेन वस्त्रपूतेन कारयेत् ॥२३४॥

यद्दानमभयं पुण्यं सर्वदानोत्तमोत्तमम् ।
तस्यात्मा परिहर्तव्या हिंसा सर्वत्र सर्वदा ॥२३५॥

मनसा कर्मणा वाचा सर्वभूत हितेरतः ।
यदा दर्शितपन्थानः शिवलोकं व्रजन्ति ते ॥२३६॥

काशीखण्डेऽपि--

क्व मांसं क्व शिवे भक्तिः क्व मद्यं क्व शिवार्चनम् ।
मद्यमांसरसानाञ्च दूरे तिष्ठति शङ्करः ॥२३७॥

त्रैलोक्यमखिलं हित्वा यत्पापं जायते नृणाम् ।
शिवालये निहन्त्यैकमपि तत्पापमाप्नुयात् ॥२३८॥

शिवार्थं सर्वदा कार्या पुष्पहिंसा द्विजोत्तमैः ।
यज्ञार्थं पशुहिंसा च राज्ञा दुष्टस्य शासनम् ॥२३९॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न हन्तव्याः स्त्रियः सर्वा अरेश्च कुलसंभवाः ।
ब्रह्महत्या समं पापं मात्रेया वधता भवेत् ॥२४०॥

स्त्रियःसर्वा नहन्तव्याः सर्वैश्चैव द्विजातिभिः ।
सर्वधर्मेषु विप्रेन्द्राः पापकर्मरता अपि ॥२४१॥

मनुः—

यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयम्भुवा ।
यज्ञोऽस्य भूत्यै सर्वत्र तस्माद् यज्ञे वधोऽवधः ॥२४२॥

मां स भक्षयिताऽमुत्र यस्य मांसमिहाद् म्यहम् ।
एतत्मांसस्य मासत्वं प्रवदन्ति मनीषिणः ॥२४३॥

महाभारतेः—

यज्ञे हता ये यशवो म्रियन्ते तेऽमीहताः क्रूरनृपा भवन्ति ।
तेनैव संस्कारमयेन राजा कुतो विवेकः पृथिवी पतीनाम् ॥२४४॥

अत्र मांसादि भक्षणे दोषो नास्तीत्युक्तम् । तेन —

न मांस भक्षणे दोषो न मद्ये न च मैथुने ।
प्रवृत्ति रेषा भूतानां निवृत्ति स्तु महा फला ॥२४५॥

इति वाकचं न सर्व देशग्रहणम् [१] । यस्मिन्युगे यस्मिन्देशे यस्यां जातौ दोषाभाव इति व्याक्तं तत्र तत्रैव योज्यं, युगधर्मव्यवस्थाकारिबहुमुनिमत विरुद्धत्वात् । अत एव सामान्य वचनमनुमीयते । . . . . . तत्रैव योज्यं युगधर्म व्यवस्था भट्टाचार्यैर्देशे देशे पञ्च पञ्चदुषणानि निगदितानि,मांस-

---

१ इति वाक्यस्य न सर्वदेशे ग्रहणम् पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भक्षणप्रवृत्तिः खसदेशे नान्यत्र यथा वेश्यादि, मांसभक्षणादि भोगाद् रुचि लेभि न भोगान्कुर्वन्ति। एतत्सर्वं भट्टाचार्य विरचित पूर्व मीमांसादि ग्रन्थेषु द्रष्टव्यम्।

अपि च महाभारते,युधिष्ठिर भीष्म पितामह संवादे, ब्राह्मणानां मांस-भक्षणं निषिद्धमिति ।।   ।।

अथ दीपोत्सवः

पूर्वविद्धा चतुर्दश्या कार्तिकस्य सिते तरे।
प्रत्यूषसमये स्नानं कर्ता कुर्यादतन्द्रितः ।।२४६।।

वर्द्धमानतिथौ नन्दा मन्दासार्ध त्रियात्मिका[1]।
द्वितीया बृद्धिगामिन्या उत्तरा तत्र युज्यते ।।२४७।।

तथा च—

त्रियामनादर्शतिथिर्भवेच्चेत् सार्द्ध त्रियामा प्रतिपद्विवृद्धौ[2]।
दीपोत्सवे ते मुनिभिः प्रदिष्टे त्रेतान्यथा पूर्वदिने विधेये ।।२४८।।

पूर्वविद्धा प्रकर्तव्या शिवरात्रिर्वलेर्दिन मित्यादि वचनानि। विद्धश्च प्रसिद्ध एव। तथा च—

या कुहूः प्रतिपन्मिश्रास्तत्रगाः पूजयेद्द्विजः।
पूजनात्त्री[3]णि वर्द्धन्ते प्रजागावो महीपतिः ।।२४९।।

नन्दायां दर्शने रक्षावलिदानं दशासु च।
भद्रायां गोकुलक्रीडा स देशो वै विनश्यति ।।२५०।।

---

१ सार्ध त्रियामात्मिका प्र.। २ त्रियामा सा दर्शतिथिर्भवेच्चेत् सार्ध त्रिया-मा प्रतिपद्विवृद्धौ प्र. ३ त्रयो इतिभाव्यम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रतिपद्दर्श संयोगे क्रीडनन्तु गवायनम् ।
परिविद्धेषु यः कुर्यात्पुत्रदाराधनक्षयम् ॥२५१॥

प्रतिपद्यग्निकरणं द्वितीयायां गवार्चनम् ।
छत्रच्छेदं[1] करिष्येते वित्तनाशं कुलक्षयम् ॥२५२॥

अन्यदपि—

त्रयोदशी चतुर्दशी प्रतिपद्द्वितीया एतासां कर्मणोयस्याहेतुतः ।
"अत एव प्रकुर्वीत स्वयमेव तु नान्दिकं" तथा च—
पित्रोस्तु जीविते पुत्रः कुरुते दारसंग्रहः ।
पितुर्नान्दिमुखं प्रोक्तं न पुत्रस्य कथञ्चन ॥२५३॥

महोत्सवः ॥ अथ वट सावित्री—

वृहत्तपा तथा रम्भा[2] सावित्री वटपूर्विका ।
बृहत्तपा–फलद्वितीया, रम्भा, तृतीया भूता शिव चतुर्दशी ॥ तथा च—
शिवा च शिव दुर्गा च दुर्भरा च हुताशनी ।
वत्सपूजा वटश्चैव कर्तव्या प्रथमेहनि ॥२५५॥

भविष्योत्तरे—

त्रयोदश्यां भाद्रपदे दन्तधावन पूर्वकम् ।
उपवासस्य नियमं गृह्णीयात्सुब्रती जनः ॥२५६॥ इति ।

भाद्रपदे उत्तरभाद्रनक्षत्रे त्रिरात्रोपवासनिमित्तं नियमं गृह्णीयादित्यर्थः । अमावास्यार्चनं मन्वन्तरः ।

---

१ स्कन्धच्छेदं प्र. । २ वृह-त्तया तशा रम्भा क. । ३ समुखा क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ पौर्णमासी श्राद्धे निर्णयो वोद्धव्यः विशेषतश्च गोभिलेनोक्तः । यः परमोत्सन्निकर्षः सा पौर्णमासी परमः सन्निकर्षः[1] मास्यमावास्येति ।

भाष्यकारश्च—

अपराह्णेऽथवा रात्रौ यदि सर्वं[2] समाप्यते ।
उपोष्या तत्र राकास्यात्पौर्णमास्यपि लक्षणैः ॥२५७॥

अन्यच्च ॥ आषाढ्यादयो मध्याह्नव्यापिन्यः पतिताः स्वनामनक्षत्रयुताः, तदा स्तोका अपि ताः कर्तव्याः । एवं यथा—

महाषाढी महामाघी वैशाखी कार्तिकी तथा ।
स्वनामर्क्षयुताः स्वल्पा अपि कार्या न संशयः ॥२५८॥

श्रावणे फाल्गुने विशेषस्तस्य व्यक्तोऽस्ति । अन्यासां चन्द्रतारादिविषयः । तं विवेचयेदिति—विवेचनीयेति । सा च ग्रन्थगौरवभयान्न कथिता । अथ फाल्गुनी निर्णयः । ता यदि रात्रेः प्रहरद्वयानन्तरं यावद्यत्र भवति तदा रात्रौ भद्रावसाने[3] वा ननु रजनीमुखे भद्रायामन्तिका सकलजनानन्दोत्सवार्थश्च । तेन कारणेन भद्रा परित्याज्या, तथा च—

"भद्रायां द्वे नकर्तव्ये श्रावणी फाल्गुनी तथा" ॥
भद्रायां दीप्ता होलिका राज्यदाहं करोति । नगरस्य नैवेष्टं तस्मात्तां

परि वर्जयेत्—

भद्रायां द्वे नकर्तव्ये श्रावणी फाल्गुनी तथा ।
श्रावणी नृपतिं हन्ति ग्रामं दहति फाल्गुनी ॥२५९॥

---

१ परमो विकर्ष अ. क. । २ पर्वः अ. क. । ३ होलिकादीपति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दिनार्द्धात्परतोपिस्यात्फाल्गुनी परतो यदि ।
रात्रौ भद्रावसाने तु होलिकां तत्र दीपयेत् ।।२६०।।

अथ युगादि निर्णयः—

कार्तिके शुक्लपक्षस्य नवम्यन्तर्गतं कृतम् ।
त्रेतायुगं तृतीयायां वैशाखे समुपस्थिते ।।२६१।।

दर्शे तु माघमासस्य प्रवृत्तं द्वापरं युगम् ।
कलिः कृष्णत्रयोदश्यां नभस्ये मासि निर्गतः ।।२६२।।

सार्द्धसप्तमुहूर्तश्चेद् यस्मिन्नर्हति तद्गतः ।
(भाग शुक्ले तु ते कार्याः कृष्णे चैवा पराह्णिके) ।।२६३।।

याज्ञे— कृष्णे ग्राह्योऽपराह्णिके—शुक्लेऽक्षतृतीयाक्षनवमी कृष्णा त्रयोदशी । अमावास्या शिवरात्रेः समीपवर्तिनी पञ्चदशेति ।

अथ संक्रान्तिनिर्णयः

आद्या षोडश नाड्यस्तु परत स्तावदेव च ।

परतः पुण्यकालः संक्रान्तिः स्नानदान जपादिषु । एतद्वाक्यं मध्यमकालोपक्षणपरम् ।—

यतः— केन्द्रस्थितेऽर्कसंक्रान्तिर्मध्यप्रायेण सपादमात्रं, दशघटिका, अर्वाक्स्थितौ आद्यन्त कालौ भवतः । एवं च सति मकरसंक्रान्तिर्यदा घटिका न्यूनेऽर्द्धरात्रेःस्यात्, तथा च चापकुम्भयोश्च तदार्धदिवसे स्नानादि, अर्द्धरात्रे यदा भवेत् घटिकाधिक स्तदा परस्मिन्नहनि । यथा

~१२४ तमे पत्रं तुटितत्वाच्चापान्तरस्थः पाठः क पुस्तके नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चोक्तम्—

(अर्धरात्रिमतिक्रम्य यदा संक्रमते रविः ।
तदा द्वितीयदिवसे स्नानदानादि कारयेत् ॥२६४॥

यदा च मकरे अर्धरात्रिर्भवति रात्र्यर्धं षोडशघटिकाधिकं भवति न वाऽस्तोदयस्पर्शनाच्च वाप्यन्तकालौ भवतः तदा पूर्वदिने नक्तं स्नानाद्यं रविहितत्वात् अपरस्मिन्दिने, अनुदयत्यपि उदयकाले स्नानं तस्य विहितत्वात् द्वितीयदिने कार्यं, तदुक्तं "सं क्रान्तौ पुत्र जन्मनीत्यादि" रात्रौ वापि स्नानदानाधिकारः तत्समारम्भकाले पूर्णभागे काले प्रवेशे रात्रावपि कर्क मिथुन सिंहयोर्वार्द्धरात्रे पूर्णकालाहनूनेवास्यातादारात्र्यर्द्धलघुत्वादुभयदिने भोगः काल स्यात्तदा दिनद्वयभोगः । न पुन न्यूने ऽर्द्धाधिके परस्मिन्दिने चेति । अत्रोक्तिः—

अर्द्धरात्रे कलान्यूने यदा संक्रमते रविः ।
तदापूर्वदिने भोगः कालेऽतीते परेऽहनि ॥२६५॥ इति ।

एतत् समदिन रात्र्यभिप्रायेण ॥ अर्वाक् षोडश नाडयश्चेति वाह्यगुणत्वंचोक्तम्[1] ।

अथानयोः कथनम्—

त्रिंशत्कर्कटकेनाड्यो मकरेतु दशाधिकाः ।
भविष्यत्ययनं तत्र अतिते चोत्तरायणम् ॥२६६॥

कर्कटे मकरसमीपे सप्तमीयं कर्कट समीपे यदायनं तद्दक्षिणायनम् । मकर समीपे यदायनं तदुत्तरायणम् । पुनः कर्कटके संक्रान्ताविति ।

---

१ वाह्यगुणं नोक्तम् अ । वाह्यगुणत्वोक्तम् प्र.च. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अयनं हि संक्रान्तेः प्रागंशैः सार्द्धैरष्टाभिः पश्यन्ति तस्मिन्नपि तथा चस्मृतिः—"अयने विषुवे चैव सूर्य संक्रमणे तथा" अयने विषुवती संक्रान्तिश्च पृथगुक्ता विषुवति मध्यदानं दक्षिणायने चादौ । षडशीति मुखेऽतीते । तयोरुद्गयनं भूरिफलम् ।

विषुवन्मेषतुलयोरर्वागयनांशैः समदिनरात्रं पूर्वं मध्यत इति । तत्समीपे काले विषुवत्पदमिति कुंभ वृष सिंहयोर्वृश्चिकायेभ्यः, प्रागयनांशैः पर्वतस्मिन्नतीत इति । भूतसमीपे उदयनं व्याख्यानम्—

विषुवत् षड्मुहूर्तं स्यात् षडशीति मुखे भवेत् ।
तथा विष्णुपदे त्रीणि पुण्यानि मुनयो विदुः ॥२६७॥

इदानीं मलमासो तिरुप्यते । तस्य लक्षणं ब्रह्मसिद्धान्ते—

द्वौ तिथ्यन्तावेकवारे, यस्मिन्तस्माद्दिनक्षयः[१]।
चान्द्रमासो प्यसंक्रान्तौ मलमासः प्रकीर्तितः ॥२६८॥

शुक्लप्रतिपदादितः अमावास्यान्तश्चान्द्रो मासः, यदि रविसंसक्रान्तिरहीतो भवति तदा मलमासः कथ्यते । तथा चश्रीपतिः—

सवितृमण्डलमेति यदा शशी, तदनु संक्रमणं कुरुते रविः ।
मखमहोत्सव नाशकरस्तदा मुनिवरैः कथितो ह्यधिमासः ॥२६९॥

सवितृमण्डललक्षणं—पराशरश्चाह—

कृष्णपक्षे चतुर्दश्या द्वितीयार्द्धे तथा कुहूः ।
एतदेव वुधैरुक्तमुत्तरे रविमण्डलम् ॥२७०॥

---

[१] तिथिक्षय इत्यर्थः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मण्डलेस्मिन् यदा भानुः संक्रामेदधिमासकः ।
द्वितीयेस्मिन् यदा भानु स्तदा मासक्षयो भवेत् ॥२७१॥

अमावास्यामहोरात्रे यदा संक्रमते रविः ।
स तु मास पवित्रः स्यादतीते ह्यधिको भवेत् ॥२७२॥

तत्र यत्कृत्यमाह बृहस्पतिः—

नित्य नैमित्तिके कुर्यात् प्रयतः सन्मलिम्लुचे ।
तीर्थश्राद्धं गजच्छाया प्रेत श्राद्धं तथैव च ॥२७३॥

नित्यमावश्यकं यस्मात्सविशेषतां च निष्पक्षं विहितं तन्मलमासेपि कर्तव्यम् । तथा हरिहरः— श्राद्धपञ्च महायज्ञदेवार्चनादिनैमित्तिकादौ सोमसूर्यौ परागादौ जातकर्म स्नानदानश्राद्धादि तदपि कर्तव्यम् ।

"तीर्थश्राद्धं गजच्छायाश्राद्धं चैव मलिम्लुमे" । कुर्यादकरणात्प्रत्यवायो भवति, प्रेतश्राद्धं नित्यत्वेन मलमासेऽपि प्राप्तम्—

यत्र च पुनर्विधीयते, तत्सम्वत्सर मध्यपतिते मलिम्लुचे एकं मासिकं कुर्यात् । द्वितीये मासि शुध्यति । अन्यदधिकं कुर्यादिति ।

बृद्धवसिष्ठोप्याह—

श्राद्धं क्षयेऽहनि प्राप्ते अधिमासो भवेद्यदि ।
श्राद्धं द्वयं प्रकूर्वीत कुर्वन्नेव न मुह्यति ॥२७४॥

प्रेतश्राद्धद्वयमपि—अधिकमासेकुर्वीत । यदा पुनर्मृतमासस्तद् द्वादश एवाधिमासो भवति । तदा तस्मिन्नेव मलिम्लुचे सर्व प्रेतश्राद्धं समापनीयम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

असंक्रान्त्यापि कर्तव्यमाब्दिकं प्रथमं द्विजैः ।
तथैवमासिकं कार्यं सपिण्डीकरणं तथा ॥२७५॥

गर्भे वार्द्धुषिके प्रेते श्राद्धकर्मणि मासिके ।
सपिण्डीकरणे नित्ये नाधिमासे विवर्जयेत् ॥२७६॥ इति ।

अथ विहितम्—

मलमास मृतानाञ्च श्राद्धं यत्प्रति वत्सरम् ।
मलमासेपि कर्तव्यं नान्येषान्तु कदाचन ॥२७७॥

आब्दिकं प्रथमं यस्मान्नकुर्यात्तु मलिम्लुचे ।
त्रयोदशेतु संप्राप्ते कुर्वीत पुनराब्दिकम् ॥२७८॥

एतदपि मलमासमृतस्य विषयम् ।

तृतीये वर्षे पूर्वमासादन्यो मलमासो भवति, तदा तस्मात्मलमास मृतस्य पुनराब्दिकं प्रतिवत्सरविहितं श्राद्धं कुर्वीतेत्यर्थः ।

यस्मिन्राशौ गते सूर्ये विपत्तिः स्याद्द्विजन्मनः ।
तद्राशावेव कर्तव्यं पितृकार्यं मृतेऽहनि ॥२७९॥

अथाधिमासवर्जनीयं[1] तदाह—

नकुर्यादधिके मासि काम्यं कर्म कदाचन ।
मुक्त्वा नैमित्तिकं श्राद्धं तद्धि तत्रैव कीर्तितम् ॥२८०॥

यथा वैशाखेऽक्षयतृतीयायां ज्येष्ठे सावित्रीव्रतमाषाढे चातुर्मास्य-व्रतानि श्रावणी जन्माष्टमी, एवमपरमपि ज्ञेयम् । आरम्भे तु काम्यकर्मणि

---

१ तथाधिमासे वर्जनीयं क. च, ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

समाप्तिकालादर्वाक्[1] मध्यपतितेऽधिमासे काम्यं कार्यं, तथा चातुर्मास्य व्रतानि, उपाकर्मादि[2] चोत्तरे कुर्यात् ।

रविणा लङ्घितो मास श्चान्द्रः ख्यातो मलिम्लुचः ।
तत्र यद्विहितं कर्म, उत्तरे मासि कारयेत् ॥२८१॥

द्वौ मासौ तुल्यमासानौ[3] स्यातां सम्वत्सरे यदा ।
पूर्वे तु देवकार्याणि पितृकार्याणि चोत्तरे ॥२८२॥

पितृकार्यसम्बन्धीनि देवकार्याणि पवित्रारोपणनागपूजा कुलधर्म प्राप्तानि यान्युत्तरे क्रियमाणानि न दुष्यन्ति । व्याघ्र आह—

वर्षे वर्षे तु यच्छ्राद्धं मातापित्रोर्मृतेऽहनि ।
मलमासे न तत्कार्यं व्याघ्रस्य वचनं यथा ॥२८३॥

अन्यान्यपि वर्जनीयानि । आह वृद्धमनु :—

अग्न्याधेयं प्रतिष्ठानं यत्र दानव्रतानि च ।
देव व्रतवृषोत्सर्गचूडाकरणमेखलाः ॥
माङ्गल्यमभिषेकञ्च मलमासे विवर्जयेत् ॥२८४॥

वापीकूपतडागानि प्रतिष्ठा यज्ञकर्म च ।
न कुर्यात् मलमासेपि महादानव्रतानि च ॥२८५॥

एतेषामनावश्यकत्वं विशेषो द्रष्टव्यः । तेन मलमासेपि प्रायश्चित्त मग्न्याध्येयं व्रतमादि संस्कारः । प्रतिष्ठा प्रायश्चित्तभूतसंसर्गयज्ञप्रायश्चित्त-भूतदानव्रतानि, एकादशाहवृषोत्सर्गो न च प्रतिसिध्यते । शेषवक्तव्यम्—

---

१ सनाग्निकालादर्वाक् लि. पु. । २ उपाकर्मणि अ. च. ।
३ तुल्यमासान्तौ अ. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अधिमासे नकर्तव्यं श्राद्धमाभ्युदयं तथा ।
तथैन्धकार्यं यत्कर्म वत्सरात्प्रथमादृते ।।२८६।।

प्रथमसम्बत्सरकार्यम् । आभ्युदयिकं श्राद्धं मलमासे प्राप्ते सपिण्डीकरणं विहितम् । तदुत्तरदिने यदाभ्युदयिकं विदधीत, तन्मलमासेपि कर्तव्यम् । यथोक्तम्—

भ्राता वा भ्रातृपुत्रो वा सपिण्डी शिष्य एव वा ।
सह पिण्डक्रियां कृत्वा कुर्यादभ्युदयन्ततः ।।२८७।।

गर्भे वार्द्धुषिके प्रेते नित्ये भृत्ये तथाब्दिके ।
आब्दिकं प्रथमे चैव मलमासे न दुष्यति ।।२८८।।

मलिम्लुचे गुरौ सिंहे शुक्रे चास्तमिते वहिः ।
तीर्थयात्रां विवाहं च मनसापि न चिन्तयेत् ।।२८९।।

अथ शुक्रास्त निरूपणम्–

वाले वा यदि वा वृद्धे शुक्रेचास्तमुपागते ।
मलमासश्चैतानि[1] वर्जयेद्देवदर्शनम् ।।२९०।।

एतान्यग्न्याधेयप्रभृतीनि शुक्रास्ते बाले वृद्धे वर्जनीयानि । मलमासश्चेत्यभिधानात् वर्जयेद्देव दर्शनमिति प्रतिषेधः । प्रथमदर्शनमुपेक्षेत[2] –

अनादिदेवतां दृष्ट्वा शुचः स्युर्नष्टभार्गवे ।
मलमासेप्यनावृत्त तीर्थस्नानमपि त्यजेत् ।।२९१।।

---

१ मलमासे च चैतानि अ. । मलमासेषु चैतानि क. ।

२ प्रथमदर्शनमुपेयात् अ. क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गुर्वादित्येगुरौ सिंहे शुक्रे चास्तमुपागते ।
नाधिष्ठानवतीं पश्येद्देवतामादितो नरः ॥२९२॥

उपनयनं गोदानं पाणिग्रहणं, गृहप्रवेशगमनानि । अस्तमितेषु नकुर्यात्सुरगुरुभृगुपुत्रचन्द्रेषु–

नष्टे चन्द्रे तथा शुक्रे नष्टे चैव बृहस्पतौ ।
मङ्गलानि तथोद्वाहं त्वरितोपि नकारयेत् ॥२९३॥

प्रागुद्गतः शिशुरहस्त्रितयं सितः स्यात् ।
पश्चाद्दशाहमिह पञ्च दिनानि वृद्धः ।
प्राक्पक्षमेव कथितोऽ त्रिवसिष्ठ मुख्यैः
जीवस्तु पक्षमपि बृद्धशिशुर्विवर्ज्यः ॥२९४॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने तिथिनिर्णयाऽध्यायः

गृहस्थानां पुत्राभावे तपोदानफलपरलोकाद्यभावः श्रूयते । यथा वसिष्ठः[१]

नास्ति लोको मनुष्याणामपुत्राणां त्रिविष्टपम् ।
तेषां दानफलं नास्ति नास्त्येव तपसः फलम् ॥१॥ इति ।

अतस्तावदाधानं निरुप्यते रजोदर्शनानन्तरमेवाधानं कार्यम् । तत्पूर्वं गर्भग्रहणयोग्यताया अभावात् । तथाच भरद्वाजसंहितायाम्–

रजस्वला यदा नारी योग्या स्याद्गर्भ धारणे ।
अतः कुर्वीत तत्सङ्गं गर्भार्थं बुद्धिमान्नरः ॥२॥ इति ।

१ तथा वासिष्ठेः अ. क ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रथम रजोदर्शनं द्वादशवर्षे स्यात् तदुत्तरं प्रतिमासं तथा च वसिष्ठ-

अर्कान्मुक्तः शशी यद्वद् द्वादशांशादुदेष्यति ।
रजोदर्शनमत्यासां द्वादशाब्दे च जन्मनः' ॥३॥

प्रतिमासं तदूद्ध्र्वञ्च रजः स्याद्भौमयोगतः ।
चन्द्रेऽनुपचयस्थेवा रजः स्यात् कुजवीक्षणात् ॥४॥

जन्मतो वा लग्नतो वा वलिनः सकाशात् ।

तृतीय षष्ठ दशमेकादशराशयः उपचयाः । तद्व्यतिरित्ताराशयः अनुपचया इत्यर्थः । न च रजोदर्शन एव गर्भ ग्रहण योग्येत्यसंगतम् तदभावेपि गर्भग्रहणदर्शनादिति वाच्यं प्रकटदर्शनाभावेपि अन्तर्गतरजोदर्शनसंभवात् । तथा च काश्यपसंहितायाम्–

वर्षद्वादशकादूद्ध्र्वं यदिपुष्पं वहि र्नहि ।
(अन्तः पुष्पं भवत्येव पनसोडुम्बरादिवत्) ॥
अत स्तत्र प्रकुर्वीत तत्सगं बुद्धिमान्नरः ॥५॥

प्रथमरजोदर्शने तिथ्यादिफलमाह नारदः–

अमारिक्ताष्टमी षष्ठी द्वादशी प्रतिपत्स्वपि ।
परिघस्य तु पूर्वार्धे व्यतिपाते च वैधृतौ ॥६॥

संध्यामुपप्लवे विष्टयामशुभं प्रथमार्तवम् ।
रोगी पतिव्रता दुःखी पुत्रिणी भोगभागिनी ॥७॥

पतिव्रताक्लेशभागी सूर्यवारादिषु क्रमात् ॥७॥ इति ।

प्रतिपदादीन्युक्तानि करणानि चाशुभानि । अवशिष्टानि शुभानीत्यर्थः । नक्षत्रफलान्याह गर्गः–

१ जन्मतः अ.क. । चापान्तर्गतः पाठः कपुस्तके नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सुभगा चैव दुःशीला वन्ध्यापुत्रसमन्विता ।
धर्मयुक्ता व्रतघ्नी च परसन्तान मोदिनी ॥८॥

सुपुत्रा चैव दुष्पुत्रा पितृवेश्म रता सदा ।
दीना प्रजावती चैव पुत्राढया चित्रकारिणी ॥९॥

साध्वी पतिप्रिया नित्यं सुपुत्रा कष्टचारिणी ।
स्वकर्म निरता हिंस्रा पुण्यपुत्रादिसंयुता ॥१०॥

नित्यं धनव्ययासक्ता पुत्र धान्यसमन्विता ।
मूर्खा चाढया पुण्यवती दस्रर्क्षादिः क्रमात्फलम् ॥११॥ इति ।

राशिफलमाह —

राशयः सफला श्रेष्ठाः शुभग्रह निरीक्षिताः ।
राशिस्वभावजं हित्वा फलं ग्रहजमाप्नुयात् ॥१२॥

तथाचोक्तं वासिष्ठे —

अशुभमपि समस्तं चार्तवे सप्रभूते,
सुरगुरुसितयुक्ते वीक्षिते[1] वाथ लग्ने ।
तिमिरमिव कठोरं ज्योतिरुत्पत्तिकाले,
क्षयमथसमुपैति प्राप्नुयादिप्सितानि ॥१३॥

रजोदर्शनसमये प्रावृतवस्त्रफलमाह गर्गः—

सुभगा श्वेत वस्त्रास्याद् दृढवस्त्रा पतिव्रता ।
क्षौमवस्त्रा क्षितीशास्या न्नववस्त्रा सुतान्विता ॥१४॥
दुर्भगाजीर्ण वस्त्रास्याद्रोगिणी रक्तवाससा ।

---

१ वीक्षणे पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नीलाम्बरधरानारी विधवा पुष्पिता ततः ॥१५॥
मलिनाम्बरधरानारी दरिद्रास्याद् रजस्वला।

वस्त्रेस्युर्विषमारक्तविन्दवः पुत्रमाप्नुयात् ॥
समाश्चेत्कन्यका चेति फलंस्यात्प्रथमार्तवे ॥१६॥

लग्न विशेषमाह नारदः—

कुलीरवृषचापान्त्यनृयुक्कन्यातुलाधराः।
राशयः शुभदाज्ञेया नारीणां प्रथमार्तवे ॥१७॥

रजोदर्शनानन्तरं त्रिरात्रमशुचित्वमाह भरद्वाजः—

प्रथमेहनि चाण्डाली द्वितीये रजकी स्मृता।
तृतीयेहनि शूद्रास्या च्चतुर्थेहनि शुध्यति[१] ॥१८॥

रजोदर्शनतोऽस्पृश्या नार्यो दिन चतुष्टयम्।
ततः शुद्धाः क्रियास्वेताः सर्ववर्णेष्वयं विधिः ॥१९॥

तेषु दिनेषु नियमाह वसिष्ठः— त्रिरात्रं रजस्वला अशुचिर्भवति स नाञ्ज्यात्, नाभ्यंज्यात्, नापि स्नायात्,[२] अधः शयीत,[३] न दिवा सुप्यात् न रज्जु सृजेत्[४] न मांसमश्नीयात् न ग्रहान्निरीक्षेत न हसेत[५] न किञ्चिदाचरेत् न खवण[६] पात्रेण पिवेत्, अञ्जलिनावा पात्रेण

---

१ अत्र, 'इति नारदः' इति पाठो वर्तते ।
२ नाप्सु स्नायात् पा। ३ शय्याधः शयीत ।
४ रज्जु सृजेत इतिपाढ : प्र पुस्तके नास्ति ।
५ न हसेत् इतिपाठ : क पुस्तके नास्ति। ६ अरवर्वेण प्र।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लोहितायसेन वेति[१] खर्वो वामहस्तः अयञ्च वामहस्तस्य निषेधः अथवा खर्वपात्रं मृण्मयपात्रं लोहितायसं ताम्रं वसिष्ठसंहितायामेव ॥

+ न नखदशनवीक्षितानि कुर्यात् ऋतुसमये पुरुषः स्त्रियाः कदाचित्।
ऋतुरपि दश षट् च वासराणि, प्रथमनिशात्रितयं न तत्र गम्यम् ॥२०॥

निन्द्य तिथ्यादौ शान्तिः कर्तव्येत्याह नारदः --

निन्द्यर्क्ष तिथिवारेषु यत्र पुष्पं प्रदृश्यते ।
तत्र शान्तिं प्रकुर्वीत घृतदुर्वातिलाक्षतैः ॥२१॥

शान्तिपर्यन्तं, एकशय्यायां न तिष्ठेत् । तथा च वासिष्ठे --

प्रभूतदोषे यदि दृश्यते तत्, पुष्पं तदा शान्तिककर्म कार्यम् ।
विवर्जयेदेव तदेकशय्यां,यावद्रजोदर्शनमेवयस्ते ॥२२॥

ऋतु परिमाणमाह याज्ञवल्क्यः--

षोडशर्तु निशास्त्रीणां तासु युग्मासु संविशेत् ।
ब्रह्मचार्य्येव पर्वाण्याद्याश्चतस्रश्च वर्जयेत् ॥२३॥

पर्वाणिचाह --

चतुर्दश्यष्टमीचैव अमावास्या च पूर्णिमा ।
चत्वार्येतानिपर्वाणि रविसंक्रान्तिरेव च ॥२४॥

काश्यप संहितायां कालविधाने --

षष्ट्यष्टमी पञ्चदशी चतुर्थि श्चतुर्दशीमप्युभयत्रहित्वा ।
शेषाः शुभास्यु स्तिथयो निषेके वाराः शशाङ्कार्य सितेन्दुजानाम् ॥२५॥

---

१ चेति अ. क. । + एष श्लोको बृहत्संहितायाः स्त्रीपुंसमायाग नाम्न ७७ तमे ऽध्याये वर्तते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वसिष्ठः—

+पौष्ण द्वये नैव न जन्मभेषु, उत्पात पादग्रहदूषितेषु ।
नकार्यमाधानमनष्टलग्ने उपप्लवे वैधृतिपातयोश्च ।।२६।।

विष्ट्यां दिवा पारिघ पूर्वभागे संध्यासु पर्वष्वपि मातृपित्रोः ।
मृतेऽह्नि पत्नीगमनं च वर्ज्यं दिनेषु युग्मेषु च वक्षमाणैः ।।२७।।

योगैः सुतार्थी स्वसती मुपेयात् दिनेषु युग्मेषु च कन्यकार्थी ।
हित्वा च गण्डां स्तिथिलग्नभानां........ ।।२८।।

वृषभ–मिथुन–र्कीक–सिंह कन्या–तुलधर–चाप झषाः शुभा भवन्ति ।
यदि शुभवलशालिनोऽनुकूले निधनविशुद्धयुता निषेककार्ये ।।२९।।

केन्द्र त्रिकोणेषु शुभस्थितेषु लग्ने शशाङ्के च शुभैः समेतैः ।
पापैस्त्रिलाभारि गतैश्चयायात् पुंजन्मयोगेषु च संप्रयोगम् ।।३०।।

आधानलग्ने विषमांशराशौ जीवेन्दुकाभ्यां युतवीक्षिते वा ।
नान्यत्सपुत्रंस्त्वथवा[1]सुखेष्टैः पापीयमिश्रैर्वहुभिश्च मिश्रैः ।।३१।।

+वसिष्ठसंहितायामाधानाध्याय ईदृशः पाठोवर्तते । पौष्णद्वये पैतृभया-म्यसार्थ विष्णुद्वये नैधनजन्मभेषु । उत्पातपातग्रहदूषितेषु न कार्यमाधानमनिष्टलग्ने ।। उपप्लवे वैधृतिपातयोश्च विष्टचां दिवा पारिघ पूर्वभागे । सन्ध्यासु पर्वस्वपि मातृपित्रोर्मृ तेऽह्निपत्नीगमनं विवर्ज्यम् ।। दिनेषु युग्मेषु च वक्ष्यमाण योगैः सुतार्थी स्वसतीमुपेयात् । दिनेष्व युग्मेषु च कन्यकार्थी हित्वा च गण्डांस्तिथि लग्नभानाम् ।।

१ नान्यैः स पुत्रस्त्वथवा श्र.क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ओजर्क्षांशे लग्नगे वीर्ययुक्ते जीवेन्द्वर्के ओजराश्यंश संस्थैः ।
पुंजन्मस्याद्व्यत्यये कन्यकास्यान्मिश्रैः खण्डोद्व्यंशगै[1] र्द्वित्रिजन्म ॥३२॥

ओजांशकर्क्षा[2] द्विषमर्क्षसंस्थः पुंजन्मकारी रविसूनुरेकः ।
विचार्यवीर्यं पुरुषग्रहणां, वाच्योऽत्र पुत्रस्त्वथ पुत्रिका वा ॥३३॥

पुंग्रहादीनाह नारदः—

पुंग्रहाः सूर्यजीवारा स्त्रीग्रहौ शशि भार्गवौ ।
नपुंसकौ सौम्यसौरी शिरोमात्रं विधुन्तुदः ॥३४॥

ओजराश्यंशगेचन्द्रे लग्ने पुंग्रहवीक्षिते ।
उपवीति युग्मतिथौ न लग्नः कामयेत्स्त्रियम् ॥३५॥

पुत्रार्थी पुरुषस्त्यक्त्वा पर्वमूलादि पैतृकम् ।
युग्मभेंशे शशाङ्के च लग्ने स्त्रीग्रह वीक्षिते ॥
अयुग्मदिवसे भार्यां पूर्ववत्कामयेत् पतिः ॥३६॥

पुत्रार्थिनो विशेषमाह वसिष्ठः—

रक्तेऽधिकेस्त्री पुरुषस्तु शुक्रे नपुंसकं शोणित शुक्रसाम्ये ।
यस्मादत शुक्रविवृद्धिदानि निषेवितव्यानि रसायनानि ॥३७॥

विदारिकायाः स्वरसेन चूर्णं मुहुर्मुहु र्भावित शोषितञ्च ।
शृतेन[3] दुग्धेन सशर्करेण पिवेत् स यस्य[4] प्रमदाः प्रभूताः ॥३८॥

---

१ व्यङ्गगैः अ. क. । २ ओजांककस्थाद् क. । एषः श्लोक प्र पुस्तके नास्ति । ३ घृतेन लि. पु. । ४ पिवेदजस्रं लि. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नारिकेलनववारि भावितं मासचूर्णवटकं घृताप्लुतम् ।
भक्षयन्पिवति योगराट् पयोयात्यपूर्व इवयोषितां शतम् ॥३९॥

मधुकं मधुना घृतेन वा लिह्यात् क्षीरमनुप्रयोजयेत् ।
लभते च बलान्मनोक्षयं प्रमदानां प्रियतां च गच्छति ॥४०॥

माष [1] सूपसहितेन सर्पिषा षष्टिकोदनमदन्ति ये नराः ।
क्षीरमप्यनुपिवन्ति तासुते सर्वरीषु मदनेन सेविताः ॥४१॥

बार्हस्पत्य संहितायाम्—

हरिहस्तानुराधाश्च स्वातीवारुणरेवली ।
उत्तरात्रितयं चैव रोहिणी चोत्तमा स्मृता ॥४२॥

चित्रादित्येन्दवस्तिष्यस्तुरगाश्चेति मध्यमाः ।
शेषाण्यक्षाणि दुष्टानि स्युर्निषेकस्य कर्मणि ॥४३॥

सोमज्ञगुरुशुक्राणां वारवर्गोदयाः शुभाः ।
तेषां दृष्ट्यादयश्चैव नेतरेषां कदाचन ॥४४॥

शुक्रेऽधिके वलैर्युक्ते ([2] पुमान्वामौ च क्षणिणे ।
रक्तेऽधिके वलैर्युक्ते) नारी वा यौ च दामके ॥४५॥

गर्गः—

लग्नस्थोवा सुतस्थो वा [3] धर्मस्थो वा बली गुरुः ।
प्रोक्तर्क्षे शुभवारे स्याद् धारयेद् गर्भमुत्तमम् ॥४६॥

---

१ श्लोकोऽयं बृहत्संहिताया पञ्चसप्ततितमेऽध्याये वर्तते ।

२ चापान्तर्गतः पाठः प्र. पुस्तके नास्ति ।

३ सुतस्थो वेति प्र.क.पुस्तकयोर्नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लग्नात्मजेसौ संयुक्तौ, अन्योऽन्यं वा भिवीक्षितौ ।
क्षेत्रे परस्परस्थे वा पुत्रयोगा इमे स्मृताः ॥४७॥

लग्नंमुक्त्वा तु बिषमे बलवान्भास्करात्मजः ।
स्थितः पुत्रप्रदो ज्ञेयो नान्यग्रह निरीक्षितः ॥४८॥

पुंग्रहाः[1] षष्ठलाभस्थाः पञ्चमेशो बली यदा ।
सर्वे विषमराशिस्थाः पुत्रयोगा इमे स्मृताः ॥४९॥

चन्द्रशुक्रोदये वापि पञ्चमे, दशमेऽपि वा ।
स्वर्क्षे वा स्वांशके वापि स्त्रीयोगाः शास्त्रवीक्षिताः ॥५०॥

एषु योगेषु नारीणां वन्ध्यानामपि योगतः ।
गर्भाधानं भवत्येव नात्रकार्या विचारणा ॥५१॥

आधानञ्च मन्त्रपूर्वकम् । तथा ष्णुपुराणे—
ऋतावुपगमस्वस्थः स्वपत्न्यां मन्त्रतो द्विजः । इति ।

मन्त्रत इति द्विजाति विषयम् । ते च मन्त्रा गोभिलेनोक्ताः—

उद्ध्वं त्रिरात्रात्संभव इत्येके, यावदृतुमती भवती, उपरतशोणिता तदा संभवकाल इत्युपक्रमात् दक्षिणेन पाणिनोपस्थमभिस्पृशत्[2] विष्णुं योनि कल्पयत्येति यद्वा गर्भं धेहि सिनीवालीति चेति । तदपिगमनं, एकस्यां रामावेकवारम् । तथा च याज्ञवल्क्यः—

एवं गच्छन् स्त्रियं क्षामां मघांमूलं च वर्जयेत् ।
सुस्थ इन्दौ सकृत्पुत्रं लक्षण्यं जनयेत्पुमान् ॥५२॥ इति ।

---

१ श्लोकोऽयं प्र. क, च. पुस्तकेषु नास्ति । २ मभिभृशेत् प्र.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विष्णु स्मृतौ—

निद्रासमयमासाद्य ताम्बूलं वदनात् त्यजेत् ।
पर्यङ्कां प्रमदां भालात् पुण्ड्रं पुष्पाणि मस्तकात् ।
वादा[1] प्रमादा यक्षा हि भयदा सर्वका- इमे ।।५३। इति ।

प्रतिमासं गर्भस्य कललादिभावं मासाधिपतीं चाह गर्गः—

कललं प्रथमे मासि तस्यमासा धिपो भृगुः ।
द्वितीयेमासि भौमेशः गर्भं पिंगाक्षवीर्यवत् ।।५४।।

गर्भाङ्कुरं तृतीये स्यात्तस्य मासाधिपोऽङ्गिराः ।
मज्जास्थि सम्भवो मासि चतुर्थे भास्करोऽधिपः ।।५५।।

पञ्चमे मासि भौमेश स्त्वङ्मेदोरक्तसम्भवः ।
सर्वाङ्गसम्भवःषष्ठे[2] तस्यमासाधिपःशनिः ।।५६।।

ज्ञानेन्द्रिययुतः पश्चात्सप्तमस्येश्वरो बुधः ।
भवनेऽशोष्टमेमासि क्षुत्तृष्णासंभ्रमो भवेत् ।।५७।।

उद्वेगो गर्भसंस्थश्च) मासेशो नवमे शशी ।
प्रसूतिर्दशमे मासि मासेशो भास्करः स्मृतः ।।५८।।

यस्य मासाधिपो रक्तो भंगो वास्तंगतोपि वा ।
तस्मिमासे क्षयं याति प्रसवो वा भविष्यनि ।।५९।।

---

१ गदः श्र. । २ चापान्तरवर्ती पाठः क पुस्तके नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रतिमासपूजामाह वसिष्ठः—

मासे मासे मासपादिग्रहाणां शान्ति कुर्याच् शान्तिवादै[1]र्जपैश्च ।
होमैर्दानैः सज्जनानाञ्च वाक्यैर्गर्भं सम्यक् रक्षयेत्पुत्रकामी ॥६०।

२(मासाधिपतयः—

सितावनेयामरपूज्यसूर्य भौमार्किसौम्योदयपेन्दुसूर्याः ।
मासाधिपास्युः क्रमशो दशैले निपीडिता नाशयति स्वमासेः ॥)६१॥

पराशरः—

गर्भाधानाच्चरे राशौ दशमे मासि सूयते ।
स्थिरेणैकादशे मासि द्विदेहे द्वादशे स वै ॥
निशेककाले यत्प्रोक्तं फलं प्रश्ने समादिशेत् ॥६२॥

पूर्वोक्त निखिलयोगादिफलं वालवृद्धातुरावन्ध्याः परित्यज्य द्रष्टव्यमित्याह—

वालबृद्धातुरा बन्ध्या मुक्ता चान्यासुलक्षणम् ।
विफलं तच्च तासु स्याद्दानमश्रोत्रिये यथा ॥६४॥ इति ।

अतउर्ध्वं प्रतिमासं भवति भौमयोगत स्वासाम् ।
अनुपचयस्थे चन्द्रे धरणी सुतवीक्षणाद्वापि ॥६५॥

आहूय नारी प्रतिपत्सुपुण्या प्राक्पुष्पवत्या समये च बाला ।
स्रगन्धपुष्पाक्षतताम्बुलैश्चकार्यं यथोक्तं कुरुते शुभेह्नि ॥६६॥

प्रथमेदिवसे रजस्वलास्याद् भर्तृ विहीना धनाढ्यता द्वितीयायाम् ।
पुष्टाङ्गी बिमलीतृतीयदिबसे वृषलीचरिता चतुर्थ्यान्तु ॥६७॥

---

१ शान्तिवाक्यैः अ. क. । २चापान्तर्गतः पाठः प्र. क पुस्तकयोर्नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पञ्चमेऽहनि सुभाग्ययुक्ता षष्टकेऽहनि विकारचारिणी ।
सप्तमेधनवती सुभगास्यादष्टमे तु कलहप्रिया सदा ॥६८॥

नवम्यां विधवा नारी दशम्यां भाग्यवर्धिनी ।
एकादश्यां शुचिनारी द्वादश्यां परदूषिणी ॥६९॥

त्रयोदश्यां[1] तेजखिनी पापे चरतीति शर्बतिथ्यान्तु ।
नष्टेन्दौ विधवास्यात्पूर्णे नष्टा क्रमेण धात्वाद्याः ।
रिक्तासु पर्वस्वथकार्तिकेयो—

द्वयोः कराण्यां व्यतिपात दस्वे ।

एकार्गले पारिघ वैधृतेषु
चोत्पातसन्ध्या सु रजोप्यनिष्टम् ॥७०॥

अथ वारफलानि—

सदागदार्ता स्वपतिवृतासा वन्ध्या प्रजावत्यतुलार्थ युक्ता ।
आनन्द कृत्पापवती च पुष्पावती क्रमाद्भास्कर वारकेषु ॥७१॥

नक्षत्रफलानि —

शुभयुत धनहीना पुष्पवत्या सुपुत्रा
धनवतिसुखहीना दुष्टचित्तातिमूर्खाः ।
सुतवति, धनहीना रोगिणी स्याद्वियोगा
कुलटवति रजास्यात्साधुवृत्तातिरोगा ॥७२॥

पतिहित धनयुक्ता भूरिवित्तातिमान्या
पतिहित धनहीना पूजिता भाग्ययुक्ता ।

१ त्रयोदश्यां तेजस्वी लि.पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सुतवति बहुपुत्रा दुश्चरी भाग्ययुक्ता,
सुतवति पतिदस्रा चारजोत्पत्तिधिष्ण्या
अङ्गः वङ्गः कलिङ्गे च काश्मीर मगधाह्वये ।
विश्वादि फलमुन्नेयं वाल्हीके वर्वरे खसे ॥७४॥

विश्वादि द्वादशं श्रेष्ठं कुलघ्नादिति सप्तकम् ।
शुभं हस्तादि चातुष्कं शेषा वैधव्य तारकाः ॥७५॥

सौराष्ट्र शाल्व सिन्धु नाम नलादि फलं तथा ।
करादि शेष देशेषु रजः काले शुभावहम् ॥७६॥

श्रीपतिः—

करादिपञ्चोत्तरमूलपूषाविष्णुस्त्रयाश्वीज्यविधीन्दुभेषु ।
आद्यंरजः सौख्यसुतायुरर्थसौभाग्यवृद्धि कुरुतेऽङ्गनानाम् ॥७७॥

पूर्वात्रये याम्य भुजङ्गधिष्ण्ये वैधव्यमस्या विदधीत नूनम् ।
मघेशयोः शोकमथादितेऽभे सावन्धकीन्द्रेप्यनले दरिद्रा ।
शेषाणि ऋक्षाणि शुभानि सर्वान्येतानि शान्तेर्वलयुक्तकानि ॥७८॥

कुतिथि कुलिक वेला पापवर्गोदयो वा दुरितखचरवारे वैधृतौ पापधिष्णे ।
मदननिधनराशौ क्रुरयुक्ते च दृष्टे त्वशुभमिति च पुष्पं वृद्ध मृत्युस्वरे वा॥७९॥

चतुर्थी द्वादशीषष्ठी पञ्चदश्यपि निन्दिताः ।
रव्यारशनिवारेषु कुतिथौ परिघादिषु ॥८०॥

आरोग्यसौभाग्यमतीवसौम्यवर्गेषु या पुष्पवती च कन्या ।
दुःखामयानर्थविवादशीला वर्गेषु सौम्या वरवारिणी सा ॥८१॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जारिणीं सुचरिता जनाश्रया, सत्सुता कलहकृद्वहुप्रजा ।
सज्जनावृतरतानि निर्गुणा, निष्फलामृतवतो विकारिणी ॥८२॥

नारदः—

मेर्षसिंहोक्षचापानामुदये धवलाम्बरा ।
मीनालिर्कोकिनक्राणामुदये मलिनाम्वरा ॥८३॥

घटयुग्माङ्गनातौलिलग्ने रक्तयुताम्बरा ।
पृच्छाकाले भवत्येवं वालिका प्रथमार्तवे ॥८४॥

सुभगा श्वेतवस्त्रास्याद् दृढवस्त्रा पतिव्रता ।
क्षौमवस्त्रा क्षितीशा स्याद् नववस्त्रा सुतान्विता ॥८५॥

दुर्भगा जीर्णवस्त्रास्याद्रोगिणी कृष्णवाससा ।
नीलाम्बरधरा नारी विधवा पुष्पिता ततः ।
मलिनाम्बरधरानारी दरीद्रा स्याद्रजस्वला ॥८६॥

इन्द्रो गुणो धूमय मेच वार्द्धि श्वाने वृषेगार्दभवाहु संख्या ।
नागे गुणीशे गुणवेद संख्या रक्तं सुपुष्पं फलदञ्च वस्त्रे ॥८७॥

वस्त्रेषुरक्तं विषमे च पुंसा समे च कन्या प्रथमे च गर्भे ।
रक्तश्चतुर्थश्च सदा च रोगी द्वये च लक्ष्मी गणयाधिवृद्धिम् ॥८८॥

शैल चन्द्राष्ट वेदाश्च ऋतु वाह्वंक दिक् कथा ।
प्रागाद्याः पुत्र संख्याश्च बालिका पृथमार्त्तवे ॥८९॥

दुष्टः पतिः प्रजासप्त जीर्णन्तु धवलाम्बरम् ।
रजो वत्याः स्त्रिय पूर्वे प्रश्नकाले समादिशेत् ॥९०॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भर्ताच सततं क्रूर एकमस्याश्च नन्दनम् ।
हव्यवाह दिशायान्तु निलं निः वसनं भवेत् ॥९१॥

अष्टपुत्राभ्रसान्द्रन्तु पापोऽपि बलवान्पतिः ।
दक्षिणस्यां दिशि प्रश्ने पुष्पवत्या स्त्रियो भवेत् ॥९२॥

सानेच्छति स्वभर्त्तारमन्यासक्ता सदा भवेत् ।
शुवल वस्त्रां कुपुत्राञ्च, चत्वारो रक्षसो दिशि ॥९३॥

स्त्रीपुंसो वरुणेशायां स्नेह मक्षयमादिशेत् ।
भवेद्वस्त्रं च मलिनं सुशीला तनयाश्च षट् ॥९४॥

सा नेच्छति पती नन्यात् स्वीकुर्यान्मरुतोदिशि ।
द्वावेव तनयौ स्यातां रक्ष माच्छादनं भवेत् ॥९५॥

तस्या वैश्रवणेशायां पतिः श्रीमान्भवेत्सुखी ।
रक्त युक्तं सितं वस्त्रं सुपुत्रा नवसम्मिता ॥९६॥

नेच्छन्ति सा स्वभर्त्तारं स्वैरिणी सततं भवेत् ।
ऐशान्यां दशपुत्रास्या द्वातु वस्त्रं समादिशेत् ॥९७॥

मेषे च सिंहे च रजस्वला या ग्रामे परस्मिन्प्रथमार्त्तवं स्यात् ।
वृषे तु गोष्ठे धनुसि स्वगेहे मध्ये तु संग्राम जनस्य मध्ये ॥९८॥

रात्रौ नृयुग्मे तु दिगम्बरीह कन्योदयेऽन्यस्य गृहं रजस्तम् ।
मृगे घटे कर्कटके विलग्ने रजस्वला सा जलसन्निधौ च ॥९९॥

मीने तु सौप्तिके तस्या कन्यायाः प्रथमार्त्तवम् ।
ग्रामाद् वहिः परग्रामे नास्ति स्याद् व्यभिचारिणी ॥१००॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पतिवृता, परस्थाने सुशीला गृहमध्यके ।
ग्राममध्ये तु वृद्धिश्च विधवा च दिगम्बरी ॥१०१॥

परागारे च दुःशिला आयुष्यं जलसन्निधौ ।
धनमध्ये तु कन्याया, धनधान्य समृद्धिदा ॥१०२

अजधटझषकीटे भानुमन्त्यस्तयाते, वृषधनुषि कुलीरे चार्धरात्रौ तुलायाम् ।
मकरमिथुनसिंहे कन्यकायां प्रभाते, इति मुनिवरदृष्टो वासरः क्रान्तिकालः ॥१०३

माता यदिदे वृक्षेश्रीस्यादस्यात्सुरवं जनकः ।
स्याज्जातोपिता यदि दारिद्रं स्याच् श्वश्रुरल्पायुषे व्रजेत् ॥१०४॥

स्वसुरो यद्यल्पार्था पुण्यस्त्री वेदने कुपुत्राढ्या ।
विज्ञायैवंपृच्छेदन्या पुण्याङ्गना मुहूर्तज्ञम् ॥१०५॥

दीक्षादि गर्भ पुत्रश्च कौलेषु दुहिता स्मृता ।
पृष्टारः सन्तु यावन्त स्तावन्तो रक्त विन्दवः ॥१०६॥

वसिष्ठः—

नक्षत्रवारतिथियोगदिनार्द्धकाल—
षड्वर्गसंकथितमिष्टमनिष्टमेतत् ।
ज्ञात्वाल्पदोषमथ भूरिगुणं च पश्चाद्
बृद्धाङ्गनोक्तमपरं शुभकर्म कार्यम् ॥१०७॥

चाण्डाली पतिता समाथ रजकी[1] शूद्रादिकादि क्रमात् ।
शुद्धा पुष्पवती च पञ्चमदिने हव्येषु कव्येषु च ॥१०८॥

१ समान्यरजकी अ. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चेद्दुष्टेऽह्नि नवोदकुम्भशलिलैः सन्मन्त्रितै रौषधैः ।
स्नानं पापनुदं सपञ्चकलशैः कार्यं समृद्भिर्जलै[१] : ॥१०९॥

ऐशा[२]न्यतो मण्डलगोमयेन परिस्तृतेग्नौ जुहुयात्सदुर्वाम् ।
युग्मां घृताक्ताञ्च समित्प्रमाणां गायन्ति चाष्टेन सहस्रसंख्याम् ॥११०॥

शतप्रमाणामथवाद्यहन्त्री शुभांयवैर्व्याहृतिभिस्तिलैश्च ।
ततःसुरान् भूमिसुरान् पितॄंश्च सन्तर्पयेदन्नसुवर्णवस्त्रैः ॥१११॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते
जगन्मोहने रजस्वलायाः फलकथाऽध्यायः ।

अथाधानाऽध्यायः

कालविधाने—

वेदागमोक्तसमये रुचिरप्रदेशे व्याजीकृतेन जितरोषचयेन पुंसा ।
मन्त्रौषधप्रशरतीर्थजलोज्ज्जलेषु कान्ताजनेष्वथ निषेकविधिर्विधेयः॥१॥

सौर मासे तु मौढ्यं गुरुभृगुसूतयो श्चाधिमासे न दोषः ।
पुत्रोत्पत्तौ ग्रहाणामिह वदति फलं शुक्लपक्षे प्रशस्तम्
छिद्रां पर्वाणि चान्त्यं त्यज तिथिषु सदा शोभनाश्चात्र शेषाः
कृष्णे भागं तृतियं त्वशुभमिह भृशं सर्व कार्येषु नूनम् ॥२॥

---

१ समृद्बीजकैः लि . पु . ।
२ ऐशान्यतो गोमयमण्डले च परिस्तृतेऽग्नौ जुहुयाच्च दुर्गाम् ।
युग्मां घृताक्तां च समित्प्रमाणां गायत्रिसंज्ञाष्टसहस्रसंख्याम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

छिद्रतिथीनाह् नारदः—

चतुर्दशी चतुर्थी च, अष्टमी नवमी तथा ।
षष्ठी च द्वादशी चैव पक्षच्छिद्राह्वया स्मृता ॥३॥

भूता ५ ष्ट ८ मनु १४ तत्वा २५ ङ्क ९ दश १० शेषा सुशोभना ।
दोष नाडीषु यत्कर्म कृतं कर्म विनश्यति ॥४॥

न दिनत्रयं निषेवेत् स्नानं माल्यानुलेपनं च स्त्री ।
स्नायेत चतुर्थ दिने सर्वौषधिसंयुतै स्तोयैः ॥५॥

युग्मासु मनुष्या निशासु नार्यो भवन्ति विषमासु ।
दीर्घायुषः स्वरूपाः सुखिनश्च विकृष्ट पर्व्वासु ॥६॥

वसिष्ठः—

पुत्र हीनस्य सुगति नास्तीत्युक्तं त्वया पुरा ।
तस्मान्मुनिवर श्रेष्ठ पुत्रोत्पत्तिः कथं भवेत् ॥७॥

नास्तिकेंन मनुष्याणामपुत्राणां त्रिविष्टपम् ।
तेषां दानफलं नास्ति नास्त्येव तपसः फलम् ॥८॥

गर्भाधानयोग्यं रसानयम् ॥ अत्रिः—

१ धातृफलानां स्वरसेन चूर्णं, सुभावितं क्षौद्रसिताज्ययुक्तम् ।
लीढ्वातु पित्वाथ पयोग्नि शक्त्या कामं निकामं पूरुषो निषेवेत् ॥९॥

धात्रीचूर्णस्य कास्यं स्वरस परिगतं क्षौद्रसर्पिः स मांसी
कृष्णामानी सिताष्टं प्रसृत समयुतं स्थापितञ्चान्त्यवाशौ ।

१श्लोकोऽयं वृतत्संहितायाः कान्दर्पकेऽध्याये वर्तते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वर्षान्ते तत्समस्तं भवति विकलितो रूप वर्ण प्रभावो
निर्व्याधिर्बुद्धिमेधा स्मृति वचन बलस्थैर्य सत्वै रुपेतः ॥१०॥

आयुः प्रदा वृष्यतमा च मेध्या १ भवेज्ज्वरव्याधिविनाशिनी च ।
निम्बस्य तैलं प्रकृतिस्थमेव नश्यन्तिषेकं विधिना यथा वा ।
मासेन तु क्षीर भुजो यथेष्टं यमाप्त दूतं पतितं निहन्ति
चूर्णं स्वदंष्ट्रामलकासृतानां लेह्यं सर्षापिर्मधुभागयुक्तम्
वृक्षस्थिरः शान्तविकारदुः खं समाः शतं जीवति कृष्णकेशः ॥११॥

पथ्याक्षामल चित्रकूटहननीशद्वाकुटीभृङ्गराट्
भल्लाकासनलोहकान्तलशुनं भागानुबृद्धिक्रमात् ।
तच्चूर्णं मधुशर्कराज्य सहितं तत्पात्र संयोजितम्
खादेन्निष्परिहारमेतदमृतं तथ्यं सदा चक्षुषे ॥१२॥

सुरम्या यामिन्यः समरवसुधाधौतककुभः
स्रजो नानाकाराः परिमलविशन्मत्तमधुपाः ।
प्रभूतं ताम्बूलं रतिसमयसज्जा नियतमा
निरातङ्कश्चेतो यदि वद किमन्यैर्वृष इति ॥१३॥

[२]हर्म्यपृष्ठमुडुनाथरश्मय[३]: सोत्पलं मधु मदालसानिका ।
वल्लकी स्मरकथा रहस्रजो वर्ग एष मदनस्य वागुरा ॥१४॥

चन्द्रार्कशुक्रक्षितिजे स्ववर्गगैर्बृहस्पतौ धर्मविलग्नपुत्रगे ।
योगेष्टपत्यं भवतीह निश्चयादमीच योगा विफला
विवीजिनाम् ॥१५॥

---

[२]श्लोकोयं बृहत्संहितायां कान्दर्पिकेऽध्याये वर्तते ।
[१]मध्या शङ्खपुष्पी [३] हर्म्यपृष्ठमृदुनादरश्मयः लि. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अत्र रजस्वलाध्याये आधानयोग्यकालवचनानी कललघनादि[1] तत्र द्रष्टव्यानि ॥ ॥इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने आधानाऽध्यायः

अथ पुंसवनाऽध्यायः

शौनकः—

अथ पुंसवनं कुर्यात् तृतीये मासि पुंस्त्वदं ।
शुक्लपक्षे च पूर्वाह्ले चन्द्रताराबलान्विते ॥१॥

नारदः—

बलोपन्ने दम्पत्योश्चन्द्रताराबलान्विते ।
अरिक्तपर्वदिवसे कुजजीवार्क वासरे ॥२॥

गर्गः—

कुर्यात् पुंसवनाख्यं तु पुन्नामर्क्षे शुभे दिने ।
पुन्नाम श्रवणं तिष्यः स्वाती हस्तपुर्नवसु ।
मूलं प्रोष्टपदं चानुराधा मृगशिरोऽश्विनी ॥३इति।
सौम्ये मृत प्रजा मन्दे मृत्युर्वन्ध्या च भार्गवे ।
सोमे दुग्धविहीना स्याच् शेषा सर्वार्थसाधकाः ॥४॥

कश्यपः कालविधाने—

कुर्यात्पुंसवनं प्रसिद्धविषये गर्भेतृतीयेऽथवा
मासि स्फीततनौ तुषारकिरणे पुष्येऽथवा वैष्णवे ।
हित्वा कर्कटकं नृयुग्ममवलामन्येष्वरिक्ते तिथौ ।
शुद्धे नैधनधाम्नि शुक्रशशभृत् विद्मन्त्रिणां वासनात् ॥५॥

---

[1]अत्रंकललघनादि इत्यधिकः पाठो अ. क. पुस्तकयोर्वर्तते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गर्भप्रसिद्धविषये—प्रकटत्वं प्राप्ते इत्यर्थः। अथवा तृतीयेमासीति सम्बन्धः ।। चन्द्रे स्फीततनौ पूर्णेसतीत्यर्थः।। नृयुग्मं मिथुनं, अबलाकन्या एतानी लग्नानि शुक्रसोमबुध शनैश्चर, वारांश्च हित्वा, अन्येषु लग्नादिषु पुंसनं कुर्यादित्यर्थः। तथैवगुरुः—

होरासु च प्रशस्तासु शुभमासांशकादिभिः ।
कर्कियमौ विना शेषाः राशयः शुभदास्त्रियम् ।।६।।

शुभग्रहाणां नवांश द्वादशांशकैः प्रशस्तासु च होराषु राशिषु च पुंसवनं कुर्यादित्यनुषङ्गः।।

के राशय समीचीना इत्याकांक्षायामाह, कर्कीति, कर्कमिथुने स्त्रियं कन्यकाञ्च हित्वा अन्ये राशयः शुभाः तेष्वीत्यर्थः । याज्ञवल्क्यः—

गर्भाधानमृतौ पुंसवनं स्यन्दनात्पुरेति । पुंसवनं इत्यनु वृत्तौ पारस्करः। मासे द्वितीये तृतीये वा, यदह पुंसां नक्षत्रेण चन्द्रमा स्यादिति बृहस्पतिः। याते गर्भस्यन्दने पुंसवनमाह सवनं स्यन्दितेशिशाविति । सवनं- पुंसवनं ।। अत्रयथा शाखं व्यवस्था ।

इतिश्रीसारङ्गसाधुवचामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने पुंसवनाऽध्यायः

अथ सीमन्तोन्नयनम् । तत्र याज्ञवल्क्यः— षष्ठेष्टमे वा सीमन्त इति ।।
शङ्खः— गर्भस्यन्दने सीमन्तोन्नयनम् । यावद् वा प्रसव इति ।।
सांख्यायन गृह्ये— सप्तमे मासि प्रथमगर्भे सीमन्तोन्नयनमिति ।
आपस्तम्बः — सीमन्तोन्नयने प्रथमगर्भे चतुर्थे मासीति ।।
[1]वैजपादः— अथ सीमन्तोन्नयनं मासि चतुर्थे षष्ठे पञ्चमे चेति ।।

---

१ 'वैजपाद 'इतिपाठः क पुस्तके नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लौगाक्षिः– तृतीयगर्भमासे, सीमन्तं कारयेदिति[1] । अत्र विशेषमाह

शौनकः— आपूर्यमाणपक्षे यदा पुंसां नक्षत्रेण चन्द्रमा युक्तास्यादिति । पूंसवनसीमन्तोन्नयने स्त्रीसंस्कारौ, अतएव सकृत् कर्तव्या विति केचन ।

पारस्करः– पुंसवनवत् सीमन्तोन्नयनं प्रथमगर्भ इति । यथा च

देवलोऽपि- सकृच्च संस्कृतानारी सर्वगर्भेषु संस्कृतेतिः ।

हारीतः—

सकृत्संस्कृत संस्काराः सीमन्तेन द्विजस्त्रियः ।
यं यं गर्भं प्रसूयन्ते स सर्व संस्कृतो भवेत् ॥१॥ इति ।

अत्रापि स्वस्व गृह्यानुसारेण व्यवस्थाः ।

अकृतसीमन्तायाः प्रसव सत्यव्रतोक्ते कृत सीमन्ता प्रसवे तु कथञ्चना गृहीतपुत्रा विधिवत्, पुनः संस्कारमर्हतीति ॥

तथा नारदोपि—

चतुर्थेमासि षष्ठे वा प्यष्टमे वा तदीश्वरे ।
बलोपपन्नो दम्पत्योश्चन्द्रतारा बलान्विते ॥२॥ इति ।

काश्यपः कालविधाने—

मासे षष्ठेऽष्टमे वा वलिनि तदधिपे शीतगौ चेष्टदृष्टे ।
पुन्नामर्क्षोपजाते नरभवननवांशे तद्ग्रहे चोपयाने ॥
कार्यं सीमन्तकर्म त्रिदशपति गुरौ केन्द्रगे वा त्रिकोणे ।
क्रूरैः केन्द्रत्रिकोणव्ययनिधनधने वर्जिते गर्भ पुष्ट्यै ॥३॥ इति ।

---

१ उन्नयेदिति प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बार्हस्पत्ये—

पूर्वपक्षः शुभः प्रोक्तः कृष्णे चात्यन्त्रिकं[३] विना ।
पूर्वाह्णे एव तत्रापि नापराह्णे कदाचन ॥४॥ इति ।

शुक्लपक्षे उक्ततिथ्याद्यभावे दशमीपर्यन्तं कृष्णपक्षो ग्राह्यः ।
नतु तत्सद्भावे, शुक्लपक्षस्यैव मुख्यत्वात् । तथा च परासरः—
आपूर्यमाणो मुख्यस्थात् सर्वस्मिञ्शुभकर्मणि ।
कृष्णो गौणो दशान्तः स्याद् नागान्तो व्रतबन्धने ॥५॥

गुरुः—

रोहिण्यामैन्दवादित्यां पुष्यहस्तोत्तरा त्रिषु ।
पौष्णवैष्णवयोश्चैव शुभं सीमन्तकर्म च ॥६॥

व्यासः—

पुरुषग्रहवारास्युः शुभाः सीमन्त कर्मणि ।
मध्यो स्त्रीग्रहवारौ तु वर्जयेत्तु नपुंसकौ

वसिष्ठः—

शस्ते तिथौ जीवकुजार्कवारे हस्तेन्दुपुष्यादितिविष्णुभेषु ।
विधातृपौष्णोत्तरभेषु नूनं सीमन्तकार्यं शुभदं वदन्ति ॥८॥

गुरुः—

मूलर्क्षे केचिदिच्छन्ति सीमन्तं शुभदं बुधाः ।
सिंहाली वर्जयेल्लग्नं ग्रहैरस्टमवर्जितम् ॥९॥

---

३ चात्यन्तिकं अक. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ग्रहैरतिक्रूरग्रहैरित्यर्थः ॥ तथा च भारद्वाजः—

व्रतबन्धे च सीमन्ते जन्मन्यपि शुभग्रहाः ।
अष्टमे चन्द्ररहिता तदायुर्वृद्धिरीरिताः ॥१०॥

गर्गः—

सीमन्तोन्नयनं कार्यं शुभांशे शुभलग्नगे ।
कुलीरमृगकन्याश्च वर्ज्याः शेषास्तु शोभनाः ॥११॥

वसिष्ठः—

न नैधने नैधनशुद्धिलग्ने क्रूरग्रहैर्युक्तनिरीक्षिते वा ।
दृष्टे सदा पञ्चभिरर्कचन्द्रसुरेज्यपूर्वैरथवा चर्तुभिः ॥१२॥

नैधने, अष्टमशुद्धिलग्ने, नैधने, अष्टमक्रूरग्रहशून्यलग्नेऽपि क्रूरग्रहैर्युक्तनिरीक्षिते वापि । सूर्यादिभिः पञ्चभिश्चतुर्भिर्वा दृष्टेपि नैधने जन्मराशितः लग्नाद्वाबलिनः सकाशात् अष्टमेलग्ने सीमन्तं न कुर्या दित्यर्थः ।

नारदः—

चन्द्रार्केज्यादयः पञ्च यस्य राशेस्तु खेचराः ।
दृष्टा तच्छुभदं लग्नं चत्वारो वा बलान्विताः ॥१३॥

वसिष्ठः—

केन्द्र त्रिकोणत्रिधनायसौम्यैर्दुश्चिक्यलाभारि गतैश्च पापैः ।
षडष्टलग्नान्त्यविवर्जितेन्दौ सीमन्त कार्यं शुभदं सदैव ॥१४॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्ययेष्टमे वा सुतभे विलग्ने चैकोऽपि पापश्च नभश्चराणाम् ।
सीमन्तिनीनाशकरस्त्ववश्यं करोति गर्भस्य च वा[1] विनाशम् ॥१५॥
इति ।

तथा च वादरायण :—

क्रूरग्रहाणामेकोऽपि लग्नादन्त्यात्मजाष्टमः ।
सीमन्तिनी वा तद्गर्भं बली हन्ति न संशयः ॥१६॥

वसिष्ठ :—

प्रवेशवस्त्र क्षौरादि प्रतिष्ठा वास्तु भूषणम् ।
अश्वेभ नयने भोष्ट्र सीमन्तोऽन्नादि चित्रभे ॥
प्रतिष्ठोद्वाह सीमन्त क्षौम वस्त्रोपनायनम् ॥१७॥

त्रिकोण केन्द्रे शुभदैः शुभग्रहैः सुतारि रिः ष्फोदयवर्जितैरघैः ।
व्ययारिरंध्रोदयगे च चन्द्रे तदा च सीमन्त विधिः शुभावहः ॥१८॥

परो गुरु :—

ग्रहेवलिनि[2] केन्द्रस्थे जीवे शुक्रेऽथवा यदि ।
चन्द्रः सत्कर्मकर्त्ता चेत् योगः सीमन्तकर्मणि ॥१९॥

वसिष्ठ :—

वृत्रशत्रुसचिवेऽथवा भृगौ लग्नगेऽथ नवपञ्चमेऽपि वा ।
गर्भपुष्टिरतुला भवेदिति प्रायशोऽपि हि वदन्ति सूरयः[3] ॥२०॥

---

१ नयेच्च गर्भं त्वथवा लि. पु. । २ महावलिनि क. । ३ सिद्धिदः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चन्द्रे जलस्थे दशमस्थिते वा कुर्यादिदं कर्म च पौर्णमास्याम् ।
पुंकर्मणासार्द्धमिहापि सर्वं नेन्दुं च लग्नं शुभमाह जीवः ॥२१॥

चतुर्थषष्ठाष्टम मासभाजि सौरेण गर्भे प्रथमं विधेयम् ।
सीमन्तकर्म द्विजभामिनीनां मासेऽष्टमे विष्णुबलिं च कुर्यात् ॥२२॥

काश्यपः कालविधाने—

सौरे मासे तु मौढ्यं गुरुभृगुसुतयोश्चाधिमासे न दोषः ।
पुत्रोत्पत्तिं ग्रहाणामिह वदति फलं शुक्लपक्षे प्रशस्तम् ॥
छिद्रां पर्वाणि चाद्यं त्यज तिथिषु सदा शोभनाश्चात्र शेषाः ।
कृष्णे भागं तृतीयं त्वशुभमिहभृशं सर्वकार्येषु नूनम् ॥२३॥

गुरु :—

सौरेणैव चतुर्थे स्याद् मासि षष्ठेऽष्टमेऽपि वा ।
मासि प्रोक्ताः क्रिया याः स्युः स्ता सर्वा सौरमासतः ॥२४॥

एषु मासेषु सर्वेषु प्राप्ते वा जीव शुक्रयोः ।
मूढभावे न दोष स्यादधिमासादि मेव च ॥२५॥

इतिश्रीसारङ्गसाधुवचनामृतेनभट्टश्रीलणाक्ष्मचार्यविरचिते जगन्मोहने सीमन्तप्रकरणाऽध्यायः

अथ सीमन्ताष्टकाऽध्यायः

सीमन्तानन्तरं गर्भरक्षार्थं विष्णुपूजां कुर्यात् । तथाच वसिष्ठः—

१रोहिण्यां वा वैष्णवे पूर्वपक्षे, द्वादश्यां वा सप्तमे वा तिथौ च ।
मध्ये वाह्नः पूर्वभागेनुकूले विष्णोः पूजां कारयेद् गर्भपुष्ट्यै ॥१॥

१ इमे चत्वारः श्लोका व. सं. २५ अध्यायान्तर्गताः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पीताम्बरं कृष्णवर्णं शङ्खचक्रगदाम्बुजम् ।
वैकुण्ठवासिनं विष्णुं मृत्कुम्भे चिन्तयेत् ततः[१] ॥२॥

विष्णोश्चरूपं कनकेन कृत्वा तल्लिङ्गं मन्त्रेण सुगन्ध पुष्पैः ।
वस्त्राक्षतैर्गुग्गुलुधूपदीपैर्नैवेद्यताम्बूलफलैश्च सम्यक् ॥३॥

विष्णुं च देवतापूज्यं[२] गर्भिणीनां रक्षणाय च ।
ब्राह्मणेभ्यः प्रदातव्या प्रतिमा वस्त्रसंयुता ॥४॥ इति विष्णुपूजा

अथ सीमन्ताष्टकम्

गलक गणितलग्ने माङ्गलीये प्रसस्ते
गुरुणि सति मुहूर्ते प्राप्तसीमन्तसीम्नि ।
सकलगुणसमग्रं पुत्रमुत्पादयन्तं[३]
सकलपुरमहीपाः सन्निधाना भवन्तु ॥५॥

पुरस्थिताः पुंसवने प्रकीर्तिते सुलक्षणा क्षीणकपुत्रसंपदि ।
निमन्त्रिताः स्युर्हित मन्त्रजालैर्नवग्रहाः सन्तु समग्रसम्पदः ॥६॥

व्रह्मा च विष्णुश्च महेश्वरश्च गणाधिपः शक्ति धरश्च दुर्गा ।
वायुर्महेन्द्रानलभास्कराद्याः सीमन्तिनीं पुत्रवतीं करोतु ॥७॥

गङ्गा च सिन्धुश्च सरस्वती च गोदावरीयामुननर्मदाश्च ।
कावेरीकाद्याश्च समुद्रयुक्ताः सीमन्तिनीं पुत्रवतीं करोतु ॥८॥

वाल्मीकिरत्रिः कलशोद्भवश्च गर्गो वसिष्ठः पुलहः पुलस्त्यः ।
अत्रिर्मनुः कश्यप जामदग्नी सीमन्तिनीं पुत्रवतीं करोतु ॥९॥

---

१ विन्यसेत् तत अ.क. ।
२ विष्णुं च देवतां पूजा लि. पु. । ३ पुत्रमुत्पादयन्तः, भवन्ति प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दिलीपरध्वादिनृपाः प्रसिद्धा नलोययातिर्नहुषः कुवेरः।
युधिष्ठिरो राघवसूरसेनौ सीमन्तिनीं पुत्रवतीं करोतु ॥१०॥

अश्वत्थकप्लक्षकुरुण्ड निम्बा श्रीचन्दनः कल्पमहीरुहश्च ।
श्रीमन्दराद्याश्च महीधराश्च सीमन्तिनीं पुत्रवतीं करोतु ॥११॥

श्रीशैलविन्ध्याद्रिसुवेणु शैलाः श्रीधातुकी मलयसीकराद्याः।
श्रीमेरुमन्दाद्रि महानगाश्च सीमन्तिनीं पुत्रवतीं करोतु ॥१२॥

सारस्वती हैमवती च लक्ष्मीः सरस्वती सत्ययुता च सीता।
श्रीमातृकाद्याश्च समस्तकन्याः१ सीमन्तिनीं पुत्रवतीं विदध्युः२॥१३॥

रामत्रयं विष्णुपदत्रयं च शम्भोश्चनेत्रत्रयमाहुरार्याः।
विष्णोश्च नाम त्रयमेवसौख्यं सीमन्तिनीं पुत्रवतीं विदध्युः ॥१४॥

इतिश्रीसारङ्गसाधुवचनामृतेनभट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने सीमन्ताष्टकाऽध्यायः—

अथ जातकर्म— जातकर्म ततः कुर्यात्पुत्रे जाते यथोदितम्।
स्वगृह्योक्त विधिनेत्यर्थः॥ तच्च स्नानानन्तरं तथा च व्यासः—

रात्रौ स्नानं नकुर्वी दानं चैव विशेषतः।
नैमित्तिकं तु कुर्वीत स्नानं दानं च रात्रिषु॥ इति ॥१॥

नैमित्तिकदानान्यपि स एवाह—

ग्रहणोद्वाह संक्रान्तियात्रार्तिप्रशवेषु च।
दान नैमित्तिकं ज्ञेयं रात्रावपि न दुष्यति॥ इति ॥२॥

---

१ ससप्तकन्याः प्र.। २ करोतु अ. क.।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जातकर्मं च नाभिनालच्छेदनात्पूर्वेह । जैमिनिः—

यावद् न छिद्यते नालं तावद् नाप्नोति सूतकम् ।
छिन्न नाले ततः पश्चात् सुतकं तु विधीयते ॥३॥

यच्च विष्णुधर्मोत्तरे—

अछिन्ननाभ्यां कर्तव्यं श्राद्धं वै पुत्र जन्मनि ।
आशौचोपरमे कार्यमथवा नियतात्मभिः ॥४॥ इति ।

प्रचेताः— स्त्रीशूद्रश्वपचश्चैव जातकर्मणि चार्थतः ।
आमश्राद्धं तदा कुर्याद्विधिना पार्वणेन तु ॥५॥ इति ।

आमाभावे हेम्ना – तथा च व्यासः—

द्रव्याभावे द्विजाभे प्रवासे पुत्रजन्मनि ।
हेमश्राद्धं प्रकुर्वीत यस्य भार्या रजस्वला ॥६॥

द्रव्याभावे, आमद्रव्याभावे रजस्वलेति पाककर्मकल्प्यतराभाव इति द्रष्टव्यम् ।

अत्र विशेषमाह शङ्खः

विदेशगो वा विगताग्निको वा रजस्वलायामपि धर्मपत्न्याम् ।
श्राद्धं मृताहे विदधीतपुत्रो र्नामान्न दानं नच पञ्चमेह्नि ॥७॥

व्यासः— मृदुध्रुव चर क्षिप्र भेष्वेषामुदये पिवा ।
गुरौ शुक्रेऽथवा केन्द्रे जातकर्म च नामच ॥८॥ इति ।

मृगशीर्षं चित्रा रेवती अनुराधाश्चेति एतानि नक्षत्राणि मृदनि । उत्तराभाद्रोत्तराफाल्गुनीत्युत्तराषाढा रोहिणी च नक्षत्राण्येतानि स्थिराणि ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रवणस्वाती शतभिषगृक्षाण्येतानि चराणि । अश्विनीहस्तपुष्यर्क्षाण्येतानि क्षिप्राणि ।

वसिष्ठः— [1]सचैलमाप्लुत्य सुतस्य जन्म श्रुत्वा स्वगृह्योक्तविधानपूर्वम् ।
जातस्य रक्षार्थमरिष्टहन्तृ पिता विदध्यादिति जातकर्म ॥९॥

कालविधाने—

हस्तादित्यशशाङ्कपौष्णपवनप्राज्ञेशमित्रोत्तरा —
चित्राश्विश्रवणेषु वृश्चिकघटौ हित्वा विरिक्ते तिथौ ।

शुक्राचार्यशनैश्चरज्ञशशिनां वारेऽनुकूले शुभे ।
राशौ वेश्मनि सूतिकागृहविधिः क्षेमंकरः कीर्त्यते ॥१०॥

वसिष्ठः—

मुखावलोकेन सुतस्य जीवितः पिता च मुच्येत यतस्तदर्णतः ।
ततः क्षपादि त्वगणय्य तत्क्षणं विधीयते जन्मविधिः सुतोदये ॥११॥

यस्मिन्मुहूर्ते जनितः कुमारस्तस्मिन् विधेयं खलु जातकर्म ।
विनिर्गमे वाप्यथ सूतकेऽपि तस्मिन्दिने तस्य च नामधेयम् ॥१२॥

सन्तर्प्य देवान् सपितॄन् द्विजांश्च सुवर्णगोभूतिलकांस्यवस्त्रैः ।
गुडाज्यरौप्यैर्लवणैश्च होमैं रक्षोघ्नमन्त्रैः सह जातकर्म ॥१३॥

अतीत कार्य्याण्यखिलानि तानि कार्याणि सौम्यायनगे दिनेशे ।
सिते गुरौ वाऽप्यथ दृश्यमाने तदुक्तपञ्चाङ्ग दिनेऽप्यखण्डे ॥१४॥

---

१ मुद्रित वसिष्ठसंहितायां नास्त्येष श्लोकः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मृदुध्रुवक्षिप्रचरेषुभेषु चारिक्तपर्वारव्यदिनेषु कार्यम् ।
शुभग्रहाणां दिनलग्नवर्गे तज्जातकर्मत्वथवा विधेयम् ॥१५॥

अथ विशेषमाह गुरुः—

जातकर्मक्रियां कुर्यात् पुत्रायुः श्रीविवृद्धये ।
ग्रहदोषविनाशाय सूतिकालाऽ शुभच्छिदे ॥१६॥

कुमारग्रहनाशाय पुसां सत्वविवृद्धये ।
नोचेत्सुतविनाशः स्यात् योगे सत्यपि शोभने ॥१७॥

किं पुन र्नाशयोगेषु जातस्यायुः क्षयो भवेत् ।
तस्मात्तत्पुत्ररक्षार्थं कर्तव्यं जातकर्म यत् ॥१८॥

देवानां मानुषाणां च चतुवर्णेषु कीर्तितम् ।
स्नात्वा पिता सुतं दृष्ट्वा पूजयेत् त्र्यंम्बकं[1] शुभम् ॥१९॥

वहिरादाय तं पुत्रं प्रणयेत्सूतिकागृहात् ।
दुकूलछन्नके देशे गोमयेनोपलेपिते ॥२०॥

धान्यपद्म स्थितं कुम्भं नववस्त्रेण वेष्टयेत् ।
तस्मिन् व्रीहियवौ स्पृष्ट्वा जातकुम्भौ च तत्पिता ॥२१॥

मधुना घृततुल्यं वा प्राशयेद् मन्त्रितं शिशुम् ।
पुण्याङ्गनाङ्काध्युषितं याम्यदिक्शिरसं वुधः ॥२२॥

प्राङमुखाशां गता तस्य वामहस्ते शिशोः पदम् ।
ब्राह्मणैराशिषः[2] कृत्वा दत्वा शेषं तु बन्धनम् ॥२३॥

---

१ प्रयजेत् पञ्चकं पा. । २ ब्राह्मणस्याशिषं पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

धान्यान्यपि यथा शक्त्या प्रापयेदिदमं ततः
शिशोमूर्द्धानमाघ्राय शिशोर्दद्यात्पिता ऽ भयम् ॥२४॥

देवानां च यथापूर्वं लग्नकाले क्रमेणताम् ।
वेदोसीति जपेत्कर्णे प्रारभ्य हृदये जपेत् ॥२५॥

शिशोर्गुरुः समाधिस्थो मानसो देवतासमः ।
निशाहारा च कालस्य सौरमानस्य[1] संदधौ ॥२६॥

योऽर्धमासश्च मासाय मासश्चतुर्भ्य एव च ।
मनवः संवत्सराया दुर्ज्जयायै वत्सरो ययौ ॥२७॥

जयाय शतवीर्याय शतवर्षाय शोभनम् ।
इत्येवमभयंदत्वा कालावच्छिन्न सम्भवे ॥२८॥

रक्षां दत्वा शिरस्यस्य शिशोः सङ्करमर्चयेत ।
एतत्कर्मकृतं यस्य शिशोस्तस्याभिवर्द्धयेत् ॥२९॥

शर्षपाज्य जुहुयादग्नौ चण्डायेति द्विजोत्तमः ।
ग्रहयज्ञेन वा हुत्वा जन्मनक्षत्रगे वीधौ ॥३०॥

स्त्रीणामेषा क्रियाकाममित्याह कमलोद्भवः ।
चातुर्वर्ण्यमिदं प्रोक्तं जातकर्म क्रियापरैः ॥
शूद्राणां मन्त्रहीनास्यात् क्रिया रक्षा समन्विता ॥३१॥

इतिश्रीसारङ्गसाधुबचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने जातकर्माऽध्ययाः ॥

---

१ सार्धमासस्य अ. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ ग्रहयोनिभेदाऽध्यायः

अथ जन्नदिनकृत्यम् । कूर्मपुराणे—

सर्वैश्च जन्मदिवसे स्नातैर्मङ्गलपाणिभिः ।
गुरुदेवाग्निविप्राश्च पूजनीयाः प्रयत्नतः ॥१॥

स्वनक्षत्रं च पितरस्तथा देवः प्रजापतिः ।
प्रतिसम्वत्सरं पूजाः कर्तव्यं सुमहोत्सवम् ॥२॥

अश्वत्थामा बलिर्व्यासो हनूमांश्च विभीषणः ।
कृपः परशुरामश्च मार्कण्डेयो महातपाः ॥३॥

संपूज्य प्रार्थयेत्तत्र सुस्नातो हृष्टमानसः ।
सतिलं गुडसंमिश्रं मञ्जल्यर्धमिदं पयः[1] ॥४॥

मार्कण्डेयाद् वरं लब्ध्वा पिबाम्यायुः समृद्धये ।
ॐमार्कण्डेय महाभाग सप्तकल्पान्तजीवन ॥

आयुरारोग्य सिध्यर्थमस्माकं वरदो भव ॥५॥ इतिपिवेत्पयः ॥

फलम् —

यस्यास्य जन्मनक्षत्रं तिथौ जन्मनि जायते ।
तस्य सम्वत्सरं पूर्णं नैरुज्यं भवति ध्रुवम् ॥६॥

शनि भौमदिनं यस्य यदि जन्मतिथौ भवेम्[2] ।
विना नक्षत्रयोगेन विघ्नं तस्य पदे पदे ॥७॥

---

१ जन्मन्यर्यं घृतंपयः क. । २ यदि तस्य तिथिर्भवेत् प्र. ।

CC-0. Nepal Sanskrit Academy Kathmandu Collection

जन्मर्क्षे च यदि स्यातां वारौ भौमशनैश्चरौ ।
समासः कल्मषो नाम मनो दुःखप्रदायकः ॥८॥

तस्य सर्वौषधिस्नानं गुरुविप्रसुरार्चनम् ॥९॥ इति ।

अथ शुक्रः—

रविशुक्रभौमसर्पाः सौरेन्दुसौम्यवाक्पती क्रमशः ।
प्राच्यादीनां नाथा बलान्विता सर्वकार्येषु ।
विंशत्यष्टरविदशमनु षोडश किरणास्युः ।
पूर्वादीनां संख्या राशीनामीश्वरोर्ककिरणाः
रविगुरुभौमाः पुरुषाः स्त्रियस्तथा राहुभार्गवशशाङ्काः ।
मृत्युसुत[1]मन्दसौम्या नपुंसकाश्चेति विज्ञेयाः ॥१०॥

शुक्रगुरू विप्रेशौ रविभौमौ क्षत्रियौ विशश्चन्द्रः ।
अन्तरजातिः सौम्यो वृषलो मन्दोऽन्त्यजातिरिन्दुरिपुः[2] ॥११॥

राहुशनिकेतुभौमाः पापा क्रूरो रविः शशी कृष्णे ।
बुधगुरुशुक्राः सौम्याः शुक्ले सौम्यः शशीज्ञेया ॥१२॥

शुक्रबुधौ राजसिकौ गुरुशशिरवयस्तु सात्विका ज्ञेयाः ।
भौमशनिसैंहिकेयास्तमोगुणाः सर्वकार्येषु ॥१३॥

पित्तात्मकौ रविकुजौ वातलेष्माधिकौ तु चन्द्रसितौ ।
वाताधिकोऽर्कपुत्रः शशिजोमिश्रत्वसंपूर्णः ॥१४॥

रक्तश्यामो भानु श्चन्द्रो गौरः कुजातिरक्तश्च ।
दुर्वाकारः सौम्यो हिरण्यवर्णो गुरुः स्वभावरतः ॥१५॥

---

१ मृत्युसुतः = केतुः
२ इन्द्ररिपुः = राहुः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सितवर्णो भृगुसूनुः, नीलनिभौ भास्करिः शिखी धूम्रः ।
वहुवर्णो भृगुसूनुस्त्वपरे नीलाञ्जनो राहुः ॥१६॥
सौम्योऽपि राशिवर्णो ग्रहयोगे तद्ग्रहोक्तवर्णगुणः ।

बृहज्जातके राशिवर्णानि —

रक्तः श्वेतः शुकतनुनिभः पाटलो धूम्र पाण्डुः ।
चित्रः कृष्णः कनकसदृशः पिङ्गलः कर्वुरश्च ॥१७॥

वभ्रुः स्वच्छ प्रथमभवनाद्येषुवर्णाः प्लवत्वम् ।
स्वाम्याशाख्यं दिनकरयुताद् भाद् द्वितीयं च वेशि ॥१८॥

शुकः —

स्वांशस्वक्षेत्रगतो ग्रहो योगविवर्जितो नियोक्तगुणः ।
बालाकारो भौमः कुमारवेशो बुधो, गुर्स्त्रिशत् ॥१९॥

शुक्र षोडशवर्षो, रविस्तु पञ्चाशदब्दवेशश्च ।
शशिनः सप्ततिर्वर्षं केतो राहोश्च वर्षशतम् ॥२०॥

तेषां प्रतिसमये बलान्वितो यो ग्रहो विशेषकरः ।
तस्य स्वभावरूपं जनयेद्नृणां सदाचिन्त्यम् ॥२१॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने ग्रहोयोनिभेदाऽध्यायः ॥

अथ बलाबलप्रकरणम्

रवेः

उदगयने स्वक्षेत्रे स्वोच्चे स्वांशत्रिभागहोरायाम् ।
स्वदिने बलवान् भानुर्मित्रक्षेत्रेषु मध्यफलः ॥१॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राशिप्रमुखो भानुर्बलवान्मध्याश्रितस्तु मध्यफलः ।
राश्यन्ते बलहीनःसंध्यायां ग्रस्तभावे च ॥२॥

चन्द्रस्य

चन्द्रे वृषभं याते दक्षिणमार्गे स्वभे स्वहोरायाम् ।
रात्रौ स्वांशे स्वदिने स्वदृक्काणे बलान्वितश्चन्द्रः ॥३॥

प्रतिपूर्व दशाहे मध्यफल शीतगुःसिते पक्षे ।
श्रेष्ठो द्वितीयदशके स्वल्पबल श्चन्द्रमा तृतीये च ॥४॥

दक्षिणमार्गस्तुलादिमीनपर्यन्तः । उत्तरमार्गःमेषादिकन्यान्तः ।
उत्तरपथा प्रयातःप्रदक्षिणो वा ग्रहाणां च ।
सौम्ययुतो दृष्टो वा सर्वग्रहवीक्षितो बली चन्द्रः ॥५॥

अबलः प्रवेशकाले मध्यफलो मध्यमाश्रित श्चन्द्रः ।
राश्यन्ते बलयुक्तः पूर्णस्थानेषु सर्वेषु ॥६॥

भौमस्य

निर्जितशत्रुर्वक्री तेजस्वी मकरकुम्भमीनेषु ।
याम्यायने च बलवान् रात्रौ च धरासुतः प्रोक्तः ॥७॥

स्वांशे स्वदिनक्षेत्रे स्वदृक्काणे बलान्वितो भौमः ।
दशमर्क्षस्थो बलवान् सप्तमराशौ च विज्ञेयः ॥८॥

आदावति बलयुक्तो हीनबलो मध्यमाश्रितो रक्तः ।
भवनावसानवर्त्ती मध्यबलश्चैव विज्ञेयः ॥९॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बुधस्य

रविमुक्तश्चापहत क्षेत्रोदीचीं गतो बली सौम्यः ।
रात्रौ दिवा च बलवान् वक्री बलवान् विनार्क्कयुक्तेन ॥१०॥

राशिप्रमुखे मध्यबलःसम्पूर्ण बलश्च मध्यमायातः ।
राश्यन्ते बलहीनो द्रेक्काणदिने च बलयुक्तः ॥११॥

अथ बृहस्पतेः

जीवःस्वक्षेत्रगतःकीटकलशे च कर्कटस्थश्च ।
उदगयने पूर्वाह्णे द्रेक्काणनवांशके जयी बलवान् ॥१२॥

राशिप्रमुखे मध्यबलःसम्पूर्ण बलश्च मध्यमायातः ।
राश्यन्ते बलहीनो वक्री बलवान्न नीच राशौ स्यात् ॥१३॥

अथ शुक्रस्य

त्रिषट्कमण्डलगतो वक्रो भानोः पुरस्सरं यातः ।
स्वगृहोच्चोत्तरसंस्थः शुक्रो बलवानिवा पराद्धे च ॥१४॥

राश्यादौ बलहीनो मध्ये बलवान् विनिर्गमे मध्यः ।
चन्द्रसमागमकाले बलवान्युद्धेषु विजयी स्यात् ॥१५॥

अथ शनेः

कृष्णे निशि वक्रयातः स्वगृहतुलादक्षिणायनगतश्च ।
उद्गश्च मन्दगामी निर्जितशत्रुश्च विज्ञेयः ॥१६॥

मन्दो बली प्रवेशे मध्ये त्वबलो बली गमनकाले ।
सर्वस्थानेषु शनिं बलान्वितं केचिदिच्छन्ति ॥१७॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ राहोः

वृषमेषालिकुलीरे घटराशिसमन्वितो राहुः ।
चन्द्रार्कयोगकाले परिवेशराशिनिर्गमे बलवान् ॥१८॥

चापापरार्द्धे मीने वृषकन्याया बलान्वितः केतुः ।
केतोर्दर्शकाले शक्रधनुर्दर्शने च रात्रौ च ॥१९॥

अथ केन्द्रादि बलविशेषकाला उच्यन्ते ॥

अथ रवेः

चापाजसिंहमीनेष्वर्को बलान्वितो बली भवति ।
तेष्वेव कर्मदेशे विज्ञेयोऽन्यत्र बलहीनः ॥२०॥

अथ चन्द्रस्य

प्रालेयगुर्मिथुनगः कन्यायां चापलग्नगो बलवान् ।
मीने हयार्धप्रथमे जामित्रगतश्च बलयुक्तः ॥२१॥

वृषराशिसन्निविष्टश्चापार्धे पश्चिमे च कर्मस्थः ।
कर्कटमिथुनयोरपि पातालमाश्रितो बलवान् ॥२२॥

अथभौमस्य

प्राग्लग्ने क्षितिसूनु र्बलान्वितः कुम्भराशिना सार्धम् ।
कर्कटवृश्चिकयोरपि पत्नीस्थानाश्रितो बलवान् ॥२३॥

मृगपूर्वार्धेमीने कर्मणि पश्चार्धगतपाताले ।
निरूपहतवर्णवीर्य्यो बलान्वितः स्वत्रिकोणे च ॥२४॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ बुधस्य

मृर्गासिहकर्किवृश्चिकलग्नस्थः स्वांशके बली सौम्यः ।
पातालस्थश्चापे वृषभेस्तमये वृषे च कर्कस्थः ॥२५॥

सिंहवृषाजधनुर्धरवृश्चिकमीने च लग्नगो बलवान् ।
कर्मणि पातालगतो बलवान्जीवो बलोऽन्यत्र ॥२६॥

अथ शुक्रस्य

सिंहाजकौर्पिराशिषु लग्नस्थो भार्गवः स्वराशौ ।
बलवांश्चापान्त्यगतो वृश्चिकराशौ च पत्नीस्थः ॥२७॥
बलवान् सितो जितारिमृगपश्चार्द्धे च हिबुकस्थः ।

अथ शनेः

कुम्भेतुलाधरगतः प्राच्यां हिबुके च सूर्यजो बलवान् ।
मेषूरणो च सिंहे पृष्ठोदय वर्जितास्तमये[१] ॥२८॥

लग्नस्थौ बुधजीवौ कर्मणि सूर्यारयोश्च दिग्वलिनौ
शुक्रेन्द्वोः पाताले द्यूने सिंहनवांशकेऽप्येवम् ॥२९॥

आपोक्लिमेष्ववीर्या मध्यबलाः पणफराश्रिताः सर्वे ।
केन्द्राश्रिताश्च बलिनःसदा ग्रहाः कीर्तिता यवनैः ॥३०॥

अथ नैसर्गिकवलानि

सौराद् द्विगुणं भौमो बलवान् भौमाच्चतुर्गुणः सौम्यः ।
जीवोष्टगुणः सौम्यात् जीवाद् द्यष्टाधिको भृर्गुबलवान् ॥३१॥

---

१ वृषोदयवर्जितास्तमये अपुस्तकस्था टिप्पणी ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शुक्राद् द्विषोडशबलश्चन्द्रो भानुस्ततो द्विगुणः ।
तद् द्विगुणः सर्वेषां राहुर्बलवान्निसर्गजनितश्च ॥३२॥

चन्द्रार्कौ बलयुक्तौ कुजादयः पुरोक्तमार्गबलहीनाः ।
शुभफलदास्ते सर्वे दशासु योगेषु संचिन्त्याः ॥३३॥

भानामधस्थानगताः क्रमेण मन्दार्यभौमार्कसितज्ञचन्द्राः
तेषां मध्यमस्थानगतो बलीयान् राहुर्म्महीमण्डल मूर्ध्नि संस्थः॥३४॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने बलनिरूपणाऽध्यायः ॥

अथ गर्भप्रश्नाऽध्यायः

अथ गर्भप्रश्नमाह शुकः–

मासलक्षणयुक्तं[१] च गर्भः सुखमवाप्नुयात् ।
ऊनाधिकान् गुणांस्तस्य ज्ञात्वा प्रसवमादिशेद् ॥१॥

यस्य मासाधिपो रिक्तो भङ्गोवास्तं गतोऽपि वा ।
तस्मिन्मासे क्षयं याति प्रसवो वा भविष्यति ॥२॥

गर्भाधानाच्चरे राशौ दशमे मासि सूयते ।
स्थिरेणैकादशे मासि उभये द्वादशे सवः[२] ॥३॥

निषेककाले यत्प्रोक्तं फलं प्रश्ने समादिशेत् ।
३(गर्भप्रश्ने तु नारीणामारुढे विषमर्क्ष भे ॥४॥

---

१ मासलक्षणमुक्तं प्र. क. । २ 'तस्मिन् मासे क्षयं याति प्रसवो वा भविष्यति' इत्यधिकः पाठः प्र पुस्तके वर्तते । ३ चापान्तर्गतः पाठः प्र पुस्तके नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुंग्रहेण युते दृष्टे पुमान् भवति निश्चयः ।
पुरुषस्पर्शने प्रश्ने पुरुषाक्षरमुच्चरेत् ॥५॥

देहस्य दक्षिणे भागे स्पर्शनेन पुमान् भवेत् ।
अन्यथा स्त्री प्रसूतीः स्यात् स्त्रीग्रहसंयुतेक्षणात् ॥६॥

लग्नेन्द्वोर्यो बलवान् तस्य द्विरसांशकान्वितो राशिः ।
यावत्तस्मात्तवत्परतो राशिस्थिते विधौ प्रसवः ॥७॥

तत्कालेन्दुनवांशाज्जामित्रे शीतगौ स्थिते सूतिः ।
उदयनवांशाधिपतेः क्षेत्रं याते विधौ तदा प्रसवः ॥८॥

रात्र्यादिराशिभागात् भुक्त्वा तावद्गते दिवा रात्रौ ।
हिबुके केवलयुक्ते शुभयोगे वा सुखी गर्भः ॥९॥

वादरायणः—

पुरुषोपचयगृहस्थो गुरुणा यदि दृश्यते हिममयूखः ।
स्त्रीपुरुषयोः संप्रयोगं तदावदेदन्यथानैवमिति ॥१०॥

वराहः—अथमैथुनप्रकारज्ञानमिन्द्रवज्रयाह—
यथास्तराशिर्मिथुनं समेति तथैव वाच्यो मिथुन प्रयोगः ।
असद्ग्रहालोकितसंयुतेऽस्ते सरोष इष्टैःसबिलासहासः ॥११॥

आत्मपरजातकज्ञानार्थमाहाचार्यः—
[1]नलग्नमिन्दुं च गुरुर्निरीक्षते
नवा शशाङ्कं रविणा समन्वितं ।

---

१ श्लोकोऽयं वृहज्जातके जन्मविधिर्नामाध्याये वर्तते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सपापकोर्कणयुतोऽथवा शशी
परेण जातं प्रवदन्ति निश्चयात् ॥१२॥

दिवार्क्कशुक्रौ पितृमातृसंज्ञितौ
शनैश्चरेन्दू निशि तद्विपर्ययात् ।
पितृव्य–मातृ ष्वसृ–संज्ञितौ च
ता वथोजयुग्मर्क्षगतो तयोः शुभौ ॥१३॥

प्रश्नकालमवलम्ब्य मातुर्निधनयोगद्वयमाह—

अभिलषद्भिरुदयर्क्षमसद्भिर्मरणमेतिशुभदृष्टिमयाते ।
उदय राशिसहिते च यमे स्त्री विगलितोडुपतिभूसुतदृष्टे ॥१४॥

[1] उदयर्क्षमुदय लग्नमसद्भिः पापग्रहैरभिलषद्भिस्तत्रोदयलग्नाभिलाषकैः कैश्चिल्लग्नादद्वितीयस्थस्य व्याख्यातः । तेषामभिमतं यथा । उदयलग्नादनन्तरं तदुदयस्य प्रत्यासन्नतयाभिलषत्युदयर्क्षमिति । अन्ये पुनर्लग्नाद्द्वादश स्थानस्थस्य ग्रहस्योदयर्क्षाभिलाषं कथयन्ति । यस्मात्तद्विहायोदयराशि गमनं ग्रहः करोति । एवं लग्नाद्द्वादशस्थैः पापैर्लग्नशुभदृष्टि सौम्यैर्दर्शन मयाते अप्राप्ते, सौम्यग्रहैरदृश्यमाने स्त्रीयोषिद् गर्भिणी मरणमेति, मृत्युं प्राप्नोति । अत्र च भगवान् गर्गः—

अशुभैर्द्वादशर्क्षस्थैःशुभदृष्टिविवर्जितैः ।
आधानलग्ने मरणं योषितः प्रवदेद् बुधः ॥१५॥

---

१ चापान्तर्गतो भागः वृहज्जातकटिका ध्यायान्तर्गतषष्ठश्लोकस्य भट्टोत्पलस्य टीका । परं भट्टोत्पलस्य नामोल्लेखोऽस्मिन् पुस्तके न वर्तते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आचार्य[1]:—

ओजर्क्षे पुरुषांशकेषु बलिभिर्लग्नार्क गुर्विन्दुभिः
पुंजन्म प्रवदेत् समांशकगतैर्युग्मेषु तैर्योषितः।
गुर्वर्कौ विषमे नरं शशिसितौ वक्रश्च युग्मे स्त्रियम्
व्यङ्गस्था बुधवीक्षणाच्च यमलौ कुर्वन्ति पक्षे स्वके ॥१६॥

योगान्तरं स एवाह–

विहायलग्नं विषमर्क्षसंस्थः सौरोपि पुंजन्मकरो विलग्नात्।
प्रोक्तग्रहाणामवलोक्यवीर्यं वाच्यः[2] प्रसूतौ पुरुषोङ्गना वा ॥१७॥

अधुनावामनकहीनाङ्गयोगौ दोधकेनाह[3]—

[4]सौर शशाङ्क दिवाकर दृष्टे वामनको मकरान्त्यविलग्ने।
धीनवमोदयगैश्च दृकाणैः पापयुतैरभुजांध्रि[5] शिरास्यात् ॥१८॥

मकरान्त्यविलग्ने मकरराश्यन्त्यनवांशके विलग्नस्थो। नवमनवांशक उदयमानः सच मकरस्येत्यर्थः। तस्मिश्च सौरशशाङ्क दिवाकरदृष्टे, सौरशनिः, शशाङ्कश्चन्द्रो, दिवाकरः–सूर्यः एतैरवलोकिते वामनको गर्भस्थोवाच्यः॥ धीनवमोदयगै रिति॥ अत्र केचिद ध्याचक्षते - यदालग्ने द्वितीय द्रेक्काणोदयो भवति। तदा तस्य पञ्चमराशिसंबन्धित्वाद् द्वितीय द्रेक्काण इत्याख्या। तस्मिन्द्वितीय द्रेक्काणे पाप ग्रह युते उदयमनुप्राप्ते तस्मिन् सौरशशाङ्क दिवाकरदृष्टे गर्भस्थोऽभुजो भुजहीनो वाच्यः॥ एवं
लग्ने यदा तृतीयस्य द्रेक्काणस्योदयोभवति तदा तस्य नवम राशि मम्बन्धित्वान्नवमद्रेक्काणस्य लग्न सवन्धित्वाद् नवमद्रेक्काण इत्याख्या।

---

१ वराह मिहीरः। २ प्रायः अ. प्रोच्या प्र। ३ प्र पुस्तके छन्दोनाम नलिखितम्। ४ श्लोकोऽयं वृहज्जातकनिषेकाध्यायस्योनविंशः। टीका च भट्टोत्पलविरचिता। ५ अशुभाङ्घ्रि प्र.।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तस्मिन्नुदयगते पापयुते चौर-शशाङ्क-दिवाकर-दृष्टे, गर्भेऽनङ्घ्रि पादहीनो वाच्यः। एवं प्रथम दृक्काणस्य लग्नसम्बन्धित्वादुदयदृक्काण इत्याख्या । तस्मिन्नुदयगते सौर-शशाङ्क-दिवाकर-दृष्टे, अशिरः शिरोर्वाजितो गर्भस्थोवाच्यः । एतेषु योगेषु सौर-शशाङ्क-दिवाकराणां दर्शनयोगात्पाप युक्त इति ।। केवलेनाङ्गारकेण युक्ते योगो भवति। अत्राप्यन्ने धीनवमोदयगे द्रेक्काणैः पापयुतैः केवलमेवा भुजाङ्घ्रिशिरसां संभवं व्याचक्षते । सौर-शशाङ्क दिवाकर-दृष्टे इत्यनुवृत्तिं नेच्छन्ति । अन्ये विभुजादिसंभवे यथासंख्यं त्यक्त्वा द्रेक्काणत्रयपि द्रेक्काणं तदुद्भवं विकल्पमाहुः विभुजो वा व्यङ्घ्रि र्वा विशिरोवेति अन्ये व्याचक्षते । यथा लग्ने-यदा प्रथमद्रेक्काणोदयो भवति तदा पञ्चमेपि राशौ प्रथमद्रेक्काणो नवमेपि प्रथम एव एतद्द्रेक्काणत्रयं यदि पापयुतं भवति तदा भुजहीनो गर्भस्थो वाच्यः । अथ यदालग्ने द्वितीयद्रेक्काणोदयो भवति तदा पञ्चमनवमयोरपि द्वितीय एव भवति एतद्द्रेक्काणत्रयं यदि पापयुतं भवति तदा पादहीनो गर्भस्थो वाच्यः । [१] (अथ लग्ने तृतीयद्रेक्काणोदयो भवति, तदा पञ्चमनवमयोरपि तृतीय एव ।। एतद्द्रेक्काणत्रयं पापयुतं भवति, तदा गर्भस्थो विशिरः, शिरोविहीनो वाच्यः) ।। अत्राप्येतद् यथासंख्यं त्यक्त्वा त्रिःप्रकारेति योगभुजांघ्रि शिरोहीनानां विकल्पेन गर्भस्थितस्य सम्भवमाहुः ।। वयं पुनर्ब्रूमः–निषेककाले यःपञ्चमराशौ यो द्रेक्काणःस यद्यंगारकेणयुक्तःसौरशशाङ्क दिवाकर दृष्टश्च भवति [२] (तदा विभुजो भवति) । एवं नवमस्थाने द्रेक्काणैर्न्नवमद्रेक्काणैः तथा निषेककाले नवमराशौ यो द्रेक्काणःस यद्यङ्गारकेण युक्तः सौर–शशाङ्क–दिवाकर–दृष्टश्च भवति तदा, अनङ्घ्रिर्भवति । तथा निशेककाले लग्नस्थो द्रेक्काणे यदा भौमयुतो भवति सौर-शशाङ्क-दिवाकर-दृष्टश्च भवति, तदा विशिरो भवति ।

---

१ चापान्तर्गतःपाठ प्र पुस्तकेनास्ति । २ चापान्तर्गतःपाठःप्र पुस्तके नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एषैव व्याख्या साध्वी यथाह भगवान् गर्गः–

लग्नदृक्काणगो भौमःसौर सूर्येन्दुवीक्षितः ।
कुर्यादशिरसं तद्वत् पञ्चमे बाहुवर्जितम् ।।
विपादं नवमस्थाने यदि सौम्यै र्न वीक्षितः ।।१६।।

तथा च सारावल्याम्—

सौमयुता दृक्काणास्त्रिकोणलग्नेषु तेषु संदृष्टाः ।
विभुजाङ्घ्रिमस्तकःस्याच् शनिरवि चन्द्रौवदेद् गर्भे ।।२०।।

अथाधानकालेयोगवशात् प्रसवकालज्ञानं वसन्ततिलकेनाह ।

तत्कालमिन्दुसहितो द्विरसांशको य-
स्तत्तुल्यराशिसहितैः पुरतःशशाङ्के ।
यावानुदेति दिनरात्रिसमानभाग—
स्तावद्गते [1] दिननिशोःप्रवदन्तिजन्मः ।।२१।।

तत्कालम्, आधानकाले प्रश्नकाले वा । यस्मिन् राशौ चन्द्रमा वर्तते तत्र च यस्मिन्द्वादशभागे व्यवस्थितःस तत्कालमिन्दु सहितो द्विरसांशकः । केचित्तु तात्कालिकेन्दुसहितो द्विरसांक इति पठन्ति । तत्कालेन्दुना यावत्संख्यो द्वादशभागःसहितस्तत्तुल्यस्तत्संख्यो मेषादौ गणनया यो राशिस्तत्रस्थे चन्द्रमसि पुरतो दशमेमासि गर्भस्थस्य प्रसवो वाच्य इति केचित् ।

तथा च सारावल्याम्--

यस्मिन् द्वादशभागे गर्भाधाने व्यवस्थितश्चन्द्रः ।
तत्तुल्यर्क्षे प्रसवं गर्भस्य समादिशेत् प्राज्ञः ।।२२।।

---

१ स्तवद्गतैर् अ. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अन्ये पुनरेवं व्याचक्षत–
आधानकाले यत्र राशौ चन्द्रमा व्यवस्थितस्तत्र यावत्संख्यो द्वादशभागो वर्तते तस्माद्दशभागराशेस्तावत्संख्य एव पुरतो यो राशिस्तत्स्थे चन्द्रमसि दशमे मासि प्रसवो वक्तव्यः ।

एषैव व्याख्या साध्वी यस्माद्भगवान् गर्गः–

यावत्संख्ये द्वादशांशे शीतरश्मिर्व्यवस्थितः ।
तत्संख्यो य स्ततो राशिर्जन्मेन्दौ तद्‌गते वदेत् ॥२३॥

अत्रापि नक्षत्रानयनेऽयमनुपातोपायः । यदि चन्द्राक्रान्तद्वादशभाग प्रमाणेन सकलश्चन्द्रराशिरष्टादशशतप्रमाणो लभ्यते तदानेन भुक्तद्वादशराशि प्रमाणेन किमिति तच्चन्द्रराशिभुक्तं लभ्यते, ततोऽष्टशतलिप्तापरिकल्पनया नक्षत्रमूह्यम् । अत्रापि दिनरात्रिकालज्ञानमाह, यावानुदेतीति दिनरात्रि-राशयःपूर्वंव्याख्याताः [1] गोजाश्विकर्कि नियुना इत्यादि - आधानेप्रश्नकाले वा यल्लग्नं तस्य यःप्रविभागो दिनसंज्ञो रात्रिसंज्ञो यावानुदेति स्वमानाद्या-वत्कालभोगागतस्तावत्येव दिननिशोःस्वमानाद्‌गतेकाले जन्म भविष्यतीति वक्तव्यम् । एवं दिनस्य रात्रेर्गतकालं बुध्वा प्रसवकाले लग्नहोराद्रेक्काण-नवांशकद्वादशभागत्रिंशांशका वाच्याः । अत्र ये प्रवदन्ति कथयन्ति, तेषांचसारावल्याम् —

तत्कालंदिवसनिशासंज्ञः समुदति राशिभागो यः ।
यावानुदयस्तावान्वाच्यो दिवसस्य रात्रेर्वा ॥२४॥

---

१ अस्मिन् ग्रन्थे तु दिनरात्रिराशयःपूर्वं नैव व्याख्याता । वृहज्जातके निषेका-ध्याये पूर्व व्याख्याता वर्तन्ते ते राशय तस्मात् भट्टोत्पलःपूर्वं व्याख्याता इतिव्यलिखत् । परमत्र तस्य व्याख्यास्योद्धरणं न कृतम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्याधानं प्रथमं प्रसूतिकालं सुनिश्चितं कृत्वा ।
जातकविहितं च विधिं विचिन्तयेत्तत्र गणितज्ञः [१] ॥२५॥

अधुना धृतस्य गर्भस्य वर्षत्रयवर्षद्वादशज्ञानं च मालिन्याह –

उदयति मृदुभांशे सप्तमस्थे च मन्दे यदि भवति निषेकःशूतिरब्दत्रयेण ।
शशिनि तु विधिरेष द्वादशेऽब्दे प्रकुर्याद् निगदितमिह चिन्त्यं सूतिकालेपि युक्त्या ॥२६॥

उदयतीति मृदोःसौरस्य, भांशे मृदुभांशे, निषेककाले यस्य तस्य लग्नस्योदये मृदुभांशे शनैश्चरराशिनवांशके मृगांशके कुम्भांशके चोदयति । तथाभूते तस्मादेव लग्नान्मन्दे शनैश्चरे तत्कालं सप्तमस्थे द्यूनगते, एवं विधेयोगे, यदि निषेको भवति तदा द्वादशाब्दे–द्वादशे वर्षे प्रसूतिःप्रसवं कुर्यात् एतदुक्तं भवति । यस्य तस्य लग्नस्योदये यदा कर्कटांशकोदयो भवति तस्माल्लग्नात्सप्तमश्चन्द्रो भवति, तदा धृतस्य गर्भस्य द्वादशेऽब्दे प्रसवो वक्तयः । निगदितमिहेति इहास्मिन्नाधानाध्याये आधानकाल योग वशाद् यथा हीनाधिकाङ्गादीनां गर्भसम्भवो भवति । प्रसूतिकालेऽपि तादृग्योगवलात् तथा विधानामेव जन्म वक्तव्यम् । पितृ मातृ पितृव्य तिसृणामपि शुभाशुभं जन्मकाललग्नवशात्तदनन्तरमपि वक्तव्यम् । युक्त्येति, यन्नसंभवति तन्नवक्तव्यम् । गर्भश्रवणादिगर्भ प्रसवकालनिर्देशादि च । एवमाधानकालात्प्रसवकालाच्च । यथैकदेशःकृतस्तथा प्रश्नकालादपि वक्तव्यः [२] । उक्तञ्च–जन्माधानकाले प्रश्नकालेवेति ।

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने गर्भप्रश्नाधिकाराऽध्यायः ॥

---

१ जातकविहितं विविधं विचिन्तयेत् तत्र दैवज्ञः क ।

२ कर्तव्य प्र. श्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ अरिष्टाऽध्यायः

आचार्यः–[1]

पितुर्जातः परोक्षस्य लग्नमिन्दावपश्यति ।
विदेशस्थस्य चरभे मध्याद्भ्रष्टे दिवाकरे ॥१॥

उदयस्थेपि वा मन्दे कुजेवास्त समागते ।
स्थितेवान्तः क्षपानाथे शशाङ्कसुतशुक्रयोः ॥२॥

बालारिष्टमाह भगवान्शुकः--

प्रवक्ष्यामि समासेन सद्योमरणमेव च ।
जातस्य पूर्वषट्कस्था ये ग्रहास्ते शुभप्रदाः ॥३॥

ग्रहा ये परषट्कस्थाः, परोक्षे फलमादिशेत् ।
(भानुःपिता हि जन्तूनां चन्द्रो माता तथैव च ॥४॥

तयोर्बलाबलं ज्ञात्वा पितृमातृ गुणान्वदेत् ।
पापदृष्टियुतोभानुः पापमध्ये गतोपिवा ॥५॥

पित्ररिष्टं विजानियात् शिशोर्जातस्य निश्चयः ।)
भानोःषष्टाष्टमर्क्षस्थैः पापैः सौम्य विवर्जितैः ॥६॥

चतुरस्रगतैर्वापि पित्ररिष्टं विनिर्दिशेत् ।
भौमांशकस्थिते भानौ स्वपुत्रेण निरीक्षिते ॥७॥

प्राग्जन्मनो निवृत्तिस्याद् मृतिर्वापि शिशोः पितुः ।
भौमसूर्यांशिके युक्तौ सुखभे धर्मभेऽपिवा ॥८॥

---

१ वराहमिहीरः । चापान्तर्गतः पाठः प्र. पुस्तके नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नेक्षितो गुरुशुक्राभ्यां नेक्षेते पितरं शिशुः ।
मात्ररिष्टं तु चन्द्रेण ज्ञात्वैवं पूर्ववद्वदेत् ॥९॥

क्षीणचन्द्रात् त्रिकोणस्थैः पापै सौम्य विर्वजितैः ।
माता परित्यजे द्वालं षण्माषान्नात्रसंशयः ॥१०॥

एकांशकस्थौ मन्दारौ यत्र तत्र व्यवस्थितौ ।
शशीकेन्द्र गतौ तौ वा द्विमातृभ्यां स जीवति ॥११॥

तयोर्वलाबलत्वेन पितृमातृशुभं वदेत् ।
मूर्तौ बलान्विते यस्य पितृवेश्मनि सम्भवः ॥१२॥

चरराश्यंशके भानौ चरराश्यंशकोदये ।
शिशोः पितान्यदेशस्थ स्ततो लग्नं न दृश्यते ॥१३॥

लग्नं न दृश्यते चन्द्रश्चरराश्यंशकस्थितः ।
परोक्षे यः पिता तस्य सूतिकाले न संशयः ॥१४॥

वागीशे नीचसंस्थे च चन्द्रे राश्यंशसन्धिगे ।
मूकोवापि जडोवापि सौम्ये पापसमन्विते ॥१५॥

भाग्यबन्धु गतौ पापौ लग्नेशे बलर्वाजते ।
सूतिकाले पितादुःखी शिशो रिःफाष्टमेऽ पिवा ॥१६॥

अर्कांशक स्थिते मन्दे अर्केणैव निरीक्षिते ।
जन्मकाले पितारोगी कुजदृष्टेऽथवा भवेत् ॥१७॥

नपश्यति गुरुश्चन्द्र लग्नं च परजातकः
सार्केन्दुनेक्षिते जीवे सूर्येन्दुपापसंयुतौ ॥१८॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एकस्थो वा पृथक्स्थो वा नेक्षितो गुरुणा तथा ।
गुरुराश्यंशके चन्द्रेलग्ने वा जीवभांशके ॥१६॥

पूर्वोक्तयोगसंभूते न परैर्जात ईश्यते ।
कालस्याङ्गविभागेषु[१] यस्मिन्नंशे शुभग्रहाः ॥२०॥

तत्र लक्ष्मव्रणादीनां चिन्तयेत्तु निमित्तजाम् ।
सद्योमरण योगाश्च बहवः शास्त्रवीक्षिताः ॥२१॥

एभ्यः सिद्धास्तु योगाश्च वक्षन्तेऽत्र समासतः ।
पित्रोर्दोषैमृताः केचित्केचिद् बालग्रहैर्मृताः ॥२२॥

अपरे रिष्टयोगाद्यैस्त्रिविधा बालमृत्यवः ।
एषां सूक्ष्मतरं ज्ञात्वा शिशोर्दोषगुणान् वदेत् ॥२३॥

आद्वादशानां मर्त्यानामायुर्ज्ञातुं न शक्यते ।
जपहोमचिकित्साद्यैर्बालं रक्षेद् गुणाधिके ॥२४॥

राशिसन्धिषु ये जाता स्तेबाला गतजीविनः ।
पापदृष्टयुतो वापि निःसंशय इतिस्मृतः ॥२५॥

गण्डान्तेषूद्भवोबालः पितृमातृ कुलान्तकः ।
यदि जीवेत्सभूपालो गजवाजि समन्वितः ॥२६॥

चन्द्रादित्यौ तृतीयस्थौ क्रूरभेक्रूरसंयुतौ ।
व्याधिं तस्य विजानीयात् त्रिवर्षाद् नाति वर्तते ॥१७॥

---

[१] कालस्थाङ्गविभागेषु प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

होरायां कण्टकस्थौ द्वौ निधनेशसमन्वितौ ।
निधनस्थः परः कश्चिज्जातमात्रो न जीवति ॥२८॥

संहतौ चन्द्रजामित्रे[1] यस्याङ्गारकभास्करौ ।
राहूदये तदाजात स्याद्दशाहाद् मृतिर्भवेत् ॥२९॥

चतुरस्रगताः पापा वामदक्षिणतोऽपि वा ।
तदायो[2]व्याधिमाप्नोति दशरात्रं न जीवति ॥३०॥

उद्यद्द्रेक्काण जामित्रे यस्यस्याद्दारुणग्रहः ।
क्षीणचन्द्र विलग्नस्थे सद्यो हरति जीवितम् ॥३१॥

आपोक्लिमस्थिताः सर्वे ग्रहाश्च बलवर्जिताः ।
षड्मासं वा द्विमासं वा तस्यायुः समुदाहृतम् ॥३२॥

विलग्नाधिपतिर्नीचे निधने चार्कजो भवेत् ।
कृच्छ्रेण जीवितं विद्यात् मृतप्रायो भविष्यति ॥३३॥

केतोरुदयं पूर्वं पश्चादुल्कादि परनिर्घाताः ।
रौद्रेसति मुहूर्ते प्राणेभ्यस्त्यज्यते जन्तुः ॥३४॥

तीव्रफलराजयोगाः यवनाद्यैर्विनिर्मितास्तेषु ।
जायन्ते खलकुलजा रिष्टं तेषां प्रसूतानाम् ॥३५॥

ग्रहण परिवेषकाले जातः पापग्रहे विलग्नस्थे ।
लग्नेशे बलहीने जीवति वर्षत्रयं त्रिमासं वा ॥३६॥

१चापान्तर्गतः पाठः क पुस्तके त्रुटितः । २सौ अ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अंशाधिपजन्मपती लग्नपतिश्चास्तमुपगतो यस्य ।
जन्मावसरे मरणं तस्य भवेत्कतिपयाहेन ॥३७॥

सन्धिचतुष्टयकाले जाते मृत्युं समादिशेत् तज्ज्ञः ।
पापयुतो दृष्टो वा शीघ्रं पापैरदृष्टयुतः ॥३८॥

विलग्नद्रेक्काण नवांशनाथा
निघ्नन्त्यरिष्टं स्थितराशिसंस्थैः[1] ॥
लग्नाधिपोब्देश्चद्रेक्काण नाथो ।
मासैर्नवांशाधिपतिर्दिनैश्च ॥३९॥

लग्नरिपुरन्ध्रनवमव्ययसंस्थितः सपापेन्दुः ।
मरणमवश्यं कुरुते सौम्यग्रहवीक्षितो नस्यात् ॥४०॥

लग्नाधिपजन्मपती षष्ठाष्टमरिःफगौ प्रसवकाले ।
अस्तमितौ मरणकरौ राशिप्रमितैर्वदेद् वर्षे ॥४१॥

षष्ठाष्टमगश्चन्द्रो लग्नादुक्तो दिवेतरेजातः ।
दृष्टःशुभाशुभमिश्रैः कृष्णे स्वल्पायुरत्यन्तम् ॥४२॥

लग्नाधिपतेश्चन्द्रो मरणपदस्थो हि कृष्णतां जातः ।
राहुयुतो दृष्टो वा निधनं स्यात् सप्तमे वर्षे ॥४३॥

होराधिपतिर्द्यूने राहुयुतो मरणमेव विदधाति ।
दिवसैस्त्रिसप्तसंख्यैर्मासे वर्षेऽथवा नियतम् ॥४४॥

---

१ स्थितराशिसंख्यैः क्ष. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अर्केन्दुयोगराशिः पापयुतो यस्य केन्द्रनवमस्थः ।
निधनं कुरुतेऽवश्यं विषजलहेतो र्न सन्देहः ॥४५॥

यस्याऽष्टमस्थे पापे लग्नेशे पापसंयुते केन्द्रे ।
सौम्ययुतपापहीने निधनंस्यात्सप्तवर्षेषु ॥४६॥

रविणायुक्तः शशिजः सौम्यादृष्टो विनाशयति नूनम् ॥
एकादशभिर्वर्षैर्देवाङ्केऽपि स्थितं जातम् ॥४७॥

जज्ञे धनीरुद्ररौद्रमुखेनप्राज्ञो भानुर्गोत्र जायातरदक्षः[1] ।
यत्र नित्यं मृत्युभागाः क्रमेण मेषादीनां तेषुजातो गतायुः ॥४८॥

मे ८ वृ ९ मि २२ क २२ सिं २५ कं २५ तु ४ वृ २३ ध २८ म २०
कुं २१ मी १०

क्षीरप्रियालोकसुखेन राज्ञः कार्यान्तरे भाग्यलोकं सुखेन ।
मौली राज्यं मृत्युभागाः प्रदिष्टाः मेषादीनां वर्षसंख्यैर्हिमांशोः॥४९॥

२६।१२।१३।२५।२।११।२६।१४।१३।२५।५।१२।

मृत्युभागस्थितश्चन्द्रः पापयुक्तो न सौम्यगः ।
निधन वापि केन्द्रे वा मात्रा सह विनश्यति ॥५०॥

लग्नेशो बलयुक्तश्चेत् त्रिकोणे केन्द्रगेऽपिवा ।
अरिष्टयोगजातोऽपि बालो जीवति निश्चयम् ॥५१॥

---

१ गोत्र जायातरज्जुः प्र. । २ मौरी क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बलि केन्द्रोपगः सौम्यो निधनेश[1] विवर्जितः ।
अरिष्टयोगनाशाय[2] प्रश्ने वा जननेऽपि वा ॥५२॥

क्षेत्रग्रहोदये वापि सुखभेदसमेऽपिवा ।
दशारिष्टाब्दलवतो योगारिष्टं भवेद्गुरु : ॥५३॥

बालारिष्टं ततोऽपिस्यात् तत्फलं तत्र चिन्तयेत्[3] ।
बलवति बालारिष्टे दशाफलं नैव चिन्तये द्धीमान् ॥५४॥

योगस्यापि फलं न प्राज्ञै श्चिन्त्यं—
अनेकारिष्टयोगे तु बालो जीवति यत्नतः ॥५५॥

जातस्य चन्द्रलग्ने च सर्वग्रह निरीक्षिते ।
नश्यन्ति रिष्टयोगास्ते तामिश्रं भानुमानिव ॥५६॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहनेशुकप्रोक्तारिष्टाऽध्यायः ॥

अथ उपसूतिकाऽध्ययः

उपसूतिकाज्ञानमाह वराहः—

चन्द्रलग्नान्तरगतैर्ग्रहैः स्यु रुपसूतिकाः ।
वहिरन्तश्च चक्रार्धे दृश्याऽदृश्येऽन्यथापरे ॥१॥

लग्नादारभ्य यत्र राशौ चन्द्रमा व्यवस्थितस्तदन्तरे तयोर्मध्ये यावन्तो ग्रहा व्यवस्थितास्ते चन्द्रलग्नान्तरगता ग्रहास्तैरुपसूतिकाःस्यु स्तावत्संख्या उपसूतिका समीप वर्तिन्यः स्त्रियस्यु र्भवेयुः ॥ ताश्च ग्रहतुल्यजातिवयोवर्णरुपाः ॥ तथा च सारावल्याम्—

---

१ निधनैश्च पा । ४ अनिष्टयोगनाशाय पा । ३ तद् विचिन्तयेत् प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शशिलग्नविवरयुक्ता ग्रहतुल्याः सूतिकाश्च विज्ञेयाः[१] ।
अनुदितचक्रार्धयुतैरन्तर्बहि रन्यथा वदन्त्येके[२] ॥२॥

लक्षणरूपविभूषणयोगा स्तासां शुभैर्योगात् ।
क्रूरै विरूप देहा लक्षणहीनाः सुरौद्रमलिलाश्च ॥३॥
विश्रैर्मध्यमरूपा बलसहितैःसर्वमेतदवधार्यम्[३] ।

वहिरन्तरश्चेति । तत्र यावन्तोग्रहा[४] दृश्ये चक्रार्धे व्यवस्थितास्तावत्-संख्या उपसूतिका गृहवाह्ये वक्तव्याः । यावन्त श्चादृश्याश्चक्रार्धे व्यव-स्थितास्तावत्संख्या अभ्यन्तरे वक्तव्याः । तत्र लग्नस्य यावन्त उदिता भागास्तथा द्वादशैकादशदशमनवमाष्टमराशयस्तथा सप्तमराशेर्लग्नोदित भागतुल्यांशादृश्यमर्द्धं – शेषमदृश्यमिति । अन्यथापरे अपरे – अन्ये आचा-र्या अन्यथाऽनेनप्रकारेण दृश्ये चक्रार्धेऽभ्यन्तरगता वर्णयन्त्यदृश्ये वाह्य-स्थाः । तथा च जीवशर्मा—

उदयशशिमध्यस्थैर्ग्रहैः स्युरुपसूतिकास्तत्र ।
उदगर्घस्थैर्वाह्ये[५] दक्षिणगैरन्तरे[६] ज्ञेयाः ॥४॥

एतदाचार्यस्य नाभिप्रेतं, यतस्तेनैव स्वल्पजातके, उक्तम्—

शशिलग्नान्तरसंस्था ग्रहतुल्याः सूतिकाश्च वक्तव्याः ।
उदगर्घेऽभ्यन्तरगा वाह्याचक्रस्य दृश्येऽर्घे ॥५॥

---

१ वक्तव्याः प्र. क. । २ रन्तर्बहिरन्यथा त्वेके लि. पु. ।
३ सर्वमेतदवसर्गम् प्र. । ४ ग्रहा लि. पु. नास्ति । ५ वाह्या, ६ अन्तरम्, लि. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अत्र चायुर्दायविधिना स्वतुङ्गवक्रोपगतैस्त्रिसंगुणमित्यादिना द्वित्रिगुणत्वं कृत्वा ग्रहस्थानवशात् उपसूतिकानिश्चयः कार्यः । यदि बहुजन प्रसूतियोगा न भवन्ति तथापि ग्रहसंख्यात्वे सूतिकासम्भवो यत्र भवति तत्र बहुजन प्रसूतियोगेन भवितव्यमिति ।। तेषामङ्गविभागानां राशि विभागः शार्दूलविक्रीडितेनाह —

कंदृक् श्रोत्रनासाकपोलहनवोवक्त्रं च होरादय—
स्ते कण्ठांशकबाहुपार्श्वहृदयक्रोडानिनाभिस्ततः ।।
वस्तिःशिश्नगुदे ततश्च वृषणावूरूततोजानुनी
जङ्घाऽङ्घ्रीत्युभयत्र वाममुदितैर्द्रेक्काणभागैस्त्रिधा ।।६।।

त्रिभिः प्रकारैस्त्रिधा, त्रिभिर्द्रेक्काणगैस्त्रिधा, शरीर प्रविभागः । तत्र लग्नस्य प्रथमद्रेक्काणे उदयति प्रथमो मूर्द्धाद्यंग विभागः । द्वितीय द्रेक्काणे उदयति कण्ठपूर्वको द्वितीयो भागः । तृतीये द्रेक्काणे उदयति वस्तिपूर्वकस्तृतीयः । तत्राप्यङ्गविभागे वामदक्षिणावर्त्येवयवज्ञानं कथमित्याह । वाममुदितैरिति ।। राशिभिरुदितैर्दृश्यभागावस्थितैर्वामोऽङ्ग विभागः । लग्नस्योदितभागास्तथा द्वादशैकादशदशनवमाष्टमात् सप्तमस्य राशे लग्नानुदित तुल्यभागाः । एषभाग उदितः । शेषोऽनुदितः । अर्थादनुदितैरदृश्यैर्दक्षिण इति । तत्र लग्नानुदित भागास्तथा द्वितीयतृतीयचतुर्थपञ्चमषष्ठाः सप्तमराशेर्लग्नोदिततुल्यभागाः । एवं स्थिते लग्नप्रथम द्रेक्काणोदये लग्नराशि कं शिरः कल्पनीयम् । लग्नाद्यद्द्वितीय द्वादशेदृक्केचक्षूषी तत्र द्वितीयो दक्षिणमक्षि, द्वादशो वामम् । तृतीयैकादशे श्रोत्रे तत्र तृयीयदक्षिणमेकादशो वामम् । चतुर्थदशमौ नासापुटे, चतुर्थो दक्षिणं दशमो वामम् । पञ्चमनवमौ कपोलौ, पञ्चमो दक्षिणो नवमो वामः । षष्टाष्टमौ हनू षष्ठो दक्षिणमष्टमो वामम् । सप्तमो वक्त्रं मुखम् । एवं राश्याद्युपलक्षितः प्रथमोऽङ्गविभागः, ते कण्ठांशक इति । अथ द्वितीयद्रेक्काणोद

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दयस्तदा होरादय कण्ठाद्ये द्वितीयेऽङ्गविभागे परिकल्प्याः। तद्यथा लग्नं कण्ठो गलकः, द्वितीयद्वादशौ स्कन्धौ, तत्र द्वितोयो दक्षिणो द्वादशो वामः। तृतीयैकादशौबाहू तृतीयो दक्षिण एकादशो वामः। चतुर्थदशमौ पार्श्वे, चतुर्थो दक्षिणम् दशमो वामम्। पञ्चमनवमौ हृद्भागौ पञ्चमो दक्षिण-भागः नवमो वामः। षष्ठाष्टमौक्रोडं उदरभागौ षष्ठो दक्षिणोऽष्टमो वामः सप्तमो नाभिरिति, नाभिग्रहणमुदरोपलक्षणार्थम्। एष द्वितीयोऽङ्ग विभागः। वस्तिः शिश्नगुद इति। लग्नद्रेक्काणे तृतीये उदयति। त एव होरादयस्तृतीयोऽङ्ग विभागे परिकल्प्याः। तद्यथा— लग्नं वस्तिर्नाभि-लिङ्गयोर्मध्यमभागः, द्वितीयद्वादशौ शिश्नगुदे तत्र द्वितीय शिश्नगुदयोर्द-क्षिणोभागः द्वादशो वामः। ततोऽनन्तरं तृतीयैकादशौ वृषणौ, तृतीयो दक्षिणः, एकादशो वामः। चतुर्थदशमावूरुः चतुर्थों दक्षिणः दशमो वामः। पञ्चमनवमौ जानुनी दक्षिणजानु नवमो वामम्। षष्ठाष्टमौ जङ्घे षष्ठो दक्षिण जङ्घा, अष्टमो वामः। सप्तमः पादद्वयमिति।

अथाङ्गज्ञानप्रयोजनम् ॥—

तस्मिन्पापयुते व्रणं शुभयुते दृष्टेच लक्ष्मादिशेत्,
स्वर्क्षांशस्थिरसंयुतेषु सहजः स्यादन्यथाऽऽगन्तुकः।
मन्देश्मानिलजोग्निशस्त्र विषयो भौमे बुधे भूभवः।
सूर्येकाष्ठचतुष्पदेन हिमगौ शृङ्ग्यब्जजोन्यैशुभम् ॥७॥

दिवार्कशुक्रौ पितृमातृसंज्ञितौ शनैश्चरेन्दू निशि तद्विपर्ययात्।
पितृव्यमातृष्वसृसंज्ञतौ च तावथोजयुग्मर्क्षगतौ तयोः शुभौ ॥८॥

पितृमातृगृहेषु तद्बलात्तरुशालादिषु नीचगैः शुभैः।
यदि नैकगतौ तु वीक्षितौ लग्नेन्दू विजने प्रसूयते ॥९॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अधुना दीपसंभवासंभवं भूप्रदेशप्रसवज्ञानं गर्भमोक्षं मातुः सूतिकाले तदा, निमित्तक्लेशज्ञानं मन्दाक्रान्तयाह —

मन्दर्क्षांशे शशिनि हिबुके मन्ददृष्टेऽब्जगे वा
तद्युक्ते वा तमसि शयनं नीचसंस्थैश्च भूमौ ।
यद्वद्राशिर्व्रजति हरिजं गर्भ मोक्षस्तु तद्वत्
पापैश्चन्द्रात्स्मर सुखगतैः क्लेशमाहुर्जनन्याः ॥१०॥

अथ दीपगृहद्वारज्ञानमाह—

स्नेहः शशाङ्कादुदयाच्चवर्त्ति-
र्दीपोऽर्कयुक्तर्क्षवशाच्चराद्यैः ॥
द्वारं च तद्वास्तुनि केन्द्रसंस्थै-
र्ज्ञेयं ग्रहैर्वीर्यसमन्वितै र्वा ॥११॥

जीर्णं संस्कृतमर्क्कजे क्षितिसुते दग्धं नवं शीतगौ
काष्ठाढ्यं न दृढं रवौ शशिसुते चानेक शिल्पोद्भवम् ॥
रम्यं चित्रयुतं नवं च भृगुजे जीवेदृढं मन्दिरम्
चक्रस्थैश्च यथोपदेश रचनां सामन्तपूर्वां वदेत् ॥१२॥

जीर्णं संस्कृतमिति । वीर्यसमन्वितादित्यनुवर्तते । सर्वग्रहेभ्योऽर्क्कजेसौरे वीर्यवति स वले, जीर्णमपि चिन्तनं, भूयः संस्कृतं सूतिकागृहं वक्तव्यम् ॥ क्षितिसुते भूमिजे बलवत्यग्निना दग्धं, नवं शीतगौचन्द्रे नवं, शुक्लपक्षे उपलिप्तं वदेत् । यस्माद्यवनेश्वरः । सम्बर्धता चन्द्रमसोपलिप्तमिति, काष्ठाढ्यं नदृढं च रवा विति रवादित्येकाष्ठाढ्यं दारुबहुलं नदृढसारं, शशिसुते बुधे, तद्गृहमनेकसिल्प्युद्भवं बहुबिधशिलिप विरचितं 'रम्यं – चित्रयुतमिति' भृगुजे शुक्रे रम्यं रमणीयं मनोरमं चित्रयुतं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चित्रकर्म संयुक्तं । जीवे गुरौ दृढं चिरकालस्थायि, चक्रस्थैर्भचक्रादिरूढै गृहदातृगृहसमीपस्थैरन्यैर्ग्रहैः सामन्तपूर्वा समन्तात् सर्वासु दिक्षु यथोपदिष्टं वदेत् ब्रूयात् । सामन्तात् पूर्वाद्यतिवेशिकवेश्मसामन्तात्क्रमेणेत्यर्थः । यथा गृहदातृ ग्रहस्य पुरतः पश्चाद्वा पार्श्वयोर्वाऽन्येग्रहा व्यवस्थिता-स्तेनैव क्रमेण सूतिकागृहस्याऽन्यानि प्रतिवेश्मगृहाणि वाच्यानि । अन्येतु पूर्वामिति पठन्ति, सामन्ताद्गृहपर्यन्तपूर्विकावचनमिति । तथाच सारावल्याम् —

भवनग्रहसंयोगैः प्रतिवेश्माश्चिन्तनीयाश्च ।
देवालयाम्बुपावक – कोशविहाराद्यवस्करस्थानम् ॥१३॥

निद्रागृह च भास्करशशिकुजगुरूभार्गवार्किबुधयोगात् । अत्राचार्येण भूमिकाप्रमाणं नोक्तम्, विशालद्विशालज्ञानं च तदुच्यते—

बृहस्पतौ कर्कटस्थे परमोच्चाद्भ्रष्टे लग्नाद्दशमे द्विभूमिकं ।

उच्चभागेष्वर्वाक्स्थिते, त्रिभूमिकमुच्चभागस्थे चतुर्भूमिकं धनुषि सबले दशमस्थानसंस्थे गुरौ त्रिशालं तद्वद् गृहम् । मिथुन कन्या मीनस्थे द्विशालम् । उक्तञ्च स्वल्पजातके—

गुरुरुच्चे दशमस्थो द्वित्रिचतुर्भूमिकं करोति गृहम् ।
धनुषि सबले त्रिशालं, द्विशालमन्येषु यमलेषु इति ॥१४॥

अथ समस्त वास्तु रिक्त सूतिकास्थानं वक्तव्यं, अंशेवा उत्तरतो गुरुसौम्य-गृहे, धन्वीमीनौ, सौम्यगृहे मिथुनकन्ये एतेषु लग्नकेषु, तदंशकेषु चोत्तरो वास्तुनः सूतिकागृहं वाच्यम् । वृषेण तदंशकेन वा गृह पश्चिम भागे ससूतिकागृहं, मृगसिंहौ मकरकेशरिणौदक्षिणभागकराविति, दक्षिणे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भागे सूतिका गृहं कुरुतः । अथ सूतिका गृहे एव शयनमिति तज्ज्ञानं वैतालीयेनाह—

प्राच्यादिगृहे क्रियादयो द्वौ द्वौ कोणगता द्विमूर्त्तयः ।
शय्यास्वपि वास्तुवद्वदेत्पादैः षड्त्रिनवान्त्यसंस्थितैः ॥१५॥

गृहे सूतिका वेश्मनि प्राच्यादि पूर्वाद्याराशयः द्वौ द्वौ चतसृषुदिक्षु कोणगतो विदिक्स्था द्विमूर्त्तयो, द्विस्वभावाः । तद्यथा— मेषवृषयोर्लग्नयो गृहस्य प्राग्भावे सूतिकाशयनं मिथुने आग्नेय्यां कर्क्कटसिंहयोर्दक्षिणे कन्यायां नैर्ऋत्ये-- तुलावृश्चिकयोः पश्चिमे, धनुषि वायव्ये, मकरकुम्भयोरुत्तरे, मीनेऐशान इति ।। एष एव विधिः शय्यास्वपि वक्तव्यः । अत उक्तम्[१]— शय्यास्वपि वास्तुवद्वदेदिति ।। किं त्वयं विशेषः 'पादैः षट्त्रिनवान्त्य-संस्थितैरिति' इह षट् पादाः षट्नवान्त्यराशयः । लग्नात्षष्ठतृतीय-नवमद्वादशराशयः पादाः परिकल्प्याः । तत्रैव तज्जातं येन लग्नेन प्रसवस्तदुक्तदिशि, शय्यायाः शिरस्तस्मादेव षड्नवांशाः पादाः तत्र द्वादशतृतीयौ पूर्वपादौ तत्रापि तृतीयो दक्षिणे द्वादशो वामः । षष्ठ नवमौ पश्चिमपादौ तत्रापि षष्ठो दक्षिणो नवमो वामः । लग्नद्वितीयौ शीर्षभागः चतुर्थपञ्चमौ दक्षिणमङ्गं, सप्ताष्टमौ पादान्तभागः, दशमैकादशो वाममङ्गं प्रयोजनं "विनतत्वं यमलक्षैः क्रूरैस्तुल्य उपघात" इति । यत्र द्विस्वभावा राशयः स्थितास्तत्र विनतत्वं यत्र पापास्तत्सदृश श्चोपघातः, एवं सदैवानुपपन्नं खट्वाङ्ग प्रसङ्गः । यस्मादवश्यं क्वचिदपि यमलक्षेण पापग्रहेणच भवितव्यं, तस्माद्यमलक्षं सौम्यग्रह स्वामियुतदृष्टं तत्र विनतत्वम् । पापग्रहोपि स्वोच्चराशि त्रिकोणमित्रक्षेत्रस्थोऽशुभ फलकरो नभवतीति ।।

१ यदुक्तम् क. । यत उक्तम् प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथुनोपसूतिका संख्याज्ञानमनुष्टुभाह—

चन्द्रलग्नान्तरगतैर्ग्रहैः स्युरुपसूतिका ।
बहिरन्तश्चचक्रार्द्धे दृश्या ऽ दृश्ये ऽ न्यथा परे ।।१६।।

लग्नादारभ्य यत्र राशौ चन्द्रमा व्यवस्थितस्तदन्तरे तयोर्मध्ये यावन्तो ग्रहा व्यवस्थिता स्ते चन्द्रलग्नान्तरगताग्रहा स्तैरुपसूतिकास्यु स्तावत्संख्या उपसूतिका समीप वर्तिन्यः स्त्रियः स्युर्भवेयुः । ताश्च ग्रह तुल्यजाति वयोवर्णरुपाः

इतिश्रीसारङ्गसाधुवचनामृतेनभट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने उपसूतिकाज्ञानाऽध्यायः ।।

अथरिष्टाऽध्यायः

बृहज्जातकमतेनारिष्ट योगान् कथयामि ।।

संध्यायां हिमदीधितिहोरा[1] पापैर्भन्तिगतैर्निधनाय ।
प्रत्येकं शशिपापसमेतैः केन्द्रैर्वा स विनाशमुपैति ।।१।।

चक्रस्य पूर्वापरभागगेषु क्रूरेषु सौम्येषु च कीटलग्ने ।
क्षिप्रं विनाशं समुपैति जातः पापैर्विलग्नास्त मयाभितश्च ।।२।।

कीटलग्नं, कर्कटलग्नं, वृश्चिकलग्नं, तथा च वादरायण —
पूर्वापरभागगतै रशुभशुभैरलिनिकर्कटे[2] लग्ने ।
जातस्य शिशोर्मरणं सद्य: कथयन्ति यवनेन्द्राः ।।३।।

पापावुदयास्तगतौ क्रूरेणयुतश्च शशी ।
दृष्टस्तु शुभैर्न यदा मृत्युश्च भवेदचिरात् ।।४।।

---

१ दीधितेर्होरा प्र. । २ कर्कटके प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यवनेश्वरः—

एकेन श्लोकेनारिष्ट चतुष्टयं कथयति—
रिपु व्ययगतैः पापैरथवा धनमृत्युगैः ।
लग्ने वा पापमध्यस्थे द्यूनेवा मृत्युमाप्नुयात् ॥५॥

बृहज्जातके—

क्षीणे हिमगौ व्ययगे पापैरुदयाष्टमगैः ।
केन्द्रेषु शुभाश्च नचेत् क्षिप्रं निधनं प्रवदेत् ॥६॥

भगवान् गर्गः—

क्षीणे चन्द्रे व्ययगते पापैरष्टम लग्नगैः[1] ।
केन्द्रवाह्यस्थितैः सौम्यै र्जातस्य निधनं वदेत् ॥७॥

क्रूरेण संयुत शशी स्मरान्त्यमृत्युलग्नगः ।
कण्टकाद्वहिः शुभैरवीक्षितश्च मृत्युदः ॥८॥

यवनेश्वरः—

लग्नाच्छशी नैधनगोऽशुभर्क्षेः षष्ठेथवापापनिरीक्षितश्च ।
सर्वायुराहन्ति शुभैरमिश्रैस्तदीक्षितोऽब्दाष्टकपर्यायेण ॥९॥

स्वल्पजातके—

शशिवत्सौम्याः पापैर्वक्रिभिरवलोकिता न शुभदृष्टाः ।
मासेनः मरणदाःस्युः पापजितो लग्नपश्चास्ते ॥१०॥

---

१ रुदयाष्टमलग्नगैः । प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथारिष्टान्तराणि मन्दाक्रान्तयाह —

लग्ने क्षीणे शशिनि निधनं रन्ध्रकेन्द्रेषु पापैः ।
पापान्तस्थैर्निधनहिबुकद्यूनयुक्ते च चन्द्रे ।
एवं लग्ने भवतिमदनच्छिद्रसंस्थे च पापे ।
मात्रासार्द्धं यदि च न शुभैर्वीक्षितः शक्तिमद्भिः ॥११॥

अथारिष्टान्तराणीन्द्रवज्र्याह –

राश्यन्तगे सद्भिरवीक्षमाणे चन्द्रेत्रिकोणोपगतैश्च पापैः ।
प्राणैःप्रयात्याशुशिशुर्वियोगमस्ते च पापैस्तुहिनांशु लग्ने ॥१२॥

अथारिष्टान्तराणि हरिण्याह–

अशुभसहितेग्रस्ते चन्द्रेकुजे निधनाश्रिते ।
जननि सुतयोर्मृत्युर्लग्नेरवौ तु स शस्त्रजः ।
उदयतिरवौ शीतांशौ वा त्रिकोणविनाशगै–
र्निधनसशुभै वीर्योपेतैःशुभैर्नयुतेक्षिते ॥१३॥

अथारिष्टान्तरमपरबक्त्रेणाह–

असितरविशकाङ्कभूमिजैर्व्ययनवमोदयनैधनाश्रितैः ।
भवतिमरणमाशु देहिनां यदि बलिना गुरुणा न वीक्षिताः ॥१४॥

अथारिष्टान्तरं पुष्पिताग्रयाह–

सुतमदननवान्त्यलग्नरन्ध्रेष्वशुभयुतो मरणाय शीतरश्मिः ।
भृगुसुतशशिपुत्र देवपूज्यैर्यदि बलिभिर्नयुतो विलोकितो वा ॥१५॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथानुक्तमरणकालानामरिष्टयोगानां कालपरिज्ञानं भ्रमरविलसितयाह –

[1] योगेस्थानं गतवति वलिनश्चन्द्रेस्वं वा तनुगृह मथवा ।
पापैर्दृष्टे वलवति मरणं वर्षस्यान्तः किल मुनिगदितम् ॥१६॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचितें जगन्मोहने गर्गयवनवराहादिभिःप्रणीतद्वितीयप्रकारारिष्टाऽध्यायः ॥

अरिष्टभङ्गाऽध्यायः

साराल्याम्

सर्वापदामतिवलस्फुरदंशुजालो लग्नस्थितः प्रशमयेत्सुरराजमन्त्री ।
एकोबहुनि दुरितानि सुदुस्तराणि भक्त्याप्रयुक्त इवशूलधरेप्रणामः॥१॥

लग्नाधिपोऽतिवलवानशुभैरदृष्टःकेन्द्रस्थितैःशुभफलैरवलोक्यमानः ।
मृत्युंविधूय विदधाति सुदीर्घमायुःसार्द्धंगुणैर्बहुभिरुर्जितया च लक्ष्म्या॥२॥

लग्नादष्टमवर्त्यपि गुरुबुधशुक्रद्रेक्काणगश्चन्द्रः ।
मृत्युं प्राप्तमपिनरं परिरक्षत्येषनिर्व्याजिम् ॥३॥

चन्द्रःसम्पूर्णतनुः सौम्यर्क्षगतः शुभस्यान्तः ।
प्रकरोत्यरिष्टभङ्ग विशेषतः शुक्रसंदृष्टः ॥४॥

बुधभार्गवजीवानामेकतमः केन्द्रमागतो बलवान् ।
यद्यक्रूर सहायः सद्योरिष्टस्य भङ्गाय ॥५॥

रिपुभवनगतोऽपि शशी गुरुसित चन्द्रात्मजदृक्काणस्थः ।
अगद इव भोगिदष्टं रक्षत्येवैष निर्व्याजिम् ॥६॥

---

१ यतो वहवोजाता, असतस्वपियोगेषु जीवन्तो दृश्यन्तेऽतोस्माभिः कञ्चिल्लिख्यते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सौम्यद्वयान्तरगतः सम्पूर्णस्निग्धमण्डलः शशभृत् ।
निःशेषरिष्टहन्ता भुजङ्गलोकस्य गरुड इव ॥७॥

शशभृति पूर्णशरिरे शुक्लेपक्षे निशाभवे काले ।
रिपुनिधनस्थेऽरिष्टं प्रभवति [१] नैवात्र जातस्य ॥८॥

प्रस्फुरित किरणजाले स्निग्धामल मण्डलोपेते ।
सुरमन्त्रिणि केन्द्रगते सर्वारिष्टं समभुपैति ॥९॥

सौम्यभवनोपयाताः सौम्यांशक सोम्यदृक्काणस्थाः ।
गुरुचन्द्राकाव्यशशिजाः सर्वारिष्टं हरन्त्याशु ॥१०॥

चन्द्राध्यासितराशेरधिपः केन्द्रे शुभग्रहो वापि ।
प्रशमयतिरिष्टमखिलं पापानि यथा हरिस्मरणम् ॥११॥

पापायदि शुभवर्गे सौम्यैर्दृष्टाः शुभांशवर्गस्थैः ।
निघ्नन्ति तदारिष्टं पतिं विरक्ता यथा युवतिः ॥१२॥

राहु स्त्रिषष्ठलाभे लग्नात्सौम्यैर्निरीक्षितः सम्यक् ।
नाशयति सर्वदुरितं मारुत इव तूलसंघातम् ॥१३॥

शीर्षोदयेषु राशिषु सर्वे गगनाधिवासिनः सूतौ ।
प्रकृतस्थैश्चारिष्टं विलीयते घृतमिताग्निस्थम् ॥१४॥

तत्काले यदि विजयी शुभग्रहः शुभनिरीक्षितेऽवश्यम् ।
नाशयति सर्वारिष्टं मारुतइव पादपान् प्रबलः ॥१५॥

---

१ भवति प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सर्वैर्गगनभ्रमणैर्दृष्टश्चन्द्रो विनाशयतिरिष्टम् ।
आपूर्यमाणमूर्तिर्यथानृपः स्वनयविद्द्वेषी ॥१६॥

पक्षेसिते भवतिजन्म यदि क्षपायां
कृष्णेऽथवाऽह्नि शुभाशुभ दृश्यमानः ।
तच्चन्द्रमा रिपुविनाशगतोऽपि यत्ना—
दापत्सुरक्षति पितेव शिशुं प्रजातम् ॥१७॥

उडुपतितनुरिष्टानां भङ्गस्तावन्निरुप्यते सम्यक् ।
शब्राणामपि पश्चाद् यथामतं ब्रह्मपूर्वाणाम् ।:१८॥

चन्द्रःसम्पूर्णतनुःशुक्रेण निरीक्षितः सुहृद्भागे ।
रिष्टहराणां श्रेष्टो वातहराणां यथावस्तिः ॥१९॥

परमोच्चे शिशिरतनुर्भृगुतनय निरीक्षितो हरतिरिष्टम् ।
सम्यग्विरेचवमनं पित्तकफानां यथादोषम् ॥२०॥

चन्द्रःशुभवर्गस्थः क्षीणोऽपि शुभेक्षितो हरति रिष्टम् ।
सप्ताष्टमषष्ठस्थे शशिनिसौम्या हरन्ति रिष्टफलम् ॥२१॥

पापैर्मिश्रफलैःस्यात्कल्याणघृतं यथोन्मादम् ।
आपूर्यमाणमूर्तिर्द्वादशभागे शुभस्य यदि चन्द्रः ॥२२॥

रिष्टं नयति विनाशं भक्त्याभ्यासाद्यथा शम्भुः ।
सौम्यक्षेत्रे चन्द्रो होरापतिना विलोकितो हन्ति ॥२३॥

रिष्टं न वीक्षितोन्यैः कुलाङ्गनाकुलमिवान्त्यगता ॥२४॥

क्रूरभवने शशाङ्को भवनेशनिरीक्षितस्तदनु वर्गे ।
रक्षति शिशुं प्रजातं कृपण इव धनं प्रयत्नेन ॥२५॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अजवृषकर्किणिलग्ने रक्षति राहुःसमस्तपीडाभ्यः ।
अवनिपतिःप्रसन्नःकृतापराधं यथा पुरुषम् ॥२६॥

स्वोच्चस्थःस्वगृहेऽथवापि सुहृदां वर्गेऽथ सौम्येऽपि वा ।
सम्पूर्णःशुभवीक्षितःशशधरो वर्गे स्वकीयेऽथ वा ।
शत्रूणामवलोकने निपतितःपापैरयुक्ते क्षितो
रिष्टं हन्ति सुदुष्करं दिनपतिःप्रालेयराशिं यथा ॥२७॥

सौम्यग्रहैरतिबलैर्विबलैश्चपापै–
लग्नं च सौम्यभवनं शुभदृष्टिजुष्टम् ।
सर्व्वापदाविरहितो भवति प्रसूतः
पूजाकरःखलु यथा दुरितं ग्रहाणाम् ॥२८॥

गुरुशुक्रौ च केन्द्रस्थौ जीवेद्वर्षशतं नरः ।
ग्रहारिष्टं भिनत्त्याशु चन्द्ररिष्टं तथैव च ॥२९॥

सौम्यास्पदे यदि विलग्नगते कुलीरे
गीर्वाणनाथसचिवः सितपक्षचन्द्रः ।
लाभेकवीन्दु तनयावपरे च लाभे
दुश्चिक्य शत्रुभवनेष्वमितं तदायुः ॥३०॥

जातकार्भकचक्रम्—

यस्मिश्चरति वै भानुस्तदादि त्रीणिमस्तके ।
तारकाश्चमुखे त्रीणि एकैकं स्कन्धयोरपि ॥३१॥

एकैकं वाहुयुग्मेऽपि एकैकं तु द्विहस्तयोः ।
उदरे पञ्च, ऋक्षाणि एकं नाभौ तु निर्दिशेत् ॥३२॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एकं गुह्यप्रदेशे तु एकैकं तु द्विजानुनोः ।
शेषं तु पाद ऋक्षाणि नरचक्रं प्रकीर्त्तितम् ॥३३॥

अल्पायुर्जन्यते पादौ स्थानभ्रष्टं तु जानुनि ।
परदारतो गुह्ये अल्प सौख्यं तु नाभिगे ॥३४॥

उदरेत्वीश्वरंविद्यात् पाणिभ्यां तस्करो भवेत् ।
शूरत्वं जायते बाहौ श्रीपतिः स्कन्धयोरपि ॥
आस्येन पण्डितां विद्यात् पट्टबद्धशिरो भवेत् ॥३५॥

इतिश्रीसारङ्गसाधुनवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने ऽरिष्टभङ्गाऽध्यायः ॥

अथ योगारिष्टाऽध्यायः

शुकप्रणीतयोगारिष्टं लिख्यते —

उक्तं बालारिष्टं योगारिष्टं प्रयत्नतो वक्षे ।
योगारिष्टदशायामुभयोस्तुल्यं यदा तदा रिष्टम् ॥१॥

होरेश्वरेर्कसंस्थे जन्मेशे वापि सौम्यदृग् हीने ।
केन्द्रगतैः पापैः स्या ज्जातस्य विंशतेर्मृतिर्भवति ॥२॥

नीचांशक स्थितश्चन्द्रोऽप्यष्टमसंस्थः क्षयी च मरणकरः ।
कुजमन्दाभ्यां दृष्टस्तस्यायुः पञ्चविंशतिः परमम् ॥३॥

भौमे लग्नं याते रविमन्दौ केन्द्रगौ बलौ दृक्कौ ।
आविंशतेर्मृतिः स्याद्भंगो वा रोगयुक्तो वा ॥४॥

कुजरवियुक्ते लग्ने चरराशौ मध्यसंस्थिते[1] जीवे ।
सुतधर्मगते चन्द्रे जातस्य विंशतेर्मृति भंवति ॥५॥

---

१ मध्यमसंस्थिते प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चन्द्राष्टमगतैः पापैः सौम्यैरापोक्लिमस्थितैः ।
निधनारिगते चन्द्रे तस्यायुर्विंशतिः परमम्[१] ॥६॥

अर्थव्ययर्क्षसंस्थो जीवो रोगेण[२] संयुक्तः
सप्ताष्टमस्थश्च तदा जातः परमायुरात्रिंशत् ॥७॥

गुरुणायुक्तः शुक्रो धनगतः पञ्चमे कुजार्कसुतौ ।
बलरहितश्चेच्चन्द्रो योगे जातोल्पजीवितं नियतम् ॥८॥

अष्टाविंशति वर्षे मरणं चन्द्रार्कराहु लग्नस्थाः ।
कुर्वन्ति तदा जातं जीवे व्ययगे तथा नियतम् ॥९॥

चन्द्रलग्नाष्टमपति केन्द्रगतावष्टमे ग्रहः कश्चित् ।
आद्वात्रिंशान्मरणं नान्यच्छुभ संयुते केन्द्रे ॥१०॥

चन्द्रे क्षीणे स्वर्क्षे निधनकेन्द्रगेष्टमे पापे ।
लग्नेशे बलहीने ज़ातः परमायुरात्रिंशत् ॥११॥

होरानिधनाधिपयोः स्फुटयोगः केन्द्रमृत्युराशिस्थः ।
तत्र समेतः पापो निधनं स्यात्सप्तविंशति वर्षेषु ॥१२॥

रन्ध्रेश्वरो भाग्यलग्नात्मजस्थः लग्नाधिपे क्रूरदृष्टेऽष्टमस्थे ।
जातश्चतुर्विंशतिवर्षमायुः शुभेक्षितैस्तैरपमृत्युरेषः ॥१३॥

पापोदये सुरगुरौ शनिदृष्ट राहुणा समेतो न यः ।
कश्चिद् निधनगतो मरणं जनयेद् द्विरुद्रसंख्याब्दैः ॥१४॥

---

१ परम् अ. । २ रोगेण प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

होरेशे षष्ठगते सक्रूरौ चन्द्रभास्करौ सुतगौ ।
निधनेशे केन्द्रगते जातस्यायुः परं त्रिंशत् ॥१५॥

अष्टमाधिपतौ केन्द्रे लग्नेशे बलवर्जिते ।
त्रिंशद्वर्षाण्यसौजीवेद् द्वात्रिंशज्जातकक्रमः ॥१६॥

आपो क्लिमस्थितेचन्द्रे लग्नेशे च तथैव च ।
पापेक्षिते बलैर्हीने जीवत्यष्ट चतुर्गुणम् ॥१७॥

गुरुशुक्रौ च केन्द्रस्थौ लग्नेशेपापसंयुतें ।
आपोक्लिमस्थे संध्यायां जातस्यायुरपि त्रयम् ॥१८॥

पापमध्यगतेसूर्ये लग्नस्थे शत्रुवेश्मनि ।
जातश्च रोगपीडान्तः परमायुरपि त्रयम् ॥१९॥

वक्त्रेन्दू लग्नगौ यस्य केन्द्राष्टम विर्वाजितैः ।
सौम्यैः कुलिकवेलायां जातस्यायुरपित्रयम् ॥२०॥

अष्टमाधिपतौ लग्ने स्थिरराशौ च जायते ।
चत्वारिंशद्[१] वर्षे मरणं रन्ध्रेण शुभसंयुते ॥२१॥

लग्नेशे निधनांशे लग्नांशे निधनेश्वरे ।
पापयुतौ तदा जातः पञ्चाशद्वर्षजीवितम् ॥२२॥

यस्य केन्द्रे पापयुक्ते लग्नेशे क्रूरवर्जिते ।
षष्ठिवर्षात्परं नास्ति पापैः पञ्चमसंस्थितैः ॥२३॥

लग्नेशे व्ययसंस्थे च क्षीणे पापयुतेऽपिवा ।
षष्ठिवर्षात्परं नास्ति न लग्ने च बृहस्पतिः ॥२४॥

---

१ 'नरो यस्तु' इत्यधिक पाठ प्र. अ. पुस्तकयोः वर्तते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अष्टमाधिपतौ केन्द्रे भौमे लग्नं समाश्रिते ।
अर्कार्किजौ त्रिषष्ठस्थौ जीवेद्रुद्रचतुर्गुणम् ॥२५॥

वर्गोत्तमांशके चन्द्रे लग्नस्थे पापवीक्षिते ।
सौम्यैर्बलविहीनस्थै द्वादशाब्द चतुर्गुणम् ॥२६॥

सौम्यैः पापांशकर्क्षस्थैः पापैः केन्द्रगतै स्तथा ।
मध्यमायुरयं योगः सौम्यैः केन्द्रविवर्जितैः ॥२७॥

द्विशरीरोदयगते मन्दे चन्द्रेऽष्टमे व्ययेऽपिवा ।
जातस्तत्र मनुष्यो जीवेद्वर्षं द्विपञ्चाशत् ॥२८॥

अलिकर्क्युदये लग्ने सूर्ये पापान्विते विधौ ।
धनगे गुरुरहिते केन्द्रे स्याच् शतार्द्ध वर्षं च तस्यायुः ॥२९॥

चतुरस्रगताः पापा लग्नात्कुर्वन्ति मध्यमायुष्यम् ।
चन्द्रस्तथैव दिवसे सौम्यरनवेक्षिता न संयुक्ताः ॥३०॥

सुत दशमे सौम्यः स्यान्निधने च रव्यन्विते व्यये चन्द्रे ।
गुरुशुक्रावेकगतौ जातस्तत्रैव मध्यमायुष्यम् ॥३१॥

शन्यंशे लग्नेशे निधनेश समन्विते निशानाथे ।
षष्ठाष्टमव्यये वा जातस्तत्रैव चाष्टपञ्चाशत् ॥३२॥

लग्नाधिपाद् मृत्युषष्ठ व्ययस्थाः पापाः सन्तो नैधनं वर्जयित्वा[१] ।
अस्मिन्योगे जायते यो मनुष्यस्तस्यायुष्यं षष्टिवर्षं प्रसिद्धम् ॥३३॥

---

१ वर्ज्य संस्थाः लि. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

होराजन्माधिपती सार्कगतौ मृत्युराशिसंयुक्तौ ।
केन्द्रचतुष्टयहीने देवगुरौ पञ्चषष्टि वर्षान्तौ ॥३४॥

षष्ठाष्टमव्ययगतैर्ग्रहैः समस्तैर्नृपालयोगाख्यः ।
अस्मिन्योगे जातः परमायु श्चाष्टपञ्चाशत् ॥३५॥

अर्ककुजमन्दयुक्ते बलवर्जिते सुराचार्ये ।
चन्द्राद् यथात्मजे वा सप्ततिवर्षं च जीवति प्रायः ॥३६॥

चतुराद्यैर्ग्रहैर्युक्तेलग्नद्वित्रिसुखेषु वा ।
चिरायुस्तत्र जातश्च ज्ञानवानर्थवान्भवेत् ॥३७॥

पञ्चमादिषु तैर्युक्तैः षष्ठिवर्षं च जीवति ।
नवमादियुतैः सर्वै रल्पायु स्तत्र जातकः ॥३८॥

क्रूरभांशस्थितैः सौम्यैः केन्द्राश्रितैरशीत्यब्दम् ।
जीवति तत्रोद्भूतो मिश्रैर्वा षष्टि वर्षञ्च ॥३९॥

गुरुचन्द्रौ हिबुकस्थौ लग्नेशे लाभगे बलाढ्ये स्यात् ।
सौम्ये दशमं याते द्वाशीति वर्षञ्च परमायुः ॥४०॥

जीवांशसंस्था रविचन्द्रभौमाः केन्द्राश्रिता लग्नसंस्थः सुरेज्यः ।
रन्ध्रं हित्वा यत्र तत्रावशेषैः पञ्चाशीति जीवितं तत्रजायः ॥४१॥

क्रूरभवनस्थैः क्रूरैः सौम्य क्षेत्रेषुः संस्थितैः सौम्यैः ।
लग्नेशे ऽखबलाढ्ये जातः परमायुराप्नोति ॥४२॥

यदि नैधनगोभौमः सार्को होरागतोऽथवा प्रसवे ।
केन्द्रे चामरपूज्ये प्राणी जातोऽत्र वर्षशतम् ॥४३॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

केन्दत्रिकोणनिधनेषु न यस्य पापा
लग्नाधिपः सुरगुरुश्च चतुष्टयस्थौ ।
भुङ्क्ते सुखानि विविधानि च पुण्यकर्मा
जीवेच्च वत्सरशतं स विमुक्तरोगः ॥४४॥

चरांशकस्थाः कविमन्दभौमा स्थिरांशकस्थौ रविदेवपूज्यौ ।
शषौ तु युग्मांशकसंप्रयुक्तौ दीर्घायुरत्र पुरुषो नृपालः[1] ॥४५॥

ओजांशकः स्थितशुभा शुभधर्मसंस्थाः
पापास्तु युग्मभवनांशकलाभसंस्थाः ।
चन्द्रे विलग्नभवने यदि पूर्णरश्मि—
र्जातोऽत्र वर्षशतमायुररोगतां च ॥४६॥

लग्नाधिपो ऽतिबलवानशुभैरदृष्टः
केन्द्रस्थितः शुभफलैरवलोक्यमान ।
मत्युं विधूय विदधाति सुदीर्घमायुः
सार्द्धं गुणैर्बलिभिरूर्जितया च लक्ष्म्याः ॥४७॥

लग्नेश्वरो दतिबलि निधनेश्वरश्च
केन्द्रस्थितो निधनरिः फगतैश्च पापैः ।
तस्यायुरल्पमथवा यदिमध्यमायु —
रुत्साहसङ्कट वशात् परमायुरेति ॥४८॥

अथामितायुर्लक्षणम् ॥ –

एकांशकस्था वुधजीवशुक्रा —
स्त्वेकर्क्षगा लग्नमुपागताश्च ।

---

१ शेषौ तु युग्मभवनांशकसंप्रयुक्तौ दीर्घायुरत्र जनने पुरुषो ृपालः प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

धर्मे शनौ जन्मनि यस्यजन्तो --
रसायनाख्यैर्युगमादधाति ।।४९।।

एकांशकस्था बुधजीवमन्दा धर्मस्थिता लग्नमुपागता वा ।
षष्ठेऽष्टमे वा हिमगौ च यस्य सहस्रवर्षद्वयमात्मजातः ।।५०।।

जीवांशकस्था:सरलग्रहेन्द्रा:केन्द्राश्रिता धर्म धनाश्रिता वा ।
जातो नरः प्रव्रजितः स वाह्ये युगान्तमायुर्वहुशास्त्रकर्त्ता ।।५१।।

मन्दांशकस्था रविजीवभौमा धर्माश्रिता कर्मयुता बलाढ्याः ।
राश्यावसाने हिमगौ विलग्ने युगान्तमायुःश्रियमादधाति ।।५२ ।

अक्षीणचन्द्रे सुहृदुच्चभांशे लाभाश्रिते लग्नमुपाश्रिते वा ।
धर्मेश्वरे सूर्यसुतेबलाढ्ये जातोऽत्र दीर्घायुरसंख्यवर्षम् ।।५३।।

गुरुमन्दावेकस्थावेकांशगतोस्वधर्मकर्मस्थौ ।
अर्कोदये ससौम्ये जातो मुनिवल्लभोऽति दीर्घायुः ।।५४।।

केन्द्रेबाणाङ्कसंस्थे सितबुधधिषणे दीर्घमायुः प्रसूतौ ।
मध्ये नेत्राग्निलाभे सितवुधधिषणे शेषगे मृत्यवे स्यात् ।।
चन्द्रे लग्नारिवाणे व्ययगजमदने मृत्युदः शेषभोगात्
क्रूरैः षड्वन्हिलाभे सुखधनमदने मध्यमोऽन्यत्र मृत्युः ।।५५।।

कन्द्रे शतायुर्भृगुजे गुरौ वा रिष्टं च चन्द्रग्रहजं विनश्येत् ।
एकोऽपि मृत्यावुदये न पापः केन्द्रेगुरौ चाष्ट शतायुरत्र ।।५६।।

अतिदीर्घकालयोगे जातो मुनिर्वर्जितेन्द्रियो भूत्वा ।
दिव्यौषधि प्रयोगान् विलप्रवेशान्तमेतिमन्त्रजपात् ।।५७।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्यादियोगः परमेश्वरेण प्रोक्तो मया पूर्वकर्मानुषंगात् ।
सर्वान्विनिश्चित्य दशान्तराले छिद्रेषु योगोक्तफलंप्रयोज्यम् ।।५८।।

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने शुकप्रणीतयोगारिष्टाऽध्यायः ।।

अथ राजयोगाऽध्यायः

अथ वराहगर्गयवनशुकादीनांमतान्यवलम्ब्य कतिपय राजयोगा लिख्यन्ते वैतालीयेनाह–

प्राहुर्यवनाश्च तुङ्गभागैः क्रूरैः क्रूरमतिर्महीपतिः ।
क्रूरैस्तु न जीवशर्म्मणः पक्षे क्षित्यधिपः प्रजायते ।।१।।

अथद्वात्रिंशद्राजयोगान् वसन्ततिलकेनाह–

वक्रार्काजार्कगुरुभिः सकलैस्त्रिभिश्च
स्वोच्चेषु षोडश नृपाः कथितैकलग्ने ।
व्द्येकाश्रितेषु च तथैकतमे विलग्ने
स्वक्षेत्रगे शशिनि षोडश भूमिपाः स्युः ।।२।।

चतुश्चत्वारिंशद्राजयोगानुष्टुभ श्लोकेनाह–

वर्गोत्तमगते लग्ने चन्द्रेवा चन्द्र वर्जितैः ।
चतुराद्यैर्ग्रहैर्दृष्टे नृपाद्वाविंशतिः स्मृताः ।।३।।

अ . खरिण्या पञ्च–राजयोगानाह–

यमे कुम्भेऽर्केऽजे गवि शशिनि तैरेवतनुगै–
र्नृयुक्सिंहालिस्थैः शशिजगुरुवक्रैर्नृपतयः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यमेन्दू तुङ्गेऽङ्गे सवितृशशिजौ षष्ठभवने
तुलाजेन्दुक्षेत्रैः ससितकुजजीवैश्च नरपौ ॥४॥

अथान्यद्राजयोगत्रयंशिखरिण्याह–

कुजेतुङ्गे ऽर्केन्दोर्धनुषि यमलग्ने च नृपतिः
पतिर्भूमेश्चान्यः क्षितिसुतविलग्ने सशशिनि ।
सचन्द्रे सौरेस्ते सुरपतिगुरौ चापधरगे
स्वतुङ्गस्थे भानावुदयमुपयाते क्षितिपतिः ॥५॥

अथ शिखरिण्याराजयोगद्वयमाह्–

बृषेसेन्दौ लग्ने सवितृगुरुतीक्ष्णांशुतनयैः
सुहृज्जायाखस्थैर्भवतिनियमात्मानरपतिः ।
मृगे मन्दे लग्ने सहजरिपु धर्मव्ययगतैः
शशाङ्काद्यैः ख्यातः पृथुगुणयशाः पुंगवपतिः ॥६॥

अथ शिखरिण्याराजयोगत्रयमाह्–

हृषेसेन्दो जीवे मृगमुखगते भूमितनये,
स्वतुङ्गस्थौ लग्ने भृगुजशशिजावत्र नृपती ।
सुतस्थौ वक्रार्कौ गुरुशशिसिताश्चापि हिबुके
बुधे कन्यालग्ने भवति हि नृपोन्योऽपि गुणवान् ॥७॥

अथ शिखरिण्याराजयोगत्रयमाह

झसे सेन्दौ लग्ने घटमृग मृगेन्द्रेषु सहितै—
र्यमारार्कैर्योभूत्खलु मनुजः शास्ति स वसुधाम् ।
अजे सारे मूर्त्तौ शशिगृहगते चामरगुरौ
सुरेज्ये वा लग्ने धरणिपतिरन्योऽपि गुणवान् ॥८॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ राजयोगं विद्युन्मालयाह—

कर्क्किणि लग्ने तत्स्थे जीवे चन्द्रसितज्ञैरायप्राप्तैः ।
मेषगतेर्क्के जातं विद्याद् विक्रमयुक्तं पृथ्वीनाथम् ॥९॥

अथ द्रुपदेन राजयोगमाह–

मृगमुखेऽर्क्कतनये तनुसंस्थे क्रियकुलीरहरयो धिपयुक्तः ।
मिथुनतौलिसहितौ बुधशुक्रौ यदि ततः पृथुयशाः पृथिवीशः ॥१०॥

अथ राजयोगमनुष्टुभाह–

स्वोच्च संस्थे बुधे लग्ने भृगौमेषूरणाश्रिते ।
स जीवेऽस्ते निशानाथे राजा मन्दारयोः सुते ॥११॥

मालिन्याह–

अपिपरकुलजाता मानवा राज्य भाजः
किमुतनृपकुलोत्थाः प्रोक्तभूपालयोगैः ।
नृपतिकुलसमुत्थाः पार्थिवा वक्ष्माणै—
र्भवति नृपतितुल्यस्तेष्व भूपालपुत्रः ॥१२॥

अथ राजयोगानोपच्छन्दसिकेनाह–

स्वोच्च स्वत्रिकोणगैर्बलस्थै स्त्र्याद्यै भूपति वंशजानरेन्द्राः ।
पञ्चादिभिरन्य वंशजाता हीनैर्वित्तयुता नभूमिपालाः ॥१३॥

अथान्यराजयोगं विद्युन्मालयाह–

लेखास्थेर्क्के जेन्दौ लग्ने भौमे स्वोच्चे कुम्भे मन्दे ।
चापः प्राप्ते जीवे राज्ञः पुत्रं विद्यात्पृथ्वीनाथम् ॥१४॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथान्यं राजयोगं विद्युन्मालयाह—

स्वर्क्षे शुक्रे पातालस्थे धर्मस्थानं प्राप्ते चन्द्रे ।
दुश्चिक्याङ्गप्राप्तिप्राप्तैः शेषैर्जातः स्वामी भूमेः ॥१५॥

अथान्यं राजयोगं च मालिन्याह—

सौम्ये वीर्ययुते तनुयुक्ते वीर्याढये च शुभाशुभयाते ॥१६॥
धर्मार्थोपचयेष्ववशेषैर्धर्मात्मा नृपजः पृथिवीशः ।

अथान्यद्राजयोगं वंशस्थेनाह—

वृषोदये मूर्तिधनारिलाभगैः
शशाङ्कजीवार्कसुताः परैर्नृपः ।
सुखेगुरौरवे शशितीक्ष्णदीधिती
यमोदये लाभगतैर्नृपोऽपरैः ।१७।

अथान्यद्राजयोगद्वयं वसन्ततिलकेनाह—

मेषूरणायतनुगाः शशिमन्दजीवा
ज्ञारौधने सितरवी हिबुके नरेन्द्रम् ।
वक्रासितौ शशिसुरेज्यसितार्कसौम्या
होरासुखास्तशुभखाप्तिगताः प्रजेशम् ॥१८॥

अथ राजयोगजातस्य कस्मिन्काले राज्यावाप्तिर्भविष्यतीति ज्ञानं स्वागतयाह—

कर्मलग्नयुतपाकदशायां राज्यलब्धि रथवा प्रबलस्य ।
शत्रुनीच गृहपातदशायां छिद्रसंस्थितदशाः परिकल्प्याः ॥१९॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अत्र भगवान् गर्गः--

लग्नगः कर्मगो वास्यादथवा प्रबलोऽपि यः ।
स स्यात्स्वान्तर्दशाकाले राज्यदः प्रबलो यदा ॥२०॥

नीचविग्रहसंस्थस्य दशायां प्रबलस्य च ।
च्युतिर्बलविहीनस्य तन्मोक्षपरमाश्रयात् ॥२१॥ इति ।

अथभोगिनां शवरदस्युस्वामिनां मालिन्याह—

गुरुसितबुधलग्ने सप्तमस्थेऽर्कपुत्रे, -
वियति दिवसनाथे भोगिनांजन्मविद्यात् ।
शुभबलयुतकेन्द्रैः क्रूरभस्थै[1]श्च पापै-
र्व्रजति शवरदस्यु स्वामितामर्थभाक् चः[2] ॥२२॥

अत्र च भगवान् गर्गः—

गुरुज्ञभार्गवैर्लग्ने सप्तमस्थेऽर्कनन्दने ।
दशमस्थे रवौजातो भोगभाक्पुरुषो भवेत् ॥२३॥

पापक्षेत्रगतैः पापैः केन्द्रस्थैः सौम्यरश्मिभिः ।
सकलैर्यस्य जन्मस्यादसौ स्या दस्युनयकः ॥२४॥ इति ।

अथसारावल्यान्तर्गतकतिपयराजयोगा लिख्यन्ते—

स्वोच्चत्रिकोणभवने बलसंयुतैश्च त्र्याद्यैर्नृपोभवति भूपतिवंशजातः ।
पञ्चादिभिर्जनपदप्रभवोऽपि सिद्धो[3]क्षितीश्वरसमो न तु
भूमिपालः ॥२५॥

---

१ क्रूरसंस्थै अ. क. । २ स्वामिनामर्थभाक् स. प्र. । ३ पञ्चादिभि-र्जनपतिश्चतदेकछत्रो लि. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अशुभ गगनवासैः स्वोच्चगैः क्रूरचष्ठ[1]
कथयति यवनेन्द्रो भूपतिं विक्रमोत्थम्[2] ।
न तु भवति नरेन्द्रो जीवशर्म्मोक्तपक्षे
भवति नृपतियोगैः सत्कृतो राष्ट्रपालः[3] ॥२६॥

यस्य नीचभवने शुभग्रहः कर्मगोभवति सोऽतुलकीर्तिः ।
नीच वीर्य कुलजोऽपि नरोऽस्मिन् राजयोग इति सव्यपदेशः ॥२७॥

रवतनुमदनगाः शुभाः समग्राः कुजरविरविजाश्च लाभसंस्था ।
यदि भवति महीपतिः प्रशान्तो यवननृपकृतो ह्ययं तु योगः ॥२८॥

लाभधर्मस्थिताः पापाः पुण्याः कर्मणि संस्थिताः ।
नृपतीनामयंयोगो भवेत्कुलजलंस्थितः ॥२९॥

सुविस्तरा नीच कुलोद्भवा मया,
विचित्ररूपाः कथिताः क्षितीश्वराः ।
अतः परं पार्थिववंशजाता
भवन्ति यै स्तैर्मुनिभिः प्रकीर्तिताः ॥३०॥

सिंहोदये दिनकरौ मृगलाञ्छनः रवे
कुम्भस्थितो रविसुतः स्वगृहे सुरेज्यः ।
स्वोच्चे च भूमितनयः पृथिवीस्वरस्य
जन्मप्रदः सकललोक नमस्कृतस्य ॥३१॥

सिंहे लग्ने षड्ग्रहदृश्ये क्ष्मापतिनाथः रव्यातियुतश्च ।
पञ्चकदृश्यो भवति धरेशो मण्डलनाथः क्रूरचतुर्भिः ॥३२॥

---

१ क्रूरनाथः लि.पु. । २ विक्रमोक्तम् लि.पु. । ३ सम्मति भूमिपालः लि.पु.।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अश्विन्यनुराधस्थः स्थितः श्रविष्ठासु पार्थिवं भौमः ।
कुरुते स्वोच्चगतो वा वर्गोत्तमगश्च नान्यत्र ॥३३॥

तुङ्गत्रिकोणः स्वसुहृत्स्वराशिगे गतैः खकेन्द्रैः प्रवलैः प्रजातः ।
भवत्यनेकद्विपरत्नभूमेस्तुरङ्गपालो निधिबल्लभेन्दु ॥३४॥

शशिः सौम्या षष्ठे द्यूने वा निधनसंस्थिता वा स्युः ।
जातो नृपति र्ज्ञेयो मन्त्रीवा दण्डनायको वापि ॥३५॥

सुधारश्मेः षष्ठं निधनमथ जामित्रभवनम्
यदाप्राप्ताः पापव्यतिकरवियुक्ताः शुभफलाः ।
तदा जातोराजा चतुरुदधिवेलावनि भृतः
पिवेयुर्यत्सेनाकरिमदजलं भृंगनिवहाः ॥३६॥

न भवतिरिपुसंभवं[1] भयं न च सहसा समुपैति वृद्धताम् ।
कृतधृतिरिह लब्धसंभवो भवति सुखी सुभगश्च मानवः ॥३७॥

अमृतद्युतिसंयुक्तः स्फुरदंशुर्महीसुतः ।
यस्य लग्नं प्रपद्येत स ज्ञेयः पुरुषाधिपः ॥३८॥

षष्ठे भानुर्बुधोऽस्तेहिबुकमुपगतो भार्गवः कर्मणीज्यः ।
दुश्चिक्ये सौरभौमो चिरमवति महीमेकशुक्लातपत्राम् ॥३९॥

उदयतिवृषे सितेद्यौ विष्फुरद् करजालक—
स्तपनतनयजातो बृहस्पतिरस्तगः ।
यदिच भुवनध्वान्तध्वंसि मृगाधिपतौ
स्थितः प्रभवति नरो योगेऽस्मिन्नवश्यमवनीपतिः ॥४०॥

---

१ नृपसंभवं ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चतुर्भिरभिवीक्षितः परमसुच्चमभ्यागतो ।
नयाति यदि गोचरं रिपुदृशां जितो वारिभिः ॥४१॥

अथ शुकजातके कतिपयराजयोगा लिख्यन्ते—

अश्विन्यां लग्नगः शुक्रः सर्वग्रहनिरीक्षितः ।
करोति पृथिवीपाल निर्जितारातिमण्डलम् ॥४२॥

शत्रुनीचगृहं त्यक्त्वा कुटुम्बस्थ स भार्गवः ।
लग्नेश्वरो बली यस्य स नरः पृथिवीपतिः ॥४३॥

नीचांशकान् परित्यज्य त्र्यादि क्षेत्रोच्च संस्थिताः ।
तेषामेको विलग्नस्थः कुर्वीत पृथिवीपतिम् ॥४४॥

सचन्द्र भौमे लग्नस्थे कुर्वीत पृथिवीपतिम् ।
सचन्द्र भौमे लग्नस्थे धर्मकर्मगतोऽपि वा ॥४५॥

गुरौ वलान्विते सूर्ये जातो नरपतिर्भवेत् ।
दिवौकसां पतेर्मन्त्री कुर्यात्पश्यन्बुधं सदा ॥४६॥

शिरोभिः शासनं यस्य धारयन्ति नृपाधिपाः ।
अधिमित्रांशगश्चन्द्रो दृष्टो दानवमन्त्रिणा ॥४७॥

([१]निशायां कुरुते राज्यं नान्यग्रह निरीक्षितः ।
स्वांशेधिमित्र भागस्थो दृष्टो देवेन्द्रमन्त्रिणा) ॥४८॥

शशी महीपतिं कुर्याद्दिवसे न च संशयः ।
अर्कज्ञौ सुखगौ यस्य मन्देन्दू दशमस्थितौ ॥४९॥

---

१ चापान्तर्गतः पाठः प्र पुस्तके नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रक्तोदये तथाजातः पृथिवीशो न संशयः ।
सिंहे सूर्योदये यस्य शुक्रांशक विर्वजितः ॥५०॥

कन्यागते बुधे विप्रो नीचोऽपि पृथिवी पति ।
मीने मीनांशके लग्ने शुक्ले जातो नृपो भवेत् ॥५१॥

गुर्वात्मजास्पदस्थौ वा कुजमन्दौ यदा तदा ।
सम्पूर्णचन्द्रभागस्थे जातो राजा भविष्यति ॥५२॥

अधिमित्रगृहे केन्द्रे जन्माधिपतिर्विलग्नपतियुक्तः ।
पश्यति बलपरिपूर्णो लग्नं स्यात्पुष्कलो योगः ॥५३॥

पुष्कलयोगे जाता जायन्ते भूमिपालकानित्यम् ।
क्षितिपति वंशेजाता मुकुटच्छत्रान्विता भूपाः ॥५४॥

जन्माधिपतिः केन्द्रे बलपरिपूर्णः करोति भूपालम् ।
तन्मित्रयुत दृष्टो वा नीचकुले जायतेऽपि राजास्यात् ॥५५॥

लग्नाधिपतिः स्वोच्चे पश्यति मृगलाञ्छनं नृपं कुरुते ।
बहुगजतुरगबलाद्यैः क्षपितविपक्षमहाविभवम् ॥५६॥

लग्नं विहाय केन्द्रे सकलकलापूरितो निशानाथः ।
भार्गवगुरूभ्यां दृष्टो जातो राजा भवेन्नियतम् ॥५७॥

विदधाति सार्वभौमं जन्माधिपतिः स्वतुङ्गगः केन्द्रे ।
मुक्त्वारी नीचभांशं नान्य ग्रहसंयुतो भवेन्नियतम् ॥५८॥

चापार्जसिंहराशिषु लग्नस्थो भूमिजो महिपालम् ।
जनयति मित्रदृष्टः स्वबाहुबलवर्जितारातिपक्षः स्यात् ॥५९॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रश्विन्यनुराधाषु स्थितः श्रविष्ठासु पार्थिवं भौमः ।
कुरते दशमोपगतो लग्नस्थो वा रवौ न नीचस्थे ॥६०॥

जीवनिशाकरसूर्याः पञ्चमदुश्चिक्यधर्मगा वक्रात् ।
यदि भवति तदा राजा कुवेरतुल्यो धनेशो वा ॥६१॥

यद्येको ऽप्युच्चगतो मित्रेण निरीक्षितो नृपं जनयेत् ।
मित्रयुतो वा लग्ने धनधान्य समन्वितो नृपो भवति ॥६२॥

उपचयसंस्थै सौम्यैः क्रूरो वा लग्नमाश्रितः रवमध्ये वा ।
जातोऽवश्यं धरणीशो मन्त्री वा दण्डनायको वापि ॥६४॥

शरासने लग्नगते दिवाकरे सहेन्दुना भूमिसुते रवमध्यगे ।
लाभे व्यये वा भृगुजे बलान्विते देवेन्द्रतुल्यो नृपतिः प्रजायते ॥६५॥

श्रायारिसहजस्थैः पापैर्यदि जन्मपश्च शुभदृष्टः ।
भवति तदा धरणीशः समस्तजनवन्दितः साधुः ॥६६॥

मृगोदये भूमिसुते सनिर्मले शनैश्चरे धर्मगृहे[1] व्यवस्थिते ।
दिवाकरे सप्तमगे सहेन्दुना चलस्वभावो नृपतिःप्रजायते ॥६७॥

श्रोजस्थिताः सर्व एव ग्रहेन्द्राः शुक्रे साङ्गस्त्वोजराशौ विलग्ने
जातापुमान् भाग्ययोगं वदन्ति स्त्रीणां चैव त्वन्यथा जन्मनिस्यात्॥६८॥

भाग्ये जातो यो नरः पण्डितो वा कल्याणं वा चार्थवान् भृत्यवांश्च
गन्धर्वविन्नगरमण्डलवारणानामीशो विलग्न भवनोपगते शुभे स्यात् –
॥६९॥

---

१ धनेश्वरे धर्मभार्या प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अत्र कल्याणवर्म वचनम्

उत्तमरुपो गुणवान् तेजस्वि पार्थिवो महा विभवः ।
त्रिदशगुरौ भाग्यस्थे सर्वग्रह' वीक्षिते भवति भाग्यम् [२] ॥७०॥

दुश्चिक्यगतो भाग्यं पञ्चम भनस्थितो ग्रहः पश्येत् ।
होरा गदश्च बलवान् येषां त मानवा धन्याः ॥७१॥

राजयोगेषु ये मर्त्या हीनजा अपि पार्थिवाः ।
राजवंशोद्भवास्तेषु भवेयुर्भूमिपालकाः ॥७२॥

स्वर्क्षबलेन च सहितः प्रमुदित धनधान्यसम्पदा क्रान्तम् [१]
मित्रबलेन च युक्तो जनयति कीर्त्यान्वितं पुरुषम् ॥७३॥

तेजस्विनमतिसुखिनं सुस्थिरविभवं नृपाच्च लब्धधनम् ।
स्वनवांशसंयुक्तः करोति पुरुषं प्रसिद्धं च ॥७४॥

शुभदर्शनबलयुक्तः पुरुषं कुर्याद् धनान्वितं ख्यातम् ।
शुभगं प्रधानमखिलं सुरूपदेहं सुसौम्यं च ॥७५॥

आसाबलसमेतो जनयति नभश्चरः पुरुषम् ।
नीत्वा वस्त्रविभूषणवाहनसौख्यान्वितं कुरुते ॥७६॥

वर्षबले समवेतः करोति नरं महाविभवम् ।
मासबलेन च युक्तः पुत्रकलत्रान्वितं धनाढ्यं च ॥७७॥

---

१ सर्वत्र क.। २ 'भाग्यम्' इत्यधिकपाठोऽधिको वर्तते लिखितपुस्तकेषु ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पक्षबले रिपुहन्ता दिवसबले जनबल्लभो भवति ।
होराबलसमवेतो[1] ग्रहः प्रकुर्यात् सुतान्वितं[2] पुरुषम् ॥७८॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने राजयोगाऽध्यायः ॥

अथ राजयोगभङ्गाऽध्यायः

राजयोगभङ्गमाह भगवान् शुकः —

सहस्रं राजयोगानां पद्मभूमुखपद्मतः ।
प्रादुराशीत्ततो राजयोगभङ्गसहस्रकम् ॥१॥

नामग्रहमयं दोषो राजयोगं निहन्त्यमुम् ।
इति तद्वचनं तन्न वितथी भवति क्वचित् ॥२॥

स्वोच्चभे चेद्ग्रहः स्वोच्चनवांशे स्वत्रिकोणके ।
चन्द्रे वर्गोत्तमगते लग्ने वर्गोत्तमेऽपिवा ॥३॥

इति मुख्यतमा पञ्च राजयोगाः प्रकीर्तिताः ।
तत्तद्ग्रहैर्भवत्येभ्यो राजयोगाः सहस्रशः ॥४॥

राशीश्वरांशेश्वरयोर्विरोधे
बलाधिको यः स बलप्रदः स्यात् ।
नवांशराशीश्वरयोः समत्वे
भृशं बलीयान् परमोच्चखेटः ॥५॥

---

१ समन्वितो प्र. । २ शुभान्वितं प्र ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अखण्डनीया नृपयोगभङ्गा —
नहंप्रवक्ष्यामि घनत्रिसङ्ख्यान् ।
वीर्याधिकेनापि रसायनेन
त्रिदोष बाधानिव सद्गुणेन ॥६॥

राजयोगहरः खेटः परमोच्च विलङ्घनः ।
दिवाकरकराक्रान्तस्त्वरितंगत्वरोऽर्भकः ॥७॥

वार्द्धकीयुद्धनिर्धूतः शत्रुयुक् शत्रुवीक्षितः ।
भावयोगदलस्थायी बहुग्रहसमन्वितः ॥८॥

नीचगौ चन्द्रचण्डांशू चण्डचित्रशिखण्डिजौ ।
जन्मेशलग्ननाथारिर्विलग्ने विहितस्थितिः ॥९॥

तुलायां परमे नीचे रुचांपतिरवस्थितः ।
मेषस्थोपि तुलाभागे कृतावस्थितिरंशुमान् ॥१०॥

शत्रुलग्नगतः सूर्य सुतशत्रुनवांशगः ।
नीचराशिगतो नीचनवांशगत एव वा ॥११॥

अनुक्तः क्षेत्रगः खेटस्त्रयो नीचा ग्रहा अपि ।
उल्का[१] निर्घातपरिधिचन्द्र सूर्योपरक्तयः ॥१२॥

महाव्यतीपात महावैधृतिविषनाडिकाः ।
विनाशयन्ति भूपालयोगं पुंसां महत्तरम् ॥१३॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीक्ष्यणाचार्यविरचिते जगन्मोहने राजयोगभङ्गाऽध्यायः ॥

---

१ उक्त्वा प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ लग्नांश गुणाऽध्यायः

अथ लग्नफलान्याह[१] माण्डव्यः—

मेषे लग्नोपगते जातः पुरुषो महाधनी धीमान् ।
क्रोधपरः स्वजनानां द्वेष्टा परवत्सलो धीमान् ॥१॥

वृषभोदये तु जातो मन्त्री ज्ञानी धनी मधुरवादी ।
उच्चोपस्मर एव च गुरुभक्तो ज्ञानविच्छरः ॥२॥

मिथुने लग्नोपगते जातो विज्ञानवान् धनी त्यागी ।
स्वजनप्रियो बहुमतिर्विसारदो दीर्गसूत्रश्च ॥३॥

लग्ने कुलीरस्य तु संप्रसूतो
जलप्रियो मिष्टभुगिष्टदारः ।
सौभाग्ययुक्तो रतिलोलुपश्च
मित्रोपसेवी गुरुवत्सलश्च ॥४॥

लग्ने तु सिंहस्य भवेत्प्रसूतो
नरोऽतिभोगी रिपुमर्दनश्च ।
त्यागात्मवान् नीतिपरः प्रकास —
मुत्साहयुक्तश्च सुतोधनश्च ॥५॥

कन्याविलग्ने तु नरः प्रसूतो
विज्ञानविद्यागमशास्त्रलुब्धः ।
वक्ता गुरूणां[२] रतिलोलुपश्च
धनी च सौभाग्य गुणैश्च युक्तः ॥६॥

---

१ लग्नफलमाह प्र. । २ वक्ता गुणां रतीनां प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तुला विलग्ने तु नरः प्रसूतः स्वकर्मणा जीवति वुद्धिमांश्च ।
विद्वान् प्रियः सर्वकलास्वभिज्ञ स्खलस्वभावो वनिता जितश्च[1]
॥७॥

जातो विलग्ने खलु वृश्चिकाख्ये[2] चण्डोऽतिमानी पुरुषोऽतिरौद्रः ।
विज्ञानवान् कृत्यकरः कृतज्ञः स्यात्संविभागी बहुरोषचित्तः ॥८॥

धनुर्विलग्ने भवति प्रसूतः कुलप्रधानः शुभगो मनुष्यः ।
सूरोऽर्थवान् नीतिपरः कृतज्ञो वधूपभोग्यो द्रविणो वपुश्च ॥९॥

मृगस्यलग्ने पुरुषोऽभिजातः स्यान्नीचकर्मा बहुपुत्रभृत्यः ।
लुब्धोऽलसः स्यात् परगः कृतज्ञ[3]स्वकार्यनिष्ठो गुरुवत्सलश्च ॥१०॥

कुम्भस्यलग्ने पुरुषोभिजात श्चलस्वभावः[4]स्थिरसौहृदश्च ।
प्रभूतधान्यार्थसुतः प्रचण्ड़ो लुब्धोऽन्यनारीरतिलोलुपश्च ॥११॥

मीने विलग्नोपगते तु जातः प्रभूतरत्नद्रविणोल्पकामः ।
त्यागात्मवान् शास्त्रविशारदश्च नदीर्घसूत्रो न च मन्दबुद्धिः ॥१२॥

शुभग्रह युतं लग्नं शुभग्रहनिरीक्षणम् ।
लग्नस्वभावजं हित्वाफलं ग्रहजमाप्नुयात ॥१३॥

अथांशगुणाः—

स्तेनो भोक्ता पण्डिताढ्यो नरेन्द्रः
क्लीवः शूरो विष्टिकृत् वासवृत्तिः ।

---

१ वतिता निजश्च प्र. श्र. क. । २ वृश्चिकस्य पा. । ३ कृतघ्न प्र. क. । ४ खलस्वभाव. प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पापो हिंस्रो धीश्च वर्गोत्तमांशे—
स्वेशामीशाराशिवद्द्वादशांशे ॥१४॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने लग्नांशगुणाऽध्यायः ॥

अथ भावफलाऽध्यायः

अथ शुक्रप्रणीतभावफलानि लिख्यन्ते । —

सूर्योदयेन शान्तो, नातिसुतो निर्घृणो[1] रणश्लाघी ।
विकलेक्षणोऽल्पभाषी प्रवासशीलो भवेत् सुखी जातः ॥१॥

मेषोदयेऽतिकीर्त्तिर्बलवान् तिमिरेक्षेणो धनी विद्वान् ।
नीचः प्रतापहीनो निः स्वप्रायोऽति नीचकरः ॥२॥

सिंहे स्व वंशनाथः कुलीरभे ज्ञानवाननेकमतिः ।
मीने स्त्री जनसेवी कन्यायां दारहा कृतघ्नश्च ॥३॥

धनगे तु वक्र रोगी धनवान् नृपचौरतोऽर्थ हानिः स्यात् ।
सहजेऽतिरोषी बलवान्निजसंक्षयोऽति विख्यातः ॥४॥

निजधनहीनोहिबुके, संतापी वुद्धिसौर्य सम्पन्नः ।
त्वरितवचनो मेधावी नातिसुतो नार्थवान् रवौ सुतगे ॥५॥

नृपमन्त्री नेता वा बहुशत्रुः ख्यातिमान् रवौ षष्ठे ।
मदगे विनोदशीलो दारद्वेषी न शान्तबुद्धिः स्यात् ॥६॥

---

१ निर्व्विण्णो प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विकलक्षणो[1]ऽल्प सूनुर्निधन रोगान्विनोऽतिविख्यातः ।
धर्मपरो नवमस्थे भानौ सुतदारवान् पितृद्वेषी ॥७॥

नृपकर्मरतो दशमे शूरो रणवल्लभोऽतिविख्यातः ।
लाभे प्रभूतधनवान्[2] विधेयभृत्यो नरेन्द्रदयितश्च ॥८॥

वयसोऽन्ते धनहीनो हीनाङ्गो दोषवान् विदेशरतः ।
नीचांशस्थो भानुर्भावेषु दोषवृद्धिकरः ॥९॥

अथ चन्द्रस्य

मेषवृषकर्किलग्ने[3] हिमगौ धनवान् सुखी नृपालसमः ।
वाग्बुद्धिवित्तरहितो लग्नस्थेनोक्तभेषु बल हीने ॥१०॥

धनगे बहुप्रलापी, धनवान् वनितादृतोऽल्पसंतोषी ।
पिशुनो दयाविहीनो मायावी सहजमाश्रिते शशिनि ॥११॥

मिष्टान्नभुक् विनीतस्त्रीलोलः सौख्यवान् सुखच्छेदौ ।
स्त्रीबुद्धिसत्वयुक्तो बहुश्रमोत्पन्नवित्तवान्[4] सुतगे ॥१२॥

षष्ठेऽलसो दरिद्रो बहुशत्रु सोदराग्निमदनश्च ।
स्त्रीदयितो नृपनेता प्रवासशीलो[5]ऽस्तगे निशानाथे ॥१३॥

धनवान्निधने रोगी हिमगौ ज्ञानी प्रतापयुक्तः स्यात् ।
धर्मप्रियोऽतिभाषी नवमे स्त्रीचञ्चलो धनाध्यक्षः ॥१४॥

---

१ विकल्पेक्षणो प्र. । २ प्रलब्धधनवान् प्र. । ३ मेषवृषर्काकिणि लग्ने प्र. । ४ बहु श्रमोऽन्यत्र वित्तवान् प्र. । ५ प्रधानशीलो प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सर्वोपायैर्धनवान् दशमे हिमगौ विदग्धयुवतीशः ।
लाभे धनी सुविद्यो गोमान्नृपसम्मतो[1] विनितश्च ।।१५।।

नयनातुरोऽङ्ग हीनो व्ययगे स्त्रीदोषवाननेकमतिः[2] ।
शस्तोच्चशस्तपक्षे व्ययगे हिमगौ धनी सुखी भवति ।।१६।।

अथ भौमस्य

भौमोदये क्षताङ्गः शूरो बलवान् स्वमान शौर्यधनः[3] ।
चपलोऽल्पायुः क्रोधी पित्तरुगार्तोऽनिशं[4] भवेज्जातः ।।१७।।

धनगे बहुव्ययार्तो विकृताङ्गो निष्ठुरोक्तवान्प्रोक्तः ।
भ्रातुर्द्वेषी सहजे क्लेशान्[5] संप्राप्य वित्तवान् सुभगः ।।१८।।

परगृहसंश्रयशीलो रोगी सुखगे धनान्वितो भौमः ।
दुःखात्मजो विशीलो मेधावी पञ्चमेऽतितीक्ष्णकरः ।।१९।।

षष्ठेरिवृद्धिरलसो जामित्रे स्त्रीजितो विदेशरतः ।
निधने तु कृच्छ्रजीवी सुतदारविवर्जितो नूनम् ।।२०।।

धर्मघ्नो[6] नवमस्थे दशमे जनवल्लभोऽतिमेधावी ।
लाभे धनी गुणाढ्यो व्ययगे पतितोऽङ्गहीनो वा ।।२१।।

अथ बुधस्य

विद्वान्नतिदयावान्, बुधलग्नगे वित्तगे धनी सुभगः ।
स्वगुणोपार्जितविभवो दुश्चिक्ये ज्ञानवान् सुखी सुखगे ।।२२।।

---

१ गोमातृसंनतो प्र. क. । २ ननेकपति प्र. । ३ सो ऽ र्थधनः प्र. क.
४ लसो अ, क. ५ क्लेशात् प्र. । ६ मार्गघ्नो प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मेधावी वाङ्मधुरो बुद्धिस्थे, षष्ठभे विवादरतः ।
धर्मज्ञोदारमति सप्तमगे लोक विश्रुतो निधने ॥२३॥

धर्मे प्रतापवहुलो दशमे विख्यातनाम वित्तेशः ।
लाभे बहुप्रकारैर्धनवान् व्ययगे नृशंसस्यात् ॥२४॥

अथ गुरोः

जीवोदये चिरायुर्ज्ञानीसुखवान्न नीच राशिस्थे ।
धनगे धनी सुवक्ता दुश्चिक्य भ्रातृबन्धुदोषकरः ॥२५॥

सुखग सुखी सुदारो मेधावी वाक्पटुश्च बुद्धिश्च ।
अरिभे शत्रुविहीनो जामित्रे पूर्वतोऽधिको विद्वान् ॥२७॥

चिरजीवी नीचकरो निधनस्थे धर्मवान् धनी धर्मे ।
विख्यातो दशमस्थे लाभे धनवान् व्ययेऽङ्गहीनश्च१ ॥२७॥

अथ शुक्रस्य

कन्दर्परूप गुणवान् भृगुलग्ने स्त्रीयुतो धनी विद्वान् ।
नय विनयज्ञो धनवान् धनगे सुखी दयापरो भवति ॥२८॥

नीचस्त्री भोगरतो दुश्चिक्ये वित्तभोग रहितश्च ।
सुखभे सुखी क्षमावान् दयापरो दारपुत्रवान् भृगुजे ॥२९॥

नृपमन्त्री नेता वा स्त्रीजनको ज्ञानवान् सिते धीस्थे ।
शत्रुक्षयी च षष्ठे मायावी रोगवान् व्ययार्थसुतः ॥३०॥

१ दुश्चिक्ये भोगरहितश्च प्र. क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्मरनिपुणो जामित्रे स्त्रीद्वेषी प्रजनधनबन्धु ।
निधने स्वभाव बहुलो रोगी हितदारसन्तुष्टः[1] ॥३१॥

धीधर्मभोगयुक्तो नवमे सुतवान् सिते बलिनि ।
स्त्रीदयितो नृपमन्त्री दशमेलाभे धनी सिते प्राज्ञः ॥३२॥

स्त्रीलाभो व्ययसंस्थे धनव्ययी स्वकर्मपरिहीनः ।
क्षेत्रोच्च व्ययभवने धनवान् प्रसिद्धयुवतीशः ॥३३॥

अथ शनेः

सौरोदयेऽतिरोगी वाल्ये बलवर्जितोऽटनो नृशंसश्च ।
स्त्रीचञ्चलोऽनिलात्मा निःस्वः प्रयोग हीनो वा ॥३४॥

स्वोच्चे स्वजीवभवने कलाधिको ज्ञानवान् नरेन्द्रधनः ।
पितृधनहीनोधनगे स्वमानशौर्यान्वितो धनी विद्वान् ॥३५॥

पश्चात् परदेशरतो धनवाहन भोगवान् भवति ।
शूरो दया विहीनो हास्यरतो दारुणश्च दुश्चिक्ये ॥३६॥

बन्धुजनपीडितात्मा बन्धुस्थे नातिपुत्रवानसुखी ।
बन्धुसुतनेत्रहीनो नातिसुखवित्तवान् सुतगे ॥३७॥

षष्ठे न साधुशीलो रिपुरोगसमन्वितोऽतिविख्यातः ।
निःस्वः प्रायोऽ रोगी जामित्रे सूर्यजे कुदाररतः ॥३८॥

निधने धनवान् रोगीनातिसुतो नेत्र दुर्बलश्चपलः ।
धर्मध्वजाऽति निपुणो मेधावी नातिपुत्रवान् नवमे ॥३९॥

---

१ हितदारणसन्तुष्ट प्र. क.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दशमेऽतिचोरबुद्धिर्धनवान् स्वकुलाधिकः सुखी भवति ।
प्रभुशीलो विख्यातो लाभे विज्ञानशास्त्र कुशलश्च ॥४०॥

दोषकरो व्ययसंस्थ बहुव्ययार्त्तः सुखी दिनेश सुते ।
क्षेत्रोच्चमित्रभावं पुष्टफलं सौम्यपापयोस्तुल्यम् ॥४१॥

नीचारि भवनसंस्थं ग्रहयुक्तं, तत्फलं विनाशयति ।
यत्प्रोक्तं, भावफलं लग्नादीनां तथैव चन्द्राद्यात् ॥४२॥

भावफलं च नराणां वक्तव्यं चन्द्रवच्च मूर्तिसमम् ।
एकैकमेव राशौ भावफलं सम्यगेव वक्तव्यम् ॥४३॥
द्व्याद्यैरेकर्क्षगतैर्लग्नादिफलं न सम्यगायाति ।

अथ राहोः

माण्डव्यः —

व्याधिः श्रीमानदीनः स्थिरतरकरणः प्राप्तदायादकुःखम्
चण्डोन्मूलद्विकर्मा कलहपटुगदीरिक्थदाराङ्गरोगी ।
ज्ञानव्याध्यल्पपुत्रो सुकृतकुलचरो[१]ऽन्यार्थचार्यप्रवृत्तिः
संपद्युक्तः प्रमादी भवति फणिधरे लग्नभावादि संस्थे ॥४४॥

अथ केतोः

मध्यायुः कुमुखः पराक्रमगुणो हृद्रोगवानप्रजः
स्थानभ्रंश करो विशीर्ण वदनो दुर्मार्गमृत्युस्तथा ।
धर्मादिप्रतिकूलधी रुचिकर शास्त्रान्वितो दोषवा —
नित्येवं क्रमशो विलग्नभवनात् केतोः फलं चिन्तयेत् ॥४५॥

---

१ कुलचरी प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रवेः

शूरः क्रूरो नितान्तं द्रविणविरहितश्चादिमान् शक्तियुक्तो
भातृद्विट् क्लिष्टवाहो विवसुघनमतिः कीर्तिसौर्यादियुक्तः।
स्त्रीद्वेषी भूरिदुःखः सुकृतिपितृवधूरोषणः षड्गुणाढ्यो
वह्वैश्वर्यः कुपात्रव्ययकृदिति फलं लग्नतोभास्वतः स्यात् ॥४६॥

चन्द्रस्य

शुक्ले कर्क्यृक्षमेषे सुखनिधिरसुखोऽन्येषु कृष्णे विशेषात्
सानन्दाति प्रलापी समुदयसुमना[1] दातृसम्पत्तियुक्तः।
सत्पुत्रोऽग्रोऽलसात्मा सुखभृदतिधनव्याधिमान् भातृयुक्तः
सश्रीर्विद्यार्थयुक्तः सवियदिति फलं देह भावादिगेन्दौ ॥४७॥

भौमस्य

भूरिद्रव्यः क्षताङ्गो धनसुख रहितो भाग्यवद्भातृवैरी
सश्रीकाल्पालयस्थो विमुखसुतसुधीः शत्रुमद्भूरिमान्द्यः।
भार्यावश्यः प्रवासी गतयुवतीसुतोमार्गरुग्राजमान्यः
सम्पत्याढ्यो गुणाढ्यः शिथिल इति कुले लग्नतः स्यात्क्रमेण ॥४८॥

बुधस्य

सर्वज्ञो भोगभोगी स्वगुणजविभवो, ज्ञानसम्पत्तियुक्तो[2]
मेधैश्वर्यप्रजावान् गजदवगणितो भूरिसौभाग्यभार्यः।
आयुस्मद्राजमान्यो जनधनसुकृतो विश्रुतामोघकर्मा
शर्मायुस्मान्नृशंसो भवति शशिसुते देह भावादि संस्थे ॥४९॥

गुरोः

प्रजायुर्धर्मयुक्तो धनिकसुवचनो, दारसौन्दर्यतन्त्रः
सद्भार्याभोगयुक्तः सुखश्रुतिमतिमान् शत्रुहीनः प्रसिद्धः।

---

१ समुदयमदना क.। २ जातसम्पत्तियुक्तो प्र.।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अस्वातन्त्रयो ऽमितायुः सुभगसुकृतवान् विश्रुतः कोशयुक्तः
सालस्यो मूर्त्तिभावप्रभृति परिगते वाक्पतौ स्यात्क्रमेण ॥५०॥

शुक्रस्य

ज्ञानायुर्भोगयुक्तो बहुजनविभवस्त्रीजितो मुक्तबन्धुः
संपत्सन्तत्यदीनो बहुदुहितृधनो धूर्त्तरोगक्षतारिः ।
स्त्रीभोगी प्राग्भटश्रीश्चिरतरमुदितः सत्प्रियस्त्रीसुताढ्यः ।
प्रख्यातो भूरिलाभो व्यसननिधनयुतः स्यात्सितोऽनुक्रमेण ॥५१॥

शनेः

स्वोच्चस्वक्षेत्रलग्ने नृपसदृगितरेष्वाधिरोगाभिभूतो,
नानादेशार्जितश्रीरभयविपुलधीर्दुः खसोढाभिसूनुः ।
प्रख्यातव्याधिशत्रुः सरुजकुयुवतिः पापरोगोऽभिधर्मो,
रोगी श्रीमान् गुणाढ्यो विगुण इतिशनौः लग्नतः स्यात्क्रमेण ॥५२॥

बृहज्जातके—

सुहृदरिपरकीयस्वर्क्षतुङ्गस्थितानां,
फलमनुपरिचिन्त्यं लग्नदेहादिभावैः ।
समुपचयविपत्ती सौम्यपापेषु सत्यः,
कथयति विपरितं रिःफषष्ठाष्टमेषु ॥५३॥

अस्यार्थः—

मित्रशत्रूदासीनस्वक्षेत्रतुङ्गक्षेत्रादिफलानि; एतेषु स्थानेषु फलमनुपरिचिन्त्यं पापः सौम्यो वा नीचस्थः शत्रु क्षेत्रस्थो वा यस्मिन्भावे व्यवस्थितः, तस्य भावस्यहानिं करोति । उदासीनक्षेत्रे न हानिं न वृद्धिम् । मित्रक्षेत्रे मूलत्रिकोण स्वोच्चेषु व्यवस्थितः, तस्य भावस्य वृद्धिमिति । एतत्केषाञ्चिन्मतम् । तथाच गर्गः—

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नीचर्क्षरिपुदेहस्थो ग्रहो भावविनाशकृत् ।
उदासीन सुहृन्मध्यसुहृत्स्वर्क्षोच्चगो ग्रहः ॥५४॥

मूलत्रिकोणगो वापि भाववृंद्धिकरः स्मृतः ।
किं त्वेतद्विपरितं हि रिःफषष्ठाष्टमेषु च ॥५५॥

द्वादशस्थाने शुभो व्ययहानिं करोति, पापो व्ययवृद्धिं करोति। षष्ठस्थाने शुभग्रहाः शत्रुहानिं कुर्वन्ति पापाः शत्रुवृद्धिं कुर्वन्ति ॥ अष्टमस्थाने शुभग्रहो मृत्युहानिं करोति पापो मृत्युंकरोति । ननु पूर्वं सौम्यानां पापानां च शत्रूस्थानावस्थितानां शुभफलं व्याख्यातं, तत्कथंषष्ठ पापः शत्रुवृद्धि करोति ।

अत्रोच्यते पूर्वं सामान्येनोक्तं — यत्र वाचनिकी वाधा भवति तत्र सामान्यं भावफलं त्यक्त्वा यथोक्तमेव फलंवक्तव्यम् । यद्येवं कथं स्वल्प जातके, उक्तम् पुष्णानिशुभा भावान् मूर्त्यादन् घ्नन्ति१ संस्थिताः पापाः सौम्याः षष्ठेऽरिघ्नाः सर्वे नेष्टा व्ययाष्टमगाः । इति प्रतिज्ञातमाचार्येण ॥ "ज्यौतिषमागमशास्त्रं विप्रतिपत्तौ नयोग्यम स्माकं । स्वयमेव विकल्प- यितुं किन्तु बहूनांमतं वक्ष्ये" ॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने ग्रहभावफलोऽध्यायः ॥

अथ स्त्रीजातकाऽध्यायः

उच्च-मूलत्रिकोण-स्वक्षेत्र- मित्रक्षेत्र - शत्रुक्षेत्र-नीचक्षेत्रास्तमितग्रहाणां फलप्रमाणा लिख्यन्ते । तत्र पराशरः—

२उच्चत्रिकोणस्थ सुहृच्छत्रुनीचग्रहार्कगैः।
शुभं सम्पूर्णपादोनदलपादाल्पनिस्फलम् ॥

---

१ मूर्ति लि. पु. - २ श्लोकोऽयं प्र. क. पुस्तकयो र्नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अस्यार्थः— स्वच्चस्थो ग्रहः सम्पूर्णफलदः मूलत्रिकोणस्थः पादोनसम्पूर्णं शुभं प्रयच्छति । स्वक्षेत्रे अर्धशुभं मित्रक्षेत्रे च चतुर्थांशं शुभं च अशुभं सम्पूर्णफलं ददाति । शत्रु- क्षेत्रस्थः पादोनमशुभं सम्पूर्णं, मित्रक्षेत्रस्थः अर्धं स्वक्षेत्रस्थः पादमशुभं, मूलचिकोणस्थः पादादल्पमशुभम् । उच्च-स्थोग्रहः कष्टं नकिञ्चित्, शुभमेव ।

अथ त्रीणां जन्मलग्नात्तु सप्तमाष्टमवलम्ब्य स्त्रीपुरूषयोः शुभाशुभंलिख्यते । तत्र भगवान् शुकः—

स्त्रीपुरुषयोः समानयोगादिदशाफलञ्च पूर्वोक्तम्–
यद्युदययोग्यं स्त्रीणां तत्तत्सर्वं वदेत्स्वनाथेषु ॥१॥

वैधव्यं निधन भवने पतिसौभाग्यं सुखञ्च जामित्रे ।
सौन्दर्यं लग्नभवने विचिन्तयेत् पुत्रसंम्पदं नवमे ॥२॥

एषु थानेषु शुभाः सौम्या शुभदा बलान्विता ज्ञेयाः ।
क्रूरास्तु नेष्टफलदा भवनेशविवर्जिताः सदाचिन्त्यम् ॥३॥

पुरुषर्क्षे पुरुषांशे लग्नेन्द्वोः पापयुक्तयोर्जाताः ।
पुरुषाः कुशीलयुक्ता भर्तुरयोग्या समञ्जसा सा कन्या ॥४॥

समराशौ समभागे लग्नेन्द्वोः स्त्रीगुणान्विता कन्या ।
सौम्ययुते दृष्टे वा शुभगा साध्वी सुविख्याता ॥५॥

लग्नेनेन्द्वो र्यो बलवान् तस्यत्रिशांशकैः सदा चिन्त्यम् ।
त्रिशांशेशो वलवान्स्तत्प्रोक्तफलानि सम्यगायान्ति ॥६॥

भौमर्क्षे भौमांशे कन्या मृतसूतिका गुणैर्हीना ।
मन्दांशस्थे प्रेष्या दुःशीला बहुविधा नारी ॥७॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जीवांशे बहुव्ययार्त्ता शुभगा पतिव्रता कन्या ।
सौम्यांशे मायावी[१] मलिनाचारालपसूतिः स्यात् ॥८॥

कन्याजननी कन्या शुक्रांशे जारभोग सन्तुष्टा ।
भानोरप्येवमेवं त्रिंशांशफलं समादेश्यम् ॥९॥

सितभवने भौमांशे दुष्टा कलहप्रिया पतिद्वेष्या ।
मन्दांशे च पुनर्भूर्मृतप्रजा रोग संयुता नित्यम् ॥१०॥

रूपान्विता गुणाढ्या जीवांशे भर्त्तृ पुत्रसम्पन्ना ।
कुचरित्रा सौम्यांशे काव्यकलाज्ञेयवाद्यसन्तुष्टा ॥११॥

शुक्रांशे भोगवती विदग्धदयिता जगत्प्रिया ख्याता ।
पापयुते वलहीने त्रिंशांशे नैव पुष्टफलमिति ॥१२॥

बुधभवने भौमांशे कन्या जारप्रियाऽल्पपुत्रा स्यात् ।
मन्दांशे क्लीवसमा मृतप्रजावान् भर्तृयुता ॥१३॥

साध्वी पतिप्रिया सा जीवांश[२] क्षेत्रतुङ्गगे जीवे ।
सौम्यांशे तु कुलाढ्या पशुजन धनान्विता च शुक्रांशे ॥१४॥

शशिभवने सौम्यांशे स्वच्छन्दा कामिनी विनष्टसुता ।
मन्दांशे पतिहीना कृच्छ्रान्नेनोपजीविनी नित्यम् ॥१५॥

अल्पसुता जीर्णायुर्जीवांशे शिल्पिनी बुधस्यांशे ।
बन्ध्या मृतप्रजा वा शुक्रांशे श्रीषु पुष्टरता ॥१६॥

---

[१] मायाविनी । [२] जीवांशे अ, क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वाचाटा रविभवने कुजभागे जारिणी विदेशरता ।
कुलटा कृशा दरिद्रा मन्दांशे जारवल्लभा जीवे ॥१७॥

पुरुषाकृतिः शीलयुता सौम्यांशे कार्य्यचोरिका कुलटा ।
कुपतिप्रियाल्पसुता शुक्रांशे नित्यरोगिणी भवति ॥१८॥

जीवर्क्षे भौमांशे कन्या परिचारिणी सुविख्या ।
सौरांशे तु दरिद्रा कन्या जननी स्वतन्त्र निरता स्यात् ॥१९॥

जीवांशे तु धनाढ्या सौम्यांशे लोकपूजिता ललना ।
पुत्रवती शुक्रांशे सद्गुणयुक्ता पतिव्रता साध्वी ॥२०॥

मन्दर्क्षे भौमांशे नीचाचारातिदुर्भगा कन्या ।
भर्तृप्रिया च सुभगा जीवांशे नैकनामभिः ख्याता ॥२१॥

भिन्नव्रता च कुलटा मायावी१ सोमजस्यांशे ।
शुक्रांशे प्रभुशीला वन्ध्या चारित्र्यलोचना वनिता ॥२२॥

त्रिंशांशक फलमेवं वक्तव्यं दैवविद्वद्भिः२ ।
चन्द्रार्कस्फुटयोगात् त्रिंशांशफलं विनिर्दिशेदथवा ॥२३॥

शून्येऽस्ते दुर्बले यस्याः पाप ग्रहनिरीक्षिते ।
सौम्यग्रहदृशा हीने भर्त्ता कापुरुषो भवेत् ॥२४॥

बुधमन्दयुतेऽस्ते च पतिः क्लीवसमो भवेत् ।
बन्ध्या वा दुर्भगा वापि सा च नित्यं प्रवासिनी ॥२५॥

---

१ मायाविनी । २ दैवविद्भिरित्यर्थः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सप्तमे चरराशौ च तदीशे चरभांशके ।
भर्त्ता प्रवाशशीलः स्यात् स्थिरभे स्वगृहे वसेत् ॥२६॥

अस्तगेऽर्केऽरिभिर्दृष्टे गर्भोत्सृष्टा भवेत्स्वयम् ।
सप्तमस्थे कुजे तद्वद्बाल्ये सा विधवा भवेत् ॥२७॥

भर्त्ता क्रोधपरो वापि अन्योन्यमतिमाप्नुयात्
मन्दे सप्तमराशिस्थे तथा शत्रु निरीक्षिते ॥२८॥

कन्यैव विधवा भूत्वा जरामपि च गच्छति ।
द्यूने शुभाशुभैर्युक्ते पुन र्भूः सा भविष्यति ॥२९॥

सप्तमेऽङ्गार मन्दौचेत् पापर्क्षे विधवा भवेत् ।
मासि वर्षेऽथवा राहुर्भान्तिगोरिव गच्छति ॥३०॥

बलहीनेऽस्तगे पापे सौम्यग्रहनिरीक्षिते ।
भर्त्ता विसृज्यते नारी नीचस्थे पतिवैरिणी ॥३१॥

अन्योन्यांशे सितारौ चेत् जारसक्ता भवेद्वधूः ।
तथैव सप्तमे चन्द्रे दुश्चरत्पतिना सह ॥३२॥

मन्दारर्क्षे विलग्नस्थौ शशिशुक्रौ यदा तदा ।
वन्ध्या भवति सा नारी पञ्चमे पापदृग्युते ॥३३॥

अस्त राश्यंशके भौमे सूर्यजेऽस्तांशके पिवा ।
सौरे कुजेऽर्के वा सन्दृष्टे व्याधियोनिश्च दुर्भगा ॥३४॥

सप्तमर्क्षे शुभैर्दृष्टे शुभस्यांशे शुभेक्षिते ।
चारुश्रोणी प्रिया भर्त्तुर्बल्लभा च भवेद्वधूः ॥३५॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अस्तेऽर्के स्वांशके स्वर्क्षे भर्त्ता रति चरो मृदुः ।
चन्द्रेऽस्ते स्वांशके स्वर्क्षे मृदुः स्मरवशः पतिः ॥३६॥

भौमेऽस्ते स्वांशके क्षेत्रे स्त्रीलोलो निर्धनः पतिः ।
सौम्येऽस्ते स्वांशके क्षेत्रे भर्त्ता विद्वान् भवेत्सुखी ॥३७॥

मन्देऽस्ते स्वांशके क्षेत्रे वृद्धो मूर्खो भवेत्पतिः ।
एवं सप्तमराशिस्थैर्ग्रहैर्नृणां फलं वदेत् ॥३८॥

अस्तराशिफलं प्रोक्तं लग्नं राशेः फलं तथा ।
तथा भवति दम्पत्योर्बहुयोगबलाद्वदेत् ॥३९॥

सौम्य क्षेत्रोदये चन्द्रे सार्द्धं शुक्रेण सा बधूः ।
जीवे घोस्थे स्वांशक्षेत्रे गुणज्ञा विजितेन्द्रिया ॥४०॥

शुक्रेऽस्ते स्वांशके क्षेत्रे कान्तः सौभाग्यवान् सुखी ।
सुखान्विता पतिद्वेष्टा नित्यमस्थिरचारिणी ॥४१॥

चन्द्रज्ञौ यदि लग्नस्थौ (कुलाढ्या ब्रह्मवादिनी[1] ।
शुक्रज्ञौ यदि लग्नस्थौ) सौभाग्यस्था कुलाढ्यता ॥४२॥

चान्द्रीचन्द्रसिता लग्ने बहुसौख्य गुणैर्युता ।
जीवलग्नेऽतिसम्पन्ना पुत्रवित्तसुखप्रदा ॥४३॥

क्षेत्रोच्चसंस्थिता लग्ने अशुभास्ते शुभप्रदाः ।
क्रूरेऽष्टमे विधवता पापक्षेत्रे विशेषतः ॥४४॥

---

१ ब्रह्मवादिनी क. । चापान्तर्गतः पाठ प्र पुस्तके नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निधनेस्वरांशकपतेर्दशायां निश्चयो भवेत् ।
सौम्येऽष्टमस्थे कन्याया भर्त्तुः प्रागेव सा मृतिः ॥४५॥

पापसौम्ययुते तस्मिन् समकाले तयोर्मृतिः ।
बलाबलं तयोर्ज्ञात्वा पुरुषेषु विजानता ॥४६॥

भाग्यस्थानस्थिते सौम्ये सपापेऽस्तेऽष्टमे पिवा ।
भर्त्तृपुत्रसुतैः सार्धं दीर्घकालं च जीवति ॥४७॥

धनुः कर्कियुते लग्ने भर्तृपुत्रादि दुःखदा ।
सिंहालिवृषकन्यायां चन्द्रे तिष्ठति पञ्चमे ॥४८॥

अल्पापत्यं विजानीयात् पुरुषेषु विचिन्तयेत् ।
लग्नास्ताष्टमभाग्यस्थैः पापैः दुःखफलान्विता ॥४९॥

सौम्यग्रहैरसंमिश्रं सर्वथा क्लेशमाप्नुयात् ।
क्रूरग्रहे सुखगते बलमुत्सवमादिशेत् ॥५०॥
कन्याप्रदानसमये प्रोक्तमार्गं विचिन्तयेत् ।

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने स्त्रीजातकाऽध्यायः ॥

अथ सामुद्रिकाऽध्यायः

स्निग्धोन्नताग्रतनुताम्रनखौ कुमार्या
पादौ समोपचितचारुनिगूढगुल्फौ ।
लिश्ष्टाङ्गुलीकमलकान्तितलौ च यस्या-
स्तामुद्वहेद् यदि भुवोऽधिपतित्व[1]मिच्छेत् ॥१॥

---

१ भवाधिपतित्व लि. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मत्स्याङ्कुशाब्जयववज्रहलासिचिह्ना–
वस्वेदिनौ मृदुतलौ चरणौ प्रशस्तौ ।
जङ्घे च रोमरहिते विशिरे सुवृत्ते
जानुद्वयं सममनुल्वणसन्धिदेशम् ॥२॥

उरू घनौ करिकरप्रतिमावरोमा–
वस्वत्थपत्रसदृशं विपुलं च गुह्यम् ।
श्रोणीललाटमुरुकूर्मसमुन्नतं च,
गूढो मणिश्च विपुला श्रियमादधाति ॥३॥

विस्तीर्णमांसोपचितो नितम्बो,
गुरुश्च धत्ते रसनाकलापम् ।
नाभिर्गभीरा विपुलाङ्गनानां,
प्रदक्षिणावर्त्तगता च शस्ता ॥४॥

मध्यं स्त्रिया स्त्रिवलि नथ[2]मरोमशं च,
वृत्तौ घनावविषमौ कठिनावुरस्यौ ।
रोमप्रवर्ज्जितमुरो मृदु चाङ्गनानां,
ग्रीवा च कम्बुनिचिताऽर्थसुखानि धत्ते ॥५॥

बन्धुजीवकुसुमोपमो धरो,
मांसलो रुचिरविम्बरूपभृत् ।
कुन्दकुड्मलनिभाः समा द्विजा
योषितां पतिसुखाऽमितार्थदाः ॥६॥

---

२ त्रिवलिभङ्ग अ पाठान्तरम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दाक्षिण्ययुक्तमशठं परपुष्टहंस–
वल्गु प्रभाषितमदीनमनल्पसौख्यम् ।
नासा समा समपुटा रुचिरा प्रशस्ता
दृग्नीलनीरजदलद्युतिहारिणी च ॥७॥

नो संहते नापि पृथूनलम्बे
शस्ते भ्रुवौ बालशशाङ्कवक्रे ।
अर्द्धेन्दुसंस्थानमरोमशं च
शस्तं ललाटं ननतं न तुङ्गम् ॥८॥

कर्णयुग्ममपि युक्त मांसलं,
शस्यते मृदु समं समाहितम् ।
स्निग्धनीलमृदुकुञ्चितैकजा
मूर्द्धजाः सुखकराः समंशिरः ॥९॥

भृङ्गरासनवाजिकुञ्जररथश्रीवृक्षयूपेषुभि–
र्मालाकुण्डलचामराङ्कुशयवैः शैलैर्ध्वजैः स्तोरणैः[१] ।
मत्स्यस्वस्तिकवैदिकाव्यजनकैः शङ्खातपत्राम्बुजैः,
पादे पाणितलेऽथवा युवतयो गच्छन्ति राज्ञीपदम् ॥१०॥

निगूढमणिबन्धनौ तरुणपद्मगर्भोपमौ,
करौनृपतियोषितस्तनुविकृष्टपर्वाङ्गुली ।
ननिम्नमति नोन्नतं करतलं सुरेखान्वितं,
करोत्यविधां चिरं[२] सुतसुखार्थ संभोगिनीम् ॥११॥

---

१ स्तौमरैः अ. क. । २ करोतिः विविधाम्बरां लि. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मध्याङ्गुलिं या मणिवन्धनोत्था,
रेखा गता पाणितलेऽङ्गनायाः ।
ऊर्ध्वस्थिता पाणितले थवाऽया,
पुंसोऽथवा राज्य सुखाय सा स्यात् ॥१२॥

कनिष्ठिकामूलभवाङ्गनाया
प्रदेशिनीमध्यमिकान्तरालम् ।
करोतिरेखा परमायुषः सा
प्रमाणमूना तु तदूनमायुः ॥१३॥

अङ्गुष्ठमूले प्रसवस्य रेखाः
पुत्रा वृहत्यःप्रमदास्तु तन्व्यः ।
अच्छिन्नमूला बृहदायुषान्ताः
स्वल्पायुषां छिन्नलघुप्रमाणाः ॥१४॥

इतीदमुक्तं शुभमङ्गनाना—
मतो विपर्यस्त मनिष्टमुक्तम् ।
विशेषतोऽनिष्ट फलानि यानि,
समासतस्तान्यनुकीर्त्तयामि ॥१५॥

कनिष्ठिका वा तदनन्तरा वा
महीं न यस्याःस्पृशतेङ्गनायाः ।
गताऽथवाऽङ्गुष्ठमतीत्य यस्याः
प्रदेशिनी सा कुलटातिपापाः ॥१६॥

उद्बद्धाभ्यां पिण्डिकाभ्यां शिराले
शुष्के जङ्घे रोमशे चातिमांसे ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वामावर्त्तं निम्नमल्पं च गुह्यं,
कुम्भाकारं चोदरं दुःखितानाम् ॥१७॥

ह्रस्वयातिनिःस्वता दीर्घया कुलक्षयः
ग्रीवया पृथूत्यया योषितः प्रचण्डताः ॥१८॥

नेत्रे यस्या केकरे पिङ्गले वा,
सा दुःशीला श्यावलोलेक्षणा च ।
कूपौयस्या गण्डयोश्च स्मितेषु
निःसन्दिग्धं बन्धकीं तां वदन्ति ॥१९॥

प्रविलम्बिनि देवरं ललाटे
श्वशुरं हन्त्युदरे स्फिचो [1] पतिं च ।
प्रतिरोमचयान्वितोत्तरोष्टी
अशुभा [2] भर्त्तुरतीव या च दीर्घा ॥२०॥

स्तनौ सरोमौ मलिनोल्वणौ च,
क्लेशं दधाते विषमौ च कर्णौ ।
स्थूलाःकराला विषमाश्च दन्ताः
क्लेशाय चौर्याय च कृष्णमांसाः ॥२१॥

क्रव्यादरूपैर्वृक काक कङ्कः
सरीसृपोलूकसमानचिह्नैः ।
शुष्कैःशिरालैर्विषमैश्च हस्तै-
र्भवन्ति नार्यःसुखवित्तहीनाः ॥२२॥

---

१ स्फिजोः । २ नशुभा क ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

या तूत्तरोष्ठेन समुन्नतेन
रूक्षाग्रकेशी कलहप्रिया सा ।
प्रायोविरूपासु भवन्ति दोषा,
यत्राकृतिस्तत्रगुणा वसन्ति ॥२३॥

पादौ सगुल्फौ प्रथमं प्रदिष्टौ,
जङ्घे द्वितीयं च सजानुचक्रे ।
मेढ्रोरूमुष्कं च ततस्तृतीयं,
नाभिःकटिश्चैव चतुर्थमाहुः ॥२४॥

उदरं कथयन्ति पञ्चमं हृदयं षष्ठमथ स्तनान्वितम् ।
अथ सप्तममंसजत्रुणी कथयन्त्यष्टममोष्ठकन्धरे ॥२५॥

[१] नवमं नयने च सभ्रूणी सललाटं दशमं शिरस्तथा ।
अशुभेष्वशुभं दशाफलं चरणाद्येषु शुभेषु शोभनम् ॥२६॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने स्त्रीलक्षणाऽध्यायः [२] ॥

अथ सामुद्रिक लक्षणाऽध्यायः–

अथ सामुद्रिकः—

प्रणम्यशिरसादेवं चन्द्रोज्वल विशोभितम् ।
सर्वज्ञं सर्वद्रष्टारं सर्वस्य जगतः पतिम् ॥१॥

१ श्लोकोऽयं प्र. क. पुस्तकयोर्नास्ति । २ एषोऽध्याय वृहत्संहितायाः कन्यालक्षणं नामोनसप्ततितमोऽध्याय एवास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

७० सामुद्रिकाऽध्यायः

पुरुषाणां तथा स्त्रीणां लक्षणं च समग्रतः
अधमोत्तममध्यानां यथा प्राह पयोनिधिः ॥२॥

शोभने हस्तनक्षत्रे ग्रहे सौम्ये शुभे रवौ ।
पूर्वाह्णे ब्राह्मणैर्युक्तः परीक्षेत विचक्षणः ॥३॥

प्रमाणं प्रथमं ज्ञेयं तथा सर्वाङ्गलक्षणम् ।
दन्तकेशनखश्मश्रुगन्धवर्णस्वरादिभिः ॥४॥

पूर्वमायुःपरीक्षेत पश्चाल्लक्षणमादिशेत् ।
हीनायुषां नरस्त्रीणां लक्षणैःकिं प्रयोजनम् ॥५॥

अधमो नवतिःप्रोक्तो मध्यमस्तु शतां गुणः ।
अष्टोत्तरशतं यस्तु सोत्तमःपरिकीर्त्तितः ॥६॥

प्रमाणलक्षणं प्रोक्तं समुद्रेण शुभाशुभम् ॥७॥

अतःपरं प्रवक्ष्यामि देहावयवलक्षणम् ।
तत्र पादतलं वक्षे यथा सर्वज्ञभाषितम् ॥८॥

अस्वेदनौ [1] मृदुतलौ कमलोदरसन्निभौ ।
श्लिष्टाङ्गुलीयसंयुक्तौ शिराविरहितौ तथा ॥९॥

नखैस्तु दीप्तिसंकाशैः सहितौ चरणौ तथा ।
कूर्म्मोन्नतैश्च चरणैःपूरुषा पार्थिवा स्मृताः ॥१०॥

सूर्पाकारस्तथा भग्नैर्वक्रैःशुष्कैः शिरायुतैः ।
अस्वेदैःपाण्डुरै रुक्षै श्चरणैरतिदुःखिताः ॥११॥

---

१ अस्वेदिनौ प्र.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यस्य पादतल रेखा अङ्कुशेव [1] प्रजायते ।
सुखदुःखोभयं [2] तस्य पुरुषस्य नसंशयः ॥१२॥

अङ्गुष्ठौ विपुलौ येषां ते नरा दुःख भागिनः ।
क्लिश्यन्ति विरलाङ्गुष्ठा ते नरा दुःखभागिनः ॥१३॥

उन्नतैश्च समैःस्निग्धै र्हसितैःसुखभागिनः ।
वृत्तैस्ताम्रनखै रक्तैरङ्गुष्ठै राज्यमादिशेत् ॥१४॥

यस्य प्रदेशिनीदीर्घा अङ्गुष्ठं च व्यतिक्रमेत् ।
स्त्रीभोगं लभते सोपि पुरुषो नात्र संशयः ॥१५॥

भार्यावा म्रियते तस्य पुत्रो वा प्रथमेऽपिवा ।
साच ह्रस्वा भवेद्यस्य तं विद्यात्कलह प्रियम् ॥१६॥

मध्यमायां तु दीर्घायां विद्याभोगी भवेन्नरः [3] ।
साच ह्रस्वा भवेद्वापि भार्याहानिमवाप्नुयात् ॥१७॥

अनामिकायां दीर्घायां विद्याभोगी भवेन्नरः ।
साच ह्रस्वा भवेद्वापि भार्या हानिमवाप्नुयात् ॥१८॥

कनिष्ठायां तु दीर्घायां स्वर्णभागी भवेन्नरः ।
सा च ह्रस्वा भवेद्यस्य तं विद्यात्पारदारिकम् ॥१९॥

यस्य प्रदेशिनीस्थूला तत्तथा च कनिष्ठिका ।
बालस्य म्रियते माता समुद्रवचनं यथा ॥२०॥

---

१ अङ्कुइव । २ दुःखादुःखभयं अ. । ३ भार्याहानिं विनिर्दिशेत् क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अङ्गुली मध्यमा यस्य समश्लिष्टा च शोभना ।
पुत्रांश्च जनयेत्सोऽपि अल्पायु श्चैव जायते ॥२१॥

असङ्गताभिर्ह्रस्वाभिरङ्गुलीभिस्तु मानवः ।
दासो वा दासकर्मा वा भवेन्मर्त्यो न संशयः ॥२२॥

समाश्च ह्रसिता नित्यं स्निग्धाःकूर्मसमुन्नताः ।
अङ्गुली पार्थिवो [1] ज्ञेया समुद्रवचनं यथा ॥२३॥

नखैः श्वेतैश्च विकृतैः पुरुषा दुःख भागिनः[2] ।
दुःशीलाः कुनखा ज्ञेयाः कामलोभ विवर्जिताः ॥२४॥

विकृतैः स्फुटितैः स्थूलैर्नखैर्दारिद्र्यभागिनः ।
महापापानि कुर्वन्ति पुरुषा हरितैर्नखैः ॥२५॥

इन्द्रगोपकसंकाशैर्नखै र्भवति पार्थिवः ।
नखैस्ताम्रैस्तथैश्वर्यं पुष्पितैश्चैव मानवाः ॥२६॥

वर्तुलैश्च तथैश्वर्यं पुष्पितै शुभगू[3] भवेत् ।
स्निग्धैरुपचितैस्ताम्रैर्नखैर्भूपतयः स्मृताः ॥२७॥

रक्तैर्नखैस्तथैश्वर्यं धन्याः पद्मनखानराः ॥२८॥

महापार्ष्णिस्तु दीर्घायुः समैर्दुः खसुखानि च ।
अल्पपार्ष्णिर्दरिद्रश्च सूर्पोन्नतैश्च दुर्जयः ॥२९॥

---

१ अङ्गुल्यो भूभुजो । २ दुःखभाजनम् प्र. अ. । ३ शुभगो अ. क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नरा सूकर गुल्फास्तु[3] नित्यं बन्धन भागिनः ।
समैर्भवति गुल्फैस्तु पुरुषाः सुखभागिनः ॥३०॥

गुल्फैस्तु महिषाकारैः नित्यं बन्धन भागिनः ।)
वक्रैस्तु दुःखिता नित्यं रोमशैर्निरपत्यता ॥३१॥

तुरङ्गजङ्घा धनिनः ऐश्वर्यं च समादिशेत् ।
मृगजङ्घास्तु राजानो जायन्ते नात्र संशयः ॥३२॥

दीर्घजङ्घा स्थूलजङ्घा नित्यं गच्छन्ति ते पथि ।
अनर्थभागिनश्चैव परप्रेष्यकराः स्मृताः ॥३३॥

सिंहव्याघ्रसमे जङ्घे धनिनः परिकीर्तिताः ।
रोमशे च तथा जङ्घे नरा दारिद्य्र भागिनः ॥३४॥

रोमैकेन भवेद्राजा द्वाभ्यां भवति पण्डितः ।
स्त्रिभिस्तु श्रोत्रियः प्रोक्त श्चतुर्भिस्तु दरिद्रकः ॥३५॥

वृषसिंह गजानां च अन्येषां पशुपक्षिणाम् ।
गतिस्तुल्या भवेद् येषां भोगिनस्ते नराधिपाः ॥३६॥

जलोर्मिसदृशी या च काकोलूकसमा च या ।
गतिर्द्रव्य विहीनानां दुःखशोकभयङ्करी ॥३७॥

शुनोष्ट्रमहिषाणां च खरशूकरयोस्तथा ।
गतिर्येषां समाख्याता ते नरा भाग्यवर्जिताः ॥३८॥

---

३ मकरगुल्फाश्च क. । ४ चापान्तर्गतः पाठः प्र. क. पुस्तकयोर्नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अनपत्योऽल्प जानुश्च चिरायुः स्निग्धजानुकः।
[1] (दुर्भगः स्थूलजानुश्च पीतजानुरभाग्यवान् ॥३९॥

भग्नजानुकटीवस्तिनरास्तु नरभाग्यवान्।
हीनजानुर्नरो यस्तु बन्धनं लभते नरः ॥४०॥

जानुस्तालफलाकारा दुःख भारा नभाजनम्।)
विषमैर्दुः खितो नित्यं निर्मांसास्तु प्रवासिनः ॥४१॥

वृषोरुर्ह्लसितोरुश्च नरः सर्व गुणान्वितः।
उरूभ्यां विकटाभ्यां च सभवेत् स्त्रीषु बल्लभः॥
स्थूलाग्रमध्यनिम्नाभ्यां ते नरा अध्वगामिनः ॥४२॥

दक्षिणावर्त्तलिङ्गेन पुत्रवान्स भवेन्नरः।
वामावर्त्तेन लिङ्गेन नरः कन्याप्रजो भवेत् ॥४३॥

स्थूलकृष्णेन लिङ्गेन दुखितास्ते नराः स्मृताः।
ऋजुभिर्वर्त्तुलै लिङ्गैः पुरुषाः सुखभागिनः ॥४४॥

एकैकधारलिङ्गेन सभवेत्पृथिवी पतिः।
द्विधारा धनवन्तश्च सप्त धाराः सु दुःखिता ॥४५॥

मीनगन्धेन शुक्रेण धनवान् श्रोत्रियो भवेत्।
हविर्गन्धेन शुक्रेण गवाढ्यो जायते नरः ॥४६॥

मधुगन्धेन शुक्रेण नरः स्त्रीजनवल्लभः।
हालागन्धेन नृपतिः पयोगन्धेन भूपतिः ॥४३॥

---

१ चापान्तर्गतः पाठ प्र. पुस्तके नास्ति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

[1]लाक्षागन्धो भवेन्निःस्वो मांसगन्धेन तस्करः ।
व्यसनी च वसागन्धे मेदोगन्धेन दुःखितः ॥४४॥

रजोवर्णं भवेच्छुक्रं यस्य पुंसः स पार्थिवः ।
श्यामवर्णेन शुक्रेण दशभागी भवेन्नरः ॥४५॥

समपादोपविष्टस्य भूमिस्पृशति मेहनम् ।
स भवेद् दुःखितो नित्यं दारिद्र्येण तु पीडितः ॥४६॥

समपादोपविष्टस्य गुल्फौ स्पृशति मेहनम् ।
भोगवान् सतु विज्ञेयस्तथा तुरग मेहनः ॥४७॥

सुवर्णरजतप्रख्यैर्मणि मौक्तिकसन्निभैः ।
प्रवालसदृशैः स्निग्धैर्मणिभिः पार्थिवो भवेत् ॥४८॥

प्रवालसदृशं स्निग्धं भवेद् यस्य तु शोणितम् ।
राजानं तं विजानीयात् एकच्छत्रं महाबलम् ॥४९॥

अलक्तसदृशं रक्तं जायते यस्य शोणितम् ।
धनवान् भोगवाँश्चैव स नरः परिकीर्त्तितः ॥५०॥

पद्मपत्रनिभं चैव देहे भवति शोणितम् ।
जनयेद् बहुधा कन्यां दुःखितश्च सदा भवेत् ॥५१॥

विस्तीर्णमांसलं स्निग्धमस्थि पुंसां प्रशस्यते ।
कृशं रुक्षं च निर्मांसं येषां ते सुखिनोऽस्थिनो ॥५२॥

---

१ लाक्षागन्धात् प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विस्तीर्णमांसलाः स्निग्धा वस्तिः पुंसां प्रशस्यते ।
निर्मांसा संकटा वस्ति येषां ते दुःखभाजनाः ॥५३॥

सिहव्याघ्रसमा येषां कटिस्ते दण्डनायकाः ।
ऋक्षवानर तुल्याभकटि येषां न ते शुभाः ॥५४॥

मृगोदरो नरो धन्यो मयूरोदर एव च ।
मण्डूकसदृशो यस्तु सभवेत्पार्थिवो नरः ॥५५॥

वर्त्तुला यदि गम्भीरा नाभिः पुंसां प्रशस्यते ।
उत्ताना विरला नाभिः सर्वदा दुःखिनो भवेत् ॥५६॥

उन्नतोपचिता येषां घनाः स्निग्धा पयोधराः ।
पुरुषा धनिनः शूराः भोगवन्तश्च कर्मभिः ॥५७॥

विस्तीर्णं हृदयं यस्य मांसलोपचितं समम् ।
शतायुषं विजानीयाद् भोगाढ्यं च महाधनम् ॥५८॥

मांसलौ सरलौ वृत्तौ पार्श्वौ यस्य सुशोभनौ ।
अश्वव्याघ्रसमपृष्ठः सनरोऽवनिनायकः ॥५९॥

प्रलम्ब बाहुर्विज्ञेयो नरः सर्वगुणान्वितः ।
ह्रस्वबाहुर्भवेद्दासः परकर्मकरः स्मृतः ॥६०॥

वामावर्त्तभुजा ये तु दीर्घा वा मनुजाश्चये ।
सम्पूर्णा बाहवो येषां तं राजानं विनिर्दिशेत् ॥६१॥

तुलाग्रमथवा वज्रं करमध्ये तु दृश्यते ।
वाणिज्यं जायते तस्य पुरुषस्य नसंशयः ॥६२॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यस्य मीनसमारेखा कर्मसिद्धिः सदा भवेत् ।
धनाढ्यः स तु विज्ञेयो बहुपुत्रो न नंशयः ॥६३॥

पद्मं वा यदि वा शङ्खं कोष्ठागारं च दृश्यते ।
पुरुषस्य करे यस्य ईश्वरः स च कथ्यते ॥६४॥

चक्राकारा ध्वजाकारा खड्गाकारा च दृश्यते ।
यस्य पाणितले[१] रेखा स नरः पार्थिवः स्मृतः ॥६५॥

दक्षिणे पाणिनोऽङ्गुष्ठे यवो यस्य तु दृश्यते ॥
सर्वविद्याप्रधानो ऽयं बुद्धिमान् स भवेन्नरः ॥६६

यस्यपाणितले रेखा कनिष्ठामूलगामिनि ।
ऊद्ध्र्वायाति प्रदेशिन्यां शतायुः सभवेन्नरः ॥६७॥

द्वितीया धनरेखा च तृतीया कुलवर्द्धनी ।
यदि पूर्णा च रेखाः स्युः पूर्णं तस्य सुलक्षितम् ॥६८॥

त्यक्तोर्ध्वा मणिवन्धाया रेखा स्यात्करगामिनी ।
सुवर्णरत्नराज्यश्रीदायिका[२] सा न संशयः ॥६९॥

अङ्गुष्ठस्यापि मध्येपि प्रब्रूत नृपति त्वमुम् ॥
सैव तर्जनिकां प्राप्य धत्ते साम्राज्यमग्रिमम् । ॥७०॥

सेनापतिर्धनेशो वा मध्यमागतरेखया ।
अनामिकां पुनः श्रेष्ठधनवान् सर्वदा नरः ॥७१॥

---

१ पादतले क । २ दायिनी प्र. ३ ब्रूतनृपतिमुत्तमम् प्र. । सूर्यावर्त्तोत्तरा प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सुखिनंसुभगंचापि संप्राप्ता सा कनिष्ठिकाम् ।
करोति सत्यमेवं सा यद्यच्छिन्ना सुवर्णभाक् ॥७२॥

सूर्प्पा वर्त्तोत्तरा[४] रेखा मणिजीविन रेखयोः ।
सहोदर गणं तावान् घातुका पाणिपल्लवे ॥७३॥

यावत्यः संस्थिता रेखाः कनिष्ठायां च रेखया ।
तावत्यो महिलास्तस्य स्त्रियस्तावन्मिताधवाः ॥७४॥

ग्रिवा स्यादावर्तुला यस्य पूर्णकुम्भसमा भवेत् ।
सुधनं तं विजानीयादायुष्मन्तं च मानवम् ॥७५॥

दीर्घग्रीवाः समग्रीवाः काकग्रीवाः समानराः ।
शुष्ककन्धाश्च कृष्णा ये सर्वे ते शततर्क्ककाः[१] ॥७६॥

वृषस्कन्धा गजस्कन्धा कोलस्कन्धा च ये नराः
सर्वे ते पार्थिवाभोगा महाभोगा महाधनाः ॥७७॥

वदनं मण्डलं यस्य तस्य शीलं समं भवेत् ।
मृग मूषक वक्राश्च ते नराः दुःख भागिनः ॥७८॥

यस्य गण्डौ च सम्पूर्णौ पद्मपत्रसमप्रभौ ।
कृषिभागी भवेन्नित्यं तनुपुत्रश्च जायते ॥७९॥

सिंहव्याघ्र गजेन्द्राणां कपोलौ सदृशौ यदि ।
महाभोगी स विज्ञेयः सेनायाश्चैव नायकः ॥८०॥

---

१ शततर्कुकाः प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रक्ताधरश्च नृपतिः स्याद् वक्रौष्ठः[1] सुदुःखितः ।
कुन्दपुष्पप्रतीकाशैर्दन्तैर्नृपतयस्तथा ॥८१॥

ऋक्ष वानरदन्ताश्च नित्यं ते क्षुत्तृषाऽऽहताः ।
खरदन्ता हस्तिदन्ताः स्निग्धदन्ताश्च ते नराः ॥८२॥

सर्वे ते धनिनो ज्ञेयः समुद्रवचनं यथा ।
करालैर्विरलैरुक्षैर्दशनैर्दुःखभागिनः ॥८३॥

दक्षिणोन्नतदन्ताश्च महाभोगा महाबलाः ।
द्वात्रिंशद्दशनै राजा भोगीस्यादेकहीनकः ॥८४॥

त्रिंशता दुःख दुःखाढ्या ततो हीना न सुन्दराः ।
स्तोकदन्ता अदन्ताश्च ये नराः क्षुद्रदन्तकाः ॥८५॥

मूषिकासमदन्ताश्च ते पापा परि कीर्त्तिताः ।
वामावर्त्तो भवेद् यस्य वामायां दिशि मस्तके ॥८६॥

निर्लक्षणः क्षुधाक्षामो भिक्षामश्नाति रुक्षकः ।
दक्षिणो दक्षिणे भागे यस्याऽऽवर्त्तस्तु मस्तके ॥८८॥

तस्य नित्यं प्रजायेत कमला करवर्त्तिनी ।
यदि स्याद्दक्षिणे वामो दक्षिणो वाम पार्श्वके ॥८९॥

पश्चात्कालेनतस्यास्य रोगो नास्त्यत्र संशयः ।
उरोमुखललाटानि पृथूनि सुखभागिनाम् ॥९०॥

गम्भीराणि पुनस्त्रीणि नाभिः सत्वं स्वर स्तदा ।
कृष्णतालुर्भवेद्यस्तु स नरः कुलनाशनः ॥९१॥

१ रक्ताधरो भूपतिःस्याद् वक्रोष्ठस्तु प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दुःखभागी च सन्तप्तः धनक्षयकरस्तथा ।
प्रारक्तं चैव पृथुलं शोभनं यस्य तालुकं ॥९२॥

सुखभागी च विज्ञेयः पीततालुर्नराधिपः ।
हंसस्वराश्चधन्यास्ते मेघगम्भीरपार्थिवाः ॥९३॥

क्रौञ्च स्वरा च राजानो भोगवन्तो महाधनाः ।
खरकाकरवा ये च क्षीणभिन्नरवाश्च ये ॥९४॥

सूक्ष्मस्वराश्च ये केचित् सर्वे ते परतर्ककाः ।
हस्तिनासासमा ये च पीतनासाश्च ये नराः ॥९५॥

दीर्घनासाश्च ये मर्त्या सर्वे ते जननायकाः ।
पार्थिवाः शुक नासाश्च उच्चनासाश्च भोगिनः ॥९६॥

ह्रस्वनासा नरा ये च धर्मशीलाः समादिशेत् ॥
येषां वक्रा च हीना च नासिका मुख मध्यगाः ॥९७॥

ते सर्वे दुःखिता ज्ञेयाः कुलशीलविवर्जिताः ।
न श्रीस्त्यजनि रक्ताक्षं व्याघ्राक्षश्च सुकोपनः ॥९८॥

कुक्कुटाक्षः सदा द्वेषी मातृपुत्रैर्नसंशयः ।
विडाल हंसनेत्राश्च भवन्ति पुरुषाधमाः ॥९९॥

मयूरनकुलाक्षाश्च ते नरा मध्यमाः स्मृताः ।
ह्रस्वकर्णा मनुष्या ये ते सर्वे सुखभागिनः ॥१००॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कृष्णजिह्वा भवेत् श्रेष्ठा रक्तजिह्वास्तु नायकाः ।
श्वेतजिह्वो नरो ज्ञेयः शौचाचारसमन्वितः ॥१०१॥

पद्मपत्रसमा जिह्वा अतिसूक्ष्मा च शोभना ।
सर्वविद्याप्रवक्तारस्ते भवन्ति नरोत्तमाः ॥१०२॥

ललाटे चार्द्धचन्द्रेण भवन्ति पृथिवीश्वराः ।
विपुलेन ललाटेन विद्यावांश्च भवेन्नरः ॥१०३॥

अल्पेन तु ललाटेन अल्पायु जायते नरः ।
उन्नतेन ललाटेन धनाढ्यास्तेनराः स्मृताः ॥१०४॥

निःस्वा विषमभालेन दुःखिता ज्वरजर्जराः ।
परकर्मकरा नित्यं लभन्ते बधबन्धनम् ॥१०५॥

पञ्चभिः शतमुद्दिष्टं असीति स्तिमृभिस्तथा ।
भवन्ति तिसृभिः षष्ठिर्द्वाभ्यां स्याद्विशतिद्वयम् ॥१०६॥

रेखैकेन ललाटेन विंशतिः परिकीर्त्तिताः ।
अरेखेन ललाटेन विज्ञेया पञ्चविंशतिः ॥१०७॥

स्फुटितैः कपिलै रुक्षै स्थूलैः केशैरनीश्वराः ।
सूक्ष्मैः स्निग्धैस्तथा केशैर्जायन्ते धनदोपमाः ॥१०८॥

केशदन्तनखाः सूक्ष्मा भवन्ति सुखहेतवः ।
कण्ठंपृष्ठं तथा जङ्घे ह्रस्वलिङ्गञ्च पूजितम् ॥१०९॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रक्त जिह्वा भवेद्धन्या पाणिपादतलेन च ।
पृथुलं पाणिपादं च धन्यानां दीर्घजीविनाम् ॥११०॥

स्निग्धदन्ताः शुभाहाराः शुभगाः स्निग्धलोचनाः ।
नरोऽतिह्रस्वो दीर्घश्च स्थूल कृष्णश्च निन्दितः ॥१११॥

एवं सामुद्रिकंशास्त्रं सकुद्राच्च समुद्भवम् ।
पठति शृणुते वा यः स जानाति शुभाशुभम् ॥११२॥

इति पुरुषलक्षणं समाप्तम् ॥

तत्वं विज्ञाय यत्नेन शुभाशुभमिति स्थितम् ।
विदितं च प्रशस्तं च स्त्रीणां वक्ष्यामि लक्षणम् ॥११३॥

मातरं पितरं चैव भ्रातरं देवरं तथा ।
विनाशयति या नारी लक्षणैः किं प्रयोजनम् ॥११४॥

मुहूर्त्ते तिथिसम्पन्ने ग्रहसौम्ये बलान्विते ।
ब्राह्मणैः सहसंगम्य कन्यां वीक्षेत शास्त्रवित् ॥११५॥

हस्तपादौ परीक्षेत अङ्गुलीश्च नखांस्तथा ।
पाणिरेखाश्च जङ्घे च कटिर्नाभिस्तथैव च ॥११६॥

जघनोदरपृष्ठं च स्तनौ कर्णौ भुजौ[1] तथा ।
चक्षुःश्मश्रुललाटं च शिरः केशां स्तथैव च ॥११७॥

---

१ रुजं प्र. प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रोमराजीः स्वरं वर्णं ग्रीवा नासा तथा परे ।
एतत्सर्वं परीक्षेत कन्याशास्त्र विशारदः ॥११८॥

पादौ समांसलौ स्निग्धौ भूम्यां चैव प्रतिष्ठितौ ।
सुकोमलौ च रक्तौ च सा धन्या गृहमण्डली ॥११९॥

अङ्गुष्ठेनाति रक्तेन भर्त्तारं चैव मन्यते ।
अल्पवृत्तैः पतिं हन्याद्वहुवृत्तैः पतिव्रता ॥१२०॥

उन्नतैः सा ध्रुवं सौख्यं लभते मांसलैस्तथा ।
सुवृत्तैः पद्मवर्णैश्च पुत्रवत्यः स्त्रियः स्मृताः ॥१२१॥

चक्रं पद्मं ध्वजं छत्रं स्वस्तिकं वर्द्धमानकम् ।
यस्याः पादेषु दृश्यन्ते ज्ञेयास्ता राजयोषितः ॥१२२॥

यस्याः पादतले रेखा तर्जनीषु प्रकाशते ।
भर्त्तारं लभते शीघ्रं प्रिया भर्त्तुश्च जायते ॥१२३॥

यस्या न स्पृशते भूमिं अङ्गुली प्रकनिष्ठिका ।
भर्त्तारं प्रथमं हृत्वा द्वितीयेन सम[२] स्थिता ॥१२४॥

यस्या नस्पृशते भूमिं कनिष्ठा विरला द्विजाः ।
संयुतभ्रूकूपगण्डा पुंश्चली सा च भामिनी ॥१२५॥

यस्या अनामिका ह्रस्वा तां विद्यात्कलहप्रियाम् ।
अङ्गुष्ठं तु व्यतिक्रम्य यस्याः पादे प्रदेशिनी ॥१२६॥

---

२ सह अ. क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कुमारी कुरुते जारं यौवनस्थे च का कथा ।
दुःशीलोन्नतपार्ष्णिः स्याद् महापार्ष्णिस्तु बन्धकी ॥१२७॥

दीर्घपार्ष्णिः परिक्लिन्ना समपार्ष्णिः सुशोभना ।
गुल्फैश्च महिषाकारैर्बन्धनं बन्धमाप्नुयात् ॥१२८॥

निगूढगुल्फा या नारी सा मर्त्यसुखमेधते ।
पीने च संहते स्निग्धे शिरारोम विवर्जिते ॥१२९॥

हस्तिहास्तमिते यस्या जङ्घे सा पुण्यभाजनम् ।
वस्ति देशे च पार्श्वे च रेखाभि[1]र्निन्दिताः स्त्रियः ॥१३०॥

वस्ति श्रेष्ठा च[2] विपुला चोन्नता[3] चोत्तमोत्तमा ।
रोमैश्च वर्णग्लानैश्च कृष्णैश्च बहुभिस्तथा ॥१३१॥

नरेन्द्रस्य तु सा भार्या भवतीति[4] न संशयः ।
कूर्मपृष्ठभगं यस्या कृष्ण स्निग्धं च शोभनम् ॥१३२॥

धन धान्यवती सा च पुत्रमाता च जायते ।
निर्मांसं चैव दीर्घं च भगं शुष्कं शिरायुतम् ॥१३३॥

दारिद्र्यदुःखमाप्नोति दौर्भाग्यं च विनिर्दिशेत् ।
उन्नते दक्षिणेपार्श्वे स्त्रियः पुत्र प्रदायिकाः ॥१३४॥

---

१ रेखास्यां अ. । २ श्रेष्ठास्ति प्र. अ. । ३ चोत्तरा प्र. क. !
४ भवते च लि. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वामोन्नते भगे नारी कन्यकां सा प्रसूयते ।
आवर्त्तस्तु भवेद्यस्या भगस्योपरिमस्तके ॥१३५॥

साचैव वर्द्धते पुत्रै धनधान्यैः समन्विता ।
कूर्मपृष्ठो गजस्कन्धः समरोमाल्पनासिकाः ॥१३६॥

विस्तीर्णपद्मवर्णश्च षडेते सुभगाभगाः ।
कठोरखररोमश्च शुष्कश्च दीर्घनासिकः ॥१३७॥

सकटो विरलश्चैव षडेते दुर्भगा भगाः ॥

गभीरनाभिर्या नारी सा भवेत्पुरुषप्रिया ।
पद्माकारा भवेन्नाभिर्यूनां सा सुखमेधते ॥१३८॥

समा च मांसला स्निग्धा चतुरस्रा सुशोभना ।
समुन्नता च पृथुला कटि स्त्रीणां प्रशस्यते ॥१३९॥

सगूढौ सुदृढौ पीनौ तथा च सुप्रतिष्ठितौ ।
स्तनौ सुचूचुकौ यस्याः सा भवेद्वंशवर्द्धिनी ॥१४०॥

दासी चोन्नतपृष्ठास्या द्भग्नपृष्ठस्तथैव च ।
द्रोणीपृष्ठा पतिघ्नी च शिरालेन तु दुःखिता ॥१४१॥

पद्मपत्र निभा यासां नारीणां पाणिपल्लवाः ।
मृदवः स्वेदरहिताः तासां भवति सम्पदः ॥१४२॥

अनपत्या भवेन्नारी दन्तानां चलनं यदि ।
निर्धनत्वं च दारिद्र्यं तस्या चैव विनिर्दिशेत् ॥१४३॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रक्तजिह्वा च या नारी साभवेत्सुखभागिनी ।
नित्यं विवर्द्धते पुत्रैः समुद्रवचनं यथा ॥१४४॥

श्वेतायां तु जले मृत्यु मांसलानां धनक्षयः ।
श्यामायां कलहो नित्यं वर्णच्छेद मवाप्नुयात् ॥१४५॥

श्वेतेन तालुना दासी दुःखिता कृष्णतालुका ।
हरितेन च रुक्षेण प्रव्रज्यामनुगच्छति ॥१४६॥

दीर्घेण नासिकाग्रेण नारी भवति कोपिनी ।
ह्रस्वेन च भवेद्दासी परकर्मकरी स्मृता ॥१४७॥

चिपिटा नासिका यस्या वैधव्यमधिगच्छति ।
नातिदीर्घा च विस्तीर्णा सा नारी सुखमेधते ॥१४८॥

पिङ्गनेत्रा भवेन्नारी कृतकौशल संपदा ।
दुःशीला सा च विज्ञेया वैधव्यस्य च भागिनी ॥१४९॥

त्रीणि यस्याः प्रलम्बानि ललाटमुदरं स्फिजौ[१] ।
सानारी भक्षते त्रीणि देवरं स्वशुरं पतिम् ॥१५०॥

ललाटेन पतिं हन्यात् देवरम् उदरेण च ।
स्फिजाभ्यां स्वशुरं हन्यात्तां कन्यां परिवर्जयेत् ॥१५१॥

ललाटं त्र्यङ्गुलं यस्याः शिरारोमविवर्जितम् ।
निर्मलं सुसमं दीर्घमायुः सौख्यधनप्रदम् ॥१५२॥

---

१. भगम् क, स्फिचौ प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्थूलकेशी पतिघ्नीच दीर्घकेशी तथैव च ।
कपिलैः परुषैः क्रूरा स्कन्ध केशी न शोभना ॥१५३॥

मृगाक्षी च मृगग्रीवा मृगजङ्घा मृगोदरी ।
अपि दासकुले जाता राजपत्नी भविष्यति ॥१५४॥

कुले महति संभूता लक्षणैः समलङ्कृता ।
भार्या प्रशष्यते लोकैरितरा कलहप्रिया ॥१५५॥

रक्तनेत्रा बृहद्ग्रीवा लम्बोष्ठी विकृताननाः ।
तथैवोत्कटपादा च वर्जनीया प्रयत्नतः ॥१५६॥

हंसस्वरा मेघवर्णा सा कन्या दीर्घ लोचना ।
यस्य गेहे तु सा गच्छेत् तद्गृहं सुखमेधते ॥१५७॥

ललाटे दृश्यते यस्याः कृष्णं तिलकमुज्वलम् ।
पञ्चसा जनयेत्पुत्रान् धर्म सौभाग्यदायिनी ॥१५८॥

मण्डूककुक्षि र्या नारी न्यग्रोधपरिमण्डला ।
एकं जनयते पुत्रं सोऽपि राजा भविष्यति ॥१५९॥

क्रौञ्चस्वरा च या नारी मयूर कोकिल स्वरा ।
चक्रवाकस्वरा या च हेम धान्यविवर्धिनी ॥१६०॥

आयतौ वदनौ यस्याः स्वरूपा चैव नासिका ।
भ्रुवौ चेन्द्रायुधाकारौ सात्यन्तसुखभागिनी ॥१६१॥

अङ्गुली संहिता यस्या नखाः पद्मदलप्रभाः ।
मृदुहस्ततला कन्या सा नित्यं सुखमेधते ॥१६२॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एकैकेन तु रोम्णा च जङ्घे चैव सुवर्त्तुले ।
धनधान्यवतीकन्या सर्वसौख्यकरा स्मृता ॥१६३॥

या नीलोत्पलवर्णाभा पिङ्गनेत्रा च भामिनी ।
सुवर्णरौप्यरत्नानां स्वामिनीं तां विनिर्दिशेत् ॥१६४॥

स्तने वामे तु कृष्णाभं लाञ्छनं तिलकोऽपि वा ।
शीघ्रं तु विधवा सास्त्री जायतेऽतीव दुःखिता ॥१६५॥

स्तने तु दक्षिणे यस्या लाञ्छनं तिलकोऽपिवा ।
कुंकुमोदकसंकाशं सा भवेत् पति शोभना ॥१६६॥

लभते वित्तसंपत्ति भर्त्तारं वशर्वातनम् ।
पुत्रत्रयं प्रसूयेत तथा कन्या चतुष्टयम् ॥१६७॥

यस्याः पयोधरे वामे मशकं तिलकोऽपि वा ।
हस्ते कर्णे च कण्ठे च सा कन्या पुत्रभागिनी ॥१६८॥

श्यामवर्णा च तन्वङ्गी स्निग्धाङ्गी मृदुभाषिणी ।
शङ्खकुन्देन्दुदशना भवेदैश्वर्यभागिनी ॥१६९॥

विस्तीर्णजघनं यस्या वेदिमध्या तथा भवेत् ।
आयतैर्विपुलैर्नेत्रै राजपत्नी तु सा भवेत् ॥१७०॥

पद्मं मालाङ्कुशं छत्रं नद्यावर्त्तप्रदक्षिणा ।
पाणि पादेषु दृश्यन्ते राज्ञीं वदति तां बुधः ॥१७१॥

यस्या कृष्णाश्च सूक्ष्माश्च मृदुस्निग्धाश्च मूर्ध्वजा ।
स्निग्धाङ्गी सुकुमारी च सौभाग्यसुख भागिनी ॥१७२॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

येनकेनचिदङ्गेन मांसं यस्याः प्रवर्द्धते [1] ।
गर्दभी तादृशी कन्या न सा कल्याण मर्हती ॥१७३॥

कूर्मपृष्ठा नखा यस्याः स्निग्धभावविवर्जिता ।
वाह्याङ्गुलीतलौ पादौ तां कन्यां परिवर्जयेत् ॥१७४॥

पादे प्रदेशिनी यस्या अङ्गुष्ठं वा व्यतिक्रमेत् [2] ।
न सा रमेत भर्त्तारं जारञ्च रमते सदा [3] ॥१७५॥

पादेष्वनामिका यस्या महीं न स्पृशते [4] यदि ।
द्वौ पूरुषावतिक्रम्य तृतीयं प्रति संस्थिता ॥१७६॥

रोमराजी तथासौम्या निर्धूमाग्निसमा भवेत् ।
सा भवेत्सौख्यसम्पन्ना धनवन्तं पतिं लभेत् ॥१७७॥

पुत्रानष्टौ प्रसूयेत कन्यकां जनयेत्सदा ।
यस्याःस्युस्त्रय आवर्ता [5] ललाटे उदरे कटौ ॥१७८॥

त्रीणि सा भक्षयेन्नारी देवरं स्वशुरं पतिम् ।
आवर्तःपृष्ठतो यस्या न सा कल्याण भागिनी ॥१७९॥

बहुभी [6] रमते नारी दुःखिता कुरुते सदा ।
यस्या रोमाणि जङ्घायां मुखं च विकृतं भवेत् ॥१८०॥

---

१ मासं यस्याःप्रवर्त्तते प्र. । २ व्यतिक्रामेत् । ३ भर्तरि सा न रमते जारे च रमते सदा । ४ स्पृशति । ५ त्रिण्यावर्ता भवेद् यस्याः लि. पु. । ६ बहून् सा लि. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उत्तरावर्त्त रोमाणि सा क्षिप्रं भोजयेत् पतिम् [1] ।
उद्वर्त्तपिण्डिकायां स्तु वराहखरलोमशा ॥१८१॥

अपि राजकुले जाता दासी स्याद्यदि रुपिणी ।
काकजङ्घा च या नारी वराहऋक्षरोमशा ॥१८२॥

न सा भवति कल्याणी पतिदुःखेन मोहिता ।
यस्यास्तु गच्छमानायाः [2] कटिःकिटकिटायते ॥१८३॥

जङ्घा च त्रसते [3] नित्यं भर्त्तारं च न संशयः ।
या च छुच्छुन्दरीगन्धा मत्स्यगन्धा च या भवेत् ॥१८४॥

उग्रगन्धा च या कन्यां तां कन्यां परिवर्जयेत् ।
उग्ररूपा च या कन्या सर्वाङ्गेषु च रोमशा ॥१८५॥

स्थूलपादा च या कन्या दासीं तां च विर्निदिशेत् ॥

यस्यास्तु हृदये नार्या रक्ताभस्तिलको भवेत् ।
लाञ्छनं चापि रक्ताभं सानारी शोभना भवेत् ॥१८६॥

लभते वित्तसंपत्ति भर्त्तारं वंश वर्धनम् ।
पुत्रत्रयं प्रसूयेत तथा कन्याचतुष्टयम् ॥१८७॥

स्तने वामे तु कृष्णाभं लाञ्छनं तिलको यदि ।
शीघ्रं वैधव्यमाप्नोति जायते च सुदुःखिता ॥१८८॥

---

१ उत्तरोष्ठे च रोमाणि सा क्षिप्रं भक्षयेत् पतिम् क. ।
२ गच्छन्त्याः । ३ जङ्घावर्तसमेक. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रोमराजी भवेत् खण्डा ह्रस्वा वक्रा समुन्नता ।
अब्दार्धेन तु भर्त्तारं हत्वा भवति निर्धना ॥१८९॥

मेखला चोच्छ्रिता यस्या नाभिदेशे न वर्त्तुला ।
स्वा स्त्री भवति कल्याणी राजानं पतिमाप्नुयात् ॥१९०॥

अश्वत्थपत्रसंकाशं गुह्यं यस्याः प्रजायते ।
सा भवेत्सुभगा नारी यदि गूढो मणिर्भवेत् ॥१९१॥

गुह्यान्ते तिलको यस्या रक्तकुम्कुमसन्निभः ।
अथवा दक्षिणे भागे प्रसन्ना सा निगद्यते ॥१९२॥

यस्या पादे ध्वजं छत्रं मूशलमङ्कुशं तथा ।
प्रशस्ता सा भवेन्नारी राजानं लभते पतिम् ॥१९३॥

नासाग्रके भवेद् यस्या लाञ्छनं मसकोऽपिवा ।
कुङ्कुमोदकसंकाशं प्रशस्ता साऽभिगद्यते ॥१९४॥

रोमराजी पुनर्यस्या त्रिवलीभिर्विराजिता[1] ।
गाम्भीर नाभिकं यस्याः प्रशस्ता सा निगद्यते ॥१९५॥

धनाढ्या रूप सम्पन्ना भर्त्तारं वंशवर्त्तिनम् ।
लभते नात्र सन्देहो समुद्रवचनं यथा ॥१९६॥

लौ नातिकठिनौ कपित्थफलसन्निभौ ।
स्तनौ स मांसलौ यस्याः प्रशस्ता सा निगद्यते ॥१९७॥

---

१ त्रिवलि नाधिगच्छति क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्तनमध्ये तु नारीणां कुङ्कुमोदर सन्निभम् ।
लाञ्छनं दृश्यते यस्या प्रशस्ता सा निगद्यते ॥१९८॥

धान्यगन्धा च या नारी निम्बगन्धा च या भवेत् ।
वर्जनीया प्रयत्नेन यदिच्छेच्चिरजीवितम् ॥१९९॥

क्षीरगन्धां त्यजेत्कन्यां तथा च क्षारगन्धिनी ।
रक्तगन्धा च या नारी तां कन्यां वर्जयेत् सदा ॥२००॥

गोमूत्रहरितालाभ्यां गन्धो यस्याः प्रवर्त्तते ।
दुष्टगन्धा च या नारी वर्जनीयाः प्रयत्नतः ॥२०१॥

(तुम्बीपुष्पसमं गन्धा अथलाक्षासुगन्धिका ।
यस्या न प्रसते गर्भो दुर्भगा चैव जायते) ॥२०२॥

चम्पकाशोकपुष्पाणां यदि गन्धो भवेत्स्त्रियाः ।
सुभगा सा भवेन्नित्यं भर्तारं वशवर्त्तिनी ॥२०३॥

अन्यजन्मकृतं कर्म शुभं वा यदि वा शुभम् ।
सर्वं हि प्राप्यते येन[1] लक्षणैश्च विशेषतः ॥२०४॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने स्त्रीपुरुषयोः सामुद्रिकलक्षणाऽध्यायः ॥

अथ नामकरणम्

वसिष्ठः—

[2]नामकर्म दशमेऽथवाऽह्नि
द्वादशे शुचिषु वा विधीयते ।
स्वोच्चमित्रभवनस्थसद्ग्रहा–
स्तादृशैर्यदि विलोकिताः शुभाः ॥१॥-

---

१ सर्वोऽपि प्राप्यते तेन प्र. अ. ।

२ श्लोकोऽयं वसिष्ठसंहितायां नामकर्माध्याये न वर्तते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गुरुः—

दशाहे द्वादशाहे वा जन्मतोऽपि त्रयोदशे ।
षोडशैकोनविंशे वा द्वात्रिंशे वर्णतः क्रमात् ॥२॥

तदलाभे विधिज्ञेन विधिश्चिन्त्याऽप्रमादतः ।
नक्षत्रतिथिलग्नानां विचार्यैव पुनः पुनः ॥३॥

पौष्णार्कज्याजचित्रेन्दुविष्णुद्वयजलाधिपाः ।
उत्तरात्रय मूलाश्च प्रशस्ता नामकर्मणि ॥४॥

वैष्णवार्कवरुणोत्तरात्रयम्,
देववर्द्धकीपुनर्वसुद्वये ।
पौष्णमूलमृगवासवाजभे,
नामकर्म शुभदं जगुर्बुधाः ॥५॥

अत्र मृदु ध्रुवादि नक्षत्राणां नामज्ञानमाह दामोदरः—

रोहिण्युत्तरभंस्थिरं गिरिशमूलेन्द्रोरगं दारुणं,
क्षिप्रं चाश्विदिनेशपुष्यमनलेन्द्राग्नी तु साधारणम् ।
उग्रं पूर्वमघान्तकं मृदु मृगत्वष्ट्रान्त्यमैत्रं चरम्
विष्णुस्वातिशतोडुवस्वदितयः कुर्युः स्वसंज्ञाफलम् ॥६॥

क्षिप्रचरध्रुवमृदुभेषु कारयेज्जातकर्म नामापि ।
उदयेऽप्यवोक्त भानां गुरौ भृगौ चतुष्टयगे ॥७॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वसिष्ठः—

रिक्ता'ञ्च षष्ठीमपि पौर्णमासीं
भौमस्य वारञ्च तथा पराह्णम् ।
रात्रिं च हित्वास्य पिता गुरुर्वा,
संहृष्टचेताः खलु नाम कुर्यात् ॥८॥

गुरुः—

पक्षछिद्रां च नवमीं हित्वा पञ्चदशीं तथा ।
शेषास्यु स्तिथयः सर्वे नाम कर्मणि पूजिताः ॥९॥

नामकर्म पिता कुर्यात् सनाम्ना कीर्त्तितो भवेत् ।
नीचेस्तराशौ दृष्टे वा पापग्रहयुते पिवा ॥१०॥

नाम संकीर्त्तनं पुंसामपकीर्त्ति प्रदं नृणाम् ।
चरस्थिरध्रुवक्षिप्रनक्षेत्रे शुभवासरे ॥११॥

चन्द्रतारावलोपेते दिवसे च शिशोः पिता ।
उच्चस्थे ग्रहलग्ने वा दृष्टः स्वोच्चेऽथवा यदा ॥१२॥

नाम संकिर्त्तनं कुर्यात् सनाम्ना कीर्त्तितो भवेत् ।
बुध भार्गव जीवानामंशके दिवसोदये ॥१३॥

नाम संकीर्त्तनं कुर्या च्चिरजीवी भवेच्छिशुः ।
भास्करार्कजभौमानां वर्जयेदंशकोदये ॥१४

धनकर्मसुतभ्रातृनवमस्थः शुभः शशी ।
शुद्धे व्ययाष्टमे लग्ने पापाश्च त्रिषडायगाः ॥१५॥

१यथा क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शुभेषु शेषसंस्थेषु नामकर्म शुभावहम् ।

वसिष्ठः—

'त्र्यक्षरं वा चतुरक्षरं वा विवर्जयेच्चान्त्यलकाररेफम् ।
तन्मासनामादिकमेव चिन्त्यं स्फुटं वदेद्दक्षिणकर्णरन्ध्रे ॥१६॥

भगवान् गर्गः—

चैत्रादि मास नामानि वैकुण्ठोऽथ जनार्दनः ।
उपेन्द्रो यज्ञपुरुषो वासुदेवो हरिस्तथा ॥१७॥

योगीशः पुण्डरीकाक्षो कृष्णोऽनन्तोऽच्युतस्तथा ।
चक्रधारीति चैतानि क्रमादाहु मनीषिणः ॥१८॥

नारदः—

देशकालोपघाताद्यैः कालातिक्रमणे यदि ।
अनस्तगेज्ये च सिते तत्कार्यं चोत्तरायणे ॥१९।

कश्यपः—

आयषष्ठसहजेष्वशोभनाः सर्वगाः शुभतमाः शुभग्रहाः ।
सर्वशुद्धमथवाष्ठमव्ययं पुण्यवर्ग दिवसं विशिष्यते ॥२०॥

कर्म्मायधर्मसहजात्मगतः शशाङ्कः
शस्ते तिथौ तनुगते परिदृष्टयुक्ते ।
ओजे तिथौ च नवमीं प्रविहाय सर्वं
कुर्याञ्च नाम करणं परिपूर्ण पक्षे ॥२१॥

---

१ श्लोकोऽयं वसिष्ठसंहितायां नामकर्णाध्याये नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सूतकान्तेनामकर्म विधेयं स्वकुलोचितम् ।
नाम पूर्वोक्त मिष्येत मङ्गलैः सह माचरेत् ॥२२।

द्वादशे दशमे वापि जन्मनो दिवसे शुभम् ।
षोडशे विंशके चैव द्वात्रिंशे धर्मतः क्रमात् ॥२३॥

पूष्णश्रविष्ठ इत्युत्युक्तौ मध्याह्ना च विशेषतः [।]
अपराह्नं च रात्रिंच वर्जयेन्नामकर्मणि ॥२४॥

स्वोच्चस्वषड्वर्गगतग्रहाणां लग्नेऽथवा वीक्षणयुक्त राशौ ।
शुभग्रहाणां च विशेषतश्च नामानि कीर्ति शुभदं करोति ॥२५॥

तथाकृति नाम जनैः श्रुतेन विद्वद्भिरुत्साहपुरस्सरैश्च ।
वाग्भिः प्रशंसा हरमूर्तिराज्ञो भवेदसद्भिः श्रुतिमांश्च पापैः ॥२६॥

नामाखिलस्य व्यवहारहेतुः शुभावहं कर्मशुभाङ्गभूतम् ।
नाम्नैवकीर्तिं लभते मनुष्यस्ततः प्रशस्तं खलु नामकर्मः ॥२७॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने नामकरणाऽध्ययः ।

अथ कर्णवेधाऽध्यायः

व्यासः—

कार्तिके पौषमासे वा चैत्रे वा फाल्गुनेऽपिवा ।
कर्णवेधं प्रशंसन्ति शुक्लपक्षे शुभे दिने ॥१॥

शिशोरजातदन्तस्य मातुरुत्सङ्ग सर्प्पिणः ।
सूचिको वेधयेत्कर्णौ सूच्या द्विगुण सूत्रया ॥२॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हस्ताश्विनीस्वातिपुनर्वसौ च चित्रेन्दुतिष्ये श्रवणे च पौष्णे ।
चन्द्रेनुकूले गुरुशुक्रवारे कर्णौ च वेध्यावमरेज्यलग्ने ॥३॥

वसिष्ठः– [1]मासे षष्ठे सप्तमे चाष्टमे वा,
वेध्यौ कर्णौ द्वादशे षोडशेऽह्नि ।
मध्येचाह्नः पूर्वभागे न रात्रौ
नक्षेत्रे द्वे द्वे तिथी वर्जनीयौ ॥४॥

द्वितीया दशमी षष्ठी सप्तमी च त्रयोदशी ।
द्वादशी पञ्चमी शस्ता स्तृतीया कर्णवेधने ॥५॥

भूमिजार्कात्मजार्कानां दिवसान्परिवर्जयेत् ।
जीवेन्दुजेन्दु शुक्राणां दिवसाः परिपूजिताः ॥६॥

वसिष्ठः—

नक्रार्जसिंहालि विरिक्तलग्ने सूर्यारसौराह्निकवर्जिते च ।
पक्षे सिते चन्द्रवले प्रवृद्धे पुर्वाह्लकाले शिशुकर्णवेधः ॥७॥

नकश्चिदिष्टोऽष्टम राशिसंस्थ स्तिथिद्वयञ्चावमसंज्ञकंच ।
न तत्र[2] कुर्याद्दिवसैव कार्यं रात्रौ नकुर्यात् खलुकर्णवेधम् ॥८॥

सुवर्णं राजपुत्रस्य रजतं विप्र वैश्ययोः ।
शूद्रस्य चायसी सूची मध्यमाष्ठाङ्गुलात्मिका ॥९॥

शातकुम्भमयी सूची वेधने शोभनप्रदा ।
सम्पूज्य देवं दैवज्ञं भिषजं श्रेष्ठमेव च ॥१०॥

---

१ वसिष्ठसंहितायां कर्णवेधप्रकरणमेव नास्ति । २ नक्षत्र क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रीपतिः—

पौष्णवैष्णवकराश्विनिचित्रा,
पुष्यवासवपुनर्वसुमैत्रे ।
ऐन्दवे श्रवणवेधविधानं,
निर्दिशन्ति मुनयो हि शिशूनाम् ॥११॥

पुष्ये धनिष्ठास्वदितौ हरीन्दु –
त्वाष्ट्रेकरान्ते तिसृषूत्तरासु।
दस्त्रेच मैत्रेषु च कर्णवेधः,
शुभप्रदो व्यर्कजवासरेषु ॥१२॥

गोमीनमिथुनकन्याश्च कर्किचापतुलास्तथा ।
कर्णवेधं प्रशंसन्ति भृगुजे मध्यमे तथा ॥१३॥

कर्णवेधेषु कार्येषु नेष्टा सर्वाष्टमस्थिताः ।
उक्तेष्वेव विधानेन कुर्यात्कर्णस्य वेधनम् ॥१४॥

धनसहजसुतस्त्री धर्मलाभेषु चन्द्रः
क्षितिसुतरविमन्दा भ्रातृषष्ठचायसंख्याः ।
भृगुबुधसुरमन्त्रिर्भ्रातृवित्तायधर्म
व्यय दशमसमेतं शस्यते लग्नगं वा ॥१५॥

छिद्रे नवकृते पूर्वं लाञ्छितः सूचिधारिते ।
वेदना निग्रहं कृत्वा बंधयेद्धस्त कौशलाः ॥१६॥

शातकुम्भमयि सूचि वेधने शोभनप्रदा ।
राजती चायसी वापि यथा विभवतः शुभम् ॥१७॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सम्पूज्य देवं दैवज्ञं भिषजां श्रेष्ठमेव च ।
विदुषो ब्राह्मणांश्चैव कर्मकारं तथैव च ॥१८॥

इति कर्णं वेधः

अथ निष्क्रमणम् भविष्यपुराणे —

द्वादशेऽहनि राजेन्द्र शिशोर्निष्क्रमणं गृहात् ।
चतुर्थे मासि कर्त्तव्यं तथान्येषां मतं विभो ॥१९॥

यमः —

ततस्तृतीये कर्त्तव्यं मासि सूर्यस्य दर्शनम् ।
चतुर्थे मासि कर्त्तव्यं शिशोश्चन्द्रस्य दर्शनम् ॥२०॥

गुरुः —

जीवभार्गवसौम्यानां शिशुनिष्क्रमणक्रिया ।
दिवसे शस्यते नित्यं आयुर्वृद्धि धनप्रदा ॥२१॥

अश्विनी रेवती हस्तो धनिष्ठा रोहिणी तथा ।
श्रवणं पुष्यसंयुक्तं मृगेनोत्तरफल्गुनी ॥२२॥

अनुराधोत्तराषाढा तथाचैव पुनर्वसू ।
इमानि भानि शस्तानि शिशुनिष्क्रमणे विधौ ॥२३॥

इति निष्क्रमणम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथाऽन्नप्राशनम्

वसिष्ठः —

युग्मेषु मासेषु च षट्सु पुंसां,
संवत्सरे वा नियतं शिशूनाम्।
अयुग्म मासेषु च कन्यकानां
नवान्न संप्राशनमिष्टमेतत् ॥२४॥

गुरुः —

मासे षष्ठेऽथवा सौरे चाष्टमे दशमेऽपिवा।
द्वादशे वा परं विद्वान् युग्मेषु शिशुजन्मतः ॥२५॥

नारदः—

रिक्तां दिनक्षयं नन्दां द्वादशीमष्टमीमिमाम्।
त्यक्त्वान्य तिथयः श्रेष्ठाः प्राशने शुभ वासराः ॥२६॥

वसिष्ठः—

[1] बालान्न भोजनविधौ गुरुशुक्र मौढ्यं
मास प्रयुक्त मशुभं त्वधिमासिदोषः।
नास्त्यत्र सावन विधा विह मासिषष्ठे,
युग्मे च मासिपरतः सित चन्द्रपक्षे ॥२७॥

बालान्नभुक्तौ वृतबन्धने च
राजाभिषेके खिलजन्मधिष्ण्यम्।
शुभं त्वनिष्टं सततं विवाह,
सीमन्तयात्रादिषु मङ्गलेषु ॥२८॥

१ श्लोकोऽयं वसिष्ठसंहितायां अन्नप्राशनाध्याये नो विद्यते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नारदः—

पट्टबन्धनचौलान्न प्राशने चोपनायने ।
शुभदं जन्मनक्षत्रमशुभं त्वन्यकर्मणि ॥२६॥

पञ्चपर्वसु रिक्तायां नन्दायामाद्यभोजनम् ।
शिशोर्बलादिकं हन्ति सप्तम्यां चेति केचन ॥३०॥

गुरुः—

पक्ष छिद्रा च नवमीं यत्नेन च विवर्जयेत् ।
रविभौमार्कि वारांश्च बुद्धिमानन्नकर्मणि[1] ॥३१॥

वसिष्ठः—

छिद्रांतिथीं प्रतिपदञ्च हित्वा
शुक्रशशीन्दुजसूरिदिनेषु ।
मेषवृषालिविर्वाजित लग्ने,
बालकभोजनकालमिहाहुः ॥३२॥

शुभग्रहाणां भवने विलग्ने
तदंशके पूर्वदिने दलस्य ।
पूर्णेन्दु वारेप्यथवा विलग्ने
नवांशके वा प्यथवा बलिष्ठे ।-१०॥

१ अन्नप्राशन कर्मणि ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ननैधनं कर्म विशुद्धियुक्ते
दोषे विहीने शुभदृष्टि युक्ते ।
नोत्पातपापग्रहदूषितर्क्षे,
वैनाशिकाद्यर्क्ष विवर्जिते च ॥३४॥

नारदः—

राशयः सकला श्रेष्ठाः शुभग्रह निरीक्षिताः ।
राशिस्वभावजं हित्वा फलं ग्रहजमाप्नुयात् ॥३५॥

वसिष्ठः—

[1]विष्णुरूष्ण किरणो हिमरश्मि –
र्वायुमित्रवरुणादितिचित्राः ।
अश्विवतिष्यवसुपौष्णभरोहि –
ण्युत्तराश्च शिशुभोजनताराः ॥३६॥

[2]शुभा शुभेषु त्रिधनायकेन्द्र
त्रिकोणकेष्वाय रिपु त्रिगेषु ।
नषष्ठरिस्फाष्ट गते हिमांशौ
बालान्नभुक्तिः शुभदा च तेषाम् ॥३७॥

व्यासः—

व्ययारिकर्ममृत्युस्थश्चन्द्रोनेष्टः सितासिते ।
स्वबन्धु धर्मपुत्रास्तस्थाने शुक्रः शुभावहः ॥३८॥

---

१ एष वसिष्ठ संहिताया अन्नप्राशनाध्याये नास्ति ।

२ श्लोकोऽयं व. सं. २७ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वसिष्ठः—

कुष्ठी लग्नगते सूर्ये क्षीणे चन्द्रे च भिक्षुकः ।
सत्रदः पूर्णचन्द्रे च कुजे पित्तरुगार्दितः ॥३९॥

बुधे ज्ञानी गुरौ भोगी दीर्घायुर्भाग्यवान् सिते ।
वातरोगी शनौ राहौ केतौ चान्न विर्वाजितः ॥४०॥

सम्पूर्णेन्दूभयाष्टम्योर्मध्येन्दुः पूर्ण संज्ञकः ।
नष्टेन्दूभयाष्टम्योर्मध्येऽसौ क्षीण संज्ञकः ॥४१॥

षष्ठयष्टमान्त्यगश्चन्द्रो भोक्तुश्च निधनप्रदः ।
केन्द्रः त्रिकोणगोमन्दस्तस्यान्नमपहारकः ॥४२॥

केन्द्रद्वित्रिसुतायधर्म्मसहितो जीवः शुभो नान्यगः ।
शुक्रोऽप्यष्टमगो व्ययास्त रिपुगो नेष्टोऽन्यगः शोभनः ।
आद्यं कर्म नवांशगो व्ययकरो दोषे स्थितः स्याच्छुभ—
श्चन्द्राऽन्त्याष्टनवारिलग्न धनगो भोक्तुः सदा मृत्युदः ॥४३॥

पापास्त्रिषष्ठायगताः शुभानि
कुर्वन्ति भोक्तुं विदधाति नूनम् ।
केन्द्रत्रिकोणव्ययगाश्च पापा
भयाय रन्ध्रोपगताश्च मृत्युः ॥४४॥

कश्यपः—

गोश्विकुम्भतुलाकन्याः सिंहकर्कि मृगोदयाः ।
शुभदा राशयः सप्त न मेषझषवृश्चिकाः ॥४५॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गुरुः—

सहजस्वपुत्रयुवतिधर्मबन्ध्वायगस्तथा ।
शुभं दद्यान्निशानाथः शिशोर्भोजनकर्मणि ॥४६॥

व्ययारिमृत्युधर्मस्थः पीडां दद्याच् शिशोः शशी ।
लग्नकर्मगतश्चन्द्रो भोजने मरणप्रदः ॥४७॥

रत्नकोशे —

कुष्ठी लग्नगते र वौ क्षितिसुते स्यात्पित्तरोगार्दिते
वातार्तो दिन कृत्सुतेन शशिना क्षीणेन भिक्षाटनः ।
ज्ञानी चद्रसुतेन शुद्ध वपुषा शुक्रेण भोगान्वितो
दीर्घायुर्गुरुणेन्दुना च महता यज्वा च सत्रप्रदः ॥४८॥

चन्द्रे शुभांशे त्रिदशेशपूज्ये
केन्द्रत्रिकोणे यदि वा सुरेज्ये ।
योगोऽयमेवं नवभोजने तु
कान्ति च पुष्टि च सुखं च कुर्यात् ॥४९॥

अन्नमूलमिदं सर्वमन्नेन जगतः स्थिति ।
रूपं सत्वं बलं तेजो सर्वमन्नेन वर्द्धते ॥५०॥
तस्मात्सम्यक् परीक्षैव कर्त्तव्यं शुभमिच्छता ।

वर्णप्रसूनादि फलोपभुक्तौ,
सौवर्ण कांस्यादि नवेप्यमत्रम् ।
शुद्धाङ्गरक्षादिषु नूतनेषु
बालान्नभुक्ताविव काल उक्तः ॥५१॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गजहयरवरपूर्व भोजनेषु
नरपतिभिर्वहुमान्यजाति भुक्तम् ।
कथितमखिलं विचिन्तनीयं
परतन दैव विदान्य दैवमूह्यम् ॥५२॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने कर्णवेध– अन्नप्राशनाऽध्यायः ।

अथ चौलम्

गुरुवसिष्ठवचनानि—

गृहनिर्माणमुदधिस्नानं चौलं सुतस्य तु ।
तीर्थयात्रां नरवश्मश्रु नकुर्याद्गर्भिणी पतिः ॥१॥

पुत्रचूडा कृतौ[१] माता गर्भिणी यदि वा भवेत् ।
विपद्यते गुरुश्चैव दम्पती चतुरब्दतः ॥२॥

गर्भिण्यां मातरी शिशोश्चौलं सूनोर्नकारयेत् ।
शताभिषेकेऽप्येवं स्यात् काले वेदव्रतेष्वपि ॥३॥

गालवः—

दहनं पवनं चैव चौलं च गिरिरोहणम् ।
नावमारोहणं धीमान् नकुर्यात् गर्भिणी पतिः ॥४॥

[२]सर्वेषामेव वर्णानां चूडाकर्म विधिः स्मृतः ।
केशमूलं पिता ज्ञेया केशाग्रे जननी तथा ॥५॥

---

१ पुत्रचूडाकर्मणि । २ श्लोकोऽयं प्र. क. पुस्तकयोर्नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मनुः—

चूडाकर्म द्विजातीनां सर्वेषामेव कर्मतः ।
प्रथमेऽब्दे तृतीये वा कर्त्तव्यं श्रुति चोदनात् ॥६॥

ततः सम्बत्सरे पूर्णे चूडाकर्म विधीयते ।
द्वितीये वा तृतीये वा कर्त्तव्यं श्रुति चोदनात् ॥७॥

लौगाक्षिः—

तृतीयस्य वर्षस्य भूयिष्ठे गते चूडां कारयते। दक्षिणतः कमुजावसिष्ठा नामुभयगोऽत्रिकश्यपानां मुण्डाभृगवः। पञ्च चूडा अङ्गिरसः । वाजिमेके मङ्गलार्थं शिखिनोऽन्ये यथा कुलधर्मं वा शुद्ध पक्षस्यपुण्याहे पर्वणि चेति । कमुजा—चूडा । वाजिः—केशपङ्क्तिः । यथा गृह्यव्यवस्था ।

व्यासः[1]:—

अश्विनीश्रवणस्वाति चित्रापुष्यपुनर्वसु ।
धनिष्ठारेवतीज्येष्ठामृगहस्तेषु कारयेत् ॥८॥

क्षौरमितिशेषः—

नक्षत्रे तु न कुर्वीत यस्मिञ्जातो भवेन्नरः ।
नप्रौष्ठपदयोः कार्यं नैवाग्नेये च भारतः ।
दारुणेषु च सर्वेषु दुष्टतारां च वर्जयेत् ॥९॥

अथ स्त्री संस्काराः—

अमन्त्रिका तु कार्येयं स्त्रीणामावृतशेषतः ।
संस्कारार्थं शरीरस्य यथाकालं यथाक्रमम् ॥१०॥

---

१ च्यवनः—क ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आवृत्=बाल कर्म क्रिया[१] ।। यथा क्रममित्यभिधानात् । कालातिक्रमो नकर्तव्यः। अतिक्रमे प्रायश्चित्तमाह कात्यायनः—

देवतानां विपर्यासे जुहोतिषु कथं भवेत्।
सर्वप्रायश्चित्तं हुत्वा क्रमशो जुहुयात्पुनः ।।११।।

संस्कारा अतियुज्येरन् स्वकाला[२]च्चेत्कथञ्चन ।
हुत्वैतदेव कर्तव्या वेरूपनयनादयः ।।१२।।

प्रायश्चित्तं च पञ्चभिः प्रत्यृचं त्वन्नो अग्ने, इति, द्वाभ्यामयाश्चाग्ने श्चेति येते शतमुदुत्तममिति चेति ।।

नारदः—

तृतीये पञ्चमेऽब्दे वा स्वकुलाचारतोऽपि वा ।
बालानां जन्मतः कार्यं चौलमावत्सरान्तरात् ।।१३।।

सौम्यायने नास्तगयोरसुरामरमन्त्रिणोः ।
अपर्वरिक्तातिथिषु शुक्रेज्यज्ञेन्दुवासरे ।।१४।।

दस्रादितीज्यचन्द्रेन्द्रपौष्णभानि शुभानि तु ।
चौलकर्मणि हस्तर्क्षान्त्रीणित्रीणि च विष्णुभात् ।।१५।।

पट्टबन्धनचौलान्नप्राशनेचोपनायने ।
शुभदं जन्मनक्षत्रमशुभं त्वन्यकर्मणि ।।१६।।

अष्टशुद्धि समायुक्ते शुभलग्ने शुभांशके ।
न नैधनेभे शीतांशौ षष्ठाष्टान्त्यविर्वाजते ।।१७।।

१बालक्रिया प्र. । २अकाला प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गुरुः—

तृतीयेऽब्दे शिशोर्गर्भात् जन्मतो वा विशेषतः :
पञ्चमे सप्तमे वापि स्त्रियः पुंसोऽथवा समे ।।१८।।

पुत्रचूडाकृतौ माता गर्भिणी यदि वा भवेत् ।
विपद्यते गुरुश्चैव दम्पती चतुरब्दतः ।।१९।।

गर्भिण्यां मातरि शिशो क्षौरं सूनो र्न कारयेत् ।
शताभिषेऽर्के प्येवं स्यात् कालो वेदव्रतेष्वपि । ।।२०।।

द्वादशीं चाष्टमीं रिक्तां षष्ठीं प्रतिपदन्तथा ।
हित्वा शेषासु तिथिषु चौलकर्म शुभावहम् ।।२१।।

पराशरः—

पञ्चमी सप्तमी चैव दशम्येकादशी तथा ।
त्रयोदशी तृतीया च चौल कर्म शुभावहाः ।।२२।।

सितेज्यसौम्यवारेषु चौलं पक्षेद्वये हितम् ।
इन्दुवारे सितेपक्षे वाराः शेषा न शोभनाः ।।२३।।

पौष्णचित्राश्विनीपुष्य श्रवणादित्यवासवाः ।
हस्तो मृगशिरश्चैव ताराः स्युर्नव शोभनाः ।।२४।।

उत्तरातृतयं स्वाती वारुणं ब्राह्मदैवतम् ।
मध्यानि षडतोऽन्यानि चौलेधिष्ण्यानि वर्जयेत् ।।२५।।

वृषकर्कटकश्चैव धनुः कन्या तुलाधरः ।
मिथुनश्चैव मीनश्च क्षौरकर्मसु पूजिताः ।।२६।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गुरुः—

हस्ताश्विविष्णुपौष्णाश्च श्रविष्ठादितिपुष्यकाः ।
सौम्यचित्रे[1] नवक्षौरेऽप्युत्तमा नव तारकाः ॥२७॥

त्रीण्युत्तराणि वायव्ये रोहिणी वारुणा स्तथा ।
क्षौरे षण्मध्यमाःप्रोक्ताः शेषा द्वादश वर्जिताः ॥२८॥

अर्धोत्तरपरे[2] द्वे द्वे प्राजापत्यं परं च यत् ।
ऐन्द्र वारुण वायव्याः प्रशस्ता क्षौरकर्मणि ॥२९॥

एतेवात्यु स्त्रितारा:स्युः पुनश्चूडादिकर्मणि
श्मश्रु रोम नखादिनां शोधनेऽन्यत्समं द्वयोः ॥३०॥

नक्षत्राणां तथैतेषां नव क्षौरेण चानने ।
अश्विन्यां तुष्टिमाप्नोति भरण्यां मरणं भवेत् ॥३१॥

कृत्तिकासु क्षयो रोगो रोहिण्यां रोगनाशनम् ।
सौभाग्यबुद्धिः[3] सौम्ये स्यात् रौद्रे चित्तस्य तापनम् ॥३२॥

पराक्रमः पुनर्वस्वोः पुष्ये मानार्थसिद्धयः ।
सार्प्ये शरीरपीडा स्यात् धननाशश्च पैतृभे ॥३३॥

व्याधयो वहवो भाग्ये फाल्गुने रोगनाशनम् ।
तेजोभिवृद्धिर्हस्ते स्यात् सौभाग्यं त्वाष्ट्रभे भवेत् ॥३४॥

स्वात्यां दुःखविनाशः स्यादैन्द्राग्ने वित्तनाशनम् ।
मैत्रमन्त्र विनाशः स्यात् ज्येष्ठायां भूमिनाशनम् ॥३५॥

१सौम्यमूलं प्र. । २आर्द्रोत्तरपरे अ. क. । ३सौभाग्यशुद्धिः प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

समूलनाशनं मूले पूर्वाषाढेऽपि मूलवत् ।
सौम्यवच्चोत्तराषाढे वैष्णवे रुपशोभनम् ॥३६॥

वसुभे ह्यायुषो वृद्धिर्वारुणे बलवर्द्धनम् ।
पूर्वाप्रौष्ठपदे मृत्युरहिर्बुध्ने सुखावहम् ॥६७॥

पौष्णे स्यान्महती वृद्धिर्नव क्षौरफल क्रमात् ।
जन्माष्टमौ विधौ याते चौलमायुः क्षयाय च ॥३८॥

तस्माज्जन्माष्टमं वर्ज्यं सर्वदा क्षुर कर्मणि ।
सोमवारः सितेपक्षे पूज्यः कृष्णेऽति गर्हितः ॥३९॥

दशपञ्चान्त्यकतिथौ कृष्णपक्षे त्रिधा कृते ।
अशुभं चान्त्यभागे स्यात् पूर्वभागद्वये शुभम् ॥४०॥

अन्त्यभागेऽपि सत्कर्मंरभेचन्द्रं शुभावहम् ।
बुधवारोऽशुभः प्रोक्तः पापग्रहयुते बुधे ॥४२॥

अस्तग्रहणां वर्गश्च तादृग्वर्गगतः शशी ।
पापग्रहाणां वर्गश्च वर्ज्याः क्षौरे विशेषतः ॥४२॥

पापग्रहणां वारादौ विप्राणां तु शुभो र वेः ।
क्षत्रियाणां क्षमासूनो विंट्शुद्राणां शनेः शुभः ॥४३॥

अर्कोदयः प्रशस्तः स्यात् विप्राणां क्षुरकर्मणि ।
भौमोदयः क्षत्रियाणां विट् शूद्राणां यमोदयः ॥४४॥

चन्द्रोदयो गणानां तु प्रशस्तः क्षुरकर्मणि ।
तत् तत्सम्बन्धिनो वर्गाः शुभाःस्युश्चौलकर्मणि ॥४५॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अष्टमस्था ग्रहाः सर्वे नेष्टाः शुक्रविवर्जिताः ।
शुक्रश्च निधने क्षौरे सर्वसम्पद्प्रदः शिशोः ॥४६॥

क्षौरे स्मरस्थौ भौमार्क्कौ मृत्युदौ नियतं शिशोः ।
कुम्भः कुलविनाशाय कथितः क्षुरकर्मणि ॥४७॥

शुभैर्युक्ताः शुभैर्दृष्टा यद्येतेऽति शुभा ग्रहाः ।
शुभैर्युक्तोऽपि दृष्टोऽपि न शुभः कुम्भभृत्सदा ॥४८॥

क्षौरे द्वितीयेऽप्यन्येपि श्मश्रुकर्मणि सर्वदा ।
यमारार्कांशके लग्ने द्रेक्काणे दिवसे तथा ॥४९॥

काल होरोदये चैव क्षुरमायुः क्षयावहम् ।
सितेन्दु जीव सौम्यानामंशके दिवशोदये ॥५०॥

होराद्रेक्काणलग्ने च चूडाकर्मातिशोभनम् ।
राहुकेतू स्मरस्थाने सर्वकार्यविनाशनौ ॥५१॥

दर्शेऽष्टम्यां प्रतिपदि मांसस्त्रीतैलसेवनात् ।
चतुर्दश्यां तथाष्टम्यां चाण्डालो जायते नरः ॥५२॥

शतवर्षं भवे न्नृणामर्वाक्मृत्युर्जिघांसति ।
कुर्वन्ति काले ये क्षौरं ते त्यजेयुः प्रयत्नतः ॥५३॥

त्रिकोणे कण्टके वापि सत्कर्मनिरते विधौ ।
गुरुर्वातिबली प्रोक्त श्चौलयोगः शुभावहः ॥५४॥

गुरुर्भृगुर्वा चन्द्रो वा शुभांशस्थो बलान्वितः ।
लग्नादुपचये क्रूरा श्चौलयोगाः शुभावहाः ॥५५॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मीने शुक्रेण संयुक्ते भवे भानौ चतुष्टये ।
गुरौ यातेऽथवा योगः शुभदश्चौलकर्मणि ॥५६॥

घटे सशुक्रे लग्नस्थे सबुधे व्ययगे रवौ ।
त्रिकोणगे गुरौ चन्द्रे चूडायोगोयमुत्तमः ॥५७॥

मीने मेषे वृषे लग्ने ससिते भवगे[1] रवौ ।
बुधोदये वा योगाः स्युश्चूडाकर्मणि शोभनाः ॥५८॥

यमे कर्किणि सिंहे च ससिते भृगुजे बुधे ।
रवौ भवे व्यये वापि योगश्चौले शुभावहः ॥५९॥

भवे व्ययोदये भानुबुधशुक्रा यदा स्थिताः ।
चन्द्रे शुभांशगे केन्द्रे चूडायोगः शुभावहः ॥६०॥

त्रिषडायेषु पापेषु शुभाः केन्द्रत्रिकोणयोः ।
एको द्वौ त्रि[2]र्यथा लाभं चूडायोगः शुभावहः ॥६१॥

च्यवनः—

नैधने जन्मनक्षत्रे वैनाशे चन्द्रमाष्टमे ।
विपत्करे व्यये क्षौरं प्रत्यरेऽपि विवर्जयेत् ॥६२॥

कालविधाने—

वर्षेतृतीये प्यथपञ्चमे वा गते त्रिभागेषु वदन्ति चौलम् ।
उदग्गतेऽर्के गुरुशुक्रतेजः प्रकाशिते व्योम्नि च शुक्लपक्षे ॥६२॥

---

१ भवने श्र. । २ त्रयः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अत्रिः—

तृतीयवर्षं चौलं सर्वकामार्थसाधकम् ।
संवत्सरे तु चौलेन आयुष्यं ब्रह्मवर्च्चसम् ॥६३॥

पञ्चमे पशुकामस्य युग्मे वर्षेतु गर्हितम् ।
अब्दायनर्तुमासान्ते पक्षान्ते च दिन त्रये ॥
कृष्णपक्षे कृतं क्षौरं देहारोग्यं न विद्यते ॥६४॥

भरद्वाजः—

संपदं कुरुते चन्द्रः क्षौरकाले तु लग्नगः ।
क्षौरकर्मणि जामित्रे भास्करे नैव कारयेत् ॥६५॥

स्त्रीणां चौले लग्नचन्द्रः शुभदः सितपक्षकः ।
इति गुरुवचनात्, स्त्रीणां चूडाकरणविषये नतु बालकस्य
जन्मराश्युदये षष्ठे द्वादशे निधने तथा ।
शत्रुक्षेत्रे च नीचे च क्षौरं नैव समाचरेत् ॥६६॥

प्रसङ्गात् – सामान्य क्षौरमाह वसिष्ठः—

हस्तत्रये पुष्यपुनर्वसौ च
शशांकविष्णुत्रितयेऽश्विनीषु ।
पौष्ण्येन्द्रधिष्ण्ये क्षुरकर्मशस्तं
व्यर्कारशन्यंशकवारलग्ने ॥६७॥

गुरुः—

राजकार्यंनियुक्तानां नटानां रूपजीविनां ।
श्मश्रुरोमनखच्छेदे नास्ति कालविधिर्नृणाम् ॥६८॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रात्रौ प्रवेशे प्रस्थाने संध्ययोश्च विवर्जयेत् ।
विवाहे पञ्चमाहे च दशाहे मृतसूचके ॥६९॥

वृतान्ते[1] निकृते यज्ञे[2] सीमन्ते राजदर्शने ।
सद्यक्षौरं प्रकुर्वीत न तु रङ्गोपजीविनाम् ॥७०॥

दर्शे च पौर्णमास्यां च द्वादश्यां सोमपः शुभम् ।
अस्यैव रात्रौ कर्तव्यमन्यत्र तु विवर्जयेत् ॥
अन्तर्वत्न्यां च जायायां क्षौरं कुर्वन् विनश्यति ॥७१॥

गर्गः—

भानुरायुः क्षपयति मासं सप्त शनैश्चरः ।
भौमो मासाष्टकं हन्ति ज्ञोयच्छेत् पञ्चमासकम् ॥७२॥

सप्तमासं ददातीन्दुः सुरेज्यो दशमासकम् ।
एकादश कविर्दद्यात् कृते तु क्षौरकर्मणि ॥७३॥

षट्क्षौरतः कृत्तिकासु मघायां क्षौरपञ्चकात् ।
क्षौरत्रयान्मैत्रभे तु चतुः क्षौरात्तु त्र्युत्तरे ॥
क्षौराष्टकेन रोहिण्यां मृत्युमाप्नोत्यसंशयः ॥७४॥

भरद्वाजः—

उक्तर्क्षे राजभिः कार्यं पञ्चमे पञ्पमेऽहनि ।
उक्तर्क्षाणामलाभे तु तत्तद्भाख्यं मुहूर्त्तके ॥७५॥

---

१ जनान्ते प्र. । २ युक्ते क. प्र ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नारदः—

[1]अभ्यङ्गवत् प्राक् फलेनान्तर्वत्नीभर्त्तु भवांहसे ।
नोत्कटै भूषितेनैव याने नैवावमेऽह्नि च ॥७६॥

क्षौरकर्म महीशानां पञ्चमे पञ्चमे हनि ।
कर्तव्यं क्षौरनक्षत्रे तद्वारे तन्मुहूर्त्तके ॥७७॥

नृपविप्राज्ञया यज्ञे मरणे बन्धमोक्षणे ।
उद्वाहेऽखिलवारर्क्षे तिथिषु क्षौरमिष्टकम् ॥७८॥

भरद्वाजः—

अनाचारात्तथाऽन्यायादकाले क्षौरकर्मणः ।
अमङ्गलात्तथालस्यान्मृत्युर्मर्त्यान् समाप्नुयात् ॥७९॥

निषिद्ध तिथि वारादौ भोजनानन्तरं च यः ।
क्षौरं करोति तद्गेहे नाश्नन्ति पितरः स्वधा[2] ॥८०॥

भुक्तिक्रियोत्तरं[3] कालं क्षौरकर्म करोति यः ।
क्रिमिभक्षो भवेत्सोऽपि यावच्चन्द्रदिवाकरौ ॥८१॥

आयुर्वर्धनमारोग्यं सौख्यंतेजोबलं धृतिः ।
जायन्ते च शुभे क्षौरे नश्यन्त्यशुभकालगे ॥८२॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने चूडाकरणाऽध्यायः

---

१ अभ्यक्ते सन्ध्ययोर्नान्ते निशि भोक्तुर्न चाहवे । नोत्कटे भूषिते नैव न याने नवमेऽह्नि च ॥ २ सुरा. अ. क. । ३ भुजिक्तियोत्तरं अ.क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथाक्षरस्वीकारः

वसिष्ठः—

उदग्गते भास्वति पञ्चमाब्दे प्राप्तेऽक्षरस्वीकरणं शिशूनाम्
सरस्वती विघ्न विनायकञ्च गुडौदनाद्यैरतिपूज्य कुर्यात् ॥१॥

मरीचिः—

उत्तरायणगे सूर्ये गुरौ शुक्रे प्रकाशिते ।
अर्वाङ्मध्य दिने शुक्ले वर्णग्रहणमुत्तमम् ॥२॥

कालविधाने—

हस्तादित्य समीर पौष्णपुरजिन्मित्राश्विचित्रायुते-
ष्वारार्कांशदिनोदयादिरहिते राशौ चरे भोदये ।
पक्षे पूर्णनिशाकरे प्रतिपदं रिक्तां विहायाष्टमीम्
षष्ठीमष्टमशुद्धिभाजि भवने प्रोक्ताक्षर स्वीकृतिः ॥३॥

मार्कण्डेयः—

अभ्यङ्गस्नानपूर्वं तु गन्धाद्यैश्च विभूषितम् ।
शुक्लवस्त्रं समास्तीर्य तण्डुलोपरिपूजयेत् ॥४॥

प्राप्तेतु पञ्चमे वर्षे असुप्ते च जनार्दने ।
षष्ठीं प्रतिपदञ्चैव वर्जयित्वा तथाष्टमीम् ॥५॥

रिक्तां पञ्चदशीं चैव सौरीभौमदिने तथा ।
एवं सुनिश्चिते काले विद्यारम्भं तु कारयेत् ॥६॥

पूजयित्वा हरिं लक्ष्मीं देवीं चैव सरस्वतीम् ।
सुविद्या सूत्रकारांश्च स्वांविद्याञ्च विशेषतः ॥७॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एतेषामेव देवानां नाम्नापि जुहुयात् घृतम् ।
दक्षिणाभिर्द्विजेन्द्राणां कर्त्तव्यं चात्र पूजनम् ॥८॥

प्राङ्मुखो गुरुराशीनो वरुणाशामुखं शिशुम् ।
अध्यापयीत प्रथमं द्विजाशीर्भिः प्रपूजितम् ॥९॥ इत्यक्षर स्वीकारः ॥

अथाङ्कुरार्पणविधिः । नारदः—

कर्त्तव्यं मङ्गलस्यादौ मङ्गलायाङ्कुरार्पणम्[1] ।
नवमे सप्तमे वापि पञ्चमे दिवसेऽपि वा ॥१०॥

तृतीये बीजनक्षत्रे शुभवारे शुभोदये ।
सम्यक् गृहाण्यलङ्कृत्य[2] वितान ध्वज तोरणैः ॥११॥

आशिषो वाचनं कार्यं पुण्यं पुण्याङ्गनादिभिः ।
सह वादित्रनृत्याद्यै[3]र्गत्वा प्रागुत्तरां दिशम् ॥१२॥

तत्र मृत्सिकतां श्लक्ष्णां[4] गृहीत्वा पुनरागतः ।
मृन्मयेष्वथवा वैणवेषु पात्रेषु पूरयेत् ॥
अनेकबीजसंयुक्तं तोयपुष्पोपशोभितम् ॥१३॥

वशिष्ठः—

शशाङ्कतोयेशकरार्यमित्रध्रूवांवूपैत्रे वसुदैवतेषु ।
उद्यानवाप्यादितडागकूपकार्याणि सिद्ध्यन्ति जलोद्भवं यत् ॥१४॥

शौनकः—

आधाने गर्भसंस्कारे जातकर्मणि नाम च ।
हित्वान्यत्र विधातव्यं मङ्गलाङ्कुरवापनम् ॥१५॥

---

१ मङ्गलायां क्षुरार्पणम् प्र. । २ गृहानलंकृत्य प्र. ।
३ नृत्यौघै प्र. । ४ शुक्लं प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रदोषकाले कुर्वीत पूर्व्वाह्ले वा न रात्रिषु ।
वास्तुकर्मणि काले च स्याद् दिवैवाङ्कुरार्पणम् ॥१६॥

कालविधाने—

हस्तस्वातिविरिञ्च्यासुरपितृमुरजिन्मित्रपौष्णार्यसार्प्य
यादोनाथोत्तरासुत्रिय्ययुवतिधनुर्वृश्चिकान् भद्ररिक्ते ।
हित्वा पर्वासुरेज्यामरगुरुशशिविद्वारलग्नांशके स्या –
दुक्ततौ बीजवापं तुदशिरमदयावष्टमे शुद्धियुक्ते ॥१७॥

आत्यन्तिकेषु कार्येषु कार्यं सद्योऽङ्कुरार्पणम् ।
अङ्कुरं चान्यमासेषु सौरे यद्यर्थनाशनम् ॥१८॥

इत्यङ्कुरार्पणविधिः ॥

वसिष्ठः—

व्रतबन्धः

श्रुतिस्मृतिनां पदमुत्तमं द्विजस्तवुत्तमत्वं व्रतबन्ध लग्नतः ।
तस्मात् द्विजानां तदवाप्तिकारणं तल्लग्नशुद्धिकथयामि शास्त्रतः ॥१९॥

नारदः—

आधानादष्टमेवर्षे जन्मनो वाऽ ग्रजन्मनाम् ।
राज्ञामेकादशे मौञ्जीबन्धनं द्वादशे विशाम् ॥२०॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जन्मतः पञ्चमेवर्षे वेदशास्त्रविशारदः ।
उपनीतो यतःश्रीमान् कार्यं तत्रोपनायनम् ॥२१॥

बालस्य बलहीनोऽपि शान्त्या जीवो बलप्रदः ।
यथोक्तवत्सरे कार्यमनुक्ते नोपनायनम् ॥२२॥

दृश्यमाने गुरौ शुक्ले शारवेशे चोत्तरायणे ।
वेदानामधिपा जीवशुक्रभौमबुधाः क्रमात् ॥२३॥

शरद्ग्रीष्मवसन्तेषु व्युत्क्रमात्तु द्विजन्मनाम् ।
मुख्यं साधारणं तेषां तथा माघादिपञ्चसु ॥२४॥

स्वकुलाचारधर्मज्ञो माघे मासेऽथ फाल्गुने ।
विधिज्ञश्चार्थवांश्चैत्रे वेदवेदाङ्गपारगः ॥२५॥

वैशाखे धनवान् वेदशास्त्रविद्याविशारदः ।
उपनीतः कलाढ्यश्च[१] ज्येष्ठे विधिविदाम्बरः ॥२६॥

आषोडशाब्दात् सर्वेषामनतीतो महापदि ।
अतिषोडशको विप्रो नोपनेयः कदाचन ॥२७॥

क्षत्रियो विंशतेरुर्ध्वं नो वश्यपञ्चविंशतेः ।
मृगकुम्भगते भानौ मध्यमं मीननेषयोः
उत्तमं गोयभस्थेर्के ह्यधमं चोपनायनम् ॥२८॥

---

१ फलाढ्यश्च प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अत्रिः—

पराजितेऽति नीचस्थे नीचे शुक्रे गुरौ तथा ।
वृतिनां यदि कुर्वीत स भवेद् वेदवर्जितः ॥२९॥

वसिष्ठः—

नीचादिराशावतिनीचभागे पराजिते वापि गुरौ सिते वा ।
मौञ्जीव्रतं यस्य करोति नूनं सवेदशास्त्रस्मृतिधर्महीनः ॥३०॥

गुरुः—

एवं शुभेऽब्दे देवेज्ये जन्मकर्मव्ययारिगे ।
तृतीयबन्धुरन्ध्रैश्च विनान्यत्र शुभप्रदः ॥३१॥

विशेषाद् देवमन्त्री चेदशुभे गोचरे स्थितः ।
चापे मीने कुलीरे वा शुभदश्चोपनायने ॥३२॥

भरद्वाजः—

धनुर्मीनकुलीरस्थो जीवो जन्मान्त्यमृत्युगः ।
अतिसौख्यं वटोः कुर्याद् वासिष्ठवचनं यथा ॥३३॥

पराशरः—

पती सितेज्यौ विप्राणां नृपाणां कुजभास्करौ ।
वैश्यानां शशभृत्सौम्याविति वर्णाधिपाः स्मृताः ॥३४॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सदानुकूले चैकस्मिन् वर्णेशे बलशालिनि ।
ब्राह्मणादिःप्रकुर्वीत कुमारं वृतचारिणम् ॥३५॥

वशिष्ठः—

घर्मार्थलाभसुतमायगते सुरेज्ये मौञ्जीवृतं शुभकरंतु वटोःपितुश्च ।
जन्माष्टबन्धुरिपुरिःफनभस्तृतीयेदारिद्र्यशोकबहुरोगकरोद्विजन्मा॥३६॥

बन्धौ तृतीये रिपुराशिसंस्थे इच्छन्ति पूजां दशमे सुरेज्ये ।
नेच्छन्ति पूजां जनिगे व्ययस्थे पुरातना अष्टमगेऽपि सूरौ ॥३७॥

नारदः—

शाखाधिपतिवारश्च शाखाधिपबलं शिशोः ।
शाखाधिपतिलग्नञ्च दुर्लभं तृतयं वृते ॥३८॥

वशिष्ठः—

नैवोपनयनं कार्यं वर्णेशे दुर्वलेऽपि च ।
स्ववेदाधिपतौ कुर्याद् बलिष्ठे व्रतबन्धनम् ॥३९॥

गुरुः—

भृगोरङ्गिरसो मौढ्ये कर्तव्यं नोपनायनम् ।
तयोर्बाल्ये च वार्द्धक्येऽधिमासे दक्षिणायने ॥४०॥

ग्रहेषु शुभवारेषु सुवर्णे चोत्तरायने ।
संसर्प्याहस्पती मासौ विवर्ज्यौ शुभदाःपरे ॥४१॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कर्किसिंहाङ्गनाजूकं [1] मध्यमं क्षत्रवैश्ययोः ।
भानौ याते न विप्राणां चोपनायनको विधिः ॥४२॥

पूर्णःपक्षःशुभःप्रोक्तःकृष्णश्चान्त्यं विना त्रिकम् [2] ।
कृष्णपक्षे कृते त्र्यंशे त्रयोदश्यपि केचन ॥४३॥

द्वितीया पञ्चमी षष्ठी सप्तमी दशमी तथा ।
त्रयोदशी तृतीया च शुक्ले श्रेष्ठाः प्रचोदिताः ॥४४॥

द्वादश्यैकादशी चैव मध्यमास्तिथयस्तथा ।
कृष्णे चैव प्रशंसन्ति तिथयश्चोपनायने ॥४५॥

कृष्णे च प्रथमाःपूज्याःकदाचिच्छुभगे विधौ ।
चन्द्रे बलयुते लग्नाच् शुभभावे शुभेक्षिते ॥४६॥
चतुर्दशीं प्रशंसन्ति कुमारे वयसाधिके ।

नारदः—

शुक्लपक्षे द्वितीया च तृतीया पञ्चमी तथा ॥४७॥
त्रयोदशी च दशमी सप्तमी [3] व्रतबन्धने ।
आपञ्चम्यास्तु तिथयःपराः [4] स्युरतिनिन्दिताः ॥४८॥

वसिष्ठः—

विधातृगौरीफणिषण्मुखाद्रियमाः सकामास्तिथयः प्रशस्ताः ।
मध्येऽर्करुद्रेऽपि च ते प्रशस्ते सुहृत्स्वतुङ्गर्क्षगते शशाङ्के ॥४९॥

त्यक्त्वा चतुर्थीमपि कृष्णपक्षे त्वाद्यं त्रिभागं शुभदं वृते च ।
शस्ताःसितेज्येन्दुजवासरास्ते रवीन्दुवारौ खलु मध्यमौ तौ ॥५०॥

---

१ कर्कसिंह्यांगता ह्यर्कं प्र., कर्कसिंह्यागता ज्ञेयं क. । २ विनान्तिकम् प्र. ।
३ प्रशस्ता प्र. । ४ एताः प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्यासः—

द्वादश्यैकादशी चैव मध्यमं चोपनायने ।
प्रशस्ता प्रतिपत्कृष्णो कदाचिच्छुभगे विधौ ॥५१॥
नैमित्तिकमनध्यायं कृष्णप्रतिपदं दिनम् ।

मेखलाबन्धने प्रायश्चित्तार्थे मुनयो विदुः ॥
शेषेषु वर्जयेद् विद्वान् द्विजानामौपनायनम् ॥५२॥

या चैत्र वैशाखसिता तृतीया माघस्य सप्तम्यपि फाल्गुनस्य ।
कृष्णद्वितीयोपनये प्रशस्ताःप्रोक्ता भरद्वाज मुनीन्द्रमुख्यैः ॥५३॥

नारदः—

आचार्यसौम्यकाव्यानां वाराःशस्ताःशशीनयोः ।
वारौ मध्यफलौ प्रोक्तावितरौ निन्दितौ व्रते ॥५४॥

त्रिधा विभज्य दिवसं तत्रादौ कर्मदैविकम् ।
द्वितीये मानुषं कार्यं तृतीयेंशे च पैतृकम् ॥५५॥

गुरुः—

पापग्रहाणां वाराःस्यु र्न शुभाश्चन्द्रवासरः ।

सिते पक्षे प्रशस्त स्यात् कृष्णे वारो विधो र्नहि ॥५६॥

शुद्धो बुधो नाष्टमितो पापग्रहयुतो न च ।
त्रिषूत्तरेषु रोहिण्यां हस्ते मैत्रे च वासवे ॥५७॥

त्वाष्ट्रसौम्ये पुनर्वस्वोरुत्तमं ह्यौपनायनम् ।
वारुणे वैष्णवे पुष्ये वायव्ये पौष्णभे तथा ॥५८॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अश्विन्यां षट् शुभेषूक्तं मध्यमत्वं चतुर्मुखैः ।
शेशेषु वर्जयेद् विद्वान् द्विजानामौपनायनम् ॥५९॥

वैनाशिके त्रिजन्मर्क्षे नेष्टं भेषूपनायनम् ।
पूर्वोक्तेष्वपि ऋक्षेषु शुभांशे शुभसंयुते
अनस्तगे बुधेशे च प्रशस्तं ह्यौपनायनम् ॥६०॥

नारदः—

श्रेष्ठान्यर्क त्रयान्तेज्य चन्द्रादित्युत्तराणि च ।
विष्णुत्रयाश्विमित्राब्ज योनिभान्यौपनायने ॥६१॥

वसिष्ठः—

उत्तरासु तिसृषूपनायनं हस्तमैत्रमृगरोहिणीष्वपि ।
श्रेष्ठमप्यशुभभागगे विधौ त्वाष्ट्रपूषभपुनर्वसुष्वपि ॥६२॥

दस्रपुष्यवसुवारुणानिल श्रोत्रभेष्वपि वटोर्व्रतं विधौ ।
शोभनांशकगते शुभावहं मध्यमानि षड्मानि भानि तु ॥६३॥

उक्तेष्वेतेषु ऋक्षेषु शुभांशेष्वौपनायनम् ।
कुर्वीत शुभकामस्तु नैव क्रूरांशकेषु तु ॥६४॥

नारदः—

विनर्तुना वसन्तेन कृष्णपक्षे गलग्रहे ।
अपराह्णे चोपनीतः पुनः संस्कारमर्हति ॥६५॥

कृष्णपक्षे चतुर्थी च सप्तम्यादिदिनत्रयम् ।
त्रयोदशी चतुष्कं च अष्टावेते गलग्रहाः ॥६६॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मनुः—

सर्वदेशेषु पूर्वाह्णे मुख्यं स्याच्चौपनायनम् ।
मध्याह्ने मध्यमं प्रोक्तमपराह्णे च गर्हितम् ॥६७॥

पापांशकगते चन्द्रे स्वाधिनी च स्थितेऽपिवा ।
अनध्याये चोपनीतः पुनः संस्कारमर्हति ॥६८॥

अनध्याय इति विहितानाध्याय व्यतिरिक्तानाध्याय इत्यर्थः ॥ अन्यथा गर्गनारदवसिष्ठवार्हस्पत्यभरद्वाजात्रिव्यासादिभिः अनध्यायविहितोपनयने वचन विरोधप्रसङ्गात् । अत एव विरोधात् । मूलाभावाच्च पूर्वेद्युरित्यादिवचनमप्रमाणमिति द्रष्टव्यम् ।

वसिष्ठः—

स्वोच्चस्वमित्रे स्वगृहे त्रिकोणे जीवे गते यद्युपनीतिकाले ।
शिशोः सहोत्थे[1] चतुरस्रजन्मकर्मान्त्यषष्टेऽपि शुभं वदन्ति ॥६९॥

गर्गः—

मौञ्जीबन्धे विवाहे च प्रतिष्ठायां विशेषतः ।
गोचरेणैव कर्तव्यं वेधाबलमकारणम् ॥७०॥

विवाहे मेखलाबन्धे जन्ममासेऽथ जन्मभे ।
विशेषाज्जन्मपक्षं तु वासिष्ठाद्यैरुदाहृतम् ॥७१॥

रत्नकोशः । राजमार्तण्डे —

वसन्तसमये दद्यादब्दे गर्भाष्टमेऽपि वा ।
मेधावी मेखलाबन्धो जन्ममासेऽथ जन्मभे ॥७२॥

---

१ समुत्थे अ. क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यज्वा वसन्तसमये बहुवित्तभागी गर्भाष्टमे विविधशास्त्रविशारदस्तु ।
वेदार्थपालनपरः खलु जन्ममासे ऋक्षेऽपि जन्मनि बहुक्रतुभाजनं स्यात् ॥७३॥

जन्मोदये जन्मसु तारकासु मासेऽथवा जन्मनि जन्मचन्द्रे ।
व्रतेन विप्रो न बहुश्रुतोऽपि प्रज्ञाविशेषैः प्रथितः पृथिव्याम् ॥७४॥
गर्भाष्टमे गर्गपराशराद्यैः फलं यदुक्तं व्रतवन्धनेन ।
ततोऽधिकं जन्मसु तारकासु मासेऽथवा जन्मनि मानवानाम् ॥७५॥

नष्टे शुक्ले तथा जीवे निरंशे जीवभास्करे ।
उपनीतस्य विप्रस्य जडत्वं मृत्युमादिशेत् ॥७६॥

पितुः सूर्यबलं श्रेष्ठं शाखावणशयोर्वटोः ।
सर्वेषां गुरुचन्द्रर्क्षबलं श्रेष्ठं व्रतादिषु ॥७७॥

वसिष्ठः–

पापग्रहेक्षिते लग्ने मौढये च गुरुशुक्रयोः ।
ऋत्वन्ते चैवमासान्ते तिथ्यन्ते विषनाडिषु ॥७८॥

नक्षत्रान्ते च विष्ट्यां च षडशीतिमुखे तथा ।
दिनक्षये व्यतीपाते सग्रहे ग्रहपीडिते ॥७९॥

शून्यमासे दिने राशौ ग्रहदोष–समन्विते :
कालकर्णिकलौ वज्रे विस्कम्भे परिघे तथा ॥८०॥

शूले च वैधृतौ चैव कण्टके स्थूलकण्टके ।
अष्टम्यां चव रिक्तायां सर्वोत्पातादिदूषिते ॥८१॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उक्तादन्यर्क्षसंयोगे चंद्रे गण्डातिगण्डयोः ।
उडुपे क्षीणकाले च वर्जयेदौपनायनम् ॥८२॥

लल्लः–

व्रतेऽह्निपूर्वसंध्यायां वारिदो यदि गर्जति ।
तद्दिनं स्यादनध्यायं व्रतं तत्र विवर्जयेत् ॥८३॥

पौषादित्रिषुमासेषु कृष्णे चैवाष्टकात्रयम् ।
एका ज्ञेयाश्विने मासि हायनश्चतुरष्टकः ॥८४॥

अष्टका च समुद्दिष्टा सप्तम्यादिदिनत्रयम् ।
नाधीयीत च शास्त्राणि वृतबन्धं च वर्जयेत् ॥८५॥

अभग्ने च दशायोगे न च पापेन पीडिते ।
नचोत्पातहते ऋक्षे व्रतौपनायनं शुभम् ॥८६॥

पापात्सप्तमगं चन्द्रं युतं पापग्रहेण वा ।
वृते विवर्जयेद् यत्नाद् दोषमाहुर्मनीषिणः ॥८७॥

ग्रहे रविन्दोर वनिप्रकम्पे केतूद्गमोल्कापतनादिदोषे ।
वृते दशाहानि वदन्ति तज्ज्ञास्त्रयोदशाहानि वदन्ति केचित् ॥८८॥

एकरात्रं परित्यज्य कुर्यात् पाणिग्रहं ग्रहे ।
प्रयाणे सप्तरात्रं तु त्रिरात्रं वृतबन्धने ॥८९॥

एकरात्रं त्रिरात्रं वा सप्तरात्रं तथैव च ।
विवाहवृतयात्रासु वर्जयेद्राहुदर्शनात् ॥९०॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ दिवसत्रयमध्ये मृदुपानीयपतनं यदा भवति । उत्पातदोषशमनं तदवाहुराचार्याः ।।

नो सन्ध्यागर्जिते प्राहुस्ततोपनयनं बुधाः ।
नष्टे शुक्रे तथा जीवे निरंशे चैव भास्करे ।।९१।।

उपनितस्य विप्रस्य जडत्वं मृत्युमादिशेत् ।
तदुक्तदोषसंयोगादायुर्द्रव्यक्षयो भवेत् ।।९२।।

गुरुः–

व्याघातं परिघं वज्रं व्यतीपातं च वैधृतिम् ।
गण्डातिगण्डशूलं च विस्कम्भं नव वर्जयेत् ।।९३।।

प्रोक्तोडुवारतिथ्यंशे शुभलग्ने शुभांशफे [१] ।
कथिते द्वे ग्रहे प्रोक्ते प्रशस्तमौपनायनम् [२] ।।९४।।

पापग्रहाणां षड्वर्गे न प्रशस्तमितीरितम् ।
शुभग्रहाणां षड्वर्गे सुप्रशस्तं द्विजन्मनाम् ।।९५।।

प्रोक्तेष्वेतेषु सर्वेषु दोषो यदि तदा भवेत् ।
अपवादादिभिर्दोषनाशो यदि शुभैर्भवेत् ।।९६।।

पापग्रहेक्षिते लग्ने जीवितार्थी न कारयेत् ।
चन्द्रो वा क्रूरदृग्युक्तो मूढत्वं संप्रयच्छति ।।९७।।

भौमांशकगते चन्द्रे वटुर्भवति पातकी ।
मानहीनो वनं गच्छे शत्रुगो मरणं तथा ।।९८।।

१ शुभोदये लि. पु. । २ तूपनायनम् लि. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बुधांशकगते चन्द्रे विद्याबुद्धियुतो धनी ।
दीर्घायुःपण्डितःख्यातो विज्ञानी च भवेत् वटु: ॥९९॥

वसिष्ठः–

गुरुज्ञशुक्रांशगते च चन्द्रे विद्याधनायुः सुखवान् द्विजन्मा ।
माहेयमन्दांशनवांशकस्थे हिंस्रो जडो मूर्खतरश्चनिःस्वः ॥१००॥

शुक्ले स्वांशे निशानाथे वित्तवान् यज्ञकृद् भवेत् ।
कृष्णे स्वांशगतश्चन्द्रो जातिभ्रष्टं करोति च ॥१०१॥

विद्यान्वितः सदाचारो दानधर्मदयापरः ।
आयुष्मान् धनवांश्चैव सौम्यभृग्वङ्गिरांशके ॥१०२॥

विद्याहीनं दुराचारं दानधर्म विवर्जितम् ।
आयुः क्षयं च दारिद्र्यं पापांशे व्रतबन्धनम् ॥१०३॥

सूर्यांशसंस्थितश्चन्द्रः कुरुते शस्त्रजीवनम् ।
स्वांशकस्थो निशानाथो जातिभ्रंशं करिष्यति ॥१०४॥

भौमांशकगतश्चन्द्रः पातकित्वं करिष्यति ।
द्रव्यविद्यान्वितं कुर्यात् शशी सौम्यांशमाश्रितः ॥१०५॥

सौख्यविद्यान्वितं चन्द्रः कुर्याद् गुर्वंशकस्थितः ।
चन्द्रः शुक्रांशकगतो विद्यायुक्तं करिष्यति ॥१०६॥

मन्दांशमाश्रित[1]श्चन्द्रः करोति निधनं वटोः[2] ।
मेषे भवति वाक्कुण्ठो वित्तविद्या वृषेजितः ॥१०७॥

---

१ मन्दाशकाश्रितः प्र. । २ तनो लि. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

युग्मे वेदार्थदर्शी च कुलीरे च षडङ्गवित् ।
शिल्पकर्मकरः सिंहे षष्ठे भवति पण्डितः ॥१०८॥

वाणिज्याप्तिस्तुलायां च काण्डपृष्ठोऽथ वृश्चिके ।
सर्वत्रपूजितश्चापे शूद्रवृत्तिर्मृगे तथा ॥१०९॥

राजप्रेष्यान्वितः कुम्भे मीने वेदाङ्गपारगः ।
असत्फलप्रदे राशावपि लग्ने शुभेक्षिते ॥११०॥

शुभयुक्तेऽपि वा तेषां वदेच् शुभफलानि वै ।
र वौ लग्नादिकेन्द्रस्थे दोषः कुजितसंज्ञकः ॥१११॥

तत्रोपनीतस्य शिशोः कुलनाशो भवेत् सदा ।
कुजे लग्नादिकेन्द्रस्थे दोषः कुजितसंज्ञकः ॥११२॥

तत्रोपनीतं वप्तारं हन्ति वर्षान्नसंशयः ।
शनौलग्नादिकेन्द्रस्थे दोषो रुदितसंज्ञकः ॥११३॥

करोति महतीं पीडां व्रतिनो वा गुरोस्तदा ।
राहौ लग्नादिकेन्द्रस्थे दोषो रन्ध्राह्वयो भवेत् ॥११४॥

व्रतिनो जननीं हन्ति त्वथवा धनसंचयम् ।
केतौ लग्नादिकेन्द्रस्थे दोषश्चोग्रः स संज्ञकः ॥११५॥

समग्रं व्रतिनं वृत्त वित्तविद्याविनाशनम् ।
लग्नषष्ठाष्टमान्त्यस्थः करोत्येव निशाकरः ॥११६॥
व्रतिनो रोगमप्येवं[1] निधनं दुःखसंचयम् ।

---

१ रोगमथनं प्र.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्वादशस्थं रविं भौमः पश्यनाचार्यनेत्रहा ।।
बलिनं बलवान्नूनं नचिरात् तु नसंशयः ॥११७॥

वसिष्ठः—

विशेषान्निधनस्थाने ग्रहान्नेच्छन्ति सर्वदा
आचार्यं तु शुभा घ्नन्ति शिष्यं घ्नन्त्यशुभा ग्रहाः ॥११८॥

चन्द्रात्स्मराहिरन्ध्रेषु यद्येकस्मिन् शुभग्रहे ।
स्थितेऽधियोगसंज्ञः स्याच्छुभयोगा द्विजन्मनि ॥११९॥

केन्द्रत्रिकोणगे जीवे भानुः शुक्रोऽथवा व्यये ।
द्वितीयेज्ञे शुभोयोगो द्विजानामौपनायनम् ॥१२०॥

लग्नार्थभ्रातृगे जीवे शुक्रे वा ज्ञेऽथकण्टके ।
त्रिषडेकादशे क्रूरे योगोऽयं व्रतिनो त्तमः ॥१२१॥

काश्यपसंहितायां–

भास्करो लग्नगः कुर्याद् वटुं भूपतिसेवकम् ।
वसुस्थः स्वर्णरहितं भ्रातृस्थः सुखिनं यदा ॥१२२॥

बन्धुगो दुःखिनं नित्यं सुतगो मतिवर्जितः ।
शत्रुगो रोगरहितं सप्तगो मार्गवर्जितः ॥१२३॥

अष्टगो दृष्टिरहितं नवगो धर्महारिणम् ।
व्यापारगो भिषगवृत्ति दीर्घायुष्मन्तमायगः ॥१२४॥

रिःफगो हानियुक्तं च फलमेतद्गुरोरपि ।
सितेचन्द्रे लग्नसंस्थे शुभं स्यादसितेऽशुभम् ॥१२६॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वसुगे स्याद्धनप्राप्तिस्तृतीये सुखसंस्थितः ।
चतुर्थे बुद्धिवैशद्यं पञ्चमे सौरव्यमुत्तमम् ॥१२६॥

षष्ठे तु व्याधिपीडास्यात्सप्तमे सुखसंगतिः ।
अष्टमे निधनप्राप्तिर्नवमे धर्म्मसञ्चयः ॥१२७॥

दशमे स्यात् सदाचारो लाभे स्याद्धनसंग्रहः ।
दारिद्र्यं रिःफगे विद्याच् चान्द्रं फलमुदाहृतम् ॥१२८॥

मृतिर्नाशः सुखं काणो हानिर्वृद्धिर्मतिर्गदः ।
अधर्मो दुर्मतिर्वृद्धिर्नाशो लग्नात् कुजे फलम् ॥१२९॥

बुद्धिर्वृद्धिर्वित्तनाशो लाभः पुत्रः स्मृतिः सुखम् ।
आयुः क्षयो धर्मसौरव्यौ कोशलाभः क्षयः क्रमात् ॥१३०॥

सौम्ये लग्नादिराशीनां फलमेतदुदाहृतम् ।
षष्ठाष्टमं विना जीव सर्वत्र शुभकृत् सदा ॥१३१॥

सर्वत्र शुभकृच् शुक्रो षष्ठसप्ताष्टमं विना ।
निन्दां हानिं सुखं रोगं द्यूतं कामं जडं मृतिम् ॥१३२॥

विपत्क्लेशं सुखं मृत्युमुदयात् कुरुते शनिः ।
दोषान् सर्वान् परित्यज्य शेषयोर्गुणदोषयोः ॥१३३॥

केवलं गुणसंयुक्तं दैवतैरपि दुर्लभम् ।
दोषोऽप्येको गुणान् हन्ति तद्विरोधी गुणो न चेत् ॥१३४॥

पञ्चगव्यमयं पूर्णं कुम्भं मद्यलवो यथा ।
लग्नं सर्वगुणोपेतं दोषेणैकेन दूषितम् ॥१३५॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वसिष्ठः—

शुभग्रहोदये ऋक्षं शुभषड्वर्गमेव च ।
वेदविज्ञानवाक्यं च महान्तः शुभदायकाः ॥१३६॥

शुक्लपक्षः शुभः प्रोक्तः कृष्णपक्षे त्रिधाकृते ।
अन्त्यभागं विनाऽन्यौ द्वौ गुणिनौ मध्यमाधमौ ॥१३७॥

अथ भावः

भारद्वाजः—

सीमन्तजन्मचौलोपनीतियात्राप्रवेशने ।
अभिषेके विवाहे च शस्तं भावफलं विदुः ॥१३८॥

इष्टभागस्ततः पूर्वे भागाः सार्द्धश्चतुर्दश ।
तदुत्तरे च तावन्तस्तत्संघो भाव ईरितः ॥१३९॥

एवं द्वितीयभावादि द्वादशान्तं प्रकल्पयेत् ।
भावयोगदलं सन्धिस्तत्रस्थोऽफलदो ग्रहः ॥१४०॥

सन्धेरूनस्ततः खेटः सन्धिस्थसदृशो भवेत् ।
भावोन्मुखो ग्रहो दाता फलस्यात्यन्तदूरतः ।
इष्टभावस्थितः खेटः संपूर्णफलदायकः ॥१४१॥

अथ विद्यारम्भः

वसिष्ठः—

विद्यागमो वित्सितमन्त्रिषु स्याद् वारोदये मध्यममिन्दुभान्वोः ।
वेदारम्भे द्विस्वभावा विशिष्टा मध्याः प्रोक्ता ये चराराशयश्च ॥१४२॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शुद्ध लग्ने नैधने पुत्रधर्मे कुर्यात् प्राज्ञः सर्वविद्यासमाप्तिम् ।
हस्तादिपञ्चाश्विमृगेज्यपूषा ब्रह्मा च विश्वत्रितयं च तारा ॥
पुराणधर्मश्रुतिधर्मविद्याव्रतादिकानां शुभदा भवन्ति ॥१४२॥

अर्थशास्त्रस्य

वरुणादित्यहस्तेज्यहरिविष्णुध्रुवाः शुभाः ।
अर्थशास्त्रेषु सौम्येज्य भृगुवर्गोदये शुभाः ॥१४३॥

शब्दशास्त्रस्य

अश्विनीरोहिणीसौम्यं पुष्यं हस्तादिपञ्चकम् ।
अदितिर्दश ताराः स्युः शब्दशास्त्रेषु पूजिताः ॥१४४॥

गणितविद्यायाः

गणिते रेवतीहस्तमैत्रतिष्यार्द्रवासवाः ।
ज्योतिः शास्त्रनिमित्ते च रोहिणी वारुणौ शुभौ ॥१४५॥

अर्थशास्त्रस्य

आदित्यवैष्णवस्वातीतिष्यहस्ताश्विवारुणाः ।
त्र्युत्तरा रोहिणी चैव अर्थशास्त्रेषु पूजिताः ॥१४६॥

ज्योतिःशास्त्रस्य

मूलेज्यवरुणादित्यरेवतीहस्तवारुणी ।
अश्विनी ज्योतिषां शास्त्रे प्रशस्तास्तारकाः शुभाः ॥१४७॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ज्योतिषाद्यङ्गशास्त्राणां स्वातिर्हस्तापुनर्वसू ।
पौष्णतिष्याश्विनीमूलवारुणाः स्युः सुपूजिताः ॥१४८॥

धर्मशास्त्रेषु विश्वाद्यात्रितयं पौष्णमेव च ।
अष्टमस्था ग्रहाः सर्वे सर्वविद्याविवर्जिताः ॥१४९॥

भिषजः

मार्तण्डाश्विसमीरमित्रवरुणादित्योत्तरारेवती
चित्राविष्णुशशाङ्कपुष्यवसुषु प्राजेशभे भेषजम् ।
कुर्यादर्कबुधार्यशुक्रशशभृद् वारोदयांशे शुभे
रिक्तायां चरभेङ्गनासमुदये शुद्धेऽरिदाराष्टमे ॥१५०॥

उशना--

अयने विषुवे चैव शयने बोधने हरेः ।
अनध्यायं प्रकुर्वीत मन्वादिषु युगादिषु ॥१५१॥

आश्वयुक्शुक्लनवमी कार्त्तिके द्वादशी तथा ।
तृतीया चैत्रमासस्य तथा भाद्रपदस्य च ॥१५२॥

श्रावणस्याष्टमी कृष्णा पुष्यस्यैकादशी तथा ।
आषाढस्यापि दशमी माघमासेतु सप्तमी ॥१५३॥

कार्तिके फाल्गुने चैत्रे ज्येष्ठे पञ्चदशी सिता ।
माघमासे कुहूश्चैव कार्तिके तु तथैव च ॥
एता मन्वादयः प्रोक्ता दत्तस्याक्षयकारकाः ॥१५४॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संवर्त्तः—

वैशाखमासस्य तु या तृतीया नवम्यसौ कार्तिकशुक्लपक्षे ।
नभस्यमासस्य तु कृष्णपक्षे त्रयोदशी पञ्चदशी च माघे ॥१५५॥

एता युगादयः प्रोक्ताः[१] (स्वाध्यायं वर्जयेद्बुधः ।
महापुण्यानि चैतानि दत्तस्याक्षयकारकाः ॥१५६॥

मनुः—

अनध्यायस्य पूर्वेद्युरनध्यायो भवेन्निशि ।
यदि तत्र समे कुर्यात्) स्वाध्यायः पररात्रयोः ॥१५७॥

गोभिलः—

रात्रौ यामद्वयादर्वाग् यदि पश्येत् त्रयोदशीम् ।
प्रदोषः स तु विज्ञेयः सर्वशब्दविवर्जितः ॥१५८॥

षष्ठी च द्वादशी चैव अर्धरात्रोननाडिका ।
प्रदोषमपि कुर्वीन तृतीया नव नाडिका ॥१५९॥

अष्टम्यां च चतुर्दश्यां पौर्णमास्यां कुहूतिथै ।
सन्ध्ययोर्गर्जिते चैव प्रतिपद्यपि सर्वदा ॥१६०॥

अनध्यायं प्रकुर्वीत भूकम्पोल्कादि पातने ।
सोमसूर्यग्रहे चैव त्रिरात्रं वर्जयेत् त्रयीम् ॥१६१॥

मार्जारशूकरश्चाहिपशुमर्कट वायसैः ।
कृतान्तरे त्वहोरात्रं शक्रपाते तथैव च ॥१६२॥

---

१ चापान्तर्गतः पाठः प्र. क. पुस्तकयो स्त्रुटित ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गौतमः—

श्मशाने शूद्रसंपर्के चाण्डालादेस्तु दर्शने ।
रोदने व्याकुले देशे जयस्थाने महालये ॥१६३॥

धावतः पूतिगन्धे च शिष्टे च गृहमागते ।
खरोष्ट्रयोः समीपे च स्वाध्यायं वर्जयेद् बुधः ॥१६४॥

भृगुः—

श्रावण्यां वा प्रौष्ठपद्यां स्वगृह्ये चोक्ते काले पञ्चमीपञ्चदश्योः ।
हस्ते चोपाकृत्य पुण्ये मुहूर्ते वेदानङ्गैः सार्धमध्यापयेच्च ॥१६५॥

व्रतानि चत्वारि यथाक्रमेण विधाय गोदानपवित्रभूते ।
गुरोर्निवासाद् विनिवृत्तिरुक्ता चौलोक्तरीत्याऽपि तु तानि कुर्यात्
॥१६६॥

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नमन्तर्धनं
विद्या भोगकरी यशः सुखकरी विद्या परं दैवतम् ॥
विद्या बन्धुजनो विदेशगमने विद्या गुरूणां गुरुः
विद्या राजसु पूजितो नहि धनं विद्याविहिनः पशुः ॥१६७॥

कालदीपे —

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रं च विद्या ह्येता चतुर्दश ॥१६८॥

आयुर्वेदो धनुर्वेदो वेदो गान्धर्व एव च ।
अर्थशास्त्रमिति ह्येता उपविद्याः प्रकीर्तिताः ॥१६९॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हस्ताश्वयुक्श्रवणचित्रसमीरमित्र– ,
चित्रादितित्रिपुरभृद्वसुवारुणेषु ।
हस्तोत्तराकमलसम्भवपौष्णभेषु
मेध्याश्रुतिस्मृतिसमागमने द्विजानाम् ॥१७०॥

दीर्घसिद्धिकरः पौष्णप्राजापत्युत्तरात्रयम् ।
वर्ज्या पूर्वत्रयं याम्यमूलाह्यग्नीन्द्रपैतृका ॥१७१॥

रिक्ताष्टमीपञ्चदशी निषिद्धास्त्रयोदशी सप्तमिका च मध्या ।
शब्दशास्त्रपरिज्ञाने शस्तौ हस्तपुनर्वसू ॥१७२॥

केन्द्रत्रिकोणगे जीवे नैधने शुद्धिसंयुते ।
भेरीशास्त्रे च नाट्ये च तथा सामुद्रिकेऽपि च ॥१७३॥

गान्धर्वे नीतिशास्त्रे च प्रशस्ता हि पुनर्वसू ।
आयुवदे धनुर्वेदे धनिष्ठा पूज्यते सदा ॥१७४॥

शास्त्रे महानसे मल्ले सूपशास्त्रे विशेषतः ।
खड्गशास्त्राभियोगे च आर्द्रा तारा विशिष्यते ॥१७५॥

कौक्कुटे[1] चानुराधा स्याच्चाश्वविद्यासु चाश्विनी ।
चित्रशास्त्रेषु चित्रा स्याद् धर्मशास्त्रेषु वैष्णवम् ॥१७६॥

ज्योतिः शास्त्रेषु च स्वातिर्योगशास्त्रेषु वारुणम् ।
मृगशीर्षं षडङ्गेषु विशेषेण प्रशस्यते ॥१७७॥

---

१ कौक्कुरे अ. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आतृषष्ठायकर्मस्थाः पापाः सर्वे शुभावहाः ।
स्त्रीमृत्युवर्जं शुक्रज्ञौ मुक्त्वेन्दुर्निधनोदये ॥१७८॥

शास्त्रं प्रति पृथग्भानि शस्तौ हस्तपुनर्वसू ।
वाद्यशास्त्रे च नाट्ये च तथा सामुद्रिकेऽपिवा ॥१७९॥

गन्धर्वे नीति शास्त्रे च प्रशस्ताहि पुनर्वसू ।
सर्व शाकुनिकज्ञाने वेदारम्भे तथैवच ॥१८०॥

आयुर्वेदे धनुर्वेदे धनिष्ठा पूज्यते सदा ।
गन्धयुक्ते च वेदे च गजशास्त्रे च शान्तिके ॥१८१॥

उपनयनाष्टकम्

हरिर्गिरीशः कमलासनश्च यणाधिपः स्कन्दमहेन्द्रदुर्गाः ।
श्रीभास्कराद्याः ददतु ग्रहाश्च[1] वटोर्धनायुः सुखकीर्तिविद्याः ॥१८२॥

इन्द्रोऽनलो दण्डधरोऽथ रक्षो जलेश्वरो वायुकुवेररुद्राः ।
व्योमं[2]धराते दश दिक् च पर्वता वटोर्धनायुः सुखकीर्तिविद्याः
॥१८३॥

मेरुर्महेन्द्रो मलयानिलेन्द्रश्रीशैलविन्ध्याद्रिनगाः प्रशस्ताः ।
तुषारशैलाः खलु वर्द्धमाना वटोर्धनायुः सुखकीर्तिविद्याः ॥१८४॥

अगस्त्यवभ्रूकुशकण्वकश्यपा भर्गोभरद्वाजभगीरथाद्याः
भूदेवसंघा भुविभूतभूभुजो[3] वटोर्धनायुः सुखकीर्तिविद्याः ॥१८५॥

---

१ प्रमुखा ग्रहाश्च लि. पु. । २ व्योम । ३ भूरिभूभुजो प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गङ्गाकलिङ्गा[1] यमुना च नर्मदा तुङ्गा च भद्रा असिता च वेणी ।
पातालगङ्गादि समस्तनद्यो वटोर्धनायुः सुखकीर्तिविद्याः ॥१८६॥

हरिप्रिया हैमवती च हंसी दुर्गा विशाला त्रिपुरा च बाला ।
गायत्र्यरुन्धत्यथ सत्यभामा वटोर्धनायुः सुखकीर्तीविद्याः ॥१८७॥

हारिद्रशंखा दधिताम्बुलाद्या गोक्षीरपद्माङ्कितपद्मपुष्पाः ।
रम्यं मनोभीष्टकरं च कुम्भं वटोर्धनायुः सुखकीर्तिविद्याः ॥१८८॥

साङ्गंपुराणं श्रुतितर्कशास्त्रव्याकरणमन्त्राः खलु ज्यौतिषं च[2] ।
गान्धर्वनृत्यादिसमस्तविद्या वटोर्धनायुः सुखकीर्तिविद्याः ॥१८९॥

वराहलल्लौ किल सिद्धसेनः श्रीदेवलः श्रीपतियोगनार्यौ ।
एते समस्ता ऋषिसन्निभास्ते वटोर्धनायुः सुखकीर्तिविद्याः ॥१९०॥

मित्रादित्यकराश्विनीस्थिरमरुत्पौष्णे च तारा धनु–
र्विद्यायामतिशोभना रविकवि क्ष्माजेज्यवारादयः ।
[3]धर्मार्थस्मरणैर्जलानि च शची वाराधिपा वासरा
लग्नं च स्थिरमुत्तरायणमथो नास्तंगतो बोधनः ॥१९१॥

असूप – विद्या

ध्रुवेन्द्रमृदुमूलानिद्विदैवा तोयराशयः ।
सूपशास्त्राग्निहैके च शुभा रिक्ताः सरन्ध्रकाः ॥१९२॥

(१ कलिङ्गो देशवाचको शब्दः । परमत्र नदीपर्यायोविहितः)
२ छन्दोभङ्गोत्रवर्तते । ३ धर्मार्थस्मर शैल जाति विशनीनानाधिपा वासरा क. । धर्मार्थ स्मरशैल जाति च शची ताराधिपा वासरा अ. ।
५ सौम्येज्य भृगुवाराः प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ गणितविद्या

अधोमुखार्द्रहस्ताद्याः श्रविष्ठामित्रपुष्यभम् ।
सौम्येज्यभृगुवर्गाः[1] स्यु र्गणिते च शुभप्रदाः ॥१९३॥

मैत्रादितिमरुत्त्वष्ट्रा चित्रशास्त्रे शुभावहाः ।
रुद्रान्त्यध्रुवतारेज्य हरिन्दुखड्गगन्धयोः ॥१९४॥

हस्तः पुष्यो वासवश्चानुराधा ज्येष्ठा पौष्णं वारुणं चोत्तराश्च ।
पूर्वाचार्यैः कीर्तितश्चन्द्रवर्ती नृत्यारम्भे शोभनोऽयं भवर्गः ॥१९५॥

अथ शास्त्रविद्या

वरुणादित्यहस्तेज्यहरिविष्णुध्रुवाः शुभाः
अर्थशास्त्रेषुसौमेज्यभृगुवर्गोदये शुभाः ॥१९६॥

शैवागमेषु सर्वेषु क्षिप्रोग्राः शुभदा मताः ।
विष्णवागमेषु सर्वेषु प्रशस्तश्चरमित्रकाः ॥१९७॥

चरस्थिरव्द्यङ्गगृहेविलग्ने कनिष्ठमध्येष्ठफला भवन्ति ।
त्रिकोणकेन्द्रायगता ग्रहाः[1] स्युः शुभास्त्रिलाभारिगताश्च पापाः ।१९८।

पूर्वात्रये मूलमृगादिपञ्च तथाश्विनीषु त्रितये च हस्तात् ।
सविष्णुधिष्ण्वेष्वपि सर्वविद्या प्रारम्भ इष्टः शुभवासरेषु ॥१९९॥

श्रीपतिः —

मृगादिपञ्चष्वपिभेषु मूले हस्तादिके च त्रितयेऽश्विनीषु ।
पूर्वात्रये च श्रवणत्रये च विद्यासमारम्भमुशन्ति सिद्धम् ॥२००॥

---

१ त्रिकोत्रकेन्द्राशुभा गताः लि. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शुभलग्ने दशमभवे रवौ कुजे वाऽथ तदंशे वर्गे ।
आर्युविद्या कार्या नृपसेवा वैरिविग्रहः कार्यः ॥२०१॥

शिल्पविद्या

शशितनये जीवे वा चन्द्रे वा लग्नगेऽथ धर्मे वा ।
तद्वर्गे लग्नगते शिल्पारम्भः प्रशस्यते सततम् ॥२०२॥

अथ वैतालकर्म

शशिनैर्ऋतयमपितृभे त्वष्टभशुद्धे भृगौ च पातालम् ।
घटलग्नगते च शशिजे निखिलं वैतालकर्मसिद्धिः स्यात् ॥२०३॥

सारस्वतयोगमाह वसिष्ठः —

सावित्रनक्षत्रतृतीयपादे तीक्ष्णांशुशीतांशुशशाङ्कजाश्च ।
तस्योदये ज्ञार्कनिशीशवारे सारस्वतं योगमुदाहरन्ति ॥२०४॥

आदित्यर्क्षे बुधस्यांशे वर्तन्ते ज्ञेन्दु भास्कराः ।
बुधवारे च तल्लग्ने योगः सारस्वतो भवेत् ॥२०५॥

बुधोत्तरे गुरोरंशे केन्द्रगाः ज्ञार्कभार्गवाः ।
त्रयोदश्यां यमे लग्ने योगः सारस्वताह्वयः ॥२०६॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते, जगन्मोहने अङ्कुरार्यण–उपनयन–विद्यातिथि–नक्षत्राध्यायः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ समावर्तनम्

कालविधाने—

वागीशादितिसौम्यपौष्णदिनकृद्मित्रोत्तरारोहिणी
गोविन्देषु शशाङ्कभानुगुरुविच्छुक्रांशवारादिषु ।
रिक्तां पर्व तथाष्टमीं प्रतिपदं मेषं च कीटं हरिं
हित्वा शुद्धियुतेऽष्टमेऽह्नि विमले कुर्यात् समावर्तनम् ॥१॥

वसिष्ठः—

अधीत्यवेदांश्च तदर्थशास्त्राण्यभ्यस्य लब्ध्वा स्वगुरोरनुज्ञाम् ।
कुर्यात् समावर्तनकर्म पश्चाद् गोदानतः पाणिनिपीडनात् प्राक् ॥२॥

[1] सौम्यायने निर्मलयोःसुरेज्यदैत्येज्ययोर्व्योम्नि वलक्षपक्षे ।
सन्त्यज्य रिक्तामवमाष्टमीं च वैनाशिकाख्या खिल ऋक्षवृन्दम् ॥३॥

नारदः—

द्विजातीनां गुरोर्गेहान्निवृत्तानां यतात्मनाम् ।
मित्रोत्तरादितीज्यान्त्य हरिमैत्रेन्दु धातृषु ॥४॥

भेष्वर्केन्द्वीज्यशुक्रज्ञ वारलग्नांशकेष्वपि ।
अथवा बीजनक्षत्र वारलग्नांशकेष्वपि ॥५॥

प्रतिपत्पर्वरिक्तामा, अष्टमीं च दिनक्षयम् ।
हित्वाऽन्य दिवसे कार्यं समावर्तनबन्धनम् ॥६॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने समावर्तनकर्माऽध्यायः ।

---

१ चापान्तर्गतः पाठः अ पुस्तके नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ विवाहप्रश्नम्

जन्मयोग शकुनादि विस्तरे गोचरे शुभगते नृयोषिताम् [1] ।
संप्रदानसमये गुणान्विते पाणिपीडनविधिर्विचिन्त्यते ॥१॥

कन्याप्रदानमेकं विवाहसाम्यं प्रवदन्ति तज्ज्ञाः ।
लग्नं विना वसिष्ठःप्राह मुनिर्नारदश्चैवम् ॥२॥

मुद्वारोहो चन्द्रपूषाश्विमित्रा हस्तादित्यौ पैत्रिभे त्र्युत्तरासु [2] ।
कामं हित्वा खेचरा अन्यसंस्था कालं ब्रूयान्मङ्गले गर्गमुख्याः ॥३॥

अथ विवाह शकुनान्याह लल्लाचार्यः–

रत्नानीन्दुकरा स्रजःस्मरकथा हास्योत्पलान्यासवः
ताम्बूलं प्रवराम्बराणि रुचिरं गीतं विभूतेश्चयः ।
यस्माद् न स्त्रियमन्तरेण हि नृणां सर्वाण्यपि प्रीतये,
तस्माद् वच्मि तदाप्तियोगसमयं धर्मार्थकामाय ते ॥४॥

उक्तं जन्मनि यत्तदेव हि भवेद् यदङ्गनानां फलम् ।
व्यर्थो नन्वयमादितः परिणये तत्काललग्नादिकः ।
आज्ञा तं प्रथमं प्रदानमपरं तद्बीजकं योषिता–
मुद्वाहे नियतं न यात्यतिबलाद् वेलासमं प्राक्फलैः ॥५॥

पूर्वनिमित्तशुद्धां वरयेत् कन्यां यवीयसीं पुरुषः
दैवज्ञमुखा प्राज्ञः सिद्धिं त्वधिगम्य नियमेन ॥
गौतमगर्गपराशरलम्पटवराहलल्लरचियानि ।
शकुनार्णवं महोदधिवसन्तराजश्च ॥६॥

---

१ परिचिन्त्यः प्र.। २ इत परःपरं विवाह प्रकरणस्य जातिकूटस्य वसिष्ठ वचनात् प्राक्वर्ती पाठःप्र. पुस्तके त्रुटितः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शास्त्राणि तानि मया ज्ञात्वा सर्वाणि पूर्वदृष्टानि।
एषां सारोद्धारं शकुनं संक्षेपतो वक्ष्ये ॥७॥

विवाहनिमित्तानि वृहस्पतिराह —

विवाहप्रश्नकाले च रुदितो व्यथितोऽथवा।
कौशिकश्वाङ्गहीनश्च कृष्णश्च न शुभावहाः ॥८॥

अभ्यङ्गो[1] क्षुधितो मत्तो मुक्तकेशः पिपासितः।
भुजङ्गो[2] नग्नगात्रो वा निकटे न शुभावहाः ॥९॥

कलहो भग्नकुम्भश्च काष्ठं प्रव्रजितस्तथा।
कपटाचारचाराश्च न शुभाः स्युः समीपगाः ॥१०॥

चर्मलोष्ठतुषाङ्गारकाष्ठपांसुतृणान्यपि।
रोम रोगी तुषादीनि नरस्तान्यशुभानि वै ॥११॥

एवं विधानि चान्यानि लोके यान्यशुभानि च।
तानि दृष्ट्वा विवर्ज्या स्याच्छ्रुत्वा पापविवाहिताम् ॥१२॥

पाखण्डिनो विकर्मस्था यदि यान्ति समीपतः
दुश्चारिणोऽथवा कृष्णास्तथा तत्कर्म वर्जयेत् ॥१३॥

यथा लक्षणसंभूताः प्रजा स्त्रीपुंभवांस्तथा।
प्रचरन्ति यथा रूपाः प्रजास्तत्र तयोर्भवेत् ॥१४॥

सृगालमहिषोष्ट्राश्च शिवामेषाजकुक्कुटाः।
खरकौशिकमार्जारा न प्रशस्ताः समीपगाः ॥१५॥

---

१ अन्त्यगो क.। २ भुजगो अ.।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एवं विधानि चान्यानि न प्रशस्तानि वर्जयेत् ।
मलिनच्छिन्नवासांसि विधृतेषु न शोभनम् ॥१६॥

निष्ठुराणि वचांस्यत्र प्रलापाश्च विर्गाहिताः ।
ताडने रोधने रोषे क्षमस्थौ च विवर्जयेत् ॥१७॥

निन्दायां[1] तपने चैव भर्त्सने पीडिते वधे ।
एवं विधानि चान्यानि दृष्टे नैव शुभं भवेत् ॥१८॥

पशुपक्षिमृगादीनि मैथुनं कुर्वते सदा ।
सरीसृपास्तथाऽन्येवा जारिणी कन्यका भवेत् ॥१९॥

इति निमित्तलक्षणानि ।

अथोपश्रुतिमन्त्रः

उपश्रुतिर्महादेवि चण्डालगृहवासिनी ।
यथार्थं ब्रूहि मे देवि शक्रराज्यं प्रवर्द्धितम् ॥२०॥

अथ क्षुतम्

निषेधमग्रेक्षणदक्षिणे च धनक्षयं दक्षिणकर्णदेशे ।
तत्पृष्ठभागे कुरुतेऽभिवृद्धि क्षुतं कृकत्थां शुभमामनन्ति ॥२१॥

भोगाय वामश्रवणस्य पृष्ठे कर्णे च वामे कथितो जयाय ।
सर्वार्थलाभाय च वामनेत्रे यात क्षुतं स्यात् क्रमशोऽष्टधैवम् ॥२२॥

ओषधे वाहनारोहे वसने शयनासने ।
विद्यारम्भे बीजवापे क्षुतं शुभकरं भवेत् ॥२३॥

---

१ निन्द्रायां क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वसन्तराजः—

वरस्य कन्यावरणोद्यतस्य कुमारिकायाः पतिमर्च्चयन्त्याः
आक्षायितेऽन्योन्य परीक्षणार्थं क्रमेण चेष्टास्वरमाशु तस्य ॥२४॥

कौलेयको दक्षिणचेष्टितः स्यात् कन्या विवाह्या न तु वामचेष्टा ।
शून्यासमं के विरते सुखेन तपोत्थया सार्वमर्हानियान्ति ॥२५॥

कण्डूयते दक्षिणमङ्गभागं स्तम्भे यदर्थं वरणे हृदिस्थे ।
उत्साभवेसासुतवित्तमध्यवामाङ्गकण्डूयनमप्रशस्तम् ॥२६॥

उक्षिप्य, उक्षा यदि दक्षिणाङ्घ्रिं करोति मध्ये मणिके घटे वा ।
मूत्रं तदानीं परिणीयनेह सा स्यादवश्यं बहुपुत्रयुक्ता ॥२७॥

अङ्गानि वामानिकषं निजादि विश्वांश्च शाहे गृहमण्डपादीन् ।
सा शक्ति कन्यामविवाहनीतां यद्वा भवित्री कुलदूययन्ती ॥२८॥

कौलेयको यद्वरणोद्यतस्य त्यक्त्वाऽभिशङ्काभिमुखोऽभ्युपैति ।
सा भर्तृहा भर्तृकुटुम्बमारी दूरेण हेया विदुषा कुमारी ॥२९॥

वामाङ्घ्रिणा कर्षति नासिकाग्रं कण्डूयते वा भुवि तत्कदाचित् ।
वामेन यो यां कुटिलं प्रयाति वैधव्यदोषा कपिला कुमारी ॥३०॥

स्यादेतयोर्वामकरेण शेते शनैः शनैः कर्परवामलूकम् ।
अङ्गारभस्मास्थि भयादिकं वा पञ्चत्वमीत्यर्भषणः सुयुक्तः ॥३१॥

यक्षः समाजिघ्रति यश्च शून्या योनिं सकन्यां क्षतयोनि माहुः ।
स्याज्जागरुको यदि मैथुनस्थो रुचिस्तदास्यादितरेतरस्था ॥३२॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रश्ने तवार्थेऽभिहिते कुमार्यां स्याद्वामचेष्टा शुभदा नचान्यः ।
मूत्रं च शून्यामुपरि प्रकुर्वन् ब्रूते सपत्नी भषणो भवन्ति ॥३३॥

संमार्जयन् वामकरेण जिह्वां ब्रविति भोगप्रियतां वरस्य ।
यक्षोलिहं जल्पति वामपादं वित्तेन वृत्तं भ्रमणार्जितेन ॥३४॥

मूत्रं निजं लेढि दिशां च वामां प्रयाति तस्या दयितोऽनुरागी ।
वामालिहं सृग्विमलस्यमर्णमहानसौख्यामरणं ददाति ॥३५॥

इति कथितनिमित्तैःप्रश्नमार्गस्यवर्ज्जेत् सकलशुभमयातां कर्मणां सूर्यमेव ।
विहितफलविपाकं ज्ञानिनां वृक्षभं तु शुभगुणगणवादैर्देववित्पूज्य
एव ॥३६॥

उभयकुलशुद्धवृत्तिः प्रसन्नमूर्तिः कृताधरः प्रशस्तः ।
आचारवान् प्रगल्भो दैवज्ञः शास्त्रनिर्दिष्टः ॥३७॥

स्वस्थं सुखासनगतं यथानिर्दिष्ट लक्षणोपेतम् ।
प्रणिपत्य विनयपूर्वं दैवज्ञं दैववित् पृच्छेत् ॥३८॥

पुष्पफलरत्नकाञ्चनपूर्णाञ्जलिना प्रसाद्य यत्नेन ।
प्रष्टव्यं शुद्धमना निवेद्य जनार्क्षप्रश्नबलान् ॥३९॥

गुरुः—

छत्रारुढौ तदा दृष्टौ निमित्तं च श्रुतान्यपि१ ।
वर्तमानां समालोक्य बलेन प्रवदेद् बुधः ॥४०॥

१ श्रोतावपि ग. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वसिष्ठः—

शुभे दिने दैवविदं त्वभिज्ञं ताम्बूलपुष्पाक्षतपूर्णपाणिः ।
कर्ता च गत्वा प्रणिपत्य पृच्छेत् निवेद्य तस्मै वरकन्ययोर्भम् ॥४१॥

गर्गः—

ओजर्क्षलग्ने प्रथमं भषड्कं समे च लग्नेऽप्यपरे भषड्कम् ।
चन्द्रस्य होरे प्रथमे तृतीये भानोश्च होरेऽप्यपरे तृतीये ॥४२॥

द्रेक्काणभागे प्रथमे तृतीये द्रेक्काणद्वितीये प्रथमे च राशिः ।
द्रेक्काणतृतीये द्वितीये च राशिः, नक्षत्रराशीन् मुनयो वदन्तिः॥४३॥

वसिष्ठः—

प्रश्नविलग्नात्प्रथमः शशाङ्कः शत्रुस्थितो मृत्युगृहस्थितो वा ।
यद्यष्टमाब्दात् परतो विवाहात् करोति मृत्युं वरकन्ययोश्च ॥४४॥

एकोऽपि लग्नोपगतश्च पापः पापस्ततोऽन्यः खलु सप्तमस्थः ।
आसप्तमाब्दान्निधनं नरस्य बलान्वितौ तौ कुरुतस्त्ववश्यम् ॥४५॥

प्रालेयरश्मिर्यदि लग्नसंस्थस्तस्मात् कुजः सप्तमराशिगश्च ।
तदाष्टमाब्दात् कुरुतस्त्ववश्यं वरस्य मृत्युं त्वथ चाङ्गनायाः ॥४६॥

स्वनीचगः शत्रुनिरीक्षितश्च पापो विलग्नात् यदि पञ्चमस्थः ।
विवाहिता सा मृतपुत्रिणी स्यात् वन्ध्याऽथवा भर्तृ विवर्जिता वा ॥४७॥

लग्नात् त्रिपञ्चास्तदशायगेषु हिमद्युतिर्जीवनिरीक्षितश्च ।
तयोस्तु सम्बन्धकरस्तदानीं नार्कांशलुप्तो न च नीचगस्ते ॥४८॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अतोजराश्यंशगतौ सितेन्दू निरीक्षितौ तौ बलिनौ विलग्ने ।
तयोस्तदानीं कुरुतस्त्ववश्यं सम्बन्धमाजीवितशर्मदं स्यात् ॥४९॥

यदि प्रच्छकलग्नस्थौ गुरुसौम्यौ दीर्घजीविनं कुरुतः ।
पञ्चमसंस्थौ पुत्रान् जामित्रे संस्थौ[1] धनं विपुलम् ॥५०॥

विलग्नगा गोधटकर्कटाश्च हिमांशुदैत्येज्यसमन्वितास्ते ।
संवीक्षिता वा यदि कन्यकाया लाभं वदेत्तत्र च प्रच्छकस्य ॥५१॥

अयुग्मराश्यंशगते विलग्ने निरीक्षिते पुंखचरैदृकाणे
तथाविधे तत्र वरस्य लाभं भवे[2]त्तदानीं खलु कन्यकायाः ॥५२॥

कर्किंतुलाधरवृषभाः शुक्रेन्दुयुता निरीक्षिता वाऽपि[3]
संपृच्छतां नराणां कन्यालाभोऽस्ति नियमेन ॥५३॥

इति विवाहप्रश्नः

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने विवाहप्रश्न-शकुनाध्यायः ।

अथ कालशुद्धिः

अथ मरीरि–कश्यप– वसिष्ठ– पराशर– बृहस्पतिमतानुसारेण विवाहयोग्यवरा लिख्यन्ते—

कश्चिद् गृहाश्रमसमो नपरोऽस्ति धर्मः
सोऽपि स्थितः सुगुणवृत्तयुताङ्गनासु
उद्वाहलग्नवसतोगुणवृत्तलब्धि–
स्तासां तथाविधसुलग्नमतं प्रवच्मि ॥१॥

१ जातित्रगतौ अ. । २ वरम् क. । ३ शुक्रेन्दुनिरीक्षिता सुतावपि क.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सुरभिकुसुमगन्धैस्तर्पयित्वा द्विजेन्द्रान् –
शुभतिथिकरणर्क्षे दैववित्संप्रदिष्टे ।
उभयकुलविशुद्धे ज्ञातशीले[1] सुरूपे
प्रथमवयसि दद्यात् कन्यकां यौवनस्थे ॥२॥

अष्टवर्षा भवेद् गौरी नववर्षातु रोहिणी ।
दशवर्षा भवेत् कन्या, अत-ऊर्ध्वं रजस्वला ॥३ ।

द्वादशाब्दानतिक्रम्य या कन्या न विवाह्यते ।
उच्यते सोऽपि गान्धर्वो यथैवाऽभिमते द्वयोः ॥४॥

प्राजापत्यं ब्राह्ममार्षं च दैवं कालेषूक्तेष्वेव कार्यो विवाहः
गान्धर्वो वा राक्षसो वाऽऽसुरो वा पैशाचो वा सर्वकाले विधेयः ॥५॥

रजो हि दृष्टं यदि कन्यकायाः कुलद्वयं दुर्गतिमेति तस्याः ।
तस्मान्निमित्तात् तु तदुक्तकाले नोलङ्घ्य पाणिग्रहणं विधेयम् ६

कुलं च शीलं च सनाथतां च विद्यां च वित्तं च वपुर्वयश्च ।
एतान् गुणान् सप्त निरीक्ष्य कन्या देया बुधैः शेषमचिन्तनीयम् ॥७॥

अत्यासन्नेति दूरस्थेऽप्यत्याढ्येऽप्यतिदुर्बले ।
वृत्तिहीने[2] च मूर्खे च षट्सु कन्या नदीयते ॥८॥

दूरस्थानामविद्यानां मोक्षधर्मानुवर्त्तिनाम्[3] ।
शूराणां निर्धनानां च नदेया कन्यका बुधैः ॥९॥

---

१ ज्ञानशीले क. २ वृत्तहीने क. ३ मोक्षकर्मानुवर्त्तिनाम् क.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अत्रिः—

गीताषष्ठं मनोषष्ठं षष्ठं चारण्यपर्वकम्
त्रिषष्ठमिति विज्ञेयं न देया कन्यका बुधैः ॥१०॥

कुली विद्वान् वयः शीलमारोग्यं न समीपगम्
रुपवानर्थवान् साधुर्वरे नव गुणाः स्मृताः ॥११॥

कुलशीलवयोरूप– वित्तविद्यायुताय च
वराय रूपसंपन्ने दद्यात् कन्यां यवीयसीम् ॥१२॥

वसिष्ठः—

अब्देषु युग्मेष्वपि कन्यकानां स्वजन्मवर्षात्तु शुभो विवाहः।
अयुग्मवर्षेषु[१] शुभो नराणां विपर्यये दुःखगदप्रदः सः ॥१३॥

सिंहस्थिते सुरगुरौ यदि नर्मदाया–
स्तद्वर्जयेत्सकलकर्मसुसौम्यभागे ।

विन्ध्यस्य दक्षिणदिशि प्रवदन्ति चार्याः
सिंहांशके मृगपताविति वर्जनीयः ॥१४॥

सिंहराशौ तु सिंहांशे यदा भवति वाक्पतिः ।
नर्मदोत्तरगोले तु न दोषो दक्षिणामुखे ॥१५॥

मृगेन्द्र संस्थितो जीवो मध्यदेशे करग्रहे ।
मृत्युयोगो मृत्युदःस्यात् दम्पत्योः पञ्चवर्षतः ॥१६॥

---

१ अयुग्मवर्षेतु लि.क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सिंहे सिंहांशकेजीवे कलिङ्गे गौडगूर्जरे ।
कालमृत्युरयं योगो दम्पत्योर्निधनप्रदः ॥१७॥

मृगेन्द्रमध्यमांशस्थे जीवे योगो शनिः स्वयम् ।
गौतमीयाम्यभागे तु दम्पत्योर्निधप्रदः ॥१८॥

योगत्रयो वर्जनीयश्चोक्तदेशेषु सर्वदा ।
उद्वाहेष्वन्यदेशेषु चात्यर्थ मङ्गलप्रदः ॥१९॥

गुरोः सप्तमराशिस्थे शुक्रे दोषोऽस्ति मौढ्यवत् ।
यद्यपि नर्मदायाम्यभागे दोषो न किंचन ॥२०॥

नारदः—

समदृष्टिर्गुरो शुक्रे तन्मासे तु प्रयत्नतः ।
विवाहादि न कुर्वीत नर्मदातीर उत्तरे ॥
नर्मदायाम्यभागे तु समदृष्टिर्न विद्यते[1] ॥२१॥

परस्परक्षेत्रगतौ रविज्यौ वरौ वदन्तीति विनाशमेति ।
तथैव चेच्छीतमयूखशुक्रौ विवाहिता नैधनमाशु नारी ॥२३॥

लल्लः—

गुरुक्षेत्रगतो भानुर्भानुक्षेत्रगतो गुरुः ।
विवाहं नैव कुर्वीत इति गर्गस्य निश्चयः ॥२४॥

---

१ निगद्यते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रीपतिः—

वृहस्पतौ शोभनगोचरस्थे विवाहमिच्छन्ति हि दाक्षिणात्याः ।
रवौ शुभस्थे प्रवदन्ति गौडा न गोचरे मालवके प्रमाणम् ।।२४।।

गौडाः सूर्ये गोचरेण प्रशस्ते वाञ्छन्त्यार्या दक्षिणात्या विवाहम् ।
[1] (लाटाःप्राय-स्थानवीर्यान्विता स्यु रावन्त्यानां गोचरेण प्रमाणम्।२५।

स्त्रीणां गुरुबलं श्रेष्ठं पुरुषाणां रवेर्बलम् ।
तयोश्चन्द्रबलं मुख्यं मुख्यं ताराबलं तयोः ।।२६।।

दिने दिने वृद्धिमुपागतत्वाद् बलीहि [2] चन्द्रःशुभ एव शुक्ले ।)
तथैव कृष्णे विलयं [3] गतत्वात् पक्षापराधात् खलु पाप एव ।।२७।।

नरपतिः—

जन्मनोद्वाहपर्यन्तं बालायास्त्रिविधं बलम् ।
बालिकायाः शुभं कुर्यात् पितृमातृबलैःसह ।।२८।।

विवाहोत्तरतो भर्तुर्बलमेवैन्दवादिकम् ।
चिन्तयेत् योषितां सर्वं विना सीमन्तकर्मणाम् ।।२९।।

दासोदरीये—

सिंहे सिंहांशकस्थे भवति सुरगुरौ वासुदेवे प्रसुप्ते ।
शुक्रे कर्कटकस्थे सितभवनगते शीतरश्मौ च पुष्ये ।।३०।।

मासे शून्ये च चैत्रे धनुरनिमिषग भास्करे भास्करर्क्षे ।
जीवेज्ये चासितस्थे गतवयसि शिशौ नैव वैवाहमाहुः ।।३१।।

---

१ चापान्तर्गतःपाठः क पुस्तके नास्ति । २ वृद्धिमुपागतं स्याद् , बालोऽपि लि.पु. । कृष्णोऽपि लयं लि.पु ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रीपतिः—

नाषाढप्रभृतिचतुष्टये विवाहो
नो पौषे न च मधुसंज्ञके विवाह ।
नैवास्तं गतवति भार्गवे न जीवे
वृद्धत्वे नखलु तयोर्न बालभावे ॥३१॥

सहजां गतिमासाद्य यद्यतीचारगो गुरुः ।
अवशिष्टं पूर्वराशिं नायास्यत्युपभुक्तये ॥३३॥

अन्तर्भाव्योपभुक्तांशं वक्रानन्तरितस्तदा
मासैर्द्वादशभिर्लुप्तसंवत्सर इतीरितः ॥३४॥

गर्ग :—

समं वृजेद्देवगुरुर्यदा तु भवेदतीचारगतिप्रजुष्टा ।
तदातिलुप्तोऽब्द इति प्रदिष्टः स्वसंहितायां च पितामहेन ॥३५॥

च्यवनः—

मासान् दशैकादश वा प्रयुज्य राशेर्यदा राशिमुपैति जीवः ।
भुङ्क्ते न पूर्वं च पुनस्तदार्दि प्रलुप्तसंवत्सरमाहुरार्याः ॥३६॥

यदि भवेदतिचारगतो गुरु र्न पुनरेति निज प्रथमस्थितिम् ।
भवति लुप्तसमा झषकुम्भयो – वृं षभवृश्चिकयोर्यदि नस्थितः ॥३७॥

गुरु :—

वृषे मेषे झषे कुम्भे यद्यतीचारगो गुरुः ।
न तत्र काललोपः स्यादित्याह भगवान् यमः ॥३८॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वकं भवनमाश्रित्य यद्यतीचारगो गुरुः ।
न तत्र काललोपः स्यादित्याह गालवो मुनिः[१] ॥३९॥

व्यासः—

यदातिचारं सुरराजमन्त्री करोति गोवृश्चिकमीनसंस्थः ।
नायात्यसौ यद्यपि पूर्वराशिं शुभाय पाणिग्रहणं वसिष्ठः ॥४०॥

पराशरः—

मासदशकानन्तरमहानि कतिचिद् गुरुर्यदा भुङ्क्ते ।
द्वादशमासा भुक्तावपि लुप्तो वत्सरस्तदा न स्यात् ॥४१॥

मनुः—

अतीचारगतो जीवो दशमासात् परं यदि ।
दिनानि कतिचिद् भुङ्क्ते न तदा लुप्तवत्सरः ॥४२॥

नारदः—

सम दृष्टिर्गुरोः शुक्रस्तन्मासे तु प्रयत्नतः ।
विवाहादि न कुर्वीत नर्मदातीर उत्तरे ॥४३॥

गुरुः—

यदा जीवसितौ वक्रे परस्परनिरीक्षितौ ।
सप्तमस्थौ तदा दोषो मूढत्वादतिरिच्यते ॥४४॥

---

१ भगवान् यमः भगवान् मुनि- क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भरद्वाजः—

गुरुशुक्रौ यदा नूढौ यदा चान्योन्यवीक्षितौ ।
यदा वाऽपि दिवा दृष्टौ[1] तदा कर्म शुभं त्यजेत् ॥४५॥

वसिष्ठः—

दिनाधिपे मेषवृषालिकुम्भेनृयुग्मगाख्येषु घटेषु संस्थे ।
माघद्वये माधवशुक्रयोस्तु मुख्योऽथवा कार्तिकमार्गयोस्तु ॥४६॥

कालविधाने:—

अर्ककर्कटकन्यकाघटधनुर्युक्ते भृगौ मन्त्रिणि
स्फीत ज्योतिषि चैव गोचरवले रिक्तेविरिक्ते तिथौ ।
रोहिण्युत्तररेवतीपितृमरुत्मित्रेन्दुहस्तासुरे –
ज्वारारार्कजवासरादिरहितेषूद्वाहकर्मारभेत्[2] ॥४७॥

उद्वाहं कन्यकाकुम्भकुलीरस्थे रवौ त्यजेत् ।
कार्तिकाश्वयुजौ मासा उद्वाहो दक्षिणायने ॥
संशन्ति श्राणं चैके मासास्त्वन्ते विगर्हिताः ॥४८॥

जन्मराशि न च जन्मभे तथा नैव जन्मदिवसेऽपि कारयेत् ।
आद्यगर्भ दुहितुः सुतस्य वा ज्येष्ठमासि न तु जातु मङ्गलम् ॥४९॥

वसिष्ठः:—

ज्येष्ठे मासि ज्येष्ठयोर्वा नृनार्यो नैवोद्वाहो नोपरागोऽद्भुतेषु ।
सर्वग्रासे सप्तरात्रं तदर्धं खण्डे त्याज्यं चाद्भुते सप्तरात्रम् ॥५०॥

---

१ दृश्यौ अ. । २ आरभेत् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नारदः—

अप्रबुद्धे हृषीकेशे यावत्तावन्न मङ्गलम् ।
उत्सवे वासुदेवस्य मङ्गलं नान्यमङ्गलम् ॥५१॥

न जन्ममासे जन्मर्क्षे न जन्मदिवसेऽपि च ।
नाद्यगर्भसुतस्याद्यदुहितुर्वा करग्रहः ॥५२॥

आर्द्रादिके स्वातिविरामकाले नक्षत्रवृन्दे दशके तथैव ।
विवाहचौलव्रतबन्धनाद्यं सुरप्रतिष्ठां च न कार्यमेव ॥५३॥

ज्येष्ठेमासि सहस्रांशोः शाङ्करस्यार्ध भोगतः ।
विवाहं शुभदं प्राहु इति गर्गेण निश्चितम् ॥५४॥

वसिष्ठः–

ग्रस्तोदये चोर्ध्वमनिष्टमादौ ग्रस्तास्तमानौप्युडुमासषड्कम् ।
नाड्यश्चतस्रस्तिथि ऋक्षयोगसन्धिर्द्विपादं करणस्य सन्धिः ॥
पक्षाब्दसन्धिस्त्रिदिनं च माससन्धिस्त्रिनाड्योभयसन्ध्ययोश्च ॥५५॥

इतिश्रीसारङ्गसाधुवचरामृतेन भट्टश्रीलक्ष्मणाचार्यलिरचिते जगन्मोहने कालशुद्धिर्नामाऽध्यायः ।

अथ महादोषनिरूपणं सप्तसलाकाचक्रम्

प्राच्यां सप्तकरेखाश्च तिर्यक् सप्तोपरिन्यसेत् ।
तदन्तेऽनलभाद्यास्तु तारा यस्य ग्रहस्थितिः ॥१॥

तद्रेखाभिमुखीतारा महादोषवती तथा ।
महाशूलं च शूलं च पापसौम्यग्रहाश्रिता: ॥२॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

महाशूलकृतं पुण्यं विनाशमुपगच्छति ।
शूले कर्तुर्विनाशाय तेषु चन्द्रे यदि स्थिते ॥३॥

तत्रैकरेखास्थितखेचरेन्द्रैर्विद्धं तदृक्षं नशुभं प्रदिष्टम् ।
तस्मिन्नितान्तं समपादविद्धे प्रदूषितेऽन्यत्रितयं शुभावहम् ॥४॥

नशृङ्गभेदनेनैव शरीरस्य च भेदनम् ।
पादवेधे न तद्धिष्ण्ये सर्वं विद्धं हि नो कथम् ॥५॥

विद्धभे करतलग्रहस्तदा मृत्युमेव विदधीतयोषितः ।
लत्तया विनिहिते च तारके सा वधूर्विधवतामवाप्नुयात् ॥६॥

अथ पञ्चशलाका

रेखाश्चोर्ध्वाः पञ्च तिर्यक् च पञ्च[1] द्वे द्वे रेखे कोणयोरत्रचक्रे ।
क्रमान्न्यस्ये[2] शंभुकोणे द्वितीय रेखायां भान्यग्निभात्साभिजिच्च ॥७॥

चक्रे तस्मिन्नेकरेखास्थितेन तद्विद्धर्क्षं खेचरेण प्रदिष्टम् ।
क्रूरैर्विद्धे सर्वधिष्ण्यं विवर्ज्यं सौम्यैर्विद्धं नाखिलं पाद एव ॥८॥

पञ्चशलाकाचक्रे पाणिग्रहणे भ वेधविधिरुक्तः ।
शस्तः शुभमित्रकृतः सप्तशलाकाकाल इतरत्र ॥९॥

नारदः–

पाद एव शुभैर्विद्धमशुभैर्नैवकृत्स्नभम् ।
क्रूरटिद्धयुतं धिष्ण्यं निखिलं नैव पादतः ॥१०॥

---

१ तिर्यक्प्रवृद्धे लि. पु. । २ नाड्चान्यसेत् लि. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निहितं त्रिविधोत्पातैः क्रूराक्रान्तं च विद्धभं निखिलम् ।
त्याज्यं तच्शुभकर्मणि न पादतः पापधिष्ण्यं च ॥११॥

आरार्कार्क्यहिकेतुभिराक्रान्तं च तत्सर्वम् ।
मङ्गलकार्ये सततं त्याज्यं चोत्पातदूषितं धिष्ण्यम् ॥१२॥

तक्षकविषाग्निदग्धः स नरो म्रियते किमेकदेशो वा ।
तं मृतधिष्ण्यं निखिलं मृतभे च कृतम् मृत्युमेति ॥१३॥

नक्षत्रं यो दोषो निहन्ति राशिं न शक्नोति हन्तुम् ।
तद् गात्रमेव गरलं पित्रादीनां न हन्यते यद्वत् ॥१४॥

नारदः–

एकविंशान्महादोषा नामरूपफलानि च ।
पितामहोक्तं संवीक्ष्य तानि वक्ष्ये समासतः ॥१५॥

पञ्चाङ्गशुद्धिरहितो दोषस्त्वाद्यः प्रकीर्तितः ।
उदयास्तशुद्धिहीनो द्वितीयः सूर्यसंक्रमः ॥१६॥

तृतीयः पापषड्वर्गो भृगुः षड्कः कुजाष्टमः ।
गण्डान्तकर्तरीरिःफषडष्टेन्दुश्च सग्रहः ॥१७॥

दम्पत्योरष्टमंलग्नं राशिर्विषघटीभवः ।
दुर्मुहूर्तो वारदोषः खार्जूरिकसमाङ्घ्रिभम् ॥१८॥

ग्रहणोत्पातभं क्रूरविद्धर्क्षंक्रूरसंयुतम् ।
कुनवांशो महापातो वैधृतिश्चैकविंशतिः ॥१९॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तथाह वसिष्ठः——

पञ्चाङ्गदोषो रविसंक्रमश्च स सग्रहः कर्तरिकांशदोषाः ।
चन्द्रारिरिःफाष्टमपापवर्गः कुजाष्टमस्थो भृगुषड्कसंस्थः ।।२०।।

गण्डान्तखार्जूरिकवारदोषा विषाख्यनाड्योऽष्टमलग्नराशिः ।
अकालवृष्टिः कुमुहूर्तदोषो महाव्यतीपातजवैधृतोत्थः ।।२१।।

लग्नास्तशुद्धिग्रहणर्क्षजात पापर्क्षविद्धर्क्ष समुद्भवा ये ।
उत्पातभाख्या महदाख्यदोषा सर्वेषु देशेषु विवर्ज्यनीया[1] ।।२२।।

एकोत्तरा विंशतिकाऽत्र दोषा स्वसंहितायां च पितामेहन ।
तस्मिन् महादोषचयेऽपि कार्यं कृतं च तन्नाशमुपैत्यवश्यम् ।।२३।।

नारदः—

तिथिवारर्क्षकरणयोगाः पञ्चाङ्गसंस्थिताः ।
तच्शुद्धिहीने यत्कर्म तन्निरर्थकमीरितम् ।।२४।।

लग्नास्तशुद्धिमाह पराशरः—

शुभग्रहसमायोगशुभग्रहनिरीक्षणम् ।
लग्नलग्नांशपत्योश्च परस्पर सुमित्रता ।।२५।।

लग्नांशात् सप्तमांशेऽपि पापग्रविहीनतता ।
सैषा लग्नास्तयोः शुद्धिः सर्वकामार्थदायिनी ।।२६।।

(लग्नास्तशुद्धिः[2])

---

१ सदा विवर्ज्याः अ. । २ क पुस्तके नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भरद्वाजः—

स्वे स्वेंऽशेनोदयास्तांशौ वीक्षितौ वाऽथ संयुतौ ।
लग्नं वा स्वगृहं तत्र तदंशे वीक्षितौ युतौ

राश्यंशौ मित्रसौम्येन वीक्षितौ वाऽथ संयुतौ ।
त्रिप्रकारेण सा शुद्धिः उदयास्तमयी स्फुटा ॥२८॥

इति कश्यपः ।

उदयगतनवांशः स्वेशदृष्टो युतो वा
न भवति यदि मृत्युः स्यात् तदानीं वरस्य ।
परिणयसमये चेदेवमस्तोदयांशः
स्वपति सहितदृष्टे मृत्युकारी च वध्वाः ॥२९॥

इष्टोदयांशे निजपत्यदृष्टे वरस्य मृत्युस्तदसंयुते वा ।
अष्टांशकेऽप्येवमदृष्टयुक्ते स्वस्वामिना नाशमुपैति कन्या ॥३०॥

उदयांशस्वनाथेन मित्रसौम्येन वा युतः ।
प्रेक्षितो वा तथा स्वांशो दम्पत्योः पुत्रपौत्रदः ॥३१॥

लग्नलग्नांशकौ युक्तौ पतिभ्यां वा निरीक्षितौ ।
मित्रसौम्येन वा युक्तौ तेन वाऽथ निरीक्षितौ ॥
अशुद्धिस्तदभावं स्यात् सर्वानर्थप्रदायिनी ॥३२॥

संक्रान्तिलक्षणम्

अयने विषुवे पूर्वं परं मध्यं दिनं त्यजेत् ।
अन्यसंक्रमणे पूर्वं पराः षोडश नाडिकाः ॥३३॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यदाऽयनप्रवेशः स्यात् तदा तद्राशिसंक्रमः ।
तस्मिन्नपि तथा त्याज्या नाड्यः षोडश षोडशः ॥३४॥

विवाहादौ कृतौ तत्र शुभकोटिर्विनश्यति ।
लाक्षादृढा यथा दत्ता वह्नौ प्रज्वलिते सति ॥३५॥

अथ षड्वर्गलक्षणम्

नारदः

त्रिंशद्भागात्मकं लग्नं होरा तस्यार्धमुच्यते ।
लग्नत्रिभागो द्रेक्काणो नवमांशो नवांशकः ॥३६॥

द्वादशांशो द्वादशांशस्त्रिंशांशस्त्रिंशदंशकः ।
षड्वर्गाः कथिता ह्येते तेषामीशा इमे स्मृताः ॥३७॥

मेषवृश्चिकयोर्भौमस्तुलावृषभयोः सितः ।
कन्यामिथुनयोर्बोधः कर्कटस्य पति शशी ।॥३८॥

चापान्त्ययोर्गुरुः स्वामी शनिर्मकरकुम्भयोः ।
रविः सिंहस्य वै तेषामंशानामधिपा इमे ॥३९॥

शुक्रज्ञचन्द्रगुरवः शुभा, ह्यन्येऽशुभेतराः ।
क्षीणः शशी च पापः स्यात् पापयुक्तो बुधोऽशुभः ॥४०॥

होरयोरोजराशौ तु रवीन्दू क्रमतः पती ।
स्यूर्द्रेक्काणेषु लग्नेषु नव राशीश्वराः क्रमात् ॥४१॥

नवमांशे मेषसिंहचापऽथोऽजादयः क्रमात् ।
क्रमाद् गोमृगकन्यासु ज्ञेया स्युर्मकरादयः ॥४२॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लग्नराशिं समारभ्य द्वादशांशेश्वराः क्रमात् ।
कुजार्कीज्यज्ञशुक्राणां वाणेष्वष्टाद्रिमार्गणाः ॥४३॥

भागाः स्युर्विषमे ते तु समराशौ विपर्ययात् ।
षड्वर्गो भवति सदा शुभखेचरसमुद्भवः शुभदः ॥४४॥

पापसमुत्थस्त्वशुभस्तस्माद् ग्राह्यस्तु सौम्यषड्वर्गः ।
एकविंशो मनुजिनाः मुनिश्चेति त्रिवारतः ॥४५॥

मे. २१ । वृ. १४ । मि २४। क. ७ ।, सिं. २१ । कं. १४ । तु. २४ ।
वृ. ७ ।, ध. २१ । म. १४ कुं. २४ । मी. ७ ।

आवृत्ता पुष्करा भागा मेषराश्यादितः क्रमात् ।
एष पुष्करभागो हि लग्नादेः क्रौर्यसम्भवम् ॥४६॥

दोषं विनाशयत्याशु हरिः पापमिव स्मृतः ।
द्रेक्काणमुदयं चापि होरां वा द्वादशांशकः ।।
क्रूरं विनाशयत्येव विना कुनवमांशकम् ॥४७॥

कश्यपः—

क्रूरविलग्नकं चापि क्रूरद्रेक्काण एव च ।
क्रूराहोरा थवान्यद्वा हित्वा कुनवमांशकम् ॥४८॥

पुष्करस्यास्य भागस्य महिमा चानृतायते ।
ईश्वरस्य प्रभावेण विषं हालाहलं यथा ॥४९॥

षड्वर्गं संत्यज्य विवाहादिषु कर्मसु ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वसिष्ठः —

वर्गोत्तमोऽपि न ग्राह्यः शुभकर्मफले शुभे ।
लग्नस्यभावो जीवस्य षड्वर्गो देह उच्यते ॥५०॥

ग्रहाश्चावयवाः प्रोक्ता इति शास्त्रविदो विदुः ।
एतद्विलक्षणः पापषड्वर्ग इति गीयते
तत्र यत् क्रियते कर्म तत्सर्वं निष्फलं भवेत् ॥५१॥

यः पापषड्वर्ग[१] महान् स दोषः पञ्चाङ्गसौम्यग्रहलग्नजातम् ।
गुणौघमम्भोधिममोघबाणः शुष्यत्यशेषं खलु राघस्य ॥५२॥

गुरुः —

पापषड्वर्गजो दोषः सकलगुणसंचयम् ।
हन्ति यद्वद्द्यानीकं हरिरित्यक्षरद्वयम् ॥५३॥

भृगुषट्कदोषः

लग्नाच् शुक्रो भवेत् षष्ठे भृगुषट्क इतीरितः ।
स निहन्ति गुणान् सर्वानाधिधातु चयं क्रमात्[२] ॥५४॥

अथ कुजाष्टमदोषः

भरद्वाजः—

सर्वान् गुणान्निहन्त्याशु विलग्नादष्टमः कुजः ।
असत्यभाषणं यद्वदखिलान्धर्मसंचयान् ॥५५॥

---

१ पापषड्वर्गः । २ । धातुनि च क्रमात् लि.पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तथा च नारदः —

कुजाष्टमो महादोषो लग्नादष्टमगे कुजे ।
शुभत्रययुतं[1] लग्नं त्यजेत् तुङ्गगतो यदि[2] ॥५६॥

अथाष्टमलग्नदोषः

पराशरः —

संत्यजेन्नैधनं लग्नं दम्पत्योर्जन्मलग्नतः ।
नैधनेशश्च यत्रास्ते तल्लग्नं चापि वर्जयेत् ॥५७॥

संत्यजेन्नैधनंराशिं दम्पत्यो र्जन्मराशितः ।
तदीश्वरो वा यत्रास्ते तं राशिं वर्जयेद् बुधः ॥५८॥

जन्मराश्यंशतो वापि जन्मलग्नांशतोऽपि वाः ।
अष्टमौ राशिलग्नांशौ त्याज्यौ शुभफलेप्सुभिः ॥५९॥

जन्मलग्नादितो लग्नाद्द्विद्वादशं त्यजेत् ।
सर्वत्र लग्नजन्मादीन् अष्टम लग्नादिप्रवलं भवेत् ॥६०॥
तदा त्याज्यं नोचेन्नत्याज्यमिति द्रष्टव्यं । तथा चोक्तम् ।

गर्गः—

लग्नादिनैधनं त्याज्यं बलयुक्तं यदा भवेत् ।
बलहीनं न चेत्त्याज्यं शुक्रदोषा समर्थते ॥६१॥ इति ।
उक्तदोषलक्षणराहित्यमदोष उच्यते—
सनिहन्ति शुभं कर्म व्याघ्रः कृत्स्नं मृगं यथा ॥

---

१ शुभप्रदयुतं, २ तत्तुङ्गगोऽपिवा लि. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अस्यदोषस्यापवादमाह ।

वसिष्ठः—

जन्माख्यनाड़ीषु कृतं शुभं यद् विनाशमायात्यचिराच्च सर्वम् ।
कुर्वन्ति नाशं विषनाडिकास्ता लग्नाश्रितानंशगुणान् विशेषान् ।।६२।।

जन्तून् यथा कुष्टभगन्दराश्मर्यध्मानशूलक्षयवातरोगाः ।
कुर्वन्त्युद्वाहितां कन्यां विधवां वत्सरत्रयात् ।।६३।।

अन्यस्मिन् मङ्गले ताश्च निधनं चाथ निर्धनम् ।
दस्रादीनां क्रमाज्ज्ञेयाश्चतस्रो विषनाडिका ।।६४।।

खाक्षा ५० जिना २४ व्योमगुणा ३० खवेदा ४०
इन्द्राः १४ कुदस्राः २१ खगुणा ३० नखाश्च २० ।
दन्ताः ३२ खरामाः ३० खयमाः २० पुराणाः १८
क्ष्माबाहवो २१ विंशति २० रब्धिचन्द्राः १४ ।।६५।।

इन्द्रा १४ स्तु काष्ठा १० मनवः १४ षडक्षा ५६
वेदाश्विनो २४ व्योमभूजा २० दशा १० ऽशाः १० ।
नागेन्दवो १८ भूपतयो १६ ऽब्धिदस्रा २४
व्योमाग्नयो ३० दस्रमुखर्क्षकाणाम् ।।६६।।

भरद्वाजः—

रुद्राहिमित्रपितरो वसुवार्विश्ववेधसः ।
विधीन्द्राग्न्यधिदैवत्या बुधवरुणार्यमयोनयः ।।६७।।

दिवातनमुहूर्तेषु एते पञ्च दशेरिताः ।
ईशाजपादहिर्बुध्न्यः पूषाश्वि यमपादकाः ।
त्वष्ट्रा समीरणश्चेति मुहूर्ता रात्रिकस्मृताः ।।६८।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वसिष्ठः—

आर्यम्णो भानुवारे शशधरदिवसे राक्षसब्रह्मसंज्ञौ
पित्र्याग्नेयौ कुजाह्ने शशिसुतदिवसे योऽभिजित्संज्ञकःसः ।
जीवाह्ने राक्षसाप्यौ भृगुसुतदिवसे ब्राह्मपैत्र्यावहीशौ
सौरावेतौ, विवर्ज्यास्त्वधननिधनदा मङ्गले दुर्मुहूर्ताः ॥६९॥

वरस्य लक्ष्मीं निखिलां निहन्ति संवत्सरार्धं कुमुहूर्तदोषः ।
दुर्वाससः शाप इव प्रमत्त माहेन्द्रलक्ष्मीसम मासमग्रम् ॥७०॥

अथ वारदोषः

नारदः—

आद्यः षष्ठो द्वितीयोऽस्मात् तस्मात् षष्ठः पुनः पुनः ।
सार्धनाडीद्वयेनैव दिवारात्रौ यथाक्रमात् ॥७१॥

तत्र गर्गः—

तत्र निन्दितवारदोषः स उच्यते ।
वारदोषो वरं हन्ति मार्जारो मूषकं यथा
स्थूले शुभेऽपि सूक्ष्मस्यादशुभस्त्याज्य एव सः । ॥७२॥

सूक्ष्मे सुभेऽपि स्थूलश्च अशुभस्त्याज्य एव हि
तस्माद् वारौ स्थूलसूक्ष्मौ शुभौ ग्राह्यौ न चान्यथा । ॥७३॥

एवं खार्जूरिकं

नारदः—

लिखेदूर्द्धाधरां रेखां तिर्यग्रेखा त्रयोदश ।
तत्र खार्जूरिके चक्रे कथं मूर्ध्नि च भं न्यसेत् ॥७४॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तान्येकरेखागतयोः सूर्याचन्द्रमसोर्मिथः ।
एकार्गलो दृष्टिपातस्त्वभिजिद्वर्जितानिवै ॥७५॥

अदितीन्दुमघाहृयाद्यमूलमैत्रेज्यभानि च ।
ज्ञेयानि सह चित्राणि मूर्ध्निभानि यथाक्रमम् ॥७६॥

वसिष्ठः—

खार्जूरचक्रस्य समाङ्घ्रिदोषो विलग्नसंभूतगणान्न शेषान् ।
शुभग्रहोत्थान् स तथा निहन्ति लोभो यथा सर्वगुणान् निहन्ति ॥७७॥

नारदः—

पाद एव शुभैर्विद्ध मशुभैर्नैव कृत्स्नभम् ।
क्रूरविद्धयुतं धिष्ण्यं निखिलं नैव पादतः ॥७८॥

वसिष्ठः--

अहिवासवपौष्णानामन्त्यपादर्धमृक्षसन्धिः स्यात् ।
पितृमूलाश्विने भानामादौ यामार्धगण्डान्तम् ॥७९॥

पुनः पुनः पञ्चमषष्ठतिथ्यो· यदन्तरालं प्रहरार्धकालः ।
यल्लग्न जातं गुणसंचयं यत् क्ष्वेडो तथा हन्ति नरं हि नूनम् ॥८०॥

लग्नान्तरालं घटिकार्धमेतत्कुलीरहर्योरलिचापयोश्च ।
मीनाजयोः सर्वगुणान्निहन्ति दारिद्रमेकं गुणसंहतिं तत्[1] ॥८१॥

लग्नेऽस्य पृष्ठाग्रगयोरसाध्वोः सा कर्तरि स्यादृजु वक्रगत्योः
तावेव शीघ्रौ यदि बक्रचारौ नकर्तरी चेति पितामहोक्तिः ॥८२॥

---

१ यथा अ. क. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यः कर्तरी नाम महान् स दोषो लग्नोद्भवानंशशुभग्रहोत्थान् ।
गुणान्निहन्ति प्रबलानशेषान् व्याघ्रं यथा गोसमितिं समस्ताम् ॥८३॥

क्रूरग्रहमध्यगते लग्ने चन्द्रेऽथवा करग्रहणम् ।
ते यमसदनाभिमुखं गमनं चेच्छन्ति कन्यकायाः ॥८४॥

पापयोः कर्तरीकर्त्रो नीचशत्रुगृहस्थयोः ।
यदा चास्तगयोर्वाऽपि कर्तरी नैव दोषदा ॥८५॥

लग्नादिसर्वे शुभराशयश्च शुभेक्षितावाथ युताः शुभाः स्युः ।
नवांशकास्तौलिनृयुग्मवत्यश्चापाद्यभागः शुभदो न वाऽन्य ॥८६॥

द्विभर्तृका मेषनवांशके स्याद् वृषांशके स्यात् पशुशीलयुक्ता[१] ।
धनान्विता पुत्रवती तृतीये कुलीरकांशे कुलटाप्यजस्रम् ॥८७॥

सिंहांशके सा पितृमन्दिरस्था कन्यांशके वित्तयुता सुशीला ।
तुलांशके सर्वगुणास्पदा सा कीटांशके निःस्वतरा विशीला ॥८८॥

चापांशकाद्ये धनिनी द्वितीये भागेऽन्यसक्ता मलिनी गदाढ्या ।
निःस्वा भृगांशे विगुणाघटांशके विभर्तृका योगरता विशीर्णा ॥८९॥

मीनांशके भर्तृसुतार्थहीना[२] शुभग्रहैर्युक्तनिरीक्षितेऽपि ।
तस्मात् सदैवोक्त नवांशकेषुकुर्याद् विवाहं गुणसंप्रवृध्यै ॥९०॥

अन्त्यांशकश्चेद् विशुभांशकानां मध्ये य एको न शुभप्रदः सः ।
स एव वर्गोत्तम संज्ञित श्चेच्छुभप्रदश्चाखिलमङ्गलेषु ॥९१॥

---

१ पशुशीलयुक्ता-पशुचारपरा 'पीयूषधारा'। २ भर्तृयुता ऽर्थहीना-पीयूषधारा ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वर्गोत्तमं विनान्त्यांशो विवाहे न शुभप्रदः ।
वर्गोत्तमश्चेदन्त्यांशः पुत्रपौत्रादिवृद्धिदः ॥९२॥

वर्गोत्तमोऽपि संत्याज्यः क्रूरराशिषु संस्थितः ।
शुभं दत्वा तु कर्तारं वासयत्येव वत्सरान् ॥९३॥

नवांशदोषः सकलं गुणौघं ''लग्नोत्थसौम्यग्रहसंभवं च ।
दत्तं निहन्तीव वृकोऽजसंघं " षड्वर्गजंसौम्यवियच्चराणाम् ॥९४॥

विधोश्च षष्टाष्टम रिःफदोषः करोति नाशं विविधं गुणौघम् ।
लग्नांशसौम्यग्रहजं च तद्वत् सुरालवः पावनपञ्चगव्यम् ॥९५॥

षष्टाष्टमद्वादशगे शशाङ्के स्थिते ग्रहा वर्धयितुं न शक्ताः ।
विवाहमुत्सन्निजमित्रमुच्चैर्वत्सं यथा वत्सलवत् स्वकीयम् ॥९६॥

नारदः—

षडष्टरिःफगे चन्द्रे लग्नदोषः स उच्यते ।
तल्लग्नं वर्जयेद् यत्नादपिशुक्रेज्यसंयुतम् ॥९७॥

उच्चगे नीचगे वाऽपि मित्रगे शत्रुराशिगे ।
अपि सर्वगुणोपेतं दंपत्योर्निधनप्रदम् ॥९८॥

सग्रहो दोषः

शशाङ्के ग्रहसंयुक्ते दोषः सग्रहसंज्ञकः ।
तस्मिन् सग्रहदोषे तु विवाहं नैव कारयेत् ॥९९॥

सूर्येण संयुते चन्द्रे दारिद्रं भवति ध्रुवम् ।
कुजेन मरणं व्याधिः सौम्येन त्वनपत्यता ॥१००॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दौर्भाग्यं गुरुणा युक्ते सापत्न्यं भार्गवेन तु ।
प्रव्रज्या सूर्यपुत्रेण राहुणा कलहः सदा ॥१०१॥

केतुना संयुते चन्द्रे नित्यं कष्टदरिद्रता ।
पापद्वययुते चन्द्रे दम्पत्योर्मरणं भवेत् ॥१०२॥

शुभग्रहयुते चन्द्रे स्वोच्चस्थे मित्रराशिगे ।
दोषाय न भवेल्लग्नं दम्पत्योः श्रेयसे तदा ॥१०३॥

स्वक्षेत्रगः स्वोच्चगो वा मित्र क्षेत्रगतो यदि ।
पापग्रहयुतश्चन्द्रः करोति मरणं तयोः ॥१०४॥

अकालवृष्टिप्रभवः सदोषः करोति मृत्युं शुभकार्यकेतुः ।
त्रातुं यथा लग्नगुणास्त्वशक्ताः स्वबन्धुवर्गा इव वह्निदग्धम् ॥१०५॥

वसिष्ठः—

वर्षान्ते वर्जयेत् पक्षं मासान्ते तु दिनत्रयम् ।
घटिकाद्वयमृक्षान्ते ग्रहणाद् दिन सप्तकम् ॥१०६॥

गर्गः—

सूर्यचन्द्रोपरागौ द्वौ महादोषाह्वयावुभौ ।
सप्तरात्रं तयोरुर्ध्वं सर्वशोभननाशनम् ॥१०७॥

चन्द्रसूर्योपरागेषु त्र्यहं पूर्वं शुभं भवेत् ।
सप्ताहमशुभं पश्चात् स्मृतं ग्रहण शूलकम् ॥१०८॥

उत्पातभोपप्लवभोग्रखेट विद्धर्क्षकं तद्वरकन्ययोस्तु ।
विनाशदं लग्नगुणास्त्वशक्तास्त्रातुं यथा पातकिनं स्वकीयाः ।१०९।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उत्पात ग्रहणभंकूरविद्धस्थितं च भम् ।
दहतीव शुभं कर्म राघबाग्निशरोऽम्बुधिम् ॥११०॥

लग्नस्थजीवससितप्रजाता गुणाः परित्रातुमशेकुरेव ।
भ्रष्टं जनं बन्धुजना यथैव वर्गोत्तमांशोद्भव चन्द्रजाताः ॥१११॥

गुणास्तदुद्धर्तुमिवा समर्था लग्नं महादोष विदूषितं यत् ।
गुणा यथा निर्गुणतां च सर्वे ------ ॥११२॥

वार्षिक महातन्त्रे --

पातागमे प्राग् दिनकृक्छशाङ्को राहुः प्रसाध्यायनभाजयुक्ताम् ।
चन्द्रार्कयोः क्रान्तिलवान् स्वविम्बौ विक्षेपभागश्च निशाकरस्य ॥११३॥

शिष्यधीतन्त्रे --

तुल्येऽयने भिन्नदिशे रवीन्द्वोः स्याद् वैधृतश्चैव समे समांशे ।
भिन्नेऽयने तुल्यदिशोस्तु योगे चक्रार्धतुल्ये व्यतिपात योगः ॥११४॥

चन्द्रः सहस्रकिरणेन सहैकमार्गान् येन प्रयाति समयेन समस्त एव ।
पुण्यः स दानजपहोमविधौ वरिष्ठो यात्रादिकेषु तु दिनद्वयमत्र दुष्टम् ॥११५॥

सूर्यसिद्धान्ते --

एकायनगतौ स्यातां सूर्या चन्द्रमसौ यदा ।
तद्युतौ मण्डले क्रान्त्योस्तुल्यत्वे वैधृताभिधः ॥११६॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

[1] (विपरीतायनगतौ चन्द्रार्कौ क्रान्तिलिप्तिकाः ।
समस्तदा व्यतीपातो भगणार्धे तयोर्युतौ ॥११७॥

तुल्यांशजालसंपर्कान्तयोस्तु प्रवहाहतः ।)
तत्र क्रोधोद्भवं वह्निर्लोकाऽभावाय जायते ॥११८॥

विनाशयति पातेऽस्मिन् लोकानामसकृद् यतः ।
व्यतीपातः प्रसिद्धोऽयं नाम्ना भेदेन वैधृतिः ॥११९॥

स कृष्णो दारुण वपुर्लोहिताक्षो महोदरः ।
सर्वा रिष्टकरो रौद्रो भूयो भूयः प्रजायते ॥१२०॥

आद्यन्तकालयोर्मध्ये काले ज्ञेयोऽतिदारुणः ।]
प्रज्वलज्ज्वलनाकारः सर्वकर्मसु गर्हितः ॥१२१॥

एककाष्ठागतं यावदर्केन्दोर्मण्डलान्तरम् ।
संभवस्तावदेवस्यात् सर्वकर्मविनाशकृत् ॥१२२॥

स्नानदानतपः श्राद्धव्रतहोमादिकर्मभिः ।
प्राप्यते सुमहच्छ्रेयस्तत्कालज्ञानतोऽपि वा ॥१२३॥

ब्रह्मसिद्धान्ते[2]—

पातस्यानयनं कथं वदयतो[3] मेषे शरांशा रवेः
भागाःपञ्चकृतिर्झषे हिमरुचिस्तद्वच्च राहुर्मृगे ।

अप्येदं घटकन्ययोरिनविधू व्यत्यस्तराशौ यदा
राहोः पञ्चलवास्तदा मृगपतौ विद्वान् विलोक्या शुभे ॥१२४॥

---

१ चापान्तर्गतः पाठः क पुस्तके नास्ति ।
२ 'वार्षिकतन्त्रे' इत्यत्यधिकः पाठो वर्तते श्र पुस्तके । ३ यथा क ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वसिष्ठः—

दोषो महापात इति प्रसिद्धः स वैधृतो हन्ति वधूं वरं च।
तं रक्षितुं लग्नगुणा अशक्ताः स्वबान्धवास्तेऽशनिनोपघातम्।। १२५।।

शास्त्रात् समानीत महातिपातः स वैधृतिर्हन्ति वधूं वरं च।
त्रिसप्तवारानिव जामदग्न्यः क्रोधाच् चिरात्क्षात्रकुलं समस्तम्।।१२६।।

एकविंश[1]न्महादोषास्ते ते ब्रह्ममुखोदिताः।
कदाचिन्नेव सीदन्ति गुणानां कोटिकोटिभिः ।।१२७।।

बृहन्नारदीये—

महादोषा इमे त्याज्याः सर्वदेशेषु सर्वदा।
न निवारयितुं शक्या गुणान्तर शतैरपि ।।१२८।।

एकविंशतिमहादोषास्ततो व्यतिरिक्ता ये दोषा बहवः सन्ति। ते देशव्यवस्थायाः सामान्यदोषरुपेणोक्तदोषेष्वेव संयोजनीयाः, ते सामन्य-दोषा इति मन्तव्या अपवादैः शाम्यन्ति। परिगणितानामेकविंशतिमहा-दोषाणामपवादो न दृश्यते।

तथाहुर्वसिष्ठ गर्ग च्यवनादयः—
उत्पातभोपप्लवभोग्रखेट विद्धर्क्षतद्भं वरकन्ययोस्तम्।
विनाशदंलग्न गुणास्त्वशक्तास्त्रातुं यथा पातकिनं स्वकीयाः ।।१२९।।

उत्पातभं ग्रहणभं क्रूरविद्धस्थितं च भम्।
दहतीव शुभं कर्म राघवाग्नि शरोऽम्बुधिम् ।।१३०।।

---

१ एक विंशतिः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

७९ महादोषनिरूपणाऽध्यायः

वसिष्ठः —

लग्नं महादोष विदूषितं यन्नतद्गुणास्त्राणविधौ समर्थाः ।
राजावधूतं पुरुषं च यद्वदन्ये जना बन्धुजनाश्च सर्वे ॥१३१॥

लग्नस्थजीवज्ञसितप्रजाता गुणाः परित्रातु मशेकुरे व ।
लग्नं महादोषविदूषितं यद् भ्रष्टं जनं वन्धुजना यथैव ॥१३२॥

लग्नांशसौम्यग्रहवर्गजा ये गुणाः समर्था न च रक्षितुं यत् ।
१(लग्नं महादोषविदूषितं यच्छूद्रार्थयज्ञा इव याजकानाम् ॥१३३॥

मित्राधिमित्रोच्चगृहांशजातां गुणास्त्वशक्ताः परि रक्षितुं यत् ।)
लग्नं महादोषविदूषितं यद्धर्मो यथाऽधर्मपरं द्विजेन्द्रम् ॥१३४॥

वर्गोत्तमांशोद्भवचन्द्रजाता गुणास्तदुद्धर्तुमिवासमर्थाः ।
लग्नं महादोषविदूषितं यद् गुणा यथा निर्गुणिनं च सर्वे ॥१३५॥

लग्नं महादोषविदूषितं तदपास्य सौम्यग्रहकेन्द्रजातः ।
व्यथां गुणाः पूर्णसुधाकरस्य करा जानानान्दकरा इवान्धम् ॥१३६।

अवाप्य वन्ध्या सुगुणास्तदन्धं लाभस्थखेट स्वगृहोच्चजाताः ।
लग्नं महादोषविदूषितं यद् विबीजिनां यद्वदपत्ययोगाः ॥१३७॥

२धर्मत्रिकोणेषु शुभ ग्रहोत्थ गुणानिरर्थास्तदवामसर्वे ।
लग्नं महादोषविदूषितं यद्विबीजिनां यद्वदपत्ययोगाः ॥१३८॥

१चापान्तर्गतः पाठः क पुस्तके नास्ति । २ एष पाठः अ पुस्तके नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्युरात्रिमध्ये खलु मण्डलेषु पादार्धकालः परिवर्जनीयः।
तदाभिजिद् ब्राह्म मूहूर्तकत्वात् तद्दोषजः सोऽपि शुभप्रदश्च ॥१३९॥

एकविंशान्महादोषास्ते ते ब्रह्ममुखोदिताः।
कदाचिन्नैव सीदन्ति गुणानां कोटिकोटिभिः ॥१४०॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने एकविंशतिमहादोषलक्षणाऽध्यायः।

अथ कृत्याकृत्य विवेकः

लल्ल[1]:—

नीचस्थे वक्रसंस्थेऽप्यतिचरणगते बालवृद्धास्तगे वा
सन्यासो देवयात्रा व्रतनियमविधिः कर्णवेधस्तु दीक्षा।
मौञ्जीबन्धो नकुर्यात् परिणयनविधिवासुदेव प्रतिष्ठा
वर्ज्याः सद्भिः प्रयत्नात् त्रिदशपतिगुरौ सिंहराशौ स्थिते च ॥१॥

त्रयोदशगते पक्षे तदा संहरते जगत्।
अपि वर्षसहस्रेण कालयोगः प्रकीर्तितः ॥२॥

पक्षस्य मध्ये द्वितिथी पतेतां तदा भवेद् रौ रवकालयोगः।
पक्षे विनष्टे सकलं विनष्टमित्याहुराचार्यवराः समस्ताः ॥३॥

त्रयोदशदिने पक्षे विवाहादि नकारयेत्।
गर्गादिमुनयः सर्वे कृते मृत्यु सदा द्वयोः ॥४॥

उपनयनं परिणयनं वेश्मारम्भश्च पुण्यकर्माणि।
कुर्याद् द्विक्षयपक्षे न कदाचिच्छुभमिच्छन् पुरुषः ॥५॥

---

१ क पुस्तके नास्ति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लल्लः–

उपनयनं गोदानं परिणयगृहप्रवेशगमनानि ।
अस्तमितेषु न कुर्यात् सुरगुरुभृगुपुत्रचन्द्रेषु ।।६।।

लल्लः–

बालोदशाह्यभ्युदितः परेण पूर्वेण बालो दिवसत्रयं स्यात् ।
वृद्धस्तु पूर्वेण सपक्षमेकं पश्चाद् गतः पञ्चदिनानि शुक्रः ।।७।।

बाले च बृद्धे च सितोदयास्ते प्राच्या प्रतीच्यामुभयो दिशास्तु ।
वृद्धे च पक्षौ दशभिः शिशुत्वं पञ्चत्रयं वृद्धिमुपैति बालः ।।८।।

कुजादीनां चक्रदिवसाः पञ्चाङ्गशिरोमणौ—
षट् तर्का रूपनेत्राणि तिग्मद्युति निशाकराः ।।
द्व्यक्षा दन्तेन्दवो भौमात् क्रमशो चक्रवासराः ।।९।।

कु ६६, बु २१, गु ११२, शु ५२, श १३२, ।। भौमादीनां ग्रहाणां पश्चिमायामस्तमिते दिवसाः ।

दन्तैः शशिनगैः प्राच्यां दिवसैः बुधशुक्रयोः ।
अदृश्यमानयोः पश्चादुदयो भवति क्रमात् ।।१०।।

वसिष्ठः—

वृद्धत्वमिन्दोस्त्रिदिनं दिनार्धं बालत्वमस्तत्वमहर्द्वयं च ।
अस्ते विधौ मृत्युमुपैति कन्या वारेऽन्यशक्ता विधवा च वृद्धे ।।११।।

येनोक्तमेकं दिवसं शिशुत्वमित्येतदिन्दोस्तदयुक्तमत्र।
महत्व शीघ्रत्वसुधामयत्वाद्दिनार्धमित्यब्जजनिष्ठितत्वात् ।।११।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नारदः—

दम्पत्योर्जन्मभे चैव राशौ च निधनं तयोः ।
एकस्यापि तयोद्वाहे किंचिद् भेदेऽपि वा न वा ॥१३॥

वसिष्ठः—

स्वजन्ममासर्क्षतिथिक्षणेषु वैनाशिकाद्रक्षगणेषु भेषु ।
नोद्वाहमात्माभ्युदयाभिलाषी नैवाद्य गर्भे द्वितये कदाचित् ॥१४॥

नारदः—

ज्येष्ठमासे तयोरेव निषेधः परिकीर्तितः ।
नैवोद्वाहो ज्येष्ठपुत्री पुत्रयोश्च परस्परम् ॥१५॥

आद्यगर्भसुतस्याथ ज्येष्ठकन्यकया सह
विवाहे ज्येष्ठकन्याया ज्येष्ठवरणे सह विवाह ज्येष्ठे मासि न कर्तव्यो
नतु ज्येष्ठयोः कन्यावरयोर्विवाहस्तयोः सर्वदा विवाहनिषेधात् ।

तथा चोक्तं पराशरेण—

अज्येष्ठकन्यका यत्र ज्येष्ठपुत्रो वरो यदि ।
व्यत्यये वा तयोस्तत्र ज्येष्ठमासः शुभप्रदः ॥१६॥

गर्गः—

ज्येष्ठायाः कन्यकायाश्च ज्येष्ठपुत्रस्य सर्वदा ।
विवाहो नैवकर्तव्यो यदि स्याद् निधनं ध्रुवम् ॥१७॥

वसिष्ठः—

एकोदरकरतलग्रहणं यदि स्यादेकोदरस्थ तयोः कुशनाशनं च ।
एकाब्दके तु निधनं भवतीति कन्या नयन्तरेपि शुभदं पृथुशैलरोध '१८॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न पुं विवाहोऽत्र ऋतुत्रयेऽपि विवाहकार्यं दुहितुः प्रकुर्यात् ।
प्रकीर्त्तयत्येव मुनीन्द्रवर्या न मुण्डनं चापि हि मण्डनात्तु ॥१९॥

पुत्रोद्वाहान्नैव पुत्र्याः कदाचिदाषण्मासान् कार्यमुद्वाहकार्यम् ।
उर्ध्वं तद्वन्मण्डनान्मण्डनं वा प्रत्युद्वाहं नैव पुण्यद्वयं च ॥२०॥

भगवान् गर्ग :—

पुत्री विवाहात् परतः सदैव शुभप्रदं पुत्रविवाह कर्म ।
पुत्रद्वयं नैव ऋतुत्रयेऽपि पुत्रीद्वयं चापि कदाचिदेव ॥२१॥

पराशर :—

एकोदरप्रसूतानामेकस्मिन् वत्सरे यदि ।
[1]पाणिग्रहो भवेन्नूनं तत्रैका विधवा भवेत् ॥२२॥

नारद :—

पुत्रोद्वाहान्नैवपुत्री विवाहः कार्यं पुत्र्योः पुत्रयोर्वा विवाहः ।
अब्दान्तरे मुण्डनं च नैकदा मुण्डन द्वयम् ।
एकजन्ये तु कन्ये द्वे पुत्रयोर्नैकजन्ययोः ॥२३॥

न पुत्रीद्वयमेकस्मै न विदद्यात् कदाचन ।
भ्रातृयुक् स्वसृयुग्मे च भ्रातृस्वसृयुगे तथा ॥२४॥

नजातु मङ्गलं कुर्यादेकस्मिन् मण्डपेऽहनि ।
भ्रातृद्वये स्वसृयुगे स्वसृभ्रातृत्रये तथा ॥२५॥

---

१ पाठान्तरम्— विवाहं नैव कुर्वीत महानद्यन्तरे शुभम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

समानाऽपि क्रिया कार्या मातृभेदे तथैव च ।
विवाहे तु हितं कार्यंपुंविवाहश्चतुर्दिने ॥२६॥

पुंविवाहोर्द्धषण्मासात् पुत्र्या वैवाहिकं चरेत् ।
यस्मिन् भ्रमणवर्षे च दुहितुश्च शुभावहा: ॥२७॥

पुंविवाहोर्द्धवर्षान्ते दुहिता च विवाहतः ।
पुत्रीपरिणयादूर्ध्वं यावद्दिन चतुष्टयम् ॥
पुंविवाहं प्रकुर्वीत षण्मासाभ्यन्तरे वधू ॥२८॥

नारद :—

युग्मेऽब्दे जन्मतः स्त्रीणां प्रीतिदं पाणिपीडनम् ।
एतत्पुंसामयुग्मेऽब्दे व्यत्यये नाशनं तयोः ॥२९॥

लल्ल :—

गुरुशुक्रगोचरबलादि विवेकमाह--

द्वादशदशमतृतीये जन्मनिषष्ठाष्टमे चतुर्थे वा ।
प्राप्तं पाणिग्रहणं जीवे वैधव्यमाप्नोति ॥३०॥

प्रतिबिद्धेनोद्वाहे वक्रिणि जीवितेऽतिचारगते ॥
गोचरबलं प्रधानं लग्नं च पराशरः प्राह ॥३१॥

यद्यप्यतिचारगते वक्रे वा प्राह गालवो जीवे ।
पुण्यं पाणिग्रहणं तदपि स्त्रीणां प्रकर्त्तव्यम् ॥३२॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अस्तमिते भृगुतनये कन्या मृयते बृहस्पतौ पुरुषः ।
उभयोरपि मरणं स्यात्पाणिग्रहणोदिते केतौ ॥३३॥

बालः शुक्रो हरेत् कन्या वृद्धः शुक्रः पतिं हरेत् ।
वृद्धो जीवो हरेत् कन्यां बालो जीवः पतिं हरेत् ॥३४॥

क्षीणेन्दुकुलनाशाय स्त्रीविनाशाय भार्गवः ।
जीवः पुरुषनाशाय यदि पाणिग्रहो भवेत् ॥३५॥

गुरुः —

संग्रहे प्रोक्तनक्षत्रे विवाहो नैव शोभनः ।
राशिभेदे न दोषः स्यादेकतारास्वपीदृशः ॥३६॥

[१]आर्द्रापुनर्वसूतिष्यसार्प्येवोढा पतिर्भवेत् ।
विधवाः स्वल्पकालेन विवाहसमयात् परम् ॥३७॥

शेषेष्वनेकदोषाः स्युः विनाशमरणादयः ।
तीर्थेबली तु करणं करणाद्बलवद्दिनम् ॥
दिनादृक्षं बलाढ्यं स्यात् सर्वेषामुदयो बली ॥३८॥

कालविधाने —

जेष्ठा द्वाविगमाङ्गनाघटधनुर्गोमीनकण्ठीरवा
मध्या सौम्ययुतास्तथोर्ध्ववदना सर्वे विवाहे हिता ।
सौम्याः केन्द्रधनायपुत्रसहिताः पापास्त्रिषष्ठं गता
पूज्यौ शुक्रगुरू मृतावशुभदौ शुद्धं भवेत् सप्तमम् ॥३९॥

---

१ आर्द्रा पुनवसौतिष्यसार्पे वोढा भवेत् पत्नी पा.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एकराशिनिलयौ गुरुशुक्रौ यत्र वापि समसप्तकसंस्थौ ।
यत्र मूलनिलयावपिवृद्धौ दम्पतीकरणमत्र च कुर्यात्' ॥४०॥

नारदः—

तिथयो मासदग्धाश्च दग्धलग्नानि यान्यपि ।
मध्यदेशे विवर्ज्यानि न दुष्याणीतरेषु तु ॥४१॥

पङ्गवन्धकाणलग्नानि मासशून्याश्च राशयः ।
गौडमागधयोस्त्याज्या अन्य देशे न गर्हिता ॥४२॥

दोषदुष्टः सदा कालस्तन्निर्माष्टुं न शक्यते ।
अपि घातुरतोऽन्यार्थे दोषाल्पत्वं गुणोत्कटम् ॥४३॥

(परित्यज्य महादोषं शेषयोः गुणदोषयोः ।
गुणाधिकं स्वल्पदोषः सकलो मङ्गलप्रदः ॥४४॥

दोषो न प्रभवत्येको गुणानां भूरिसंचयः ।
एको यथा तोयविन्दुरुर्दाचिषहुताशने ॥)
एवं संचिन्त्य गणितशास्त्रोक्तं लग्नमानयेत् ॥४५॥

जन्माधिपो नीचगतो भृगुर्वा पराजितो वाऽमरपूजितश्च ।
विवाहिता भर्तुवियोगिताऽसौ प्राप्नोति दुःखानि बहूनि नारी ॥४६॥

पतिः कुमारी बहुरात्मजश्च सौख्यं दिनं गेहनिनादि खेटे ।
स्वतुङ्गमित्रे समुपैतिवृद्धिं नीचेष्टगे वा विबले विनाशम् ॥४७॥

न कुर्यात् क. । चापान्तर्गतः पाठ ग्र पुस्यके नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गर्गः—

जन्मर्क्षमृक्षमित्याहुर्नामर्क्षं चान्धदण्डवत् ।
न ज्ञायते यस्य जन्म तस्य नाम्ना विधीयते ॥४८॥

कुर्यात् षोडश कर्माणि जन्मराशौ बलान्विते ।
शेषांश्चान्यानि कर्माणि नामराशिबलान्विते ॥४९॥

सुबोधिः—

व्यवहारराजसेवासंग्राम ग्राम धाममन्त्रेषु ।
ज्ञातेऽपि जन्मराशौ फलमुन्नेयं तु नामराशिवशात् ॥५०॥

यत्पूर्वाभ्यासनामानि त्यक्त्वा दोषमवाप्नुयात् ।
बलाबलं तु तज्ज्ञैर्हि पूर्वनाम्ना तु योजयेत् ॥५१॥

फलप्रदीपे —

वरस्य जन्मना सार्धं नाम वध्वा विचिन्तयेत् ।
न तु नाम्ना वरस्य स्यादङ्गना जन्मचिन्तनम् ॥५२॥

न जन्म जन्ममित्युक्ते नाम्ना नाम्नि प्रशस्यते ।
उभयोर्दलहीनः स्यात् पुंजन्मा गणनामतः ॥५३॥

च्यवनयवनमतम् —

जन्मर्क्षं यदि न ज्ञातं तदा नामैव संश्रयेत् ।
सर्वदा लौकिकार्येषु नामर्क्षमवलोकयेत् ॥५४॥

ज्ञातं जन्म सदा पुंसः स्त्रियो नज्ञायते तदा ।
जन्मनाम्नोर्बलं ज्ञात्वा कुर्वीतोद्वाहमङ्गलम् ॥५५॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वध्वा जन्म यदा ज्ञातं न विज्ञातं वरस्य तु ॥
नामर्क्षाभ्यां तदा कुर्याद् दम्पत्योः पाणिपीडनम् ॥५६॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने विवाहे कृत्याकृत्यविवेकाऽध्यायः ।

अथ विवाहे दम्पत्योः कूटभेदा लिख्यन्ते

नारदः—

दिनं गणं च माहेन्द्रं स्त्रीदीर्घं योनिरेव च ।
राशिराश्यधिपो रज्जुर्वश्यवेधा दश स्मृताः ॥१॥

पुनश्च वर्णकूटं च नाडीकूटं ततःपरम् ।
एते द्वादश योगाश्च कूटभेदाः प्रकीर्तिताः ॥२॥

अथ वसिष्ठगर्गमतेनाष्टादश कूटभेदा लिख्यन्ते

महेन्द्रं गणकूटं च दिनकूटं च योनिजम् ।
स्त्रीदीर्घरज्जुकूटं च वश्यं वर्णाख्यकूटकम् ॥३॥

राशिराश्यधिपाख्ये च वेधा नाडयाख्यकूटके ।
भूतलिङ्गाख्यकुटे च जात्याख्य पक्षिकूटकम् ॥४॥

योगिनीगोत्रकूटे च कूटान्यष्टादशैव च ।
दम्पत्योर्वृद्धिकारीणि यत्नाच्चिन्त्यानि शास्त्रतः ॥५॥

अथ माहेन्द्रकूटम्

स्त्रिभात् पुंभं चतुस्सप्तदिग्विश्वैकोनविंशतौ ।
भूपत्याकृतितत्वे तु माहेन्द्रमिति कथ्यते ॥६॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

माहेन्द्रे सति माङ्गल्ये दम्पत्योरभिवर्धते ।
अस्याभावेऽपि कल्याणं रजौ च ग्रहमैत्रके ॥७॥

अथ गणकूटम्

दस्रचन्द्रादितिज्यान्त्यमित्रश्रोत्रार्कवायवः ।
एते नव समादिष्टा देवत्वेन मनीषिभिः ॥८॥

उत्तरात्रितयं पूर्वात्रितयं यमशङ्करौ ।
रोहिणी चेति नवकं मनुष्यगण ईष्यते ॥९॥

पितृमूलाग्निवस्विन्द्रद्विदैववरुणानि च ।
चित्राश्लेषे च नवकं राक्षसं परिकीर्तितम् ॥१०॥

स्वगणे चोत्तमं विद्यान्मध्यमं दैवमानुषम् ।
वैरं दितिजदैत्येषु मरणं मानुषासुरे ॥११॥

देवासुरगणे पुंसि यदि स्त्री मानुषे गणे ।
एतदूत्तममध्याख्यौ विपरीतौ नशोभनौ ॥१२॥

राक्षसी यदि वा नारी नरो भमति मानुषः ।
दोषस्तत्र नसंदेहो विपरीतः शुभावहः ॥१६॥

पुत्रमित्रकलत्रादियोगः स्वांशे सुशोभनम् ।
मध्यमे नृसुरास्ते तु जघन्या देवराक्षसाः ॥१४॥

अत्रिः–

राश्यंशयोः सुहृद्भावे मित्रत्वेकांऽशनाथयोः ।
विना भावेऽपि दम्पत्योः पुत्रपौत्रप्रवर्धकः ॥१५॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वसिष्ठः–

दस्रादितिज्यमृगमैत्रकरानिलान्त्य
लक्ष्मीशभानि नव देवगणः प्रदिष्टः ।
पूर्वत्रयान्तक विधातृहरोत्तराणि
धिष्ण्यानि मानुषगणोऽत्र नव प्रदिष्टः ॥१७॥

पितृद्विदैवाग्न्यनलेन्द्रमूलवस्वाहि चित्रर्क्षगणे सुराख्यः ।
देवासुराणां मनुजासुराणां वैरं महत्स्नेहमथेतरेषाम् ॥१७॥

मनुः–

ग्रहमैत्री च रज्जुश्च यदि नाडी पृथक् तयोः ।
विवाहः शुभदः कन्या राक्षसी वा नरो नरः ॥१८॥

गर्गः–

ग्रहमैत्री च राशिश्च विद्यते नियतं यदि ।
नगणाभाव जानितं दूषणं हि विरोधकम् ॥१९॥

अथ दिनकूटम्

पुम्भमारभ्यगणने नव पर्याय तं क्रमात् ।
जन्मत्रिपञ्चसप्तस्थं स्त्रीभं स्याद् वरनाशनम् ॥२०॥

स्त्रीभमारभ्यगणने पुंभं जन्मादिके स्थले ।
स्त्रीविनाशो भवेत् तस्माद् दिनकूटं विवर्जयेत् ॥२१॥

दिनकूटापवादः

स्त्रीदीर्घगणसद्भावे दिनं यदि न विद्यते ।
तथापि दिनमस्त्येव चन्द्रतारावलान्विते ॥२२॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गर्ग:—

स्त्रीदीर्घगणयोः सत्वे चन्द्रताराबले सति ।
असत्वं दिनकूटस्य नदोषं जनयेद् ध्रुवम् ॥२३॥

दिनकूटराशिकूटापवादमाह

श्रीपति:——

भवनपतिसुहृत्त्वं स्यात्तथैकाधिपत्यं
यदि भवनवशित्वं[1] नैवदोषोऽष्टकेऽपि ।
शुभकृदिहविवाहोऽन्योन्यतारा विशुद्धौ
यदि खलु फणिचक्रे स्यान्ननाडीसमाज, ॥२४॥

अथ योनिकूटम्

अश्वेभमेषसार्पाहि श्वाखुमेषौ तु सूषका: ।
आखुगौ महिषीव्याघ्र सौरभी व्याघ्र एणक: ॥२५॥

मृगं मण्डलिकाख्याख्ये नकुलद्वयवानरा: ।
सिहाश्चमृगराड्गौश्च दन्तिभानां हि योनय: ॥२६॥

श्वैणं वभ्रूरगं मेषवानरंसिंहदन्ति च ।
गोव्याघ्रमाखुमार्जारं महिषाश्वं चशात्रवम् ॥२७॥

एषु योनिषु संपत्यै दम्पत्योः सङ्गम: सदा ।
भिन्नयोनिषु मध्या स्यादरिभावो न चेत्तयो: ॥२८॥

योनेरभावे नोद्वाहं स तु कार्यं वियोगद: ।
राशिर्वश्यं च यद्यस्ति कारयेन्न तु दोषभाक् ॥२९॥

---

१ यदि भवति वशित्वं क।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जगन्मोहने

अश्वेभाजफणिद्वयं च विषभुग् मेषौ ततो मूषक –
श्चाखुर्गौः क्रमसस्ततोऽपि महिषी व्याघ्रः पुनः सौरभिः।
व्याघ्रैणौ मृगमण्डली कपिरथो बभ्रुद्वयं वानरः
सिंहाश्वौ मृगराट् पशुश्च करिणी योनिस्तु भानामियम् ॥३०॥

गोव्याघ्रं गजसिंहमश्वमहिषं श्वैणं च वभ्रूरगं
वैरं वानरमेषकं च सुमहत् तद्वद्बिडालोन्दुरू।
लोकानां व्यवहारतोऽन्यदपि च ज्ञात्वा प्रयत्नादिकं
दम्पत्योर्नृपभृत्ययोरपिसदा वर्ज्यं शुभस्यार्थिभिः ॥३१॥

राशिर्वश्यं तु यद्यस्ति कारयेन् न तु दोषभाक्।

अथ स्त्रीदीर्घकूटम्

स्त्रिधिष्ण्यादतिदूरस्थं पुंभं स्त्रीदीर्घमुच्यते।
नवकत्रितये ज्ञेयं नीचं मध्यमनूत्तमम् ॥३२॥

दीर्घाभावे विवाहश्च स्त्रीविनाशकरः स्मृतः।
ग्रहमैत्रे गणे राशौ सति चेत् तन्नदोषभाक् ॥३३॥

वसिष्ठः—

स्त्रीधिष्ण्यतो भे नवके वरस्य चाद्ये तयोर्वैरमथद्वितीये।
सामान्यमेतच्च वरस्य वध्वा श्रेष्ठं तृतीयं नवकं विवाहे ॥३४॥

विधिरत्ने —

स्त्रीजन्मतारकादूर्ध्वं त्रयोदशोदितं चयत्।
पुंसो वा यदि जन्मर्क्षे स्त्रीदीर्घस्तदपि स्मृतम् ॥३५॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्त्रीणां नक्षत्रमारभ्य पुंसां नक्षत्रकं स्मृतम् ।
त्रिभागं तत्र कर्तव्यमेकद्वित्रितयं फलम् ॥३६॥

प्रथमं पुत्रपौत्रं च द्वितीयं सर्वनाशनम् ।
तृतीयं बन्धनं प्रोक्तं स्त्रीदीर्घमितिचोच्यते ॥३७॥

स्त्रीदीर्घ यदि नोद्वाहे स्त्रीनाशो भवतिध्रुवम् ।
स दोषो नास्ति यद्यस्ति राशीशगणमैत्रता ॥३८॥

अथ रज्जुकूटम्

विधुविम्बत्रयं कृत्वा तिर्यग्रेखाचतुष्टयम् ।
अश्विन्यादीनि धिष्ण्यानि वामपार्श्वादि विन्यसेत् ॥३९॥

गोमूत्रवद्विचरयेद्यदिमौलिष्वनुक्रमात् ।
फलं नक्षत्रयोश्चिन्त्यं कन्यकावरयोरिदम् ॥४०॥

गलोदरकटी पादरेखा तु यदि संस्पृशेत् ।
नाशः स्यादेकरेखायां भिन्नरेरासुशोभनम् ॥४१॥

वैधव्यं गलरेखाया क्रोडरेखा ऽनपत्यता ।
दरिद्रता भवेत् कट्यां पादे च जीबनाशनः ।४२॥

गलस्थितादिधिष्ण्येषु भिन्नरेखास्थितेषु च ।
दम्पत्योरायुरारोग्यं सुखसंपत्समृद्धये ॥४३॥

रज्जुकूटं सदाचिन्त्यं तदभावे वियोगदम् ।
स्त्रीदीर्घनाडीराशीशगणा यदि न सन्ति हि ॥४४॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रज्जुकूटापवादमाह

रज्जोरभावाद्यदि चेद्विवाहः क्रियेत सद्यः स वियोगदश्च।
तथापि राशीशगणान्वितस्तु स्त्रीदीर्घनाडी प्रयुतो न दोषः ॥४५॥

अथ वश्यम्

मेषस्य वश्यः सिंहाली कर्किजूकौ वृषस्य तु।
यमस्य वश्या कन्यास्यात् कर्किणश्चापवृश्चिकौ ॥४६॥

तुला सिंहस्य वश्या स्यात् कन्याया यममत्स्यभे।
मृगकन्ये तु जूकस्य कर्किः स्याद् वृश्चिकस्य तु ॥४७॥

मीनश्चापस्य वश्यः स्यान्मकरो मीनवश्यकृत्।
कुम्भस्य कन्या वश्या स्याद् मीनो मेषस्य वश्यकृत् ॥४८॥

एवं वश्यसमायोगे दम्पत्योः प्रीतिरुत्तमाम्।
वश्याभावेऽपि दम्पत्योर्विवाहः कलहप्रदः ॥४९॥

अथ वर्णकूटम्

कर्क्यान्त्यवृश्चिका विप्राः क्षत्रिसिंह धनुस्तुलाः।
मेषयुग्मघटाः वैश्याः शूद्रा वृषमृगाङ्गनाः ॥५०॥

वर्ण ज्येष्ठा तु या नारी वर्णहीनस्तु यः पुमान्।
विवाहं यदि कुर्वीत तस्या भर्ता विनश्यति ॥५१॥

मुख्योग्रजानां ग्रहमित्रवर्गाः क्षमाधिपानां गणसंज्ञकश्च।
विशां प्रधानं वनिताविदूर योन्याख्यवर्गः सततं परेषाम् ॥५२॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

८१ कूटभेदाऽध्यायः

अथ राशिकूटम्

कन्यामारभ्यगणने यदि षड्काष्टको भवेत् ।
तद्व्यत्ययो वापि भवेत् कन्यकाया मृतिस्तदा ॥५३॥

नवपञ्चमयोगो वा तद्विपर्यासमेव वा ।
अनपत्या भवेन्नारी मृतवत् साऽपि वा भवेन् ॥५४॥

द्विर्द्वादशस्तु कन्याया द्वादशद्वयमेव च ।
दरिद्रो वा भवेत् स्वामी देशान्तरगतोऽपि वा ॥५५॥

द्विर्द्वादशं त्रिकोणं वा षष्ठाष्टकमथापि वा ।
कन्यका राक्षसी वाऽपि दोषो वाऽन्योऽपि कश्चन ॥५६॥

एकाधिपत्ये मैत्रे वा विवाहः शुभदस्तयोः ।
मीनादियुग्मं शुभदं मेषादि त्वशुभं भवेत् ॥५७॥

[1] (शत्रुषट्काटष्कं मेषकन्ययोर्घटमीनयोः ।
चापोक्षणोर्नृयुक्कीटभयोः कुम्भकुलीरयोः ॥५८॥

चापस्य मृगयो स्त्रीणां मृतिदं पाणिपीडनम् ।)
मित्रषट्काष्टकंकीटमेषयोर्वृषजूकयोः ॥५९॥

कर्किचापभयोर्मीनसिंहयोर्मृगयुग्मयोः[2] ।
कन्यकाकुम्भयोरेव, प्रयत्ना वर्जयेद् अरिम्[3] ॥६०॥

---

१ चापान्तर्गतः पाठः क पुस्तके नास्ति । २ मृगतौलिनोः लि. पु. ।
३ प्रयत्नादरिवर्जयेत् लि. पु.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

समसप्तकयोगे च दशमे च चतुर्थके ।
एकादशे तृतीयेऽपि विवाहः प्रीतिदायकः ॥६१॥

वसिष्ठः--

द्विर्द्वादशे वा नवपञ्चमे वा षट्काष्टके राक्षसयोषितो वा ।
एकाधिपत्ये भवनेशमैत्रे वैरेऽपि पाणिग्रहणं विधेयम् ॥६२॥

कश्यपवशिष्ठौ—

द्विर्द्वादशं शुभं प्रोक्तं मीनादौ युग्मराशिषु ।
मेषादौ युगराशौ च निर्धनत्वं न संशयः ॥६३॥

द्विर्द्वादशेऽप्यदोषः स्यादंशके दूरतः स्त्रियः ।
धृत्यंशे पुष्टिरंशे वा पुंसोंऽशः कन्यकांशकात् ॥६४॥

आयुष्यसंपत् सुखभोग्यसंपत् पुत्रार्थसंपत् पतिसौख्यसंपत् ।
सौभाग्यसंपत् धनधान्यसंपत् झषादियुग्मक्रमशोदितानि ॥३५॥

अजादियुग्मक्रमशोदितानि वैधव्यमृत्युर्वधबन्धनानि ।
वियोगसंतापमतीव दुःखं वसिष्ठगर्गप्रमुखैः स्मृतानि ।६६॥

एकादशे तृतीयेऽपि दशमे चतुर्थके ।
ग्रहमैत्रं विना कुर्याद्दुभयोः समसप्तके ॥६७॥

लल्लः—

जातकमवलोक्य वदेन्नाडीयोगं विहाय दम्पत्योः ।
षट्काष्टकं त्रिकोणं द्विर्द्वादशकस्तु जन्मर्क्षात् ॥६८॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मरणं नाडीयोगे कलहः षट्काष्टके विपत्तिर्वा ।
अनपत्यता त्रिकोणे द्विर्द्वादिशकेऽपि दारिद्र्यम् ॥६९॥

दशमचतुर्थकयोगे भवति युवत्या धनं च पुत्राश्च ।
समसप्तके विवाहे भवति सतीत्व सुखं चैव ॥७०॥

एकादशे तृतीये कुलवृद्धिर्भवति चाशु नियमेन ।
एकस्मिन्नैकभवे राशौ प्रीति वधूवरयोः१ ॥७१॥

कन्याझषवृषवृश्चिककर्कटमकराः शुभावहाः प्रोक्ताः ।
स्वैःस्वैरष्टमभवनैस्तेऽप्येभिर्विदधाति प्रीतिम् ॥७२॥

एकाधिपत्येऽप्यथ मित्रभावे स्त्रीपुंसराश्यो र्न च रज्जुदोषे ।
षट्काष्ठकादिष्वपि शर्मदं स्यादुद्वाहकर्मावरतं तयोश्च ॥७३॥

श्रीपतिः२—

अनपत्यं नवपञ्चमं परिहरेद् व्यत्यं च षट्काष्टकम्
भवनैकाधिपमित्रवर्गवशतो वाञ्छन्ति तच्चापरे ।
समसप्त— — —त्रिभं चतुर्थदशकं क्षेत्रैकतो शोभनम्
प्रणयजन्मनि संपदादिषु वरा तारासु संज्ञाफलम् ॥७४॥

इति राशिकूटापवादः ।

---

१ वरयुवत्यो अ. । २ श्लोकोऽयं श्रीपतिज्योतिषत्नयालायां नास्ति । तत्र त्वस्यैव भावस्य श्लोक ईदृशो वर्तते । षद्काष्टके मृत्युरपत्य हानिः पाणिग्रहे स्यान्नवपञ्चकेऽपि । नैश्वं धनद्वादशके परेषु प्रेमातिरेको हि वधूवरस्य ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राशियोगरहितस्तु विवाहो निन्दितो भवति यद्ययमेव ।
रज्जुवेधसहिता ग्रहमैत्रयोगतः सकलदोषविहीनः ॥७५॥

अथ ग्रहमैत्रम्

रवेः समो ज्ञः सितसूर्यपुत्रावरी परे ये सुहृदोऽम्बरोगाः ।
चन्द्रस्य नारी रविचन्द्रपुत्रौ मित्रे समाः शेषनभश्चराःस्यु ॥७६॥

समौ सितार्की शशिजश्च शत्रुर्मित्राणि शेषाः पृथिवीसुतस्य ।
शत्रुः शशी सूर्यसितौ च मित्रे समाः परे स्युः शशिनन्दनस्य ॥७७॥

गुरोर्ज्ञशुक्रावरिसंज्ञकौ तौ शनिः समोऽन्ये सुहृदो ग्रहेन्द्राः ।
शुक्रस्य मित्रे बुधसूर्यपुत्रौ समौ कुजार्कावितरावरी तौ ॥७८॥

शनेः समो वाक्पतिरिन्दुसूनुः शुक्रस्यमित्रं रिपवः परेऽपि ।
एवं ग्रहाणां चतुराननेन शत्रुत्वमित्रत्वसमत्वमुक्तम् ॥७९॥

अन्योऽन्यमित्रं शस्तं स्यात् सममैत्रं तु मध्यमम् ।
उदासीनं कनिष्ठं स्यान्मृतिदं शात्रवं स्मृतम् ॥८०॥

शत्रुमित्रं तु विज्ञेयं दम्पत्योः कलहप्रदम् ।
अन्योऽन्य समशत्रुत्वं दम्पन्योर्विरहप्रदम् ॥८१॥

राशिनाथे विरुद्धेऽपि सबलावंशकाधिपौ ।
तन्मित्रेऽपि च कर्तव्यं दम्पत्योः शुभमिच्छता ॥८२॥

मित्रवर्गोत्तमः प्रोक्तः सममित्रे च मध्यमः ।
कनिष्ठः समवर्गः स्याद् वैरवर्गस्तु मारणम् ॥८३॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कलहः शत्रुमित्रे च वियोगः समशत्रुके ।
राशिनाथे विरुद्धेऽपि मित्रत्वे चांशनाथयोः ॥८४॥

विवाहं कारयेद्धीमान् दम्पत्योः सौख्यवर्धनम् ॥
ग्रहमैत्रापवादमाह गर्गः—

[1](स्त्री दूरे समसप्ते[2] च सहजाऽऽये सुहृद्दशे ।
शत्रुः समं समो मित्रं मित्रं चेत् परतः शुभम् ॥८५॥)

स्त्रीदीर्घे रज्जुकूटे च राशौ नाड्यां स्थिते सति ।
ग्रहाणां मैत्रभावेऽपि विवाहः शुभदो भवेत् ॥८६॥

वसिष्ठः—

विवाहमाहुर्ग्रहमैत्रशून्यं वियोगदं यद्ययमेव भूयः ।
स्त्रीदीर्घनाडीसहितः सरज्जुः सराशिकश्चेत् सततं शुभाढ्यः ॥८७॥

इतिग्रहमैत्रम् ।

अथ वेधकूटम्

अश्विन्यादीनि ऋक्षाणि नवाद्यन्तानि च क्रमात् ।
ज्येष्टादिनी मघान्तानि नव विध्युः परस्परम् ॥८८॥

ज्येष्ठादीनि च ऋक्षाणि मघान्तादि नव क्रमात् ।
मूलानि पौष्णभान्तानि नव विध्युः परस्परम् ॥८९॥

---

१ श्लोकोऽयं क पुस्तके नास्ति । २ समसप्तमे ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विद्वान्येतानि संत्यज्य दम्पत्योः पाणिपीडनम् ।
कुर्वीत यत्नतो विद्वान् वेधे वैधव्यमाप्नुयात् ॥९०॥

वरस्यकूटमाह पुनर्वसिष्ठः—

वश्यास्त्यक्त्वा राशयोऽन्ये नृभाणां सिंहं तस्याप्येकमन्ये विधेयाः ।
कीटं त्यक्त्वा लोकतोऽन्यप्रसिद्धं वश्यावश्यं नैव तोषालयाश्च ॥९१॥

एतानि वश्यकूटानि दम्पत्योः शुभदानि वै ।
वश्यकूटस्ततः कोऽपि कूटानां गुरुतां गतः ॥९२॥

एवं वश्यसमायोगे स्त्रीराशेः पूरुषस्य भम् ।
वश्ययोगः शुभः प्रोक्तो दम्पत्योः प्रीतिमिच्छता ॥९३॥

विवाहकरणे नृणामवश्यं वश्यमिष्यते ।
तदभावेऽपि राशिश्च गणरज्जुयुतः शुभः ॥९४॥

अथ नाडीचक्रम्

एकराशौ पृथग् धिष्ण्ये नाडीभेदो यदाभवेत् ।
विवाहस्तत्र कर्तव्यो नाड्यैके चाशुभप्रदः ॥९५॥

एकर्क्षभिन्नराशौ च पुंराशिः प्रथमो यदि ।
एकाधिपत्ये मैत्रे च विवाहो मध्यमो भवेत् ॥९६॥

एकर्क्षे चैकराशौ च विवाहस्त्वशुभः प्रदः ।
संकोचे तु तदा कार्यो भिन्नपादा यदा तयोः ॥९७॥

वरस्यांशो यदा पूर्वे नार्द्रापुष्यमघादि च ।
यथोक्त लक्षणः शिष्टाः पादभेदे शुभावहाः ॥९८॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

काश्यपः—

मध्यैकनाडी भ्रमणं यदा चेत् स बन्धुसंयुक्तविनाशमेति ।
मध्यैकनाडी यदि मध्यनाडी न पार्श्वनाडी त्वतिनिन्दिता स्यात् ॥९९॥

मध्यनाडी सदा वर्ज्या संश्लिष्टपार्श्वयोस्तथा ।
गणनान्तरिता पार्श्वनाडी मुख्या करग्रहे ॥१००॥

वसिष्ठः[1]—

निधनं मध्यमनाड्यां दम्पत्योर्नैव पार्श्वयोर्नाड्योः ।
सासन्नायांत – – – मन्तरितायां न दोष उद्वाहे ॥१०१॥

लल्लः—

एकगृहसंभवानां भवति विवाहः सुतार्थसंपत्यै ।
यद्युभयोरेकर्क्षं भवति च तत्रांशको भिन्नः ॥१०२॥

वृद्धगर्गः—

यस्मादनर्थकलहामयमृत्यवः स्युः
पाणिग्रहादनु तयोः खलु नाडीयोगे ।
तस्माच्चतुस्त्रियमला प्रथमाङ्घ्रिभेषु
नाडीसमाजमिति चिन्त्यमनुक्रमेण ॥१०३॥

आवृत्तिभिर्भैस्त्रिभिरश्विभाद्यक्रमोत्क्रमात्संगणयेदुडूनि ।
यदैव पर्वण्युभयोश्च धिष्ण्योः सतोर्नृनार्यो र्भृशमेकनाडी ॥१०४॥

१ श्लोकोऽयं क पुस्तके नास्ति । वसिष्ठसंहितायां चायं श्लोको न – विद्यते । अस्यैव भावस्य श्लोक ईदृशो वर्तते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सा मध्यनाडी पुरुषं निहन्ति तत्पार्श्वनाडी खलुकन्यकां तु ।
आसन्नपर्याय समागताश्चेद् वर्षेण साप्यन्तरिता त्रिवर्षे ॥१०५॥

नारदः—

चतुस्त्रिद्वयङ्घृभोत्थायाः कन्यायाः क्रमशोऽश्विभात् ।
वह्निभादिन्दुभान्नाडी त्रिचतुः पञ्चपर्वसु ॥
गणयेत् संख्यया चैक नाड्या मृत्युर्न पार्श्वयोः ॥१०६॥

त्रिपक्षरेखागणयेद् भसंख्यं चत्वारिपक्षे अभिजिद्युतं च ।
उभौ च, आरोहचवरोहिणी च आरोहि पञ्चाङ्गुलवर्जनीयम् ॥१०७॥

एकनाडी विवाहश्च गुणैः सर्वैः समन्वितः ।
मध्यनाडीपतिं हन्ति पार्श्वनाडी तु कन्यकाम् ॥१०८॥

तस्मान्नाडी सदा त्याज्या दम्पत्योः शुभमिच्छता ।
चतुर्नाडी त्वहल्यायां पाञ्चाले पञ्च नाडिकाः ॥
त्रिनाडी सर्वदेशेषु वर्जनीया विचक्षणैः ॥१०९॥

सारस्वतकरहाटकक्वङ्कणकाश्मीर वङ्गचीनेषु ।
नाडीयोगश्चिन्त्यः पाणिग्रहणे न चान्यत्र ॥११०॥

नाडीशुद्धिः कन्यकाकण्ठसूत्रं ज्ञेयं तस्माच्चिन्तयेत् पूर्वमेव ।
पश्चाद्राशिश्चाधिपो मित्रभावं विप्रादीनां मुख्यमेतद्द्वयं वा ॥१११॥

गर्गः—

नाडीकूटं तु संग्राह्यं कूटनां तु शिरोमणिः ।
ब्रह्मणा कन्यकाकण्ठसूत्रत्वेन विनिर्मितम् ॥११२॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यम उवाचः—

नानयध्वमितो दूताः कन्यां नाडीयुतां प्रति ।
यतो ब्रवीच्च सततं तस्मान्नाड्योऽ धुनोच्यते ॥११३॥

चतुष्पात् कन्यकाऋक्षं गणयेदश्विभादिकम् ।
त्रिभिः सव्यापसव्येन भिन्नपर्वं शुभावहम् ॥११४॥

कन्यकार्क्षं त्रिपाच्चेत् स्याद् गणयेत् कृत्तिकादिकम् ।
चतुर्भिः पर्वभिस्तद्वदभिजित्तारकान्वितम् ॥११५॥

कन्यकार्क्षं द्विपाच्चेत् स्याद् गणयेत् सौम्यभादिकम् ।
पञ्चभिस्त्ववरोहे तु पञ्चमाङगुलिर्वर्जितम् ॥११६॥

संश्लिष्टा मध्यनाडी तु पुरुषं हन्ति वेगतः ।
संश्लिष्टा पार्श्वनाडी तु कन्यकां हन्त्यसंशयम् ॥११७॥

आसन्नात्वेकनाडी स्यादासन्नमृत्युदायिनी ।
दूरस्थाचैकनाडीस्याद् दूरस्थानिष्टकारिणी ॥११८॥

नारदः—

चतुस्त्रिद्व्यङघ्रभोत्थायाः कन्यायाः क्रमशोंशुभात् ।
वह्निभादिन्दुभान्नाडी त्रिश्चतुः पञ्चपर्वसु ॥११९॥

एषैव गणना सर्वदेशेषु विदुषां सदा ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्रिनाडीचक्रम्

अ	आ	पु	उ	ह	ज्ये	मू	श	पू
भ	मृ	ति	पू	चि	अ	पू	ध	उ
कृ	रो	अ	म	स्वा	वि	उ	श्र	रे

चतुर्नाडिचक्रम्

कृ	म	पू	ज्ये	मू	पू	उ
रो	अ	उ	अ	पू	श	रे
मृ	ति	ह्	वि	उ	ध	अ
आ	पु	चि	स्वा	अ	श्र	भ

पञ्चनाडिचक्रम्

मृ	ह	चि	श्र	ध	रो
आ	उ	स्वा	उ	श	कृ
पु	पू	वि	पू	पू	भ
ति	म	अ	मू	उ	अ
अ		ज्ये		रे	

मनुः—

अहल्ये तु चतुर्नाडीसंयोगः कालमृत्युदः ॥१२०॥

एतद्योगोन्यदेशेषु ह्यपमृत्यु फलप्रदः ।
पञ्चनाडीसमायोगः पञ्चाले कालदण्डकः ॥१२१॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इतरत्र समायोगो दुःखदारिद्र्यदोषकृत् ।
त्रिनाड्या तु समायोगः सर्वत्रानिष्टकारकः ॥१२२॥

इति नाडीकूटम्

अथ देशकूटानि

वादरायणः—

माहेन्द्रं गौडदेशे च मालवे रज्जुसंज्ञकम् ।
लाटे विदेहे नाडी स्याद् वश्यं काश्मीरदेशके ॥१२३॥

वेधा सौराष्ट्रविषये राशिकूटं च दक्षिणे ।
योनिर्वै सिन्धुदेशे च ग्रहमैत्रं विदर्भके ॥
पाञ्चाले गणकूटं स्यात्ताराकूटं तु मागधे ॥१२४॥

आयुष्यं दिनशोभने शुभगणे सौख्यं च याने प्रियम् ।
माहेन्द्रे बहुपुत्रपौत्रसुलभं स्त्रीदीर्घतः सत्सुतम्—
राशिः स्यात् कुलवर्धनं ग्रहफलं मैत्रं च वश्ये रति ।
माङ्गल्यं च विरज्जुके धनमता चैतेः फला शोभनाः ॥१२५॥

दम्पत्योर्दशसंभवं शुभतरं तद्वन्नवाष्टौ शुभे
मध्यं सप्त च षट् च पञ्चममतो हीनं चतुस्त्रीणि च ।
वंशेषून्नतहीनतुल्यविषये देहं गृहीतं यदा
चक्षुर्बद्धनिवन्धनेषु शकुनैर्गौर्ष्यादिभिर्वीक्ष्यते ॥१२६॥

अथ भूतकूटम्

दस्राद्यर्क्षाणि पञ्चर्तुभूतत्त्वर्क्षाणि व क्रमात् ।
पृथिव्यादीनि वन्ह्यम्बुवैरवह्नि शुभावहम् ॥१२७॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वसिष्ठः—

दस्रर्क्षतो भानि भवन्ति पञ्च गन्धादितो वन्ह्यनिलाश्वराणाम् ।
पञ्चर्तुभूर्तात्विषिभिः क्रमेण वैरं जलाग्नौरितरत्रवृद्धिः ॥१२८॥

अथ लिङ्गकूटम्

वसूदकेषुविश्वान्त्यत्वष्टत्रययमेन्द्रकाः ।
उरगादिचतुष्कं च स्त्रिलिङ्गानि विदुर्बुधाः ॥१२९॥

नपुंसकानि ज्ञेयानि मूलेन्दुवरुणानि च ।
ततः परे च पुंलिङ्गाः स्वलिङ्गे प्रीतिरुत्तमा ।
दम्पत्योर्व्युत्क्रमेलिङ्गे कलहः सर्वदा भवेत् ॥१३०॥

वसिष्ठः—

सार्पाचचतुष्कं वसुवारिरुद्रत्वष्टात्रयं विश्वयमान्त्यशक्राः ।
स्त्रिलिङ्गतारा वरुणेन्द्रमूला तारा नपुंसाः पुरुषाः पराः स्युः ॥१३१॥

स्वकीयलिङ्गेषु तयोः स्वजन्मधिष्ण्येषु संप्रीतिरतीव नित्यम् ।
युद्धं भवेद् व्युत्क्रमलिङ्गकेषु सामान्यमन्यत्र नपुंसकेषु ॥१३२॥

अथ जातिकूटम्

विप्रक्षत्रियविट्शूद्राः पञ्चमः सङ्करश्च षट् ।
दस्रादीनि च चत्वारि चत्वारि प्रति जातिषु ॥१३३॥

अजाङ्घ्रि त्रितयं शिष्टं विप्रादि त्रितये क्रमात् ।
प्रसस्तमेकजातौ तु हीनस्त्रिग्रहणं सदा ॥१३४॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वसिष्ठः—

विप्रक्षमाधीश्वरविट् चतुर्था ये पञ्चमाः शङ्करजाश्च षष्ठाः ।
जातिप्रभेदा इति दस्रभादि ऋक्षाण्यपि ब्राह्मणपूर्वकाणि ।।१३५।।

क्रमादजाङ्घ्रित्रितयं च षष्ठं त्रैर्वाणिकानां निखिलानि भानि ।
सम्यग् विचार्यैवमनुक्रमेण जात्याख्यकूटेऽत्र फलंब्रवीमि ।।१३६।।

प्रीतिर्नृ नार्योरखिलैकजात्या पुंजातितो हीनकुला समा स्त्री ।
स्त्रीजातितो हीनकुलः पुमांश्च विलोमजात्यामपिचाति वैरम् ।।१३७।।

अथ गोत्रकूटम्

मरीचिश्च वसिष्ठः स्यादङ्गिराश्चात्रिरेव च ।
पुलस्त्य पुलहश्चैव क्रतुश्च मुनयः क्रमात् ।।१३८।।

साभिजि दस्रभादीनि सप्त सप्त पुनः पुनः ।
भिन्नगोत्रेषु शुभदमेक गोत्रे कलिप्रदम् ।।१३९।।

वसिष्ठः—

स्युः सप्त गोत्रा भयतुष्टयेन गजाश्वसंख्याऽ शिवभुखानि भानि ।
मरीचि वासिष्ठ महाङ्गिरोत्रि पौलस्त्यसंज्ञाः पुलहः क्रतुश्च ।।१४०।।

यदैक गोत्रे कलहस्त्वजस्रं संप्रितिवृद्धिर्यदि भिन्नगोत्रे ।
एष प्रधानः खलु गोत्रवर्गः सुचिन्तनीयः सततंनृनार्योः ।।१४१।।

अथ पक्षिकूटम्

भेरण्डः पिङ्गलः काकःकुक्कुटश्च मयूरकः ।
वाणर्तु षट्शर शरास्तारा दस्रादयः क्रमात् ।।१४२।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एक पक्षभयोः सम्पत् प्रीतिः स्यात् पाणिपीडने ।
भिन्न पक्षिभयोर्हानिः कलह श्चापि जायते ।।१४३।।

भेरण्ड पिङ्गलककाक सुकुक्कुटानां
वहेरथाश्विमुखभानि गणाश्च पञ्च ।
वाणर्तु षट् शरशरैः क्रमशोविवाहे
भिन्ने गणे कलहमेक गणे प्रवृद्धिः ।।१४४।।

अथ योगिनी कूटम्

ब्रह्माणी चैव कौमारी वाराही वैष्णवी तथा ।
माहेन्द्री चैवचामुण्डा माहेशी च तथा रमा ।।१४५।।

तारा दस्रादयस्त्वष्टौ योऽभिजिच्च पुनः पुनः ।
योगिन्यैक्ये समृद्धिः स्याद् भिन्नत्वे त्वशुभं भवेत् ।।१४६।।

वसिष्ठः—

ब्रह्माणी कौमारी वाराही वैष्णवी च माहेन्द्री ।
चामुण्डा माहेशी श्रीलक्ष्मीश्चाष्टदिक्षु योगिन्यः ।।१४७।।

पूर्ववदूर्ध्वं सर्वं योगिन्यैक्ये शुभोऽन्यथा त्वशुभः ।
वर्गो यो मुख्यतरः स्यात् सर्वेषां सर्वदा करग्रहणे ।।१४८।।

अथ आयकूटम्

आय ध्वजाधः क्रमशोऽश्वि पूर्वभान्यष्टभिर्भैश्च पुनः पुनः स्युः ।
त्रैवर्णिकं भत्रितयं च शिष्टं प्रद्वचेषमेषां खलु पञ्चमेन ।।१४९।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दशसंहिताष्टसंख्याः कूटाः स्युर्नारदैः कथिताः ।
दैवविदखिलं सम्यग् ज्ञात्वा सर्वं वदेन्नियतम् ॥१५०॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्य विरचिते जगन्मोहने विवाहे कूटभेदाऽध्यायः ।

वसिष्ठ :—

शुक्लेद्वितीया द्वितये च कृष्णपक्षेदशम्यन्तगताः प्रशस्ताः ।
तास्वष्टमीस्कन्दगणेशदुर्गाश्चतुर्दशी चापि तिथिर्विवर्ज्याः ॥१॥

(स्कन्दः षष्ठी । गणेशः, चतुर्थी)

वाराः प्रशस्ताः शुभखेचराणां सूर्यार्किवारौ खलु मध्यमौ तौ ।
त्याज्यः सदा भूमिसुतस्य वारः कामार्थ तित्थ्योरपि तौ प्रदोषौ ॥२॥

तिस्रोत्तरामूलमघान्त्यमैत्र प्राजेश चन्द्रार्क समीरभेषु ।
तदा प्रशस्तः खलु कन्यकानां पाणिग्रहो वेधविवर्जितेषु ॥३॥

श्रीपति :—

मैत्रमूलमृगरोहिणीकरैः पौष्णमारुतमघोत्तरान्वितैः ।
निर्व्यधाभिरुडुभिमृगीदृशां पाणिपीडनविधिर्विधीयते ॥४॥

सवैधृतौ वृष्टिरथाष्ट चेन्दुः संपातयोगः परिघार्द्धमाद्यम् ।
तिस्रोऽष्टकाश्चोक्तनिसर्गदोषा सर्वत्र वर्ज्याः खलु मङ्गलेषु ॥५॥

बले नृनार्यो रवि जीवयोश्च तारेन्दुवीर्ये सुदिने सुलग्ने ।
पञ्चेष्टकेऽर्केन्दुसुरेज्यमुख्यैर्जामित्र शुद्धौ हिमदीधितेश्च ॥६॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हारीतवभ्रुद्विजदेवलाद्या विष्टिं विनान्यत्करणं प्रशस्तम् ।
नक्षत्र तुल्यं फलमाहुरार्या क्षणेषु नक्षत्रपसंज्ञितेषु ॥७॥

यत्रार्कगुर्वोरपि नैधनान्त्य जन्मादि दुःस्थानगयोर्द्वयोर्वा ।
एकस्य पूजामपि तत्र कृत्वा पाणिग्रहं कुर्युरहः सु सम्यक् ॥८॥

पराशर :—

यावज्जीवं कन्या भर्त्रा सह नियुज्यते दुःखम् ।
पश्चादामयरोगैरश्विन्यां याति पञ्चत्वम् ॥९॥

याम्ये षड्भिर्मासैः वैधव्यं याति निर्धनत्वं च ।
धनकनकभूषणयुता पाणिग्रहणे च कृत्तिकायां च ॥१०॥

उपयुज्यते च पश्चात् षष्ठेऽब्दे याति पञ्चत्वम् ।
प्राजापत्ये शुभगा पतिव्रतामानिनी प्रिया भर्तुः । ॥११॥

शुचिरनुकूला भर्तुः प्रियंवदा सोमदैवत्ये कन्या ।
आर्द्रापाणिग्रहणे वर्षेणैकेन याति पञ्चत्वम् ॥१२॥

त्रिभिरब्दैरादित्ये कन्यासमुपैति पतिमन्यम् ।
अब्द चतुष्के कन्या कुलविद्वेषिणी भवेत् पुष्ये ॥१३॥

आश्लेषास्वपि कन्यापाणिग्रहण समेत्यभर्तारम्[1] ।
सप्तभिरब्दैः हन्यादथकुलटात्वं समाप्नोति ॥१४॥

भवति त्रिवर्गयुक्ता पित्र्ये पाणिग्रहे हि संप्राप्ते ।
भाग्ये सुतसौभाग्यं दासीत्वं याति निर्भया कन्या ॥१५॥

---

१ समेत्यकर्तारम् प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अब्दैकेऽतिक्रान्ते पतिमरणं प्राप्नुयाच्चैवम् ।
व्ययगतशोका सुभगा भोगवती सुप्रजा प्रिया भर्तुः ॥१६॥

आर्यम्णे शशियुक्ते कन्या वर्षद्वयेऽतीते ।
हस्ते पाणिग्रहणं समेत्यकन्या पतिव्रतानित्यम् ॥१७॥

आत्मप्राणवियोगमेवमाप्नुयात् कन्यका चाब्दात् ।
अथवा शीलभ्रंशं त्वाष्ट्रे प्राप्नोति बान्धवकुलात् ॥१८॥

स्वातौ धर्मसमेता पतिदयिता वन्धुवल्लभा[1] साध्वी ।
ऐन्द्राग्न्याख्ये कन्या बुद्धिभ्रष्टा प्रयाति पतिमन्यम् ॥१९॥

अब्दचतुष्केऽतीते मैत्रे कन्याप्नुयाद् धनं सौख्यम् ।
भर्तुरवज्ञां कृत्वा दुःखान्यनुभूयशक्रभे कन्या ॥२०॥

दशमेऽब्दे वैधव्यं प्रयाति यद्यष्टमेन मृता ।
मूले सधना साध्वी पत्युरतिप्रियतमा प्रकृष्टा च ॥२१॥

अशुचिरनाचारा दासरताथान्यमेति भर्तारम् ।
अब्दद्वयेन कन्या ज्ञेया सा पूर्वषाढासु ॥२२॥

विदधाति वैश्वदेवे भर्तुर्वित्तं च गुरुजनानुरता ।
पाणिग्रहमुपयाते श्रवणे नैकत्र सारमतीते ॥२३॥

विभ्रष्टस्मृति शौचा मृत्युमुखं याति वसुदैवे ।
ईर्ष्यारोगेन हता यमसदनं याति वारुणे पश्चात् ॥२४॥

---

१ बन्धुवत्सला प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अजैकपादे कन्या दुःशीला दुर्भगा दरिद्रा च ।
आहिर्बुध्न्ये कन्या मणिकनकं विभूषण प्रभूतमाप्नोति ॥२५॥

प्राप्नोति स्फीतशौचं[1] पौष्णे शय्यासनोपकरणानि ।
वैधृतिके परिणीता कन्या विकले व्यतीपाते ॥२६॥

विष्ट्यां मरणं नित्यं सुभगा षट्स्वपि चरेषु करणेषु ।
ध्रुवकरणैः शकुनाद्यैः पाणिग्रहणान् ध्रुवं मृत्युः ॥२७॥

व्यास :—

शनैश्चरदिने प्राप्ते यदा रिक्तातिथिर्भवेत् ।
तस्मिन् विवाहिता कन्या पतिसन्तति वर्धिनी ॥२८॥

मुक्तावल्याम् —

मेषे कुमारेष्वनुरक्तचित्ता विहीनवित्ता गवि गो व्रता च ।
कुलद्वयानन्दकरी तृतीये कुलीरलग्ने कुलटा नृसंशा ॥२९॥

हरौ प्रसूता सकृदाश्रितापितुः पतिप्रिया च श्वशुरस्य षष्ठे ।
रुपाभिमानार्थवती तुलाधरे तथालिनि क्रन्दति नित्यमस्थिरा ॥३०॥

धनुषि कुलटा तत्पूर्वार्धे सतीत्यपरे जगुः ।
मृगघटझषेष्वन्याशक्ता जारमुपगच्छति ॥३१॥

पञ्च पाणिग्रहे दोषा वर्जनीयाः प्रयत्नतः ।
दारिद्र्यं मरणं व्याधिः पुंश्चल्यमनपत्यता ॥३२॥

---

१ शीतशौचं प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वसिष्ठ :—

द्विभर्तृका मेषनवांशके स्याद् वृषांशके स्यात् पशुशीलयुक्ता ।
धनान्विता पुत्रवती तृतीये कुलीरकांशे कुलटाप्यजस्रम् ॥३३॥

सिंहांशके सा पितृमन्दिरस्था कन्यांशके वित्तयुता सुशीला ।
तुलांशके सर्वगुणास्पदा सा कीटांशके निस्वतरा विशीला ॥३४॥

चापांशकाद्ये धनिनी द्वितीये भागेऽन्यशक्ता मलिना गदाढ्या ।
निःस्वामृगांशे विगुणा घटांशे विभर्तृका योगरता विशीर्णा ॥३५॥

मीनांशके भर्तृसुतार्थहीना शुभग्रहैर्युक्तनिरीक्षतेऽपि ।
तस्मात् सदैवोक्तनवांशकेषु कुर्याद् विवाहं गुण संप्रवृद्ध्यै ॥३६॥
वर्गोत्तमं विनान्त्यांशो विवाहो न शुभप्रदः ।

नारद :—

अस्तगा नीचगाः शत्रु राशिगाश्च पराजिताः ।
न शक्ताः स्वफलं दातुं दानमश्रोत्रिये यथा ॥३७॥

पञ्चपाणिग्रहे दोषा वर्जनीयाः प्रयत्नतः ।
दारिद्र्यं मरणं व्याधिः पुंश्चल्यमनपत्यता ॥३८॥

गुरु :—

संचरेन्नैधनं लग्नं दम्पत्योर्जन्मलग्नतः ।
नैधनेशश्च यत्रास्ते तल्लग्नमपि वर्जयेत् ॥३९॥

संत्यजेन्नैधनं राशिं दम्पत्योर्जन्मराशितः ।
तदीश्वरो वा यत्रास्ते तं राशिं वर्जयेद् बुधः ॥४०॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ विवाहे दशदोषाः

शून्यवेदर्तुरूपाणिदिग्रुद्रतिथयो धृतिः ।
उनविंशो नखाश्चैव दश योगाः प्रकीर्तिताः ॥४१॥

यस्मिन्नृक्षे रविस्तिष्ठेद् यस्मिन्नृक्षे शशी तथा ।
द्वयोर्योगे कृते ऋक्षैः शेषस्यादिति तद्दश ॥४२॥

विवाहादौ प्रतिष्ठायां व्रते पुंसवने तथा ।
कर्णवेधादि चूडायामेषु वेधं विवर्जयेत् ॥४३॥

शुक्रेण गुरुणा वापि संयुक्तं लग्नमेव वा ।
दश दोष समायुक्तमपि लग्नं शुभावहम् ॥४४॥

लल्लः—

लग्नं यदा नास्ति विशुद्धमन्यद् गोधूलिकं साधु तदा दिशन्ति ।
लग्ने विशुद्धे सति वीर्ययुक्ते गौधूलिकं नैव फलं विधत्ते ॥४५॥

कुर्याद् विवाहं पूर्वाह्णे तदभावे तु गौणतः ।
अर्धरात्रं विना रात्रौ सर्वदेशेषु सर्वदा ॥४६॥

अत्रिः—

मुख्यो विवाहः पूर्वाह्णे मध्याह्ने चोत्तमोत्तमः ।
निशायां मध्यमः प्रोक्तस्त्वपराह्णे तु गर्हितः ॥४७॥

अभिजिन्मुहूर्तफलम्

तिष्ठन्मध्यन्दिनेऽर्कः स्थिरदलकमले ग्रामवेश्म प्रवेशे
गेहारम्भंशुभानामुपनयनसमावर्तनोद्वाहकाले ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सर्वेशो हन्त्यरिष्टं न च तिथि करणं ऋक्षलग्नं च सर्वं
यात्रोद्वाह व्रतादौ भवति हि विजयं साभिजिच्च क्षणेऽपि ।।४८।।

विष्टि र्व्यतीपात कृतोत्थ दोषं[1] सर्वग्रहोत्पात विदूषितांश्च ।
मध्याह्नको दीप्तसहस्ररश्मि निहन्ति दोषानभिजित्प्रदिष्टः ।।४९।।

अभिजिद्योगं प्राप्ते भगवति[2] मध्यन्दिनगे दिनाधिपतौ ।
चक्रेण–चक्रपाणिः समस्तदोषान्निहन्त्याशु ।।५०।।

मध्यन्दिनगते भानौ मुहूर्तेभिजिदाश्रयः ।
योऽष्टमः सर्वदोषघ्नस्त्वन्धकारं यथा रविः ।।५१।।

सर्वदेशेष्विदं मुख्यं सर्व वर्णेषु सर्वदा ।
अभिजित् सर्वदोषघ्नं हरिरित्यक्षरद्वयम् ।।५२।।

गोरेणुव्यापिताशांकनकगिरिगुहां सूर्यरश्मि प्रवेशे
दृष्ट्वा सन्ध्यानुकूले गगनमुडुगणं किञ्चिदुद्भिद्य मानम् ।
सर्वेशो हन्त्यरिष्टं न च तिथिकरणं ऋक्ष लग्नं च सर्वम्
यात्रोद्वाहव्रतादौ भवति हि विजयं सर्वकार्येषु सिद्धिम् ।।५३।।

न तारका वार न लग्नयोगा न विष्टिरिन्दुर्नतिथिग्रहाश्च ।
र वौ प्रसन्नेऽस्तमिते प्रशस्तं गोधूलि लग्नं बहुकार्य सिद्धिम् ।।५४।।

गोव्रातपात्खुरहतोद्गत पांशुजालं
रवे सद्वितानमिव रत्ननिभं दिनान्ते ।

---

१ कृतोऽन्यदोषं प्र. । २ पदमेतत् प्र पुस्तके नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यावन्न शान्तिमुपयाति विवाह लग्न—
मिच्छन्तितान्यवगुणा[१] नपहाय सर्वे ॥५५॥

गुरुः—

गोधूलिकं योगलग्नं भावलग्नं च कल्पितम् ।
गान्धर्वादि विवाहेषु वश्योद्वाहेषु योजयेत् ॥५६॥

श्रीपतिः—

प्रायेण गोपाः सह हीन वर्णाः प्राच्यां तु सन्ध्यासमयं विवाहे ।
वदन्ति यावत् समुपैति शान्ति न गोखुरात्पादरजो वितानम् ॥५७॥

ब्रह्मयामलेः—

मध्यादभ्यधिके विवाहसमयं नेच्छन्ति कर्णाटकाः ।
पाण्ड्यां केरलमालवाश्च मगधाः पूर्वाह्लिकालं त्यजेत्[२] ॥५८॥

सिन्धुर्ववर सूरसेन निवहा रात्रौ त्यजेन्मङ्गलम् ।
गङ्गानर्मद कौरवाश्च निवहा गोधूलिकालं संत्यजेत् ॥५९॥

इतिश्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने विवाहप्रकरणे तिथि–वार–नक्षत्र–गोधूलिकामुहूर्तादिनिर्णयाऽध्यायः ।

वेदीलक्षणम्

वेदी विवाहे शुभदा सुमृत्स्ना हस्तोच्छ्रिता हस्त चतुष्टयेन ।
विस्तीर्णतायाप्यधिकेन हीना न वक्रता वा च समानदिक्स्था ॥१॥

---

१ नान्यविगुणा ग्र. । २ त्यजेयुः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चतुर्दशस्थो फलकैश्चतुर्भिः समन्विता स्तम्भ चतुष्कमध्या ।
नाना विचित्रेण वितानयुक्ता सुनिर्मिता मन्दिर वामभागे ।।२।।

तुल्या समन्ताद्ग्रहवामभागे हस्तोच्छ्रितामुक्त सुभाययुक्तान् ।
समण्डपात्प्राक् प्रवणामुदग् वा सोपानरम्या निविडाङ्कका:स्युः ।।३।।

विचित्रितामङ्कुर चित्रकुम्भ विताननानाविध तोरणाद्यैः ।
भृङ्गार पुण्याङ्गमचित्रपीठ पुण्याङ्गनानृत्य सुगीतवाद्यैः ।।४।।

ताम्बूलवस्त्रक्षतगन्धपुष्पमाङ्गल्यसूत्रैः फलपूर्णपात्रैः ।
मरीचहारिद्रगुडैः सजीरैर्दीपैरनेकैर्नयनाभिरामाम् ।।५।।

स वेणुवीणा मधुर स्वनेन मनोरमा मङ्गलवेदघोषैः ।
प्रदक्षिणप्रक्रमणेग्न्युपेती तामारुरोहेद्[1] मिथुनं स[2] वेदीम् ।।६।।

पूर्णकुम्भंध्वजंछत्रंशङ्खंदीपं च चामरम् ।
अङ्कुशं शक्तिरित्यवमष्टमङ्गलमीरितम् ।।७।।

हरिद्रा लवणं चैव मरीचश्च गुडं तथा ।
जीरकं फलपुष्पं च गन्धलाष्टकमुच्यते ।।८।।

इति वेदीलक्षणम् ।

अथ शङ्कुलक्षणम्

व्यासाङ्गुली त्रिगुणमायतमिष्टशङ्को–
वृत्तं तदेव परिधिश्च तदेव तस्य ।

---

१ आरोहेत् । २ तत् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्यासाङ्गुलार्धदलमङ्गुलमानमिष्टं
सर्वत्र शङ्कु परिकल्पनमेव मेव ॥९॥

अश्वत्थं खदिरं वंशं न्यग्रोधं वंशजं तथा ।
रक्तचन्दनमाख्यातं श्रीखण्डागुरुमेव च ॥१०॥

एभिर्वृक्षैश्च कुर्वीत शङ्कुः सर्वार्थसाधनम् ।
अन्यदारुमयो नित्यं मृत्युरोग भयप्रदः ॥११॥

अथवा साधयेत् कालं द्वादशाङ्गुलशङ्कुना ।
अन्य यत्नप्रयोगा ये दुर्ल्लभाः कालसाधने ॥१२॥
एवं सुलग्ने दम्पत्योः कारयेत् सम्यगीक्षणम् ॥

इतिशङ्कुलक्षणम् ।

अथ चरणच्छाया

सप्ताहतं दिनघटी हृतमिष्ट नाड्या
विच्छाय शुक्ल मनु हीन तदर्धपादाः ।
तत्पादवृन्द वरुणाहत शैलभक्तं
छाया भवेदचिरमेव तदास्य शङ्कोः ॥१३॥

पादच्छाया द्विगुणं विच्छाय हीनं तं चतुर्दशयुक्तम् ।
मुनिगतदिनराशिस्था भागं नाडीविनाडिका ज्ञेया ॥१४॥

अथ विच्छाया

गौरीयपानीयवराङ्गगैरिकं सेनाकपाराङ्गनवाङ्ग मानसे ।
सोहं दुदोहं समुताचमावगं मेषादिरर्क त्रिविधादिगैश्च ॥१५॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ नक्षत्रनाडी

गण्डान्तं मल्लिकामाला चामरं रामकङ्कणम् ।
लिङ्गान्तं विहगा वेधा रोरुहस्तार वीथयः ॥१६॥

इनभादि तिरोभान्तं शिरोभादि नभोन्तकम् ।
सप्तोनं द्विगुणीकृत्य गताः शेषास्तु नाडिकाः ॥१७॥

तारायवानीरशिखादृरूपगं नवाङ्गनाकावकरीवका शुभम् ।
कोयामरागेश पुनातु ते कचं गानासि मारोसि गवास्थिलोकम् ॥१८॥

शैलाजमैनाक विडाल रामधीः शूको त्यसावोत्य विनाप्यसूपयुक् ।
सालोक्य सारूपसमीयते क्रमात् पादार्धनाडी भगनादि वैष्णना[१] ॥१९॥

पादभा भास्करा त्यस्ता भाजिता गिरि संख्यया ।
शङ्क्कङ्गुलीति विज्ञेयं श्रीधराचार्य निर्मिताः ॥२०॥

वसिष्ठः—

शास्त्रोक्त मार्गेण सुलग्नकालं स्फुटं समानीय जलादियन्त्रैः ।
संलभ्य तन्मङ्गल सूक्ष्मकालं संवीक्षयेत्तत्र मिथोऽर्थदृष्ट्या ॥२१॥

अर्धोदयं चास्तमितस्य वीक्ष्यं यन्त्रं निदध्याज्जलपूर्णपात्रे ।
अलङ्कृते गन्धसुपुष्पवस्त्रफलाक्षतैर्दैवविदश्च पूज्याः ॥२२॥

षडङ्गुलोत्सेधसमं सुवृत्तं कृतं मुखं यद् विरसामुखं यत् ।
पलैः सुशुल्वैर्दशभिर्जलस्य पूर्णं पलैः षष्ठिभिरम्बुयन्त्रम् ॥२३॥

---

१ वैष्णवा प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सत्र्यंशमाष त्रयमेववृत्त शलाकयामध्यम भाग विद्धम्
समुद्रसंखपाङ्गुलदीर्घयोपदे—शान्मयूरं नर वा नराद्यम् ॥२४॥

ग्रहा व्रह्मा हरीशानाश्चाधिपा द्वादशाङ्गुलाः ।
लग्नं दद्याद् दिवा शङ्को रात्रौ चेदम्बुयन्त्रतः ॥२५॥

[1] (दशपलशूलकपालं समघनवृत्ते षडङ्गुलोत्सेधे
द्वादशमुखपरिमाणं जलपलषष्ठीप्रपूरणे घटिका ॥२६॥

माषमात्रय—सुयर्णस्य शलाका चतुरङ्गुलम् ।
तन्मात्रं कारयेच्छिद्रं घटिका सर्वलक्षणम् ॥२७॥

यथा सूचिमुखेनापि भुर्जपत्रं विभिद्यते ।
तथैवाप्यति शीघ्रेण सुमुहूर्तोऽपि यो भवेत् ॥२८॥

सुमुहूर्त्तं नरो दिव्यः समस्ता शुभदायकः ।
लभते पूर्वपुण्येन सुमुहूर्तोदये फलम् [2] ॥२९॥

सुमुहूर्त्तं महासूक्ष्मं नाल्पशास्त्रेण लक्ष्यते ।
तस्माद् बहुविधे शास्त्रे सुमुहूर्त्तं विलक्ष्यते ॥३०॥

अथ मृत्युभागाः

दानं धनं [3] वनं घोरं शूरं पारं नवं वरम् ।
नरो देयंकुरांनित्यं मृत्युभागः प्रकीर्तिताः ॥३१॥

---

१ चापान्तर्गतः पाठः प्र पुस्तके नास्ति । २ शुभम् प्रः क. ।
३ घर प्र. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ विवाहलग्नं द्वादशलग्नंच

लग्ने करोति दिनकृद् विधवां कुजश्च
राहुर्विनष्ट तनयां रविजो दरिद्राम् ।
शुक्रः शशाङ्क तनयश्च गुरुश्च सौम्य –
मायुः क्षयं च कुरुते नयनाभिरामः ॥३२॥

कुर्वन्ति भास्करशनैश्चरराहुभौमा
दारिद्र्यदुःखमशुभामतुलां द्वितीये ।
वित्तेश्वरीमविधवां गुरुशुक्रसौम्या
नारीं प्रभूत तनयां कुरुते शशाङ्कः ॥३३॥

सूर्यन्दुभौमगुरु शुक्रवुधास्तृतीये
कुर्युः सदा बहुसुतां बहुभोगिनीं च ।
सूर्यात्मजो बहुसुतां च करोति सद्भिः
सौख्यं ददाति न चिरेण च सैंहिकेयः ॥३४॥

स्वल्पं फलं भवति सूर्यसुते चतुर्थे
सौभाग्यमुष्णकिरणः कुरुते शशाङ्कः ।
राहुर्विपन्नवनितां क्षितिजोल्पवित्तं
दद्याद् भृगुः सुरगुरुश्च बुधश्च सौख्यम् ॥३५॥

नष्टात्मजां रविकुजौ खलु पञ्चमस्थौ
चन्द्रात्मजो बहुसुतां गुरुभार्गवौ च ।
राहुर्ददाति मरणं रविजोग्ररोगं
कन्या प्रसूतिमतुलां कुरुते शशाङ्कः ॥३६॥

षष्ठे दिनेशकुजराहुपतङ्गपुत्राः
कुर्वन्त्यतीव शुभदां गुरुरर्थशौर्यम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चन्द्र: करोति विधवामुशना दरिद्रां
देश्यां शशाङ्कतनयः कलहे हितां च ॥३७॥

सौरारजीवबुधराहुरवीन्दुशुक्रा
दद्युर्द्रुतं च खलु सप्तम राशि संस्थाः ।
वैधव्यबन्धन धनक्षय द्रव्यनाशं
व्याधि प्रवासमरणं नियतं क्रमेण ॥३८॥

स्थानाष्टमे गुरुबुधौ नियतं वियोगं
मृत्युं शशी भृगुसुतश्च तथैव राहुः ।
सूर्यः करोति विधवां क्षितिजस्तथैव
सूर्यात्मजो धनवतीं पतिवल्लभां च ॥३९॥

धर्मे स्थितो भृगुदिवाकर भूमिपुत्रा:
जीवश्च धर्मनियतं शशिजः समृद्धिम् ।
राहुश्च सूर्यतनयश्च करोति बन्ध्यां
कन्याप्रसूतिमतुलां कुरुते शशाङ्कः ॥४०॥

राहुर्नभस्तलगतो विधवां करोति
पापेरतां दिनकरश्च शनैश्चरश्च ।
मृत्युं कुजोऽर्थरहितां कुटिलां च चन्द्रः
शेषग्रहा धनवतीं पतिबल्लभां च ॥४१॥

आये रविर्बहुसुतां धनमिन्दुराहू
पुत्रान्वितां क्षितिसुतो रविजो धनाढ्याम्
आयुष्मतीः सुरगुरुश्च शुभां च वृद्धि
चन्द्रात्मजो बहुसुतां भृगुरर्थयुक्ताम् ॥४२॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अन्त्ये गुरुर्धनवतीं दिनकृद् दरिद्रां
चन्द्रो धनव्ययकरीं कुलटां च राहुः ।
संस्थौ सदा भृगुबुधौ वहुपुत्रपौत्रां
पानप्रशक्त हृदयां रविजः कुजश्च ।।४३।।

इति लग्नद्वादशफलानि ।

प्रकारान्तरेण लग्नभावफलानि

मृत्युर्नैस्वं बहुविधधनं भ्रातृहानिः प्रजानां
व्याधिः पत्योरतिशयमतो भर्तृहानिश्चिरायुः ।
श्रेयो हानिर्भवति हृदयव्याधिरर्थागमत्वं
भानौ स्त्रीणामतिशयरुजं लग्नभावादि संस्थे ।।४४।।

नाशः संपद्वहुविधयशोबन्धुवृद्धिः प्रजाप्तिः
शस्त्रान्मृत्युर्भंति न चिराद् दीर्घसापत्न्यबाधा ।
प्रव्रज्यात्वं दुहृतिजनितत्वं धनं भोगभोक्तुं
दास्यं स्त्रीणां तुहिनकिरणे लग्नभावादि संस्थे ।।४५।।

मृत्युः शोको बहुविधधनं भ्रातृवैरं कुबुद्धि–
र्लक्ष्मी प्राप्तिर्भवति मरणं चोभयोर्वंशनाशः ।
स्त्रीणां द्वेष्यं व्यसनिरतिः पुत्रपौत्रार्थवृद्धिः
भीतिर्भूमेर्बलिनि तनये लग्नभावादिसंस्थे ।।४६।।

प्रीतिर्बुद्धिःसुगुणनिरतिर्बन्धुपूजासुताप्ति
निर्वैपक्षं तनयरहितत्वं तनूत्याग चिन्ता
धर्मे बुद्धिर्भवति धरणी लाभमत्यन्तवृद्धि -
र्हानिः स्त्रीणां हिमकिरणसुते लग्नभावादिसंस्थे ।।४७।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लक्ष्मीप्राप्तिर्भवति सुयशः प्रीतिरन्योन्यमिष्टा-
वाप्तिर्बहुविध भयं चाश्रमाणां विरक्तिः ।
पापऽऽशक्तिः सुकृतनिरतिर्भूरिलाभः सुरेज्ये
स्त्रीणां सौख्यं रिपुकृतभयं लग्नभावादिसंस्थे ।।४८।।

भोगप्राप्तिर्विविधविभवः स्वैर वृत्तिर्महत्वं
द्युम्नाधिक्यं भवति निधनं सर्वनाशो व्यसुत्वम् ।
तथ्यप्रीतिर्बहुविधगुणः सर्वसम्पत्समृद्धि
रस्वं स्त्रीणामुशनसि तथा लग्नभावादिसंस्थे ।।४९।।

स्वच्छन्दत्वं तदशनरतिर्वल्लभत्वं विशल्यं
व्याधिः सुश्रीमतिरथ सुखं गर्भपात प्रवृत्तिः ।
द्यूताशक्तिर्भवति रविजे वैभवं वक्ररोगं
स्वर्भानौ वा ग्रहवरशिखौ लग्नभावादिसंस्थे ।।५०।।

गुरुः—

[1]लग्ने सौम्यग्रहाः सर्वे कुर्युः कन्यां पतिव्रताम् ।
विधवां वन्धकीं क्रूराश्चन्द्रश्चैव तथाविधः ।।५१।।

द्वितीयगाः शशाङ्काद्याः सौम्याकुर्युर्धनान्विताम् ।
क्रूराश्च पुंश्चलीं दीनां दुर्भगां धनवर्जिताम् ।।५२।।

भर्तारं गुरुभक्तं च सौम्याः कुर्युस्तृतीयगाः ।
चतुः क्रूराश्च कुर्वन्ति सुभगां रत्नभूषिताम् ।।५३।।

---

१ अन्त्यरहितत्त्वादितः प्र पुस्तके नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सौम्याश्चतुर्थगाः कुर्युः कन्यां पुत्र धनान्विताम् ।
क्रूराश्च क्षीणचन्द्रश्च क्रूरां बन्धुविर्वर्जिताम् ॥५४॥

कन्यां पञ्चमगाः कुर्युःसौम्याः पुत्रवतीं सतीम् ।
पुत्रस्त्रीजननीं क्रूरा धर्मपुत्र विर्वजिताम् ॥५५॥

षष्ठस्था धनिनीं क्रूरा बुधजीवौ च कन्यकाम् ।
रोगाद्यां भृगुपुत्रोऽपि रोगमृत्युप्रदः शशी ॥५६॥

सप्तमस्था ग्रहाः कुर्युर्विधवां गर्भपातिनीम् ।
नीचकर्मरतां चैव सापत्न्यं च निशाकरः ॥५७॥

ग्रन्थान्तरे—

मनुमाण्डव्य शाण्डिल्य भारद्वाजात्रिगौतमः ।
जामित्रं तु प्रशंसन्ति बुधजीवोशनाः शुभाः ॥५८॥

जामित्रगो यदि भवेदुशना बुधोवा
गीर्वाण मन्त्रि सचिवः सितपक्षचन्द्रः ।
कन्याविवाहसमये परिहृत्य शेषान्
सौभाग्यपुत्रसुखदा खलुकाव्यमुख्यैः ॥५८॥

जामित्रस्थान् प्रशंसन्ति गर्गकाश्यप देवलाः ।
स्ववर्गस्वोच्च जामित्र क्षेत्रगा बलिनो यदि ॥६०॥

राजमार्तण्डे—

मित्राश्रितो मित्रनिरीक्षितो वा मित्रांशके मित्रसमागतो वा ।
क्रूरग्रहादस्तमितोऽपि चन्द्रः समीहितार्थं वितरेन्नराणाम् ॥६१॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एते मनुमाण्डव्येत्यादय श्चत्वारः श्लोकाः, ब्रह्मवसिष्ठनारदगुरुभृगु मन्वादि मूलग्रन्थेषु नदृष्टाः । अतः, आर्ष्येय बहु ग्रन्थसमन्तभावात् । एतादृशानि वचनान्यप्रमाणानि नादरणीयानि । जामित्रशुद्धिर्ना प्रवलैर्वा, अबलैर्वा परमोच्चवर्गोत्तमादि गतैः, शुभैश्च ग्रहैर्वर्जितं लग्ना-श्चन्द्राद्वा जामित्रस्थानं ।

निधनस्था ग्रहाः सर्वे रोगमृत्यु प्रदाः स्मृताः ।
आदित्यार्कसुतौ चैव निधने तु सुखप्रदौ ॥६२॥

नवमस्था ग्रहाः सौम्याः कुर्युर्दानपरां सतीम् ।
चन्द्रः स्त्रीजननीं क्रूरां धर्माचार विर्वाजिताम् ॥६३॥

सितेन्दुर्धर्मरिक्ताढ्यां करोति वनितां सदा ।
दशमस्थाग्रहाः सौम्या भर्तुश्चित्तानुवर्तिनीम् ॥६४॥

तथार्कशनिभौमाश्च पापशीलां तु कन्यकाम् ।
एकादशस्थाः कुर्वन्ति सर्वे सूर्यादयो ग्रहाः ॥६५॥

कन्यामारोग्य पुत्राढ्यां सुभगां सुखभागिनीं ।
द्वादशस्थाः ग्रहाः सर्वे निस्वां कुर्वन्ति सर्वदा ।
परपुंसिरतां नित्यं हीनां शीलविभूषणैः ॥६६॥

अत्राष्टमस्थान चिन्तामाह तत्र गुरुदेवलौ—

झशचापकुलीरस्थो जीवोऽप्यशुभगोचरे ।
अतिशोभनतां दद्याद् विवाहोपनयादिषु ॥६७॥

लग्नाष्टमदोषभङ्गमाह गुरुः—

लग्नादष्टमराशीशः केन्द्रगः शुभवीक्षितः ।
यद्यष्टमगतस्योक्त दोषमाशु व्योहति ॥६८॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रन्ध्रेशः शुभांशगः स्यात् तुङ्गः स्वक्षेत्र मित्रगः ।
अष्टमस्थानदोषं हि विनश्यति न संशयः ॥६९॥

वसिष्ठः—

जन्मेशाष्टमलग्नेशौ मिथो मित्रे व्यवस्थितौ ।
जन्मराश्यष्टमर्क्षोत्थदोषो नश्यति भावतः ॥७०॥

कमलासनः—

सर्वे जामित्रसंस्था विदधति मरणं सौरसूर्यौ न शस्तौ
षष्ठाष्टात्र्यायसंस्थौ भवरिपुसहजः सोऽपि भौमः शशाङ्कः ॥७१॥

लग्नान्त्याष्टारि वर्ज्यं परिणयनविधौ ज्ञान्त्यमृत्युविवर्ज्यं ।
शुक्रेज्ये वा सुतायास्पदनवमगतौ भ्रातृ शुक्रेऽपि नेष्टः ॥७२॥

सप्तगाः सकलखगाः सप्तभिरब्दैः स सप्तमासैश्च ।
दम्पत्योः सह मरणं यमरक्षितमपि च कुर्वन्ति ॥७३॥

सत्खचरासत्खचराः सदसत्स्थानस्थ शुभफलान्यफलम् ।
सम्यग् ज्ञात्वाथ तयोः शुभफलमशुभं प्रगृह्णीयात् ॥७४॥

तत्राधिकफलं वृन्दैर्विनाशमायाति दोष चयम् ।
यद्वच्छशाङ्ककिरणे कलङ्कमखिलं तथैव सदा ॥७५॥

देशे च काले च तथा शरीरे राज्ये च सत्यापदि यत्र तत्र ।
भावान्तरं यत्परि कल्पनीयं गान्धर्व वैवाह चतुष्टयार्थम् ॥७६॥

लग्ने भावाश्चोदिता तेषु तिष्ठंल्लग्नस्थ सस्तानतीतो द्वितीयः ।
खेटस्त्वेवं शेषराशिव्यशेषाः भावाः सम्यक् कल्पनीयाः क्रमेण ॥७७॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वराहलल्लादिवचनम्—

सर्वे विक्रमलाभगाः शुभकरा जामित्रभे वर्जिता ।
सूर्यारौ क्षतपुण्यभे दिनकरे चार्थाम्बु धर्मात्मिजे ॥७८॥

सौम्ये षड्वसुरत्र वर्जितगुरौ भुक्त्वामे भार्गवे ।
हित्वाष्टारिशनौ षडष्टजलगे कन्याविवाहे शुभम् ॥७९॥

कुजगुरुसितचन्द्रज्ञाविहायाष्टभावं द्युनसमखिलखेटाः सन्तु भावं सितेन्दू ।
कुजरविशनिचन्द्रा लग्नभावं च नूनं ददति ... फलं स्यात् कन्यकानां विवाहे ॥८०॥

बृहस्पति—

लग्ने तृतीयग्रहषष्ठतथाष्टमेषु जीवोधराजरविजौ शशिजो रविश्च ।
रन्ध्रेसितश्च यदि वीर्ययुतः क्रमेण योगो विवाहसमये शुभवृद्धिदाता ॥८१॥

केन्द्रत्रिकोणसहिता यदि शोभनान्यैः स्वोच्चे स्ववर्गसहितो बलवान् प्रदीप्तः ।

पापा स्तथाविधगुणास्त्रिषडायगाश्च योगो विवाहसमये बहुपुत्रदाता ॥८२॥

स्याद् देशकालप्रभवस्तु शास्त्रादतः स कार्यः खलु सज्जनानाम् ।
तद्देशदोषान् परिवर्जयन्ति मनीषिणो दैवविदः प्रयोगात् ॥८३॥

यस्मिन् विवाहे गुरुशुक्रसौम्याः केन्द्रस्थिताः पुत्रधनस्थिता वा ।
सर्वेऽपि दोषान् विनिहन्ति चन्द्रः शुभं च तस्मिन् धनसंस्थितो वा ॥८४॥

स्ववर्गकेन्द्रेषु गतेऽमरेज्ये बलेन युक्ते शुभवीक्षिते च ।
सितेऽथवा शीतमयूखपुत्रे रामो यथा राक्षसमाशु नाशम् ॥८५॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ विवाहमङ्गलाष्टकानि लिख्यन्ते

श्रीतार्थीपृ सरोजयुग्ममलं लोकत्रयं पावनं
गङ्गाजन्मनिकेतनं सुरनुतं भक्तप्रसादास्पदम् ।
नत्वा मङ्गलपाठसिद्धिमिषय मुहूर्त्तिकानां सदा
सम्यक् सौम्यमुहूर्त दानसमये वक्ष्ये सुलग्नाष्टकम् ॥८६॥

घण्टानादमृदङ्गदुन्दुभिरवैर्निः शानशब्दादयो
नानामङ्गलगीतनृत्यनिवहैर्निक्वाणवेणुध्वनिः ।
विप्राशीर्वचनानि वेदनिनदसंपूर्ण सस्याच्चयः
सैते पान्तु सदा सुलग्न सुमुखा वः प्रीतिसंपद्करा: ॥८७॥

दिग्नां गतिरयस्त्वनर्घ्यमणयस्त्रेधाः विभवताग्रयः
क्ष्मापालाः मुनयः प्रसन्नकवयः सम्पूर्णशस्यादयः ।
संकल्पध्रुवकामधेनु सहितं चिन्तार्माणि कौस्तुभं
सर्वे पान्तु सदा सुलग्नप्रमुखा वः प्रीतिसंपत्करा: ॥८८॥

दुर्वाग्रं मधु पञ्चगव्यसहितं गोरोचनं श्रीफलम्
कर्पूरादिसुगन्धवस्त्रनिचयां गन्धाक्षतादीनि च ।
ताम्बूलं फलपुष्पपूर्णकलशाः पुण्याङ्गनाभिर्युता—
श्चैते पान्तु सदा सुलग्नप्रमुखा वः प्रीतिसंपत्करा: ॥८९॥

मन्वादिस्मृतयः पुराणतनयः काव्यप्रबन्धोदयः
षट्कर्तापृतयः स्वतन्त्रविधयः सूत्राणि भाष्याणि च ।
सिद्धान्तो यवनादिजातकदृशो गर्गादिकाः संहिता—
श्चैते पान्तु सदा सुलग्नप्रमुखा वः प्रीतिसंपत्करा: ॥९१॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रीवत्सान्वयनारसिंहरचितं शार्दूलविक्रीडितैः
सैव्यंशत्रुहरं समृद्धिकतरं, वृत्तानुरूपस्थितम् ।
पायाद् वः सततं परं सुखतरं धर्मार्थकामप्रदं
सर्वे पान्तु सदा सुलग्नप्रमुखा वः प्रीतिसंपत्कराः ॥९२॥

ब्रह्मर्षिदेवर्षिसमाजयेस्व गन्धर्वरक्षोरग सिद्धसंघः ।
दैत्याः समुद्राः गिरयः सुपर्णा वधूवराभ्यां वरदा भवन्तु ॥९३॥

सीतानुसूया दमयन्तिका च श्रीसत्यभामा द्रुपदात्मजा वा ।
सावित्र्यरुन्धत्यपि याश्च सत्यो वधूवराभ्यां वरदा भवन्तु ॥९४॥

कामो वसन्तो मलयानिलेन्दू प्रीती रतिश्च स्मरपट्टराज्ञी ।
पौष्णाः शरास्ते धनुरैक्षवं च[1] वधूवराभ्यां वरदा भवन्तु ॥९५॥

आदित्यचन्द्रावनिजज्ञजीवशुक्रार्किराहुध्वजनामखेटाः ।
नक्षत्रराशि तिथिवार पूर्वा वधूवराभ्यां वरदा भवन्तु ॥९६॥

इन्द्रो नलो धर्मपतिः सरक्षो जलाधिपो वायुरसौ धनेशः ।
ईशो विरिञ्चिः कमला दिगीशा वधूवराभ्यां वरदा भवन्तु ॥९७॥

इत्यादिकाशीर्वचनं च कृत्वा धृत्वा करेणाक्षतगन्धपुष्पम् ।
ध्यात्वा हरिं स श्रियमेकचित्तः श्रियं च गौरीं च सरस्वतीं च ॥९८॥

स्वस्त्यष्टाशीति सहस्राणां द्विजगुरुदैवत्यानां पाकशासन-हुताशन-कालिन्दीसोदर-रजनीचराणां धनशिखिसखशिखिवाहन- गुरुणामायुष्मतः प्रजापतेः-सुप्रजसो महोजसः सत्यव्रतस्य हरिश्चन्द्रमहीपतेस्तेजस्विनो भासान्निधे महात्मनः स्फुरतोऽरुन्धतीरमणस्य महर्षेर्मार्कण्डेयस्य सकलदेवता

१ धनुरैक्षवन्धः क. च. प. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शेरस्याक्षीणसंपत्प्रदीयमानयपरायणस्यनारायणस्य कल्याणपरंपरात्प्रदाय नयनपरायणस्य पुष्पसायकस्य सस्यानां महौषधीनां दिव्यानां सुरभिसुरभि तरुणीनामक्षतधराजनिष्पावगुडजीरगराजान्नदधि क्षीरकौसुम्भ-रम्भास्तम्भादिमङ्गलद्रव्याणि भगवतो विनायकस्य च प्रसादेनास्य शोभनदिवसस्यानि भवेयुः, वारनक्षत्रयोगकरणचन्द्रताराादिबलानि सुशोभनानि सुमुहूर्तलग्नहोराद्रेक्काणनवांश द्वादशांशत्रिंशांशकानां च निरन्तर मनुकूलं सुशोभनाः सर्वे ग्रहाः सनक्षत्रा एकादशस्था फलदा वरदाः सुप्रसन्ना भवन्तु ॥

इति श्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने विवाहप्रकरणे विवाहलग्न–द्वादशलग्नाऽध्यायः ।

अथ गृहप्रवेशाऽध्यायः

वसिष्ठ :—

षष्ठाष्टमे वा दशमे दिने वा विवाहमारभ्य वधूप्रवेशः ।
पञ्चाङ्ग संशुद्धिदिनं विनापि विवाहसद्गोचरगेऽपि कार्यम् ॥१॥

अथोढभार्यां स्वगृहं विवक्षितोर्यात्रानिवृत्तस्य विवच्मि कालम् ।
निर्माय नूत्नं ग्रहमन्यमुक्तमपूर्वगेहं प्रविवीक्षितश्च ॥२॥

शुभकाले गृहं प्राप्ते वर्धते सम्पदस्तया ।
असत्काले गृहं प्राप्ते शर्वनाशं गृही व्रजेत् ॥३॥

अथ प्रवेशो नव सद्मनश्च सौम्यायने जीवसिते बलाढ्ये ।
सिते च पक्षे शुभवासरे वा वास्त्वर्च्चनं भूतबलिं च कृत्वा ॥४॥

नव प्रवेशोप्यथ कालशुद्धि र्न द्वन्द्वसौपूर्वकयोः कदाचित् ।
प्रवेशपञ्चाङ्गदिने सुलग्ने वास्त्वर्चनं पूर्ववदत्र कार्यम् ॥५॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अपूर्वसंज्ञः प्रथमः प्रवेशो यात्रावसाने च सुपूर्वसंज्ञः ।
उद्बाह्वयस्त्वग्निभवादि जातस्त्वेवं प्रवेशस्त्रिविधः प्रदिष्टः ॥६॥

माघेऽर्थलाभः प्रथमः प्रवेशः पुत्रार्थलाभः खलु फाल्गुने च ।
चैत्रेऽर्थहानिर्धनधान्यलाभो वैशाखमासे सुखपुत्रलाभः ॥७॥

ज्येष्ठे च मासे च परे च नूनं हानिप्रदः शत्रुभयप्रदश्च ।
शुक्ले च पक्षे सुतरां विवृद्ध्यै कृष्णे च यावद् दशमीं च तावत् ॥८॥

दिवा प्रवेशः शुभदः सुपुत्रपौत्रादि वृद्ध्यै निशि भास्करेन्दोः ।
बलेन सौम्यध्वजवासरस्य रात्रिं विना सूर्यतिथेश्च धात्री ॥९॥

मृगादिषड्राशिषु संस्थितेऽर्के नवप्रवेशःशुभदः सदैव ।
कुम्भं विनान्येष्वपि केचिदूचुर्न सौरमिष्टं खलु सन्निवेशे ॥१०॥

गुरुः—

निर्गमान्नवमे मासि प्रवेसे न तु वेशनम् ।
नवमे दिवशे चैव प्रवेशं नैव कारयेत् ॥११॥

कुलीरकन्यकाकुम्भे दिनेशे न विशेद् गृहम्
ग्रामं वा नगरं वापि पत्तनं वा सुराधिपः ॥१२॥

वसिष्ठः—

ग्रामान्निर्गममासतश्च नगराद् राजाथ वान्ये जना
मासे वा नवमे तु नन्वदिवसे[1] कुर्यात् प्रवेशं न तु ।

---

१ न स्वदिवसे अ. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्रेंधोक्ता नवमी प्रवेशनवमी प्रस्थान पूर्वात्रयं
तासुस्वस्थगृहान्नगमनं कुर्यात् प्रवेशं न तु ।।१३।।

पक्षे सिते कृष्णतृतीयभागं हित्वा गृहे चोक्ततिथौ प्रवेशम् ।
कुर्यात् सितं दक्षिणतश्च कृत्वा तं पृष्ठतो वा शुभदः प्रवेशः १४।।

गुरुः—

पृष्ठगं दक्षिणस्थं वा भृगुं कृत्वा विशेत्सदा ।
पुरतो वामगं चापि शुक्रं कृत्वा नचाविशेत् ।।१५।।

मूढेऽस्ते भृगुजे सर्वं सर्वेशो नैवशोभनः ।
गव्यूतिमात्रादर्वाग्वा गमनागमनं शुभः ।।१६

सनत्कुमारः—

मघाथ रेवती चैव कृत्तिका पुष्य एवच ।
पूर्वाफाल्गुनि हस्तश्च मूलं चैव तु सप्तमम् ।।१७।।

एभिर्युक्ते भूमिपुत्रे कृतं चैव तु वेश्मकम् ।
वह्निना दह्यते क्षिप्रं पुत्रनाशश्च जायते ।।१८।।

रोहिण्यातिसृषूत्तरासु शुभदो गेहे प्रवेशो नवे
पौष्णे वासवमित्रयोश्च विहितः स्वस्मिन् पुराणे गृहे ।
श्राद्धे हस्तसुरेज्ययोर्नवगृहे शस्तः पुराणे तथा
कुम्भे कर्किणि भास्करे युवतिगे निन्द्यः प्रवेशो गृहे ।।१९ ।

श्रीपतिः—

रिक्ता तिथिर्भूसुत भानुवारौ सन्ध्याऽव्ययोगाः परिवर्जनीयाः ।
मेषः कुलीरो मकरस्तुला च त्याज्या प्रवेशे हि तदा तदंशाः ।।२०।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कृत्तिकासु भवनं कृशानुना दह्यते प्रविशतो नसंशयः ।
यन्मुखं हि सदनं च तन्मुखं द्वारभेषु शुभकृत् प्रवेशनम् ॥२१॥

रिक्तावमां दग्धतिथिर्दिनेशभूसूनु षड्वर्ग सितेन्दुदृष्टि ।
क्रूरग्रहाधिष्ठितविद्धभं च विवर्जनीयं त्रिविधे प्रवेशे ॥२२॥

वसिष्ठः—

चन्द्रजार्यसितवासरेषु तु श्रीकरं सुखमहार्थलाभदम् ।
सूर्यसूनुदिवसे स्थिरप्रदं किन्तु चोर भयमत्रविद्यते ॥२३॥

चित्रोत्तराधातृशशाङ्कमित्रवस्वन्त्यवारीश्वरभेषु नूनम् ।
आयुर्धनारोग्य सुपुत्रपौत्रसुकीर्तिदः स्यात् त्रिविधःप्रवेशः ॥२४॥

अर्कानिलार्यादितिदस्रविष्णु ऋक्षं प्रदिष्टं नवमन्दिरंयत् ।
अब्दत्रयातत्पर हस्तयातं शेषेषु धिष्णेषु च मृत्युदः स्यात् ॥२५॥

पञ्चाङ्ग संशुद्धिदिने विशेत्तदा[1] ताराबलेनाष्टकवर्थयुक्ते ।
ग्राम्ये स्थिरे भे शुभदृष्टियुक्ते लग्नेऽथवा द्वयङ्ग गृहे विलग्ने ॥२६॥

गुरुः—

नन्दायां दक्षिणद्वारं भद्रायां पश्चिमेन तु ।
जयायामुत्तरं द्वारं पूर्णायां पूर्वतो विशेत् ॥२७॥

वसिष्ठः—

केन्द्रेषु सौम्यो गुरुशुक्रलग्ने पापेषु केन्द्राष्टमवर्जितेषु ।
ग्राम्ये स्थिरे वा शुभदृष्टिलग्ने गृहं विशेच् शीतकरेऽनुकूले ॥२८॥

---

१ छन्दो भङ्गोऽत्र वर्तते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गुरुः—

विवाहदिवसात् पश्चात् चतुर्थे दिवसे स्त्रियः ।
उपसंवेशनं कुर्यात् कृत्वा होमावशेषितम् ॥२९॥

वसिष्ठः –

न नैधने भेऽपि न चाष्टलग्ने पञ्चेऽष्टकेप्यष्टमशुद्धियुक्ते ।
कार्यः प्रवेशोनचरांशलग्ने शुभेक्षिते वाप्यथ संयुतेऽपि ॥३०॥

कर्तुर्विलग्नाच्च हि जन्मराशेर्लग्ने स्थितो राशिरितिप्रदिष्टः ।
निर्व्याधिदारिद्र्य यशस्करी च सुहृत्सुतघ्नी रिपुनाशदः सः ॥३१॥

कलत्रहन्ता निधनप्रदश्च रोगप्रदः सिद्धिकरोऽर्थदश्च ।
क्रमाच्चवैरी भयदः प्रवेशे सदैव नूनं त्रिविधे विचिन्त्यम् ॥३२॥

केन्द्रत्रिकोणे त्रिधनायगस्थैः शुभैस्त्रिषष्ठायनतैरधैश्च ।
लग्नान्त्यषष्ठाष्टविवर्जितेन चन्द्रेण लक्ष्मीनिलयः प्रवेशः ॥३३॥

यद्यद्द्वारं मन्दिरं तद्दिगृक्षैः सप्तर्क्षैः स्यात् संनिवेशोन सर्वैः :
पुष्यो मध्यः सन्निवेशेष्वङूनां वाराणां स्यात्सूर्यसूनोश्च वारः ॥३४॥

प्रवेश लग्नान्निधनस्थितो यः क्रूरग्रहः क्रूर गृहे यदि स्यात् ।
प्रवेशकर्तारमथ त्रिवर्षं तदन्त्यवर्षे शुभराशिकश्चेत् ॥३५॥

यः क्षीणचन्द्रोन्त्यषड्ष्टसंस्थः पापेक्षितः पापयुतोऽथवास्यात् ।
[1](कर्तुः स्त्रियं हन्ति च वत्सरेण त्रिवर्षतः सौम्यनिरीक्षितश्चेत् ३६॥

---

१ चापान्तर्गतः पाठः क. च. पुस्तकयोर्नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एको ग्रहेन्द्रः परभागवर्जितो जायास्थितः कर्मगतोऽथवा स्यात् ।
प्रविष्टगेहे पर हस्तयातं करोति वर्षाद् विबलः सखेटः ॥३७॥

गजाश्वशालादिषु सन्निवेशस्त्वेवं पशूनां पशुयोनिह्रासम् ।
शुभ ग्रहैर्युक्त निरीक्षिते च प्रवेशनं शोभनमामनन्ति ॥३८॥

कृत्वा शुक्रं पृष्ठतो वामतोऽर्कं विप्रान् पूज्यानग्रतः पूर्णकुम्भान् ।
हर्म्यं रम्यं तोरणैः स्रग्वितानैः स्त्रीभिः स्रग्भिर्गीतवाद्यै विशेच्च[1] ।।३९।

विधाय पूर्वं गृहदेवतार्चनं सन्मङ्गलालङ्कृत देवगेहे ।
तूर्यस्वर श्रवणमङ्गल गीत पूर्णकुम्भान्वितो द्विजवरप्रमदा समेतः ।४०।

स्वस्तिवाचनपुरस्सरं ततो विप्रसंघमपि पूज्य[2] लक्षितः ।
बन्धुभिः सह विधाय भोजनं संविशेदभिमताङ्गनासरवः ॥४१॥

जन्मतोपचयगे विलग्नगे पापरवेचरयुतेऽथ वीक्षिते ।
हानिशोक भयरोगपीडनं जायते खलु गृहं विविक्षताम् ॥४२॥

एवं स्थिरांशे पतिवेश्मवेशनं शुक्रः पुरो वामगतो न शस्यते ।
गव्यूत्यहीनेस्त्वथ नैव निर्गमे मासे दिने वा नवमे पुनर्विशेत् ॥४३॥

संवेशनं तुर्यदिने चतुर्दशी पर्वाष्टमी सङ्क्रम जन्मवर्जिते ।
कन्यां विनैवं तदसंभवे भजेत्, उद्वाहकालाद्धरिबारुणेऽपि ॥४४॥

गुरौ लग्ने भानौ वियति हिबुकस्थे शशधरे
स्मरे वा योगोऽयं भवति भवनानन्दजननः ।
धनं धान्यं वा गजतुरगदास्याद्यमपि वा
गृही यच्चान्यद् धृतमखिल सिद्धि जनयति ॥४५॥

१ विशेत्तत् क. च. प. । २ पूजयित्वा ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भगवान् गर्ग :–

नन्दा भद्रा जया पूर्णा प्रवेशे तिथयः शुभाः ।
अमावास्यां च रिक्तायां वर्जनीयः प्रयत्नतः ॥४६॥

मृदौ ध्रुवे च नक्षत्रे प्रवेशः पृथिवीपतेः ।
चरे क्षिप्रे प्रवेशश्चेद् गृहमन्यत्र गच्छति ॥४७॥

उग्रऋक्षे प्रविष्टस्तु सप्तरात्राद् विनश्यति ।
दारुणर्क्षे प्रविष्टस्य भयं रोगंविनिर्दिशेत् ॥४८॥

वैधृतौ च व्यतीपाते वज्रे च परिघेऽपि वा ।
अतिगण्डे च गण्डे च शूलव्याघातयो स्तथा ॥४९॥

विष्कुम्भे च परित्यज्य प्रवेशं पृथिवीपतेः ।
तस्मात् सर्शप्रयत्नेन वर्जनीयाः प्रयत्नतः ॥५०॥

शिवस्तु शोभनो योगो धनपुत्रयशस्तदा ।
विष्टिवर्ज्यानि चान्यानि शुभानि करणानि च ॥५१॥

गृहप्रवेशयोगात् ब्रह्मसंहितायाम् –

लग्ने भृगुः पुत्रगतश्च जीवः षष्ठे कुजस्तिग्मकर स्तृतीये ।
संवेशनं यस्य गृहस्य कर्ता शतद्वयं तिष्ठति वत्सराणाम् ॥५२॥

गुर्विलग्ने भृगुजो जलस्थः शशाङ्कजो मन्मथमस्युपेतः ।
तृतीयषष्ठे शशितिग्मरश्मी समाः शतायुर्नृपपुत्रयोगे ॥५३॥

भृर्गुर्विलग्ने शशिजोऽम्बरस्थे यदा भवेत् केन्द्रगतः सुरेज्यः ।
दिवाकरो लाभगतो निवेशे तदा शतायुर्भवनस्य विद्यात् ॥५४॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सहजशत्रुसुतोदय संस्थितैर्दिनकरारसुरेज्यसितैः खगैः ।
भवति यस्य गृहस्य निवेशनं खलु तथा च शतद्वयमाविशेत् ॥५५॥

प्रतिशुक्रापवादमाह वसिष्ठः—

विवाहे तीर्थयात्रायां दुर्भिक्षे राष्ट्रविभ्रमे ।
एकग्रामे चतुः शाले प्रतिशुक्रो नदुष्यति ॥५६॥

लल्लः—

स्वभवनपुरप्रवेशे देशानां विभ्रमे तथोद्वाहे ।
नूतनवध्वागमने प्रतिशुक्रविचारणा नास्ति ॥५७॥

सत्कुले समये याते राज दुर्भिक्षपीडिते ।
समूलसहयात्रायां प्रतिशुक्रो न दुष्यति ॥५८॥

इति श्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने गृहप्रवेशाऽध्यायः ।

वास्तुप्रकरणम्

सनत्कुमारविश्वरुपनारदकश्यपवसिष्ठगर्गयवनमयाचार्यवराहश्रीपतिमतानुसारेण वास्तुप्रकरणमारभ्यते ।

तत्र वराहः—

वास्तुज्ञानमथातः कमलभवान्मुनिपरंपरया यातम् ।
क्रियतेऽधुनामयेदं विदग्धसांवत्सर प्रीत्यै ॥१॥

किमपि किलभूतमभवद् रुधानं रोदसी शरीरेण ।
तदमरगणेन सहसा विनिगृह्याधोमुखं न्यस्तम् ॥२॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यत्र च येन गृहीत्वा विबुधेनाधिष्ठितं तत्रैव ।
तदमरभयं विधाता वास्तुनरं कल्पयामासः ॥३॥

अथ वास्तूत्पत्तिमाह

इन्द्रस्य वज्रपातेन पर्वता भुवि पातिताः ।
तेषां भूमिनिपातेन वास्तुरूपः समुद्भवः ॥४॥

नभस्यस्य तृतीयायां मध्याह्ने कृष्णपक्षके ।
वारे शनैश्चरे प्रोक्तं नक्षत्रं कृत्तिका भवेत् ॥५॥

योगस्तत्र व्यतीपातकरणं विष्टि संज्ञितम् ।
भद्रा च भवते तत्र मध्ये कुलिक संभवम् ॥६॥

एवंविधोद्भवो वास्तुः पृथिव्याकाशव्यापकः ।
तेनाक्रान्त ग्रहास्ताराश्चन्द्राग्नि मणिजातयः ॥७॥

दिशो वायुर्धराकाशं पानीयं गगनाङ्कनम् ।
छादितं नाभिभाषन्ते दिविदेवाश्च पक्षिणः ॥८॥

पृथिव्यां मुनयः सर्वे योगिसिद्धाप्सरोगणाः ।
न सन्ध्या न दिवारात्रौ न वेला नतु तर्पणम् ॥९॥

स्यादेकमङ्गुलं मात्रा कला प्रोक्ताङ्गुलद्वयम् ।
पर्वत्रिण्यङ्गुलान्याहु मुष्टिः स्याच्चतुरङ्गुलम् ॥१०

तलं स्यात् पञ्चभिः षड्भिः करपादाङ्गुलैर्भवेत् ।
सप्तभिर्दृष्टिरष्टाभिरङ्गुलैस्त्रुटिरुच्यते ॥११॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नवाङ्गुलस्तु प्रादेश सैकैस्तालस्तथाङ्गुलैः ।
एकादशस्तु गोकर्णो विकर्णो द्वादशाङ्गुलः ॥१२॥

चतुर्दशाङ्गुलो नीचंपदमुपरि कीर्तितम् ।
एकविंशाङ्गुलोरत्निः स्यादरत्निः करोमतः ॥१३॥

किष्कुस्तु परि संख्यातो द्विचत्वारिंशदङ्गुलः ।
चतुरुत्तरयाशीत्या वामस्य पुरुषस्य तु ॥१४॥
षण्णवत्यङ्गुलस्त्वेवं भवेन्नाडीयुगं तथा ।

कृष्णीयम्—

देवैर्मनुष्यैर्यो वासो वास्यते वास्तु तत्स्मृतम् ।
तन्त्रशास्त्रोक्त मार्गेण कृतं सफलतामिह ॥१५॥
वास्तुविन्यासमूला हि प्रजानां सर्वसम्पदः ।
यथावद्विहितं वास्तु न त्यजन्ति हि देवताः ॥१६॥

शुभकर्मणि दीक्षायां मण्डपकरणे गृहादिविधिषु तथा ।
विहितो वास्तुबलिः स्याद् रक्षो विघ्नोपशान्तिसंपद्भ्यः ॥१७॥

मण्डुकाख्यपदं वक्ष्ये सर्वप्रासाद योग्यकम् ।
चतुः षष्ठिपदोपेतं सूत्राष्टदशकान्वितम् ॥१८॥

कर्णसूत्र द्वयोपेतं रज्वष्टक विभूषितम् ।
मर्मद्वादशकोपेतं वह्निभूत सिरान्वितम् ॥१९॥

प्रागग्राण्युत्तराग्राणि वास्तौ सूत्राणि नाडिका ।
लक्ष्मीर्यशोवती कान्ता सुप्रिया विकला शिवा ॥२०॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सुभगा सुमती चैता नाड्यः प्राचीमुखोद्गताः ।
धन्या प्राणी विशाला च स्थिरा भद्रा जया निशा ॥२१॥

विरजा विभवा चैता नाड्यः सौम्यमुखा स्मृताः ।
तिर्यगर्धस्थितौ वंशौ दुर्जयौ दुर्धरौ तथा ॥२२॥

मातृपित्र्यनिधानौ तौ विद्धौ तद्वंशनाशनौ ।
रज्जवोष्टौ विकोणस्थाश्चतस्रो द्विपदास्तथा ॥२३॥

चतस्रः षट्पदास्तासां नाम वक्ष्ये यथाक्रमम् ।
कर्णयोः कीलनीरज्जुः पादगुल्फे च बन्धनी ॥२४॥

संवर्ता च विकर्ता च जानुकुर्पर संगमे ।
हृद्गृह्य कुक्षिमार्गेषु सद्भावां जननीं तथा ॥२५॥

पक्षी कीर्त्तिरितिज्ञेया रज्जवो वास्तुबन्धने ।
वक्ष्ये द्वादशमर्माणि वास्तुगात्रस्थितानि च ॥२६॥

समस्त नाडि संपातो महामर्माम्बुजं फलम् ।
त्रिशूलं स्वस्तिकं वज्रं मर्म स्वस्तिक संपुटे ॥२७॥

त्रिकण्ठं मणिबन्धश्च श्रुतिः शुद्धपदस्तथा ।
इति द्वादशमर्माणि त्रिभिस्तम्भादिषु त्यजेत् ॥२८॥

नाडीनामध्ययोगो यः संपातः सूत्र युग्मके ।
नाडीसंपात संज्ञतं मर्म व्याधिकरं हतम् ॥२९॥

वंशयोस्त्वं गतिर्मध्ये ब्रह्मस्थाने विपत्करम् ।
स्तम्भमित्यादिर्भिविद्धं महामर्म प्रकीर्त्तितम् ॥३०॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सूत्राष्टकस्य संयोगादम्बुजं नाशकृद्द्रुतम् ।
वंशरज्जुयुतार्धेन हलाख्यं सूत्र युग्मतः ॥३१॥

स्तम्भादिविद्धं तन्मर्मं धान्यक्षरकमर्मकम् ।
संयोगाद् वंशनाडीनां[1] शूलं कोणचतुष्टये ॥३२॥

सूत्रत्रययुतं विद्धं बन्धु पुत्रादि नाशकृत् ।
स्वस्तिकंबन्धुयुग्मेन हते तद्देशनाशनम् ॥३३॥

आचार्यः[2]—

संपातानां वंशानां मध्यानि समानि च याति पदानाम् ।
मर्माणि तानि विद्या न्न तानि परि परिपीडयेत् प्राज्ञः ॥३४॥

तान्यशुचिभाण्डकीलकस्तम्भाद्यैः पीडितानि शल्यैश्च ।
गृहभर्तुस्तत्तुल्यैः पीडाभङ्गे प्रयच्छन्ति[3] ॥३५॥

रोगाद्वायुं पितृतो हूताशनं शेषसूत्रमपिवितथात् ।
मुख्याद् भृशं जयन्ताद्भृङ्गराज मदितश्च सुग्रीवम् ॥३६॥

तत्संपाता नव येतान्यति मर्माणि संप्रदिष्टानि ।
यश्चपदस्यष्टांशस्तत्प्रोक्तं मर्म परिमाणम् ॥३७॥

[4](पदहस्तसंख्यया सम्मितानि वंशोऽङ्गुलानि विस्तीर्णः ।)
वंशव्यासोऽप्यर्धशिरा प्रमाणं विनिर्दिष्टम् ।
सुखमिच्छन् वृह्माणं यत्नाद् रक्षेद् गृही गृहान्तः स्थम् ॥३८॥

---

१ दशनाडीनाम् अ. । २ वराहमिहीराचार्यः ।
३ 'इति जगन्मोहने वास्तुप्रकरणाध्यायो द्विरशीति' इत्यधिकः पाठ क पुस्तके वर्तते । ४ एतच् श्लोकार्धं लिखितपुस्तकेषु नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उच्छिष्टाद्युपघाताद् गृहपतिरुपतप्यते तस्मिन् ।
गृहनगरग्रामेषु च सर्वत्रैवं प्रतिष्ठिता देवाः ॥३९॥

तेषु च यथानुरूपं वर्णादयो वा स्युः
चक्षुःषट् सूत्र संयोगात् विद्धं कर्तु विनाशनम् ॥४०॥

वंश रज्जु समायोगान्महान्तं स्वस्तिकं विदुः ।
मर्म विद्धं च यत्सूत्रं दशानां नाशनं मतम्[1] ॥४१॥

रज्जोवंशस्य वा सूत्रं कोणात् कोणगतं च यत् ।
स पुरं तद्धतं मर्म कर्तृ रोगकरं मतम् ॥४२॥

सूत्रत्रयस्य संयोगाद्वास्ते ते नाडीयोगतः ।
त्रिकटं मर्म तद्विद्धि भवेन्मन्दिर नाशकम् ॥४३॥

एवं द्वादश मर्माणि कीर्तितानि यथाक्रमम् ।
एतेषां मर्ममध्यस्थं स्तम्भभीत्यादि मध्यतः ॥४४॥

[2] (नपीडयेत्ततस्त्वस्माद् घातयं स्तम्भभित्तिकाम् ।
एकाङ्गुलेन वाऽर्धेन मर्ममध्यां तु चालयेत् ॥४५॥

एवं मर्माणि चोक्तानि देवानां स्थानमुच्यते ।
मध्ये चतुष्पदे ब्रह्मा ब्रह्मणस्तु समीपतः ॥४६॥

दिक्षु पूर्वादितः पूज्याश्चत्वारो यद्यदास्थिताः ।
मरीचीश्च विवस्वांश्च मित्रश्च पृथिवीधरः ॥४७॥

---

१ देशनाशकरं मतम् क.च. । २ चापान्तगतः पाठ अ.प. पुस्तकयोर्नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शक्रः समीपकोणेषु वह्न्यादिषु यथाक्रमम् ।
एकैकपदमध्यस्थाः पूज्या अष्टौ सुराः क्रमात्[१] ॥४८॥

सविता चाथ सावित्र इन्द्रश्चेन्द्र जयस्थितः ।
रुद्रश्च रुद्रदासश्च आपश्चैवाप वत्सकः ॥४९॥

ईशकोर्धमारभ्य द्वात्रिंशच्चामराः क्रमात् ।
अष्टौ कोणार्धगास्तत्र शेषास्तु पदिकाः स्मृताः ॥५०॥

प्रदक्षिण क्रमेणैव प्रोच्यन्ते ब्राह्म पङ्क्तिगाः ।
ईशान्यादिर्धनस्येशः पर्जन्यश्च जयस्तथा ॥५१॥

महेन्द्रश्च तथादित्यः सत्यश्च भृशकस्तथा ।
अन्तरिक्षोग्निकोणार्धं शेषास्तुपरिकाःस्मृताः ॥५२॥

पूषा च वितथाश्चैव गृहक्षत यमस्तथा ।
गन्धर्वो भृङ्गराजश्च निर्ऋतेरर्धगो मृगः ॥५३॥

पदस्यार्धे च पितरो देवारी वसुगन्धरः ।
पुष्पदन्तोथ वरुणः, असुर शेष एव च ॥५४॥

पापयक्ष्मा पदार्धे स्याद् रोगो वा यार्धके पदे ।
नागो मुख्यश्च भल्लाटः सोमश्च वरुणो दिति : ॥५५॥

दितिरीशानकोष्ठार्द्धे वास्तुदेवाः प्रकीर्तिताः ।
वास्तोर्वाह्ये वरक्याद्याः शङ्कुस्था पदवर्जिताः ॥५६॥

---

१ अष्टामरक्रमात् क. च. । अष्टोत्तर क्रमात् अ.प. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वरकी च विदारी च पूतना पापराक्षसी ।
ईशानादिषु कोणेषु राक्षस्योऽस्य समाश्रिता: ॥५७॥

स्कन्दो यमश्च जृम्भश्च पिलिपिच्छा ग्रहा इमे ।
वास्तोर्वाह्यक्रमादिक्षु सत्वजापद वर्जिताः ॥५८॥

एवं देवास्त्रिपञ्चाश वास्तोर्मण्डुक संज्ञके ।
निर्माणे पट्टन ग्राम गृहादीनां समासतः ॥५९॥

क्षेत्रमादौ परीक्षेत गन्धवर्णरसप्लवैः ।
नचोषरा न वा शीत गन्धविप्रानुपूर्वकम् ॥६०॥

सितेषद्रक्तहरित कृष्णवर्ण यथाक्रमात् ।
मधुरं कटुकं तिक्तं कषाय रससन्निभम् ।६१॥

अत्यन्त वृद्धिदं नृणामीशानप्रागुदक्प्लवम् ।
अन्यदिक्षुप्लवं तेषां शश्वदन्यप्लवं हितम् ॥६२॥

तत्र गर्तं रत्निमात्रं खनित्वा प्रतिपूरयेत् ।
अत्यन्तवृद्धिरधिके हीने हानिः समे समम् ॥६३॥

ईशानादौ ततः कृत्वा पानीयेन प्रपूरयेत् ।
प्रातर्दृष्टे जले बृद्धिः समं पक्वे ब्रणे क्षयः ॥६५॥

एवं लक्षणसंयुक्ते क्षेत्रे सम्यक् समीकृते ।
दिक्साधनाय तन्मध्ये समं मण्डलमालिखेत् ॥६४॥

---

१ राक्षस्योरस्य क. च. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

[1] पूर्वोक्तलक्षणं शङ्कुं तन्मध्ये स्थापयेत्ततः ।
चतुरस्रे कृते क्षेत्रे षड्वर्ग परिशोधिते ॥६६॥

मार्गेणैतेन कर्तव्यः प्राकारः सुमनोहरः ।
आयामेषु चतुर्दिक्षु प्रागादिषु च सत्स्वपि ॥६७

अष्टा वष्टौ प्रतिदिशं द्वाराणि स्यु र्यथा क्रमात् ।
प्रदक्षिणक्रमाद्येषा मीशान्यादि फलानिवै ॥६८॥

हानिः निः सत्वमर्थार्यो नृपपूजा महद्धनम् ।
अतिसौर्यमतिक्रोधो भीति दिशिशचीपतेः ॥६९॥

चीयते निर्धनं भीतिरर्थाप्तिर्धान्य वर्धनम् ।
अनामयं व्याधिमयं निः सत्वं दक्षिणां दिशम् ॥७०॥

पुत्रहानिः शत्रुवृद्धि लक्ष्मीप्राप्तिर्महद्धनम् ।
सौभाग्यमति दौर्भाग्यं दुःखं शोकश्च पश्चिमे ॥७१॥

कलत्रनिन्दा निः सत्वं हानिर्धान्यं धनागमम् ।
संपद्वृद्धिर्महाभीतिरामय दिशिशीतयोः ॥७२॥

एकाशीतिपदोपेतं तथा विंशतिसूत्रकम् ।
कर्णसूत्र द्वयोपेतं रज्वष्टकविभूषितम् ॥७३॥

पूर्वोक्त देवतारुप गृहाग्रामादियोग्यकम् ।
कान्ता यशोवती कान्ता विशाला प्राणवादिनी ॥७४॥

---

१ चापान्तर्गतः पाठः च पुस्तके नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सती वसुमती नन्दा सुभद्रा च मनोरमा ।
दशप्राचीमुखा नाड्यो वक्ष्यन्ते चोत्तरामुखा ॥७५॥

हिरण्यसुप्रभा लक्ष्मीर्विभूतिर्विमलाश्रया ।
जया बाला विशोका च तथा भावेति कीर्तिता ॥७६॥

दश प्राण बहा नाड्यःसुषुम्नादि स्वरूपगाः ।
रज्जवोऽत्रापि पूर्वोक्ता षट्पदास्त्रिपदाः स्मृताः ॥
वंशौ पूर्वादिना चात्र ब्राह्मणं च वहिस्थिताः ॥७७॥

आचार्यः—

एकाशीति विभागे दश दश पूर्वोत्तरायत रेखा ।
अन्तस्त्रयोदशसुराद्वात्रिंशद् वाह्यकोष्ठस्थाः ॥७८॥

शिखिपर्जन्यजयन्ते इन्द्र सूर्य सत्याः भृशोऽन्तरीक्षं च ।
ऐशान्यादि क्रमशो दक्षिणपूर्वेऽ निलः कोणे ॥७९॥

पूषावितथगृहक्षत यम गन्धर्वाख्य भृङ्गराजमृगा ।
पित्र दैवारिकसुग्रीवकुसुमदन्ताम्वुपत्यसुराः ॥८०॥

शेषोऽथ पापय यक्ष्मारोग कोणे तथा हि मुख्यौ च ।
भल्लाट सोमभुजगांस्ततोऽदितिर्दितिरिति क्रमशः ॥८१॥

मध्ये ब्रह्मा नवकोष्ठकाधिपोऽस्यार्यमा स्थितः प्राच्याम् ।
साम्ये तु साम्यं यदि तत्र हीनं फलं विहीनं च भवेच्च वेश्म ॥८२॥

स्व प्रथम वांघु पूर्णं पदशत गतं नमित्वा गतस्थ यदितोनं ।
तद्धन्यं यच्च भवेत्पलानि वास्याढकं चतुःषष्ठिः ॥८३॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रासेवा मृत्पात्रे श्वभ्र छेदीपर्वात्तरभ्यधिकः ।
ज्वलतिदीपस्य शस्तासा भूमिस्तस्य वर्गस्य ॥८४॥

दैवज्ञं तक्षकं दैवान् पूजयित्वा प्रयत्नतः ।
हलं पूर्वमुखं कृत्वा क्षेत्र शोधनमाचरेत् ॥८५॥

ताला:सप्तसु राणांषं नरपति विप्रयाश्च पंचैवं ।
वैश्यानां शूद्राणां मन्येषां चत्वारो गेह भूमि खनने स्युः ॥८६॥

एवं परीक्षयेत् क्षेत्रं शीरोत्कर्षं खनेत्तथा ।
तस्मिन् यद्द्रव्यं दृश्येत तत्फलं वच्मि यत्नतः ॥८७॥

पाषाणमिष्टकं वापि लोहं वापि विशेषतः ।
हलाग्रेण तु दृश्यन्ते शोभनं धनमेव च ॥८८॥

गोशृङ्गकं चेद्दृश्येत तण्डुला दुर्दलास्तथा ।
दृश्यन्ते खन्यमाने तु शोभनं तत्र निर्दिशेत् ॥८९॥

काष्ठेन कलहं विद्याल्लोष्ठे कलहमेव च ।
तुषे धनविनाशं च भस्मना व्याधिमादिशेत् ॥९०॥

श्रङ्गारे तु भयं मृत्युमस्थ्ना चैव बलक्षयम् ।
सरि सृपेषु सर्वेषु चोरेभ्यो भयमादिशेत् ॥९१॥

पूर्वे शिरो भाद्रपदादि मासे मार्गादिमास त्रिषु दक्षिणे तु ।
फाल्गुन्यमासत्रिषु पश्चिमेषु ज्येष्ठादिमासत्रिषु चोत्तरस्याम् ॥९२॥

शिरः खने[1] मातृपितृस्वहानिः पादौ खने स्त्रीधनगोषु हानि ।
खने तु पृष्ठं भयरोगपीडा कुक्षौ खने स्त्रीधनपुत्र लाभः ॥९३॥

---

१ शिरः खनने ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कन्यातुलावृश्चिकेषु पूर्वादिशिर एव च ।
महा हस्तपादा न्यस्तं दक्षिणं मुखमेव च ॥९४॥

भय: कार वर्णशब्दादि गुणोपेतं भुविस्थलम् ।
स्वस्ति वाचन घोषेण जयशब्दादि मङ्गलम् ॥९५॥

स्वभ्रोषितं तत् कुसुमं यस्मिन् न म्लायते सवर्ण समम् ।
तत्तस्य भवति शुभदं यस्य च यस्मिन् मनोरमयेत् ॥९६॥

अपक्रामन्तु भूतानि गृहे कृष्ण कृष्णीये ।
मिश्राणि सर्व बीजानि वापयेत् ॥९७॥

पौरुषंपञ्चहस्तं वा खात्वा भूमिं विशोधयेत् ।
त्रिहस्तं चैकहस्तं वा यावच्च शुचि मन्यते ॥९८॥

तावत् खनित्वा तस्यास्तु दोषान् परीक्षयेत् ।
पुनः संवत्सरं वापि षण्मासं मासमेव च ॥९९॥

तूष्णीं विधाय कर्तव्या ज्ञात्वा दोषस्य गौरवम् ।
गैवारै वर्षधाराभिः मेदिनी धन्यतां गता ॥१००॥

अन्तर्दोषान्विते देशे, अज्ञानाद् गृहमारभेत्[१] ।
प्राप्नोति परमं दुःखं सुखं तस्य न वर्धते[२] ॥१०१॥

हन्यमाने तु संपश्यत्सर्प मण्डुक वृश्चिकान् ।
करटान् सरीसृपान् वापि वर्जयेत् तत्र वै गृहम् ॥१०२॥

---

१ गृहमारभेत् । २. वर्तते अ. प. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कपालास्थि भश्मलोष्ठं करीश काष्ठमेव च ।
शुक्तिशङ्खनखादीनां दर्शनं तु विगर्हितम् ॥१०३॥

सुवर्ण रजतं ताम्रं मुक्तामणि समन्वितम् ।
धान्यं वा शुभदं वापि दृश्यन्ते तद्धि चोत्तमम् ॥१०४॥

उत्तममष्टाभ्यधिकं हस्तशतं नृपगृहं पृथुत्वेन ।
अष्टाष्टोनान्येवं पञ्च सपादानि दैर्घ्येण ॥१०५॥

[1](षड्भिः षड्भिर्हीना सेनापति सद्मनां चतुः षष्ठिः ।
एवं पञ्च गृहाणि षड्भाग समन्विता दैर्घ्यम् ॥१०६॥

षष्टिश्चतुश्चतुर्हीना वेश्मानि पञ्च सद्दिवस्य ।
स्वाष्टांशयुतो दैर्घ्यं तदर्धतो राजमहिषीणाम् ॥१०७॥

षड्भिः षड्भिश्चैवं युवराजस्यापवर्जिताशीति ।
त्र्यंशान्विता च दैर्घ्यं पञ्च तदर्धैस्तदनुजानाम् ॥१०८॥

नृप सचिवान्तर तुल्यं सामन्तप्रवरराज मुख्यानाम्[2] ।
नृप युवराज विशेषः कञ्चुकि वेश्या कला ज्ञानम् ॥१०९॥

अध्यक्षाधिकृतानां सर्वेषां कोशरतितुल्यम् ।
युवराजमन्त्रिविवरं[3] कर्मान्ताध्यक्षदूतानाम् ॥११०॥

चत्वारिंशद्धीना चतुश्चतुर्भिस्तु पञ्चयावदिति ।
षड्भागयुता दैर्घ्यं दैवज्ञ पुरोधसोर्भिषजः[4] ॥१११॥

---

१ चापान्तस्थं श्लोकद्वयं लिखितपुस्तकेषु नोपलब्धम् ।
२ राजपुरुषाणाम् वृ.सं. । ३ सामन्तमन्त्रि विवरम् लि.पु. ।
४ दैवज्ञ भिषक् पुरोहितानां च लि.पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वास्तुनि यो विस्तारः स एव चोच्छ्राय निश्चयः शुभदः ।
शालैकेषु गृहेष्वपि विस्ताराद् द्विगुणितं दैर्घ्यम् ॥११२॥

चातुर्वर्ण्यव्यासो द्वात्रिंशत् सा चतुश्चतुर्हीना ।
आषोडशादिति परं न्यूनतरमतीव हीनानाम्१ ॥११३॥

सदशांशं२ विप्राणां क्षत्रस्याष्टांशसयुतं दैर्घ्यम् ।
षड्भागयुतं वैश्यस्य भवति शूद्रस्य पादयुतम् ॥११४॥

नृपसेनापति गृहयोरन्तरमानेन कोशरतिभवने ।
सेनापति चातुर्वर्ण्य विवरतो राजपुरुषाणाम् ॥११५॥

अथपारशवादीनां स्वमानसंयोगदलसमं भवनम् ।
हीनाधिकं स्वमाना३दशुभकरं वास्तु सर्वेषाम् ॥११६॥

यो ब्राम्हणस्तु शूद्रायां कामादुत्पादयेत् सुतम् ।
स पारयत्येव शवंस्तस्मात् पारशवः स्मृतः ॥११७॥

पश्वाश्रमिणामभितं धान्यायुत वह्नि रति गृहाणां च ।
नेच्छन्ति शास्त्रकारा हस्तशतादुच्छ्रितं परतः ॥११८॥

सेनापति नृपतीनां सप्ततिसहिते द्विधाकृते व्यासे ।
शाला चतुर्दशहते पञ्चत्रिंशद्धते ऽलिन्दः ॥११९॥

(४हस्त द्वात्रिंशादिषु चतुश्चतुस्त्रिकत्रिकाः शालाः
सप्तदश त्रितयतिथि त्रयोदशाङ्गुलाभ्यधिकाः ॥१२०॥

१न्यूनतरमतीतानाम् लि. पु. । २ द्वादशांशं लि. पु. । ३ स्वभवनाद्
४ कोष्ठान्तर्गतं श्लोक चतुष्टयं लिखितपुस्तकेषु नोपलभ्यते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्रि त्रि द्वि द्वि समाः क्षयक्रमादङ्गुलानि चैतेषाम् ।
व्येका विंशतिरष्ठौ विंशतिरष्टादश त्रितयम् ॥१२१॥

शालात्रिभागतुल्या कर्तव्या वीथिका वहिर्भवनात्
यद्यग्रतो भवति सा सोष्णीषं नाम तद् वास्तु ॥१२२॥

सायाश्रयमिति पश्चात् सावष्टम्भं तु पार्श्वस्थितया :
सुस्थितमिति च समन्ताच्छास्त्रज्ञैः पूजिताः सर्वाः) ॥१२३॥

१यः शालायास्तृतीयांश स्तेन कार्या तु वीथिका ।
यद्यग्रतो भवेद् विथी सोष्णीषं नाम तद् गृहम् ॥१२४॥

पश्चात् सायाश्रयं नाम सावष्टम्भं तु पार्श्वयोः ।
समन्ताद्यदि जाता सा तदा सुस्थितमुच्यते ॥१२५॥

विस्तार षोडशांशः स चतुर्हस्तो भवेद्गृहोच्छ्रायः ।
द्वादशभागेनोनो भूमौ भूमौ समस्तानाम् ॥१२६॥

व्यासाद् षोडशभागः सर्वेषां सद्मनां भवति भित्तिः
पक्वेष्टकाकृतानां दारुकृतानां तु न विकल्पः ॥१२७॥

एकादशभागयुतः सः सप्ततिर्नृपबलेशयो२र्व्यासः ।
उच्छ्रायोऽङ्गुलतुल्यो द्वारस्यार्धेन विष्कम्भः ॥१२८॥

विप्रादीनां व्यासात् पञ्चांशोऽष्टादशाङ्गुलसमेतः ।
साष्टांशो विष्कम्भो द्वारस्य त्रिगुण उच्छ्रायः ॥१२९॥

---

१ भट्टोत्पल विरचितायां टीकायामुद्धृतौ श्लोकौ ।
२ भूपबलेशयोः लि. पु.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१ उच्छ्राय हस्तसंख्यापरिमाणान्यङ्गुलानि बाहुल्यम् ।
शाखाद्वयेऽपि कार्यं सार्धं तत् स्यादुदुम्बरयोः ॥१३०॥

उच्छ्रायात्सप्तगुणादशीतिभागः पृथुत्वमेे तेषाम् ।
नवगुणितेऽशीत्यंशः स्तम्भस्य दशांशहीनोऽग्रे ॥१३१॥

(२बाहुल्यं च घनत्वं यावद् हस्तोच्छ्रयं द्वारम् ।)
सम चतुरस्रोरुचको वज्रोऽष्टास्त्रिद्विवज्रको द्विगुणः ।
द्वात्रिंशता तु मध्ये प्रलीनको वृत इति वृत्तः ॥१३२॥

स्तम्भं विभज्य नवधावहनं भागो घटोऽस्य भागोऽन्यः ।
पद्मं तथोत्तरोष्ठं३ कुर्याद् भागेन भागेन ॥१३३॥

स्तम्भसमं वाहुल्यं भार तुलानामुपर्युपर्यासाम् ।
भवति तुलोपतुलानामूनं पादेन पादेन ॥१३४॥

अप्रतिसिद्धालिन्दं समन्ततो वास्तु सर्वतोभद्रम् ।
नृपविबुधसमूहानां कार्यं द्वारैश्चतुर्भिरपि ॥१३५॥

(४ अप्रतिसिद्धालिन्दं सर्वदिक्षु विच्छिन्नालिः ।)
नन्द्यावर्तमलिन्दैः शाला कुड्यात् प्रदक्षिणान्तगतैः ।
द्वारं पश्चिममस्मिन् विहाय शेषाणि कार्याणि ॥१३६॥

द्वारालिन्दोऽन्तगतः प्रदक्षिणोऽन्यः ५ शुभस्ततश्चान्यः ।
तस्मिश्च बर्धमाने द्वारं तु न दक्षिणं कार्यम् ॥१३७॥

---

१ श्लोकोऽयं लिखितपुस्तकेषु नदृश्यते । २ एतच्छ्लोकार्धं वृहत्संहितायांन वर्तते । ३ वसोत्तरोष्ठम् लि. पु. । ४ एतच्छ्लोकार्धं वृहत्संहितायां न वर्तते । ५ चापान्तर्गतः पाठः लिखित पुस्तकेषु न वर्तते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अपरोन्तर्गतोऽलिन्दः प्रागन्तगतौ तदुत्थितौ चान्यौ ।
तदवधिविधृतश्चान्यः प्राग्द्वारं स्वस्तिके शुभदम् ॥१३८॥

प्राक्पश्चिमावलिन्दावगतौ तदवधिस्थितौ शेषौ ।
रुचके द्वारं नशुभदमुत्तरतोऽन्यानि शस्तानि ॥१३९॥

श्रेष्ठं नद्यावर्तं सर्वेषां वर्धमान संज्ञं च ।
स्वस्तिक रुचके मध्ये शेषं शुभदं नृपादीनाम् ॥१४०॥

उत्तरशालाहीनं हिरण्यनाभं त्रिशालकं धन्यम् ।
प्राक्शालया वियुक्तं सुक्षेत्रं वृद्धिदं वास्तु ॥१४१॥

याम्याहीनं[१] चुल्ली त्रिशालकं वित्तनाशकरभे तत् ।
पक्षघ्नमपरया वर्जितं सुतध्वंश वैरकरम् ॥१४२॥

सिद्धार्थमपरयाम्ये यमसूर्य पश्चिमोत्तरे शाले ।
दण्डाख्यमुदक्पूर्वे वाताख्यं प्राग्युता याम्या ॥१४३॥

पूर्वापरे तु शाले गृह चुल्ली दक्षिणोत्तरे काचम् ।
सिद्धार्थेऽर्थावाप्तिर्यमसूर्य गृहपतेर्मृत्युः ॥१४४॥

दण्डबधो दण्डाख्ये कलहोद्वेगः सदैव वाताख्ये ।
वित्तविनाश्चुल्यां ज्ञातिविरोधः स्मृतः काचे ॥१४५॥

याम्यादिष्वशुभफला जातास्तरवः प्रदक्षिणेनैते ।
उदगादिषु प्रशस्ताः प्लक्षवटोदुम्बराश्वस्थाः ॥१४६॥

---

१ याम्याविहितं ल. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अत्र भगवान् गर्गः—

[1]वर्जयेत् पूर्वमश्वत्थं प्लक्षं दक्षिणत स्तथा ।
न्यग्रोधं पश्चिमे भागे उत्तरे चाप्युदुम्बरम् ॥१४७॥

अश्वत्थे तु भयं ब्रूयात् प्लक्षे ब्रूयात् पराभवम् ।
न्यग्रोधे राजतः पीडा नेत्रामयमुदुम्बरे ॥१४८॥

आसन्नाः कण्टकिनो रिपुभयदाः क्षीरिणोऽर्थनाशाय ।
फलिनः प्रजाक्षयकरा दारुण्यपि वर्जयेदेषाम् ॥१४९॥

छिन्द्याद् यदि नतरुंस्तान् तदन्तरे पूजिता वपेदन्यान् ।
पुन्नागाशोकारिष्टबकुलपनसान् शमीशालौ ॥१५०॥

शस्तौषधिद्रुमलता मधुरा सुगन्धा
स्निग्धा समा न सुषिरा च मही नराणाम् ।
अप्यध्वनि श्रमविनोदमुपागतानां
धत्ते श्रियं किमुत शाश्वतमन्दिरेषु ॥१५१

अथ द्वारनिर्णयः

नवगुण सूत्रविभक्तान्यष्टगुणेऽथवा चतुः षष्टेः ।
द्वाराणि यानि तेषामनलादीनां फलोपनयः ॥१५२॥

अनलभयं स्त्रीजननं प्रभूतधनता नरेन्द्रवाल्लभ्यम् ।
क्रोधपरतानृतत्वं क्रौर्यं चौर्यं च पूर्वेण ॥१५३॥

---

१. ८३ श्लोकस्य टीकायां भट्टोत्पलेनोद्धृतौ चेतौश्लौकौ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अल्पसुतत्वं प्रेष्यं नीचत्वं भक्ष्यपान सुतवृद्धिः ।
रौद्रं कृतघ्नमधनं सुतवीर्यघ्नं च याम्येन ॥१५४॥

सुतपीडा रिपुवृद्धिर्न सुतधनाप्तिः सुतार्थफलसंपत्
धनसंपन्नृपतिभयं धनक्षयो रोग इत्यपरे ॥१५५॥

वध बन्धो रिपुवृद्धिः सुतधनलाभः समस्तगुण सम्पत् ।
पुत्र धनाप्ति वैरं सुतेन दोषाः स्त्रिया नैः स्वम् ॥१५६॥

मार्गतरुकोणकूपस्तम्भभ्रमविद्धमशुभदं द्वारम् ।
उच्छ्रायाद्विगुणितमितां त्यक्त्वा भूमिं न दोषाय ॥१५७॥

[1]रथ्याविद्धं द्वारं नाशाय कुमारदोषदं तरुणा ।
पङ्कद्वारे शोको व्ययोऽम्बुनिः स्राविणि प्रोक्तः ॥१५८॥

कूपेनापस्मारो भवति विनाशश्च देवताविद्धे ।
स्तम्भेन स्त्रीदोषाः कुलनाशो ब्राह्मणाभिमुखे ॥१५९॥

बृहस्पतिः–

कुडयं भित्वा नकर्तव्यं द्वारं तत्र शुभेच्छुभिः ।
द्वारे च जलनिश्रावं नैव कुर्याद् विचक्षणः ॥१६०॥

उन्मादः स्वयमुद्घाटितेऽथ पिहितेऽथ स्वयं कुलविनाशः ।
मानाधिके नृपभयं दस्युभयं व्यसनमेव नीचे च ॥१६१॥

सनत्कुमारः–

अत्युच्छ्रिते चाग्निभयमतिनीचेक्षुधा भयम् ।
चतुष्षष्ठयाङ्गुलोत्सेधश्चतुस्त्रिंशच्च विस्तरम् ॥१६२॥

---

१ श्लोकोऽयं क. च पुस्तकयोर्नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्वारं द्वारस्योपरि यत्तन्न शिवाय संकटं यच्च ।
श्राव्यात्तं क्षुद्भयदं कुब्जं कुलनाशनं भवति ॥१६३॥

पीडाकरमतिपीडितमन्तर्विनतं भवेदभावाय ।
ब्राह्यविनते प्रवासो दिग्भ्रान्ते दस्युभिः पीडा ॥१६४॥

मूलद्वारं नान्यैर्द्वारैरभिसन्दधीत रुपद्धर्या ।
घटफलपत्र प्रमथादिभिश्च तन्मङ्गलैश्चिनुयात् ॥१६५॥

प्रत्यङमुखं ध्वजे स्यात् विप्रस्योदङमुखं हरौ राज्ञः ।
प्राङमुखमनडुहि च विशां शूद्रस्य गजेन्न काभिमुखम् ॥१६६॥

एवं वास्तु समभ्यर्च्य शल्योद्धारं समारभेत् ।
कारयित्वा नमस्कारं यजमानं प्रतीक्षयेत् ॥१६७॥

यदङ्गं संस्पृशेत् कर्ता वास्तोः शल्यं तदङ्गके ।
स्थितं विनिश्चितं ब्रूयात् तल्लक्षणमथोच्यते ॥१६८॥

शिरसि स्पर्शनाच्चास्ते मस्तके शल्यमुद्धरेत् ।
अष्ट तालादध स्तस्मिन् स्थितं तत्र नसंशयः ॥१६९॥

नासिका स्पर्शने तु स्यात् सार्धहस्तादधस्थितम् ।
मौक्तिकं तु कलत्रया मुखे स्पर्शे तु गेहनः ॥१७०॥

. . . . कांस्यहस्तद्वयादधः ।
उरः संस्पर्शने तत्र राजतं पञ्चतालकम् ॥१७१॥

नाभिस्पर्शे चतुस्तालाः कांस्यशल्यं समुद्धरेत् ।
उदरस्पर्शे त्रितालाधस्ताम्रशल्यं समुद्धरेत् ॥१७२॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उरुसंस्पर्शने कर्तुः सार्धहस्तादधः स्थितम् ।
ऊर्वस्थि निर्दिशेत्तत्र स्पर्शने जानु जङ्घयोः ॥१७३॥

स्तनमात्रादधस्तत्र नापितस्य क्षुरादिकम् ।
पादस्पर्शे तु पादस्थं षोडशाङ्गुलकादधः ॥१७४॥

वाजिदन्त महाशल्यमुद्धरेद्वास्तु तन्त्रवित् ।
करस्पर्शे करे वास्तु खट्वाङ्गं च करादधः ॥१७५॥

वसिष्ठः–

षड्वर्ग शुद्धिसूत्रेण सूत्रिते धरणीतले ।
सूत्रिते समये तस्मिन् सूत्रं केनापि लङ्घितम् ॥१७६॥

तदास्थि तत्र जानीयात् पुरुषस्य प्रमाणतः ।
अभ्यक्तो दृश्यते यस्यां दिशि शल्यं समादिशेत् ॥१७७॥

तस्यामेव तदास्थीनि सप्तत्यङ्गुलमानतः ।
सूत्रिते समये यत्र श्वा सद्मोपरि संस्थितः ॥१७८॥

तदास्थि तत्र जानीयात् षष्टयङ्गुल मिते क्षितौ [1] ।
उन्मादे वा गते तस्मिन् समये यत्र संस्थित ॥१७९॥

तदास्थि तत्र जानीयात् हस्तद्वयमिते क्षितौ ।
अकारादिषु वर्गेषु दिक्ष्वष्टषु यथाक्रमम् ॥१८०॥

तार्क्षमार्जारसिंहाश्व सर्पाखु गजशाशकौ ।
दिग्वर्णानामियं योनिः स्ववर्गात् पञ्चमो रिपुः ॥१८१॥

रिपुवर्गं परित्यज्य शेषवर्गः शुभप्रदः ।
साध्यवर्गं पुरस्थाप्य साधकस्य च पृष्ठतः ॥१८२॥

---

१. इतः खण्डित इव प्रतिभाति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

०५	५१३	५२१	५४५	५५३	५६९	५७७	६०१	६०६	
८	१२	४	४	८	४	८	१२	४	८
२	३	२	३	३	३	३	३	३	५
१२	२७	१०	१३	२३	१६	२२	१२	२५	२
२	४	६	५	७	४	५	७	२	६
६	९	३	३	६	३	६	९	९	

ध्वज

	२१	८३३	८४१	८४९	८५७	८८१	८८९	८९७	सिंह वद्ध
धन	८	४	८	१३	४	५	८	१२	धन
ऋण	२	३	३	३	३	३	३	३	ऋण
नक्षत्र	२	१२	५	१५	२१	१	११	२१	नक्षत्र
वार	६	५	७	९	४	५	७	२	वार
अंश	९	३	६	९	३	३	६	९	अंश

ध्वजा

१९	२२७	२११	२१९	२११	२८३	सिंह	२११	३१०
२	४	४	८	४	८	धन	८	१२
१	१	१	१	१	२	ऋण	१	१
४	७	१०	२	१३	३२	नक्षत्र	८	९
						वार	५	७
						अंश	६	९

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अष्टभिस्तु हरेद्भागं शेषं धनमृणं भवेत् ।

ध्वज	१	९	२	१७	४१	४९	५७	६५	७३	९७	११३	१२१	१२९	१५३	१६१	१६९
धन	८	१२	४	४	८	१२	४	८	८	४	८	१२	४	८	१२	१२
ऋण	८	३	३	३	३	३	३	३	३	३	३	३	३	३	३	३
नक्षत्र	८	१८	१	४	१४	२४	७	१७	२०	१२	२३	६९	९	२	१२	२२
वार	२	४	६	५	७	२	४	४	५	२	६	६५	१७	२	४	८
अंश	६	३	३	३	६	९	३	६	६	३	६	९	५	६	९	३

ध्वज	१७७	१८१	२०९	२१७	२२१	२३३	२४१	२६५	२७३	२८९	२९७	३२९	३३७	३४१		पिंडाः
धन	४	८	१२	४	८	४	१२	८	१२			४	८	१२		
ऋण	३	३	३	३	३	३	३	३	३			२	३	३		
नक्षत्र	२१	८	१८	१	१	१४	१५	२४	१७			१२	२२	६		
वार	५	७	२	४	६	५	५	७	४			७	२	४		
अंश	३	६	९	३	६	६	६	६	६			३	६	९		

ध्वजाद्यंक संख्यासु धनांको योज्यः पिण्डांका यथा वृद्धया गुणानुरूपं भजंतीति पिण्डोपपत्तिः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

३६५	३७७	३८१	३९३	४०३	४०९	ध्वज	ध्वज घूम	४३३	४४१	४४९	४५७	४६५	४८९	४८७	५०५	५१३	५२१	५४५	५५३	५६९	५७७	६०१	६०९	६१७	६२१	६२३	६५७	६६५	६७३	६८१		पिंडाः २१३
४	४	८	१२	४	८	धन	धन	८	१२	४	८	१२	१२	७	८	१२	४	४	८	४	८	१२	४	४	८	१२	१२	४	८	१२		
१६	३	३	३	३	३	ऋण	ऋण	३	३	३	३	३	२	३	२	३	२	३	३	३	३	३	३	३	३	३	३	३	२	३		
५	१६	१	१२	२२	५	नक्षत्र	नक्षत्र	८	१८	१	१७	१२	२४	७	१२	२७	१०	१३	२३	१६	२२	१२	२५	२५	५	१५	१८	१	११	२१		
३	५	७	२	४	६	वार	वार	५	७	२	४	६	५	७	२	४	६	५	७	४	५	७	२	२	४	६	५	१	२	२		
	३	६	९	३	६	अंश	अंश	६	९	३	६	९	९	३	६	९	३	३	६	३	६	९	९	३	६	९	९	३	६	९		
६८९	७१३	७२१	७२९	७३७	७४१	७६९	७७७	७८१	७९३	८०१					८२१	८३३	८४१	८४९	८५७	८८१	८८९	८९७	सिंह वद्ध	३	७	३५	४३	५९	८३	९१		पिंडाः
४	७	८	१२	४	८	८	१२	४	८	१२					८	४	८	१३	४	५	८	१२	धन	१२	१२	४	८	४	४	८		
३	३	३	२	३	३	३	३	३	३	३					२	३	३	३	३	३	३	३	ऋण	१	१	१	१	१	१	१		
७	७	५	२७	१०	२०	२३	६	१६	२६	९					१२	१२	५	१५	२१	१	११	२१	नक्षत्र	२४	२७	१२	२०	१३	१६	१६		
४	५		७	३	४	६	५	७	२	४					६	५	७	९	४	५	७	२	वार	६	५	७	२	६	७	७		
३	३	९	९	९	६	६	९	३	६	९					९	३	६	९	३	३	६	९	अंश	९	९	३	६	२	९	९		
९९	१००	११५					१३८	१३७	१५९	१६३	१७१	१९१	२०३	२११	९१९	२२७	२११	२१९	२११	२८३	सिंह	२११	३१०	३२३	३३१	३३९	३६९	३७१				पिंडाः
१२	४	८					८	१२	४	८	१२	१२	४	८	१२	४	४	८	४	८	धन	८	१२	४	८	१२	१२	४				
१	१	१					१	१	१	१	१	१	१	२	१	१	१	१	१	२	ऋण	१	१	१	१	१	१	१				
९	१९	२					१	१५	२५	८	८	८	४	१४	२४	७	१०	२	१३	३२	नक्षत्र	८	९	१९	२	१३	१५	२५				
२	४	६																			वार	५	७	२	४	६	५	७				
९	३	६																			अंश	६	९	३	६	९	९	२				

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

३७९			३८७	३९१	४११	४२७	४३१	४४३	४११	४६१	५०७	५१५	५३९	५४७	५५७	५६३
८ १ ८ २ ६			१२ १ १८ ४ ९	४ १ १ ६ ३	४ १ ४ ५ ६	८ १ १४ ७ ६	१२ १ २४ २ ९	४ १ ७ ४ ३	८ १ १७ ३ ६	८ १ २३ ६ ०	१२ १ ६ ६ ९	१२ १ ९ ५ ९	४ १ १ १९ ७ ३	८ १ १ २ २ ६	१४ १ १ १२ ४ ९	४ १ १ २२ ६ ३
७१५	सिंह	गज वध	७२३	७३१	७५५	७६३	९४७	९१५	९७९	९८७	९९५	१००३	वृषभ वध	३७	४१	६९
८ १ २२ २ ६	धन ऋण वार अंश	धन ऋण नक्षत्र वार अंश	१२ १ ६ ४ ९	४ १ १६ ६ ३	४ १ १९ ५ ३	८ १ २ ७ ६	४ १ १६ ४ ३	८ १ २ ५ ६	८ १ २ ५ ६	८ १ २२ २ ३	८ १ ५ ४ ६	८ ७ २६ ४ ६		८ ७ २६ ४ ६	१२ ७ ९ ६ ९	१२ ७ १२ ५ ९
३२५	३४९	३५७	३७३	३८१	४०५	४२१	४६९	४७७	४९३	५१७	५२५	५४१	५४९	५७३	५८९	५९७
८ ७ ८ ६ ६	८ ७ ११ ५	१२ ७ २१ ७	८ ७ १४ ४ ६	१२ ७ २४ ६ ९	१२ ७ २७ ५ ९	८ ७ २० २ ६	८ ७ ६ ७ ६	१२ ७ ९ २ ९	८ ७. २ ६ ६	८ ७ ५ ५ ६	१२ ७ १५ ७ ९	८ ७ ८ ४ ६	१२ ७ १८ ६ ९	१२ ७ २१ ५ ९	८ ७ १४ २ ६	१२ ७ २४ ४ ९

५८७	५९१	६०३	६११	६१९	६४७	६५९	६६७	६७१				७०७			पिंडाः
४ १ १ २५ ५ ३	८ १ १ ८ ७ ६	१२ १ १ १८ २ ९	४ १ १ १ ४ ३	८ १ १ ११ ८ ६	८ १ १ १४ ५ ६	४ १ १ ७ २ ३	१२ १ १ १७ ४ ६	१२ १ १ २७ ६ ९				४ १ १३ ७			
८५	९३	१३३	१४१	१५७	१८१	१८९	२०१	२३७	२५३	२६१	३०१	३०९			पिंडाः
८ ७ ५१ २१ ६	१२ ७ २१ ९ ९	८ ७ १४ ६ ६	१२ ७ १५ ४ ९	८ ७ ११ ७ ६	८ ७ १७ २ ३	८ ७ १७ ४ ७	८ ७ २० ४ ६	१५ ७ ६ ५ ९	८ ७ २६ २ ६	१२ ७ ९ ४ ९	८ ७ ५ ७ ६	१२ ७ १५ २ ९			
६३७	६६१	६८१	६९३	७०९	७१७	७४१	७५७	७६५	८०५	८२९	८५३	९०९			
८ ७ २० ७ ६	८ ७ २३ ६ ६	८ ७ २६ ५ ६	१२ ७ ९ ७ ९	८ ७ २ ४ ६	१२ ७ १२ ६ ९	१२ ७ १५ ५ ९	८ ७ ८ २ ६	१२ ७ १८ ४ ९	८ ७ २४ २ ९	८ ७ १७ ६ ६	८ ७ २० ५ ६	१२ ७ ९ ५ ९			

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

९२५	९३२	९७३	९८१	९९७	१०२१	१०३९	१०४५	१०५३	गज	७	५५	३१	५५	६२	७९	८७	१११	१२७	१३५	१२५	१८३	१९९	२२३	२३१	२४८	२५५	२७९	२९१	३०३			पिंडाः
८	१२	८	१२	९	८	१२	८	१२	धन	८	१२	८	१२	१२	८	१२	१२	८	१२	८	१२	८	८	१२	८	१२	१२	८	११			
७	७	७	७	७	७	७	७	७	ऋण	५	५	५	५	५	५	५	५	५	५	५	५	५	५	५	५	५	५	५	५			
२	१२	८	१८	११	१४	२४	२७	२७	नक्षत्र	२	१२	५	८	१८	११	२१	२५	१७	२७	२७	७	६	२	१२	१२	१५	१९	११	२१			
२	४	७	२	६	५	७	६	६	वार	७	२	६	५	७	४	६	५	२	४	७	२	६	६	७	४	४	५	२	४			
६	९	६	९	६	६	९	९	९	अंश	६	९	६	६	४	६	९	९	६	९	६	९			९	९	९	९	६	९			

२४३	३५१	३६३	३९९	४२३	४४७	४६३	४७१	५११	५१९	५३५	५८७	५६३	६१२	६३१	६७९	६०७	७०३	७२७	७३५	८५१	७५९	७८३	७९९	८४७	८५५			८७१	८७५		
८	१२	८	१२	१२	८	८	१२	८	१२	८	१२	८	८	१२	८	१२	८	१२	१२	१२	१२	१२	८	८	८			१२	८		
५	५	५	५	५	५	५	५	५	५	५	५	५	५	५	५	५	५	५	५	५	५	५	५	५	५			५	५		
१७	२७	२०	६	६	१२	५	१५	११	२१	१४	७	२०	६	२६	५	१५	८	२१	४	४	४	४	३०	२६	२६			९	२		
७	२	६	७	९	५	७	४	१७	२	६	७	४	५	२	६	२	६	७	६	६	६	६	२	७	७			२	६		
६	९	६	९	६	९	६	९	६	९	९	९	६	९	६	७	६	६	६	९	९	९	९	६	६	६			९	६		

९०३	९१९	९२७	९०९	९६७	९७१	१०१५	गज	वध
१२	१२	८	१२	८	१२	८	धन	
५	५	५	५	५	५	५	ऋण	
१५	८	१८	२१	१४	२४	२०	नक्षत्र	
९	४	६	५	२	४	७	वार	
	६	९	९	६	९	६	अंश	

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अवर्गोच्चारिते प्रश्ने प्राच्यां दिशि समादिशेत् ॥१८३॥

कुञ्जरास्थीनि पक्षी वा पुरुषस्य प्रमाणतः ।
कवर्गोच्चारिते प्रश्ने त्वाग्नेय्यां च समादिशेत् ॥१८४॥

मार्जारस्याजशल्यं वा हस्तमात्र प्रमाणतः ।
चवर्गोच्चारिते प्रश्ने याम्यायां च समादिशेत् ॥१८५॥

हरेर्लुलायशल्यं वा हस्तमात्र प्रमाणतः ।
टवर्गोच्चारिते प्रश्ने नैर्ऋत्यां च समादिशेत् ॥१८६॥

शुनःशशकशल्यं वा सार्धहस्त प्रमाणतः ।
तवर्गोच्चारिते प्रश्ने वायव्यां शल्यमादिशेत् ॥१८७॥

स मत्स्यण्डज शल्यं वा खात्वा हस्तमितिक्षितौ ।
पवर्गोच्चारिते प्रश्ने वायव्यां शल्यमादिशेत् ॥१८८॥

आखोर्मेषस्य वा नूनं हस्तखात प्रमाणतः ।
यवर्गोच्चारिते प्रश्ने उदीच्यामादिशेत्तदा ॥१८९॥

गजस्याश्वस्य वा शल्यं पूर्वखात प्रमाणतः ।
शवर्गोच्चारिते प्रश्ने त्वैशान्यां च समादिशेत् ॥१९०॥

शशकस्योक्ष शल्यं वा हस्तद्वयमितिक्षितौः ।
प्रश्ने षूच्चारिते बोध ब्रह्मस्थानं समादिशेत् ॥१९१॥

नृशल्यं गणशल्यं वा पुरुषखात प्रमाणतः ।
प्रश्नेऽप्युच्चारिते यत्र नूनं बर्गस्य पञ्चमे ।
न विद्यते तत्र शल्यं ब्रह्मोक्तत्वान्न संशयः ॥१९२॥

इतिप्रश्नशल्यं समाप्तम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कण्डूयते यदङ्गं गृहं यत्तु भाम बाहुल्यम् :
असम्भवं निमित्तं विकृतिर्वाग्रे स शल्यं तत् ।
धनहानिर्दारुमये पशुपीडा रुग्भयानि वास्थिकृत् ॥१९३॥

अथ वास्तुशल्यप्रमाणम्

तालमष्टादशं कुर्यात् कथितं वास्तुलक्षणम् ।
तालमेकं भवेच्छीर्षं द्वितालं हृदयं तथा ॥१९४॥

त्रितालं नाभिदेशं च चतुस्तालं तु गुह्यकम् ।
पञ्चतालं भवेज्जङ्घा त्रितालं जानुरुच्यते [1] ॥१९५॥

पादौ खनेषु गमनं च नित्यं जान्वोः खने राजभयं च नित्यम् ।
हनुखने चाग्निभयं च कुर्यात् कटीखना संसकटेन्न हानिः ॥१९६॥

चोराग्नि वृद्धिःखलुसर्वबाधा खनेषु कण्ठे विपरीतमेव ।
तिर्यग्यमादरान्यष्टा वङ्गुलं द्वित्रिभिर्गुणैः ॥१९७॥

पादं तद्द्विगुणं कुचैव अर्धतद् हृदयगे करम् ।
द्वाविंशदङ्गुलस्त्रिषु प्राजापत्य चतुस्त्रिकम् ॥१९८॥

षड्विंशद्धनुरित्युक्तमष्टत्रिंशद्धनुर्गृहम् ।
देवे धनुर्गृहं विद्याद् ब्रह्मक्षेत्रं धनुस्तथा ॥१९९॥

प्राजापत्यं तु विट् शूद्रं पाक्तौ कृष्ण उच्यते ।
राज्ञां चेति द्विजातीनां वेणुस्तालं विशां भवेत् ॥२००॥

---

१ जानु चोच्यते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शिरीषं शूद्रजातीनां वास्तुदण्ठस्य लक्षणम् ।
दर्भोत्थं नारिकेलोत्थं तालं कार्पास सूत्रकम् ॥२०१॥

विप्रक्षेत्रिय वैश्यानां शूद्राणां च यथाक्रमम् ।
आग्नेये वापि नैऋत्ये वायव्येशानके क्रमात ॥२०२॥

सूत्रं प्रसारयेद्दैवं शिरोत्कर्षं प्रमाणतः ।
स्वामि हस्तप्रमाणेन मानं भवति चेप्सितम् [१] ॥२०३॥

अयुतं तस्य विस्तारं परस्परहतं पदम् ।
विषमाय शुभं प्रोक्तं समायप्यशुभं भवेत् ॥२०४॥

नववर्गानियनमेकेन श्लोकेनाह मयाचार्यः—

नागैर्भानु हृतं धनैगुणगजैः शिष्टं व्यये रन्ध्रगै
रायेभैश्च भैरुडुगणं रन्धैर्नगै वारगम् ।
षड्गुण्ये निधिभाजितेश इषुभिस्त्रिशैर्हृतैः स्यात्तिथिः
ते नागैः क्षपयति धनं श्रीश्ववह्लेर्भयं च ॥२०५॥

लक्ष्मीप्रीतिर्भवतिभवनारम्भकर्तुः क्रमेण [२]
चैत्राद्येषु स्फुटफलमिदं वास्तुशास्त्रोपदिष्टम् ॥२०६॥

अंशफलम्

नष्टो वृद्धिः श्रियश्चैव दाहो मरण चोरकः ।
प्रवासो गन्धनं तुष्टिर्गृहस्येते नवांशकाः ॥२०७॥

---

१ भवनमीप्सितम् क. च. । १ कर्तृ क्रमेण क. च. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चैत्रे शोकाकुलं विद्याद् वैशाखे च धनागनमम् ।
ज्येष्ठे धनविनाशाय[1] आषाढे च पराभवम् ॥२०८॥

श्रावणे रत्नलाभं च नभस्ये नवसेद् गृहे ।
आश्विने कलहं विद्याद् कृत्या नश्यन्ति कार्त्तिके ॥२०९॥

मार्गशीर्षे धनप्राप्ति पौषे वै सर्वसंपदः ।
माघे चाग्निभयं विद्याद् फाल्गुने श्रीरनुत्तमा ॥२२०॥

द्वितीया पञ्चमीमुख्या तृतीया षष्ठिरेव च ।
सप्तमी दशमी चैव द्वादश्यैकादशी तथा ॥२११॥

त्रयोदशी पञ्चदशी तिथयः स्युः शुभावहाः ।
दारिद्र्यं प्रतिपच्चैव चतुर्थी धन हारिणी ॥२१२॥

अष्टम्युच्चाटनी चैव नवमी शस्त्रघातिनी ।
दर्शाद् राजभयं ज्ञेयं भूतादार विनाशिनी ॥२१३॥

पूर्वोक्तास्तिथयः शुद्धा विष्टिपातैश्च वर्जिता ।
पुष्यार्द्रा श्रवणं चैव, उत्तरात्रयरोहिणी ॥११४॥

शततारा धनिष्ठा च, एताश्चोर्ध्वमुखाः स्मृता ।
प्रासाद गृहकर्माणि द्वार प्राकार मण्डपाः ॥
करिशालाश्वशालानां ध्वजकर्म्माणि कारयेत् ॥११५॥

नारदः—

मृदुध्रुवक्षिप्रभेषु रिक्तया वर्जिते दिने ।
व्यर्कारवार लग्नेषु पापे चाष्टम वर्जिते ॥२१६॥

---

१ गृहविनाशाय क. च. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नैधने शुद्धसंयुक्त[1] कर्तुर्नाप्यष्टमोदयात् ।
गृह संस्थापनं सूर्ये मेषस्थे शुभदं भवेत् ॥२१७॥

वृषस्थे धनवृद्धिः स्यान्मिथुने मरकं ध्रुवम् ।
कर्कटे शुभदं प्रोक्तं[2] (सिंहे भृत्य विवर्धनम् ॥२१८॥

कन्यारोगं तुलासौख्यं वृश्चिके धनवर्धनम् ।
कार्मुके च महाहानिर्मकरे धननाशनम् ॥२१९॥

कुम्भे तु रत्नलाभः स्यात् मीने सर्वभयावहम् ।
सिंहे तु पश्चिमे द्वारं वृषभे चोत्तरं तथा ॥२३०॥

कुम्भे तु पूर्वदिग्द्वारं मीने चैव तु दक्षिणम् ।
एवं कृत्वा तु यद्वेश्म शोभनं सौख्यवर्धनम् ॥२२१॥

मकरे पश्चिमद्वारं तुलायां चोत्तरं तथा ।
कर्कटे पूर्वदिग्द्वारं मेषस्थे दक्षिणे र वौ ॥२२२॥

मेषे वृषे च सूर्यस्थे पूर्वद्वारं न शोभनम् ।
कर्काट के[3] च सिंहस्थे याम्यद्वारं न शोभनम् ॥१२३॥

तुलायां वृश्चिक्षे चैव द्वारं पश्चिमवर्जितम् ।
सूर्ये मकर कुम्भस्थे सौम्यद्वारं सुनिन्दितम् ॥२२४॥

मूलं च रेवती चैव कृत्तिकाषाढमेव च।
पूर्वाफाल्गुनि हस्ते[4] च मघा चैव तु सप्तकम् ॥२२५॥

---

१ शुद्धिसंयुक्ते क. च.   २ चापान्तर्गतःपाठः क. च.। पुस्तकयोस्त्रुटितः ।
३ कर्कटके । ४ पूर्वाफाल्गुनी हस्ते च ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एकं भौमेन युक्तेषु कृतं चैव तु वेश्मकम् ।
अग्निना दह्यते कृत्स्नं पुत्रनाशश्च जायते ॥२२६॥

श्रवणाषाढयोश्चैव रोहिण्यां चोत्तरात्रये ।
गुरुवारे कृतं वेश्म राजयोग्यमिहोच्यते ॥२२७॥

तद्गृहे जातपुत्रस्य राज्यं भवति निश्चितम् ।
अश्विनी शततारासु विशाखा भाद्र चित्रके ॥२२८॥

धनेष्ठादितिभे शुक्रे संयुक्ते शुक्रवासरे ।
गृहं नाटकशालां च देवागारं कृतं शुभम् ॥२२९॥

तद्वेश्मनि प्रजातस्तु कुवेर सदृशो भवेत् ।
ज्येष्ठानुराधके चैव भरणी स्वातिपूर्वके ॥२३०॥

धनिष्ठास्वपि ऋक्षेषु यदि तिष्ठेच्छनैश्चरः ।
कृपणो[१]नाम इयुक्ते धन धान्यादि संग्रहे ॥२३१॥

पुत्रजाते थवाऽतस्मिन् गृह्यते यक्षराक्षसैः ।
चन्द्रतारावले प्राप्ते पञ्चाङ्गे शुद्धिसंग्रहे ॥२३२॥

सुलग्ने शुक्लपक्षे च गृहस्तम्भः शुभप्रदः ।
खादिरो दुम्वरोऽश्वत्थोऽशोको शालोऽथवार्जुनः ॥२३३॥

खदिरस्तिक्ततित्तिर चार्जुनं रक्त चन्दनम् ।
शिरीससर्जन्यग्रोधं शङ्कुः कुर्यात् प्रयत्त ॥२३४॥

---

१ कृपसो अ. प. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ध्वजो धूमोऽथ सिंहः श्वा सौरभेयः खरो गजः ।
ध्वाङक्ष इत्येव नामानि पूर्वाद्यायाः क्रमादमी ॥२३५॥

प्लक्षो दुम्बरचूताख्यौ निंवस्तु हि विभीतकाः ।
ये कण्टका दग्धवृक्षा वटाश्वत्थकपित्थकाः ॥२२६॥

अगस्ति सिन्धु तालाख्यातित्तिरीकाश्च निन्दिताः ।
पलासकोविदारौ च वृक्षास्तेऽप्यति निन्दिताः ॥२३७॥

प्रशस्तेषु च वृक्षेषु गृहशल्यं च कोटरम् ।
सवक्राः सव्रणाः शेषा वृक्षास्तेऽप्यति निन्दिताः ॥२३८॥

सनत्कुमारः—

शङकु विप्रादिवर्णानां दारूणां लक्ष्म वच्म्यहम् ।
अश्वत्थोदुम्बरप्लक्षाः सिंसपाः सालचन्दनौ ॥२३९॥

नारदाशोकजं शङकु ब्राह्मणानां तु कारयेत् ।
खदिरो जीवनः सर्जो विकङको रक्तचन्दनः ॥२४०॥

शोकः[1]श्रीपर्णजः शङकुः क्षत्रियाणां तु कारयेत् ।
मधुको देवदारुश्च तिमिरो धरयेव च ॥२४१॥

अशोकः सरलः शङकुर्वैश्यानां तु प्रकल्पयेत् ।
अशोक वृक्षशिरिषः शङकुः श्रीपर्णजस्तथा ॥२४२॥

तालश्च तिमिरश्चैव, अर्जुनः शूद्रजातयः ।
छत्राकारं द्विजातीनां नृपाणां मुकुरा कृतिम् ॥२४३॥

१ अशोकः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एकं भौमेन युक्तेषु कृतं चैव तु वेश्मकम् ।
अग्निना दह्यते कृत्स्नं पुत्रनाशश्च जायते ॥२२६॥

श्रवणाषाढयोश्चैव रोहिण्यां चोत्तरात्रये ।
गुरुवारे कृतं वेश्म राजयोग्यमिहोच्यते ॥२२७॥

तद्‌गृहे जातपुत्रस्य राज्यं भवति निश्चितम् ।
अश्विनी शततारासु विशाखा भाद्र चित्रके ॥२२८॥

धनेष्ठादितिभे शुक्रे संयुक्ते शुक्रवासरे ।
गृहं नाटकशालां च देवागारं कृतं शुभम् ॥२२९॥

तद्वेश्मनि प्रजातस्तु कुवेर सदृशो भवेत् ।
ज्येष्ठानुराधके चैव भरणी स्वातिपूर्वके ॥२३०॥

धनिष्ठास्वपि ऋक्षेषु यदि तिष्ठेच्छनैश्चरः ।
कृपणो[१] नाम इयुक्ते धन धान्यादि संग्रहे ॥२३१॥

पुत्रजाते थवाऽतस्मिन् गृह्यते यक्षराक्षसैः ।
चन्द्रतारावले प्राप्ते पञ्चाङ्गे शुद्धिसंग्रहे ॥२३२॥

सुलग्ने शुक्लपक्षे च गृहस्तम्भः शुभप्रदः ।
खादिरो दुम्वरोऽश्वत्थोऽशोको शालोऽथवार्जुनः ॥२३३॥

खदिरस्तिक्ततित्तिर चार्जुनं रक्त चन्दनम् ।
शिरीससर्जन्यग्रोधं शङ्कुः कुर्यात् प्रयत्त ॥२३४॥

---

१ कृपसो अ. प. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ध्वजो धूमोऽथ सिंहः श्वा सौरभेयः खरो गजः ।
ध्वाङक्ष इत्येव नामानि पूर्वाद्यायाः क्रमादमी ॥२३५॥

प्लक्षो दुम्बरचूताख्यौ निंवस्तु हि विभीतकाः ।
ये कण्टका दग्धवृक्षा वटाश्वत्थकपित्थकाः ॥२२६॥

अगस्ति सिन्धु तालाख्यातित्तिरीकाश्च निन्दिताः ।
पलासकोविदारौ च वृक्षास्तेऽप्यति निन्दिताः ॥२३७॥

प्रशस्तेषु च वृक्षेषु गृहशल्यं च कोटरम् ।
सवक्राः सव्रणाः शेषा वृक्षास्तेऽप्यति निन्दिताः ॥२३८॥

सनत्कुमारः—

शङ्कु विप्रादिवर्णानां दारूणां लक्ष्म वच्म्यहम् ।
अश्वत्थोदुम्बरप्लक्षाः सिसपाः सालचन्दनौ ॥२३९॥

नारदाशोकजं शङ्कु ब्राह्मणानां तु कारयेत् ।
खदिरो जीवनः सर्जो विकङ्को रक्तचन्दनः ॥२४०॥

शोकः[१]श्रीपर्णजः शङ्कुः क्षत्रियाणां तु कारयेत् ।
मधुको देवदारुश्च तिमिरो धरयेव च ॥२४१॥

अशोकः सरलः शङ्कुर्वैश्यानां तु प्रकल्पयेत् ।
अशोक वृक्षशिरिषः शङ्कुः श्रीपर्णजस्तथा ॥२४२॥

तालश्च तिमिरश्चैव, अर्जुनः शूद्रजातयः ।
छत्राकारं द्विजातीनां नृपाणां मुकुरा कृतिम् ॥२४३॥

---

१ अशोकः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वैश्यानां बुद्बुदाकारं शूद्राणां च फलाकृतिम् ।
विप्राणां शङ्कु मानस्तु द्वादशद्वयसंमितम् ॥२४४॥

क्षत्रियाणां त्रयोविंशं वैश्यानां षोडशाङ्गुलम् ।
द्वादशाङ्गुलयच् शङ्कुः सर्वजातिषु चोत्तमः ॥
स्थिरलग्ने स्थिरांशे च स्थापयेच् शङ्कुमुत्तमम् ॥६४५॥

केन्द्र त्रिकोणगे सौम्ये चन्द्रतारा बलान्विते ।
क्रूरे त्रिषष्ठलाभस्थे बलवद्भिस्तु भग्रहैः ॥२४६॥

धूममेकं परित्यज्य ध्वजः सर्वत्र पूज्यते ।
स्वस्थाने फलमाप्नोति वारुणोत्तर याम्यकः ॥२४७॥

मृगराजः सदा पूज्यो नेतरासु कदाचन ।
वारुणे चोत्तरे ज्ञेयो गजाय शुभदो भवेत् ॥२४८॥

अशोकवृद्धिः
सन्तानं गोधनं तुष्टिर्ग्रहांश क्रमत स्मृता ॥२४९॥

पदं षड्गुणमङ्काप्तं शेष सिद्धो गजो नृपः ।
यमांश रहिताः सर्वे इन्द्रांशे धन संपदः ॥२५०॥

यथावद्विहितं वास्तु न त्यजन्तीह देवता ।
वास्तु विन्यास मूलाहि प्रजानां सर्वसम्पदः ॥२५१॥

यमः—

शुभकर्मणि दीक्षायां मण्डपकरणे गृहादिविधिषु तथा ।
विहितो वास्तु बलिः स्याद् रक्षा विहितोपशान्तिसंपत्यः ॥२५२॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सनत्कुमारः—

मण्डुकारव्यपदं वक्ष्ये सर्व प्रासाद योग्यकम् ।
चतुषष्टिपदोपेतं वह्निभूतामरान्वितम् ॥२५३॥

प्रागग्राण्युत्तराग्राणि वास्तु सूत्राणि नाडिकाः ।
लक्ष्मीर्यशोवती कान्ता सुप्रिया विमला शिवा ॥२५४॥

सुभगा सुपदिश्चैव नाडयः प्राचीमुखोद्गताः ।
धन्या प्राला विशाला च स्थिरा चन्द्रा जया निशा ॥२५५॥

विरजा विभवा चैता नाडयः सोम मुखाः स्मृताः ।
तिर्यगुर्ध्वस्थितौ वंशौ दुर्जयौ दुर्धरौ तथा ॥२५६॥

चतत्र षड्विदास्तासां नाम वक्ष्ये यथाक्रमम् ।
कर्णयोः कीलनीरज्जुः पाद गुल्फे च बाधनि ॥२५७॥

संवर्ता च विवर्ता च जानु कुर्प्पर संगमे ।
हृद्गुह्यकुक्षिमार्गेषु सद्भावा जननी तथा ॥२५८॥

पक्षिकीर्ति रतिर्ज्ञेया रज्जवो वास्तु बन्धने ।
वक्ष्ये द्वादशमर्माणि वास्तुगात्रास्थितानि च ॥२५९॥

समस्तनाडीसंपातो महामर्माम्बुजं हलम् ।
त्रिशूलं स्वस्तिकं बज्रं मर्म स्वस्तिक संपुटे ॥२६०॥

त्रिकटं मणिवन्धश्च श्रुतिः शुद्धपद स्तथा ।
इति द्वादशमर्माणि त्रिभिस्तम्भादिषु त्यजेत् ॥२६१॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नाडीनां मध्ययोगोऽयं संपातः सूत्रयुग्मके ।
नाडीसंपातसंज्ञं तं मर्मस्थाधिकरं मतम् ॥२६१॥

वंशयो रांगतिर्मध्ये ब्रह्मस्थाने विपत्करम् ।
स्तम्भभीत्यादिभिर्विद्धं महामर्म प्रकीर्तितम् ॥२६३॥

सूत्राष्टकस्य संयोगादम्बुजं नाशकृद् द्रुतम् ।
वंशरज्जुयुतार्धेन हलाख्यं सूत्र युग्मतः ॥२६४॥

स्तम्भादिविद्धं तन्मर्म ताम्यक्षयकरं मतम् ।
संयोगाद् वंशनाडीनां शूलकोण चतुष्टयम् ॥
सूत्रत्रयेऽपि तं विद्धं वधुपुत्रादि नाशकृत् ॥२६५॥

नारदः—

एवं गृहादिदिग्द्वारं विस्ताराद्द्विगुणोच्छ्रितम् ।
पश्चिमे दक्षिणे वापि कवाटं स्थापयेद् गृहे ॥२६६॥

प्रकारान्तं क्षितिं कुर्यादेकाशीतिपदं तथा ।
मध्ये नवपदं ब्रह्मस्थानं तदपि निन्दितम् ॥२६७॥

द्वात्रिंशदंशां प्राकार समीपांशा समन्ततः ।
पिशाचांशा गृहारम्भे दुःखशोकभयप्रदाः ॥२६८॥

शिराः स्युर्वास्तुनो रेखा दिग्विदिग्मध्यसंभवाः ।
ब्रह्मभाग पिशाचांश शिराणां यत्र संगतिः ॥२६९॥

तत्र तत्रविजानीयाद् वास्तुनो मर्मसन्धयः ।
मर्माणां सन्धयो नेष्टा स्वेस्वेप्येवं निवेशने ॥२७०॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पौषफाल्गुणवैशाखमाघश्रावणकार्तिकाः ।
मासाः स्युर्गृहनिर्माणे पुत्रारोग्य धनप्रदाः ।।२७१।।

कालविधाने —

अजवृषमिथुनान्त्य नक्रसंस्थे दिवसकरे निगदिते वास्तुकर्म ।
हरितुला धरकीटगेऽपि केचिदसुरसचिवे वासिते च दृश्यमाने ।।१७२।।

आदित्यादिषु विप्रजे च शशभृच्चित्राधनिष्ठामघा
मित्रार्कोत्तररेवतीयममरुत्तिष्येषु वैकुण्ठभे ।
रिक्तां पञ्चदशीं विहाय गुरूदिच्छुक्रांशवारोदये
मन्देन्दोर्दिवसे सुरालयगृहग्रामादि कर्मारभेत्[1] ।।२७३।।

अकारादिषु वर्गेषु दिक्षु प्रागादिषु क्रतात्
खगेन्द्रोऽत्र हरिश्चैव सर्पाखुगजमेषकाः ।।२७३।।

दिग्वर्गाणामियं योनिः स्ववर्गात् पञ्चमो रिपुः ।
साध्यवर्ग पुरस्थाप्य पृष्ठके साधकं न्यसेत् ।।२७५।।

विभजेदष्टभिः शेषः साधकस्य धनं भवेत् ।
व्यत्ययेनागतं तस्य ऋणमल्पं धनाशुभम् ।।२७६।।

आरभ्य साधकं विष्टयं साध्यं यावच्चतुर्गुणम् ।
विभजेत् सप्तभिः शेषं साधकस्य धनं यथा ।।२७७।।

विषमायः शुभश्चैव समायो निर्धनाय वै ।
धनक्षयं तृतीयर्क्षं पञ्चसर्क्ष यशक्षयम् ।।२७८।।

---

१ कर्माऽरभेत् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आत्मक्षय सप्तमर्क्षं करोत्येवहि कर्तृभात् ।
द्विर्द्वादशं निर्धनाय त्रिकोणमसुताय च ॥२७९॥

षष्ठाष्टम मृत्यवे स्याच्छुभदा राशयः परे ।
सूर्याङ्गारकवारांशा वैश्वानर भयप्रदाः
इतरग्रहवारांशाः सर्वकामार्थ सिद्धिदाः ॥२८०॥

बृहन्नारदीये —

नभस्यादिषु मासेषु त्रिषुत्रिषु यथा क्रमात् ।
२ (पूर्वादि च शिरो वामपार्श्व शायी प्रदक्षिणम् ॥२८१॥

वराह्वयो स्तु पुरुष श्वरत्यव महेश्वरः ।)
यद्दिङ् मुखो वास्तु पुमान् कुर्यात्तद्दिङ् मुखं गृहम् ॥२८२॥

प्रतिकूलमुखं गेहं शोकरोगभयप्रदम् ।
सर्वतोमुख गेहानामेषदोषो न विद्यते ॥२८३॥

अथ वास्तुपूजाविधिः

[1] वास्तु पूजाविधिं वक्ष्ये नववेश्म प्रवेशने ।
हस्तमात्रं लिखेद् रेखा दशपूर्वा दशोत्तराः ॥२८४॥

गृहमध्ये तण्डुलो पर्यकाशीतिपदं भवेत् ।
ज्ञात्वैनं स्थान नामानि वक्ष्यामि क्रमशोऽ धुना ॥२८५॥

---

२ चापान्तर्गतः पाठो मुद्रित नारदसंहितायां त्रुटितो वर्तते ।
१ ना. . वास्तुलक्षणा ध्याये – १ – २ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पञ्चोत्तरान् वक्षमाणाञ्चत्वारिंशत् सुरान् न्यसेत् ।
वास्तुज्ञो वास्तुमन्त्रेण गन्धपुष्पाक्षतादिभिः ।२८६।।

प्रणवेनार्चयेद्वाऽपि, अथवा स्वस्वनामभिः ।
शुक्लवस्त्रयुगं दद्यात् धूपदीपफलैः सह ।।२८७।।

अपूर्वैर्भूरिनैवेद्यैः खाद्यैः सह समर्पयेत् ।
ताम्बूलं च ततो दद्याद् देवेभ्यश्च पृथक् पृथक् ।।२८८।।

दत्वा पुष्पाञ्जलिं कृत्वा प्रार्थयेद् वास्तु पूरुषम् ।
शुभकर्मणि दीक्षायां मण्डपकरणे गृहादिषु तथा ।
विहितो वास्तु बलि स्याद्रक्षो विघ्नोपशान्ति संपद्भ्यः ।।२८९।।

कृष्णीये —

सुवर्णेन प्रमाणेन तदर्धार्धेन वा पुनः ।
प्रतिमां वास्तुरूपस्य द्विभुजं च त्रिनेत्रकम् ।।२९०।।

शयनाकार मित्येवं रक्तवस्त्रेण वेष्टयेत् ।
तिलतण्डुल संमिश्रमण्डले गन्ध पुष्पकैः ।।२९१।।

वास्तुमन्त्रेण वास्तुज्ञः दूर्वादध्यक्षतादिभिः ।
ब्रह्ममन्त्रेण वा श्वेतकुम्भाग्रे च प्रदापयेत् ।।२९२।।

आवाहनादि सर्वोपचाराणि क्रमशस्तथा ।
नैवेद्यं च विधानेन वाद्यैः सह समर्पयेत् ।।
ताम्बूलं च ततः कृत्वा प्रार्थयेद् वास्तुपूरुषम् ।।२९३।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रार्थनामन्त्र

[1]वास्तुपुरुष नमस्तेऽस्तु भूशय्याभिरत प्रभो ।
मद्गृहं धनधान्यादि समृद्धिं कुरु सर्वदा ॥२९४॥

इति प्रार्थ्य ततो दद्यात् दक्षिणामर्चकाय च ।
नवग्रहमखं कुर्याद् यथावित्तानुसारतः ॥२९५॥

वास्तुहोमं प्रकुर्वीत पायसेन गुडूचिभिः ।
अपामार्ग समिद्भिश्च पालाशैर्वापि खादिरैः ॥२९६॥

तिलाक्षतैर्हुने[2]दष्ट सहस्रं वा शताधिकम् ।
व्याहृतिभिस्तिलैर्हुत्वा पूर्णाहुतिमतन्द्रितः ॥२९७॥

अलङ्कृत्य पुनः सम्यग् गन्धपुष्पादिभिस्ततः ।
घोषशान्ति पञ्चदुर्गा श्रीरुद्र पुरुषसूक्तकम् ॥२९८॥

पञ्च ब्रह्मादिभिर्मन्त्रैर्नववेश्म तु मार्जयेत् ।
गृहीत्वा सुकृतं तेभ्यो दक्षिणां च प्रदापयेत् ॥२९९॥

ब्राह्मणान् भोजयेत् पश्चात्स्वयं भुञ्जीत बन्धुभिः ।
एवं यः कुरुते सम्यग् गेहशान्ति नृपोत्तमः ॥३००॥

अनेन विधिना सम्यग् वास्तु पूजां करोति यः ।
आरोग्यं पुत्रलाभं च धनधान्यं लभेन्नरः[3] ॥३०१॥

अकृत्वा वास्तुपूजां यः प्रविशेन्नवमन्दिरम् ।
रोगान् नानाविधान् क्लेशान् प्राप्नुयात् सर्वसंकटान् ॥३०२॥

---

१ ना. सं. वास्तुविधान । २ जुहुयात् । ३ लभेत नरः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नारदः—

अकपाटमनाच्छन्नमदत्तं बलिभोजनम् ।
गृहं न प्रविशेदेवं विपदामाकरं हि तत् ॥३०३॥

अथ वास्तुदेवता बलिनामानि

ईशानकोण वाह्यस्था द्वात्रिंशत् त्रिदशा अमी ।
कृपीटयोनिः पर्जन्यो जयन्तः पाकशासनः ॥३०४॥

सूर्यसत्यौ भृशाकाशौ वायुः पूषा च वैतथा[1] ।
वृहक्षतो दण्डधरो गन्धर्वो भृङ्गराजकः ॥३०५॥

मृगपितृगणाधीश[2] (स्ततो दौवारिकाह्वयः ।
सुग्रीवः पुष्पदन्तश्च जलाधीशस्तथाऽसुरः) ॥३०६॥

शोषो यक्ष्मा च रोगोऽहिर्मुख्यो भल्लाट एव च ।
सोमः सूर्योऽदितिदिती द्वात्रिंशत् त्रिदशा अमी ॥३०७॥

अथेशान्यादि कोणस्थाश् चत्वारस्तत्समीपगाः ।
आपः सावित्र संज्ञश्च जयो रुद्र क्रमादमी ॥३०८॥

मध्ये नवपदो व्रह्मा तस्याष्टौ च समीपगाः ।
एकान्तराः स्युः प्रागाद्याः व्रह्माणं परितः स्मृताः ॥३०९॥

अर्यमा सविता चैव विवश्वान् विवुधाधिपः ।
मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः क्रमात् ॥३१०॥

---

१ वितथः । २ चापान्तर्गतः पाठो लिखितपुस्तकेषु न दृश्ते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आपवत्सोऽष्टमः पञ्चचत्वारिंशत् सुरा अमी ।
आपस्तथापवत्सश्च पर्जन्योऽग्निर्दितिस्तथा ॥३११॥

पदिकानां च वर्गोयमेवं कोणेषु शेषतः ।
तन्मध्ये विंशतिर्वाह्या द्विपदास्ते तु सर्वदा ॥३१२॥

अर्यमा च विवस्वांश्च मित्रपृथ्वीधराह्वयौ ।
ब्रह्माणं परितो दिक्षु चत्वारस्त्रिपदाः स्मृताः ॥३१३॥

ब्रह्माणं च तथैकद्वित्रिपदानर्चयेत् सुरान् ।
अचलं चालयेद् यस्तु प्रासादं ब्राह्मणं न तु
देवता प्रतिमां चैव समूलं च विनश्यति ॥३१४॥

नारद :—

स्नानागारं दिशि प्राच्यामाग्नेयां पवनालयम् ।
याम्यायां शयनगृहं नैर्ऋत्यां शस्त्रमन्दिरम् ॥३१५॥

[1](प्रतीच्यां भोजनगृहं वायव्यां पशुमन्दिरम् ।)
भाण्डागारं तूत्तरस्यामीशान्यां देवमन्दिरम् ॥३१६॥

कश्यपः—

गृहाधिपति राशिस्तु षड्रिःफाष्टम वर्जिताः ।
राशयः शुभदाः शेषा गृहस्य मुनिभिः स्मृताः ॥३१७॥

स्वगणं प्रीतिलभ्यस्तु मध्यमं देवमानुषम् ।
अधमं राक्षसं देवं मरणं मानुषासुरम् ॥३१८॥

---

१ चापान्तर्गतः पाठ-, अ.प. पुस्तकयोर्नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

८५ वास्तुप्रकरणम्

चन्द्रे शुक्रे तथा सौख्यं बुधे जीवे महद्धनम् ।
कुजे सूर्ये तथा दुःखं मन्दे तस्करतो भयम् ॥३१९॥

आयाधिके धनं विद्याद् व्ययाधिक्येन वर्जयेत् ।
ध्वजादिषु महादिक्षु द्विषमास्तद्विद्गुत्तमाः ॥३२०॥

ध्वजो धूमोऽथ सिंहश्च स्वानश्च वृषभस्तथा ।
खरो गजश्च ध्वाङ्क्षश्च दिग्गजाः परिकीर्तिता ॥३२१॥

धनलाभं ध्वजे विद्याद् धूमे च कलहो भवेत् ।
सिंहे च विजयो नित्यं स्वाने हानिर्भविष्यति ॥३२२॥

पशुलाभो वृषे चैव खरे राजभयं भवेत् ।
गजे वृद्धि विजानीयाद् ध्वाङ्क्षे शून्यं विनिर्दिशेत् ॥३२३॥

सिंहो वृषो गजश्चैव स्वे स्वे ते शुभदायकाः ।
धूममेकं परित्यज्य ध्वजः सर्वत्र पूज्यते ॥३२४॥

ध्वजाहरौ तौ च गजो वृषस्ते वृषो हि नान्यत्र समाश्रितः स्यात् ।
प्रत्यग्ध्वजे द्वारमथोक्ष पूर्वं हरानुदृक् स्याद्द्विरदे च याम्ये ॥३२५॥

ध्वजे प्रतीचीमुखमग्रजानामुदङ्मुख भूमिपतेश्च सिंहे ।
विशो वृषे प्रागवदनं गजे तु शूद्रस्य याम्याननमामनन्ति ॥३२६॥

वसिष्ठ :—

ध्वजो विप्रस्य भूपस्य सिंहो विशो वृषस्तथा ।
शूद्रस्य गजदिक्श्रेष्ठा सर्वसंपत्प्रदायिनी ॥३२७॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सकलभवनकर्माण्यष्टमे शुद्धियुक्ते
भृगुसुतरहिते जामित्रराशौ विशेषात् ॥३२८॥

सौम्याः केन्द्र धनाय धर्मतनयान्तस्थास्त्रिषष्ठायगैः
क्रूरैर्वास्तु समृद्धिरेष हि विधिर्वास्तु प्रवेशेष्वपि ।
स्मृत्वैवं सकलं तथोदगयने धीमानुकूले स्थिरे
रागो गर्भविधिर्निवै विदुषा संमर्दयेत् कारयेत् ॥३२९॥

ऐश्वर्यं पुत्रहानिश्च स्त्रीलाभो निधनं भवेत् ।
सौत्रभयः — — सौख्यं कृत्स्नं प्रागादितः क्रमात् ॥
कूपे कृते मध्यमे तु धन हानिश्च वास्तु नः ॥३३०॥

इति सनत्कुमारः ।

कश्यप :—

पुन्नागाशोक तिलकशिरीषकुलचम्पकः ।
दाडिमः पिप्पली द्राक्षा पिचुमन्द जया भरः ॥३३१॥

बन्धूकपूगपनसराजवृक्षसुरद्रुमाः ।
मल्लिका पाटला जाति नारिकेल त्रिणद्रुमाः ॥३३२॥

एते गृहाङ्गणे वृक्षाः सर्वमङ्गलदायकाः ।
प्लक्षकर्कन्धुवृक्षा ये गृहस्योत्तरतः शुभाः ॥
न्यग्रोधोदुम्बराश्वत्थाः गृहप्रागादितः शुभाः ॥३३३॥

इति श्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते
जगन्मोहने वास्तुनिरूपणाऽध्यायः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ यात्राऽध्यायः

यात्राकालमतः परं मुनिमतं व्यालोक्य संक्षेप वद्
वच्म्यादिश्य पृथुक्त लक्षणगुणं संपन्नमीशं भुवः ।
जाते जन्मनि यस्य यानसमये वाञ्छन्ति होराविद—
स्त्वज्ञाने विफलं धुणाक्षरमिव प्राहात्र मुक्ताबलिम् ॥१॥

विदिते होरा राशौ स्थानबलिसपरे ग्रहाणां च ।
आयुषि च परिज्ञाने शुभमशुभं वाच्यम् ॥२॥

केचिद् वदन्त्यपि हि जन्मनि जन्मकाले
योज्य प्रयाणसमये मनुजेश्वराणाम् ।
प्रश्नोदयोद्भवफलं सदसद्विचिन्त्य
तत्वार्थविन्निगदतिस्म वचो वसिष्ठः ॥३॥

तस्मान्नृपः कनकरत्न फलाग्रहस्तः
प्रातः प्रणम्य रिपये परदिङमुखस्थः ।
होरागतं तु कुशलं हितकारिणं च
संपूज्य देव गणकं सकृदेव पृच्छेत् ॥४॥

अथ नृपति समीपे देववित् पृष्टमात्रः
फलमुदयनिमित्तैस्तर्कयेच् शास्त्रदृष्ट्या ।
सदसदपि सुवाच्यं यद्यपि स्यादनिष्टं
स्फुटमपि कथनीयं भूभुजे मन्त्रिणे च ॥५॥

समधुर फलपुष्पक्षीरवृक्षा वृतायां
वरणगति सुखाया गोसकृत्स्नानमर्म्यं ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सलिलकुसुमवत्यां पृच्छतो भद्रमूर्व्यां
ग्रहभगणगतिज्ञः स्वादिशेत् प्रच्छकस्य ॥६॥

स्तन चरण गलोष्ठाङ्गुष्ठहस्तोत्तमाङ्ग श्रवण वदननासागुह्यर-न्ध्राणि भूपाः ।
स्पृशति यदि कराग्रैर्गण्ड कट्टयंशकं वा [1]वदति च शुभशब्दो नागतः शास्ति शत्रून् ॥७॥

उदयमुदयजं वा जन्मभं जन्मजं वा तदुपचय गृहं वा वीक्ष्य लग्ने पिपासाः ।
विनिहतमपिपक्षं विद्धि शत्रोरुहं वा यदि हि विभुसमेतो पृच्छतो वा स्थिते वा ॥८॥

लोकलोचनविधौ–

जन्मभे जन्ममासे वा योगर्क्षंह्यष्टमे विधौ ।
अर्थक्षयं समाप्नोति व्याधिं च वधबन्धनम् ॥९॥

वसिष्ठः–

निखिलबलयुतस्य राज्ञः कथयामि विधानमत्र यात्रायाः ।
जातकमवलोक्य वदेत् फलसिद्धिस्त्वन्यथा मृषा भवति ॥१०॥

अज्ञान जातकानामपि यात्रां वदेन्निमित्त शकुनाद्यैः ।
शुभैः शकुनैः शुभ स्यादशुभैरेतैस्तदन्यथा भवति ॥११॥

परविषयीविजयार्थं गन्तुर्वा समरयात्राख्या ।
निखिला परयात्रा या सामान्या भुवि भवेद् द्विविधा ॥१२॥

---

१ समरभुवि तदानीं शत्रुसेनां निहन्ति व. स. पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कथिततिथिवासरर्क्षेष्वभिमतफलदा भवेच्च सामान्या ।
समराह्वया च यात्रां योगविलग्नक्षितीष योगेषु ॥१३॥

प्रच्छकविलग्नसमये शकुननिमित्तैः शुभावहं वाच्यम् ।
अक्षतफलताम्बूलकरः प्रणम्य दैवज्ञमथ पृच्छेत् ॥१४॥

राज्ञोपकरणवाहनमङ्गलवाक्यादिमङ्गलैर्घोषैः ।
सितवस्त्रपुष्पगन्ध श्रुतिघोषाम्बुजेक्षुफलरत्नैः ॥१५॥

वत्सयुता गोवनिता ज्वलितानल पूर्णकुम्भदुग्धैश्च ।
दधिमधुपिशिताज्योदन वेश्यावृषमद्यभूषणैर्जयदा ॥१६॥

प्रच्छक यात्रासमये शकुनं प्रास्थानीकं भवति ।
स्वगृहं पुनरागमने प्रवेशशकुनं जयप्रदं नृपतेः ॥१७॥

तृण तुषफणिचर्माङ्गार कार्पास पङ्कै—
लवण गुडवसास्थि क्लीव तैलौषधैश्च ।
रिपुविडसित धान्य व्याधिताभ्यक्ततक्रैः
पतित जटिल मुण्डोन्मत्तवान्तैर्नसिद्धिः ॥१८॥

प्रच्छकलग्नादशुभो निधनगतो वापि लग्नगः प्रबलः ।
गुरुसित दृष्टि विहीनः प्रभङ्गदो वा निधनदोऽपि ॥१९॥

शुभखचरस्त्वशुभो वा वक्रगतो लग्नगो यदा भवति ।
लग्नगतस्तद्वर्गः प्रभङ्गदो भवति भूमिपतेः [1] ॥२०॥

प्रच्छकनिधनविलग्नं[2] लग्नगतं वापि नैधनोपगतम् ।
तत्पतिरष्टमगो वा यदि लग्नगतः प्रभङ्गदः शीघ्रम् ॥२१॥

---

१ प्रभङ्गदो निधनदो वापि लि. पु. । २ प्रच्छकलग्नविलग्न लि. पुं. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रच्छकलग्नाद् हिमगुर्निधनगतो वारिराशिगो [१] वापि ।
[२] (मित्रगृहेषु च जाताः शुभदश्चन्द्रो हि मित्रगेहस्थः ।।२२।।

शुभखचर दृष्टि हीनः प्रभङ्गदो नैव नीचराशिस्थः ।
शुभखचरस्त्वेको वा विलग्नगस्तुङ्गराशिगो वा चेत् ।।२३।।

जयति तदारि चक्रं स्वराशिगो वाधिमित्र गेहस्थः ।
शुभखचरौ द्वौ बलिनौ प्रच्छकलग्नस्थितौ यदा भवतः ।।२४।।

बहुविधलाभं विजयं कुरुतस्त्वति शीघ्रमादिशेत्प्रष्टुः ।
भवनं पापाधिगतं पूर्वविलग्नं समाश्रितः पापः ।।२५।।

युद्धमुपदिशतिघोरं पश्यति पापान्तकः पापम् ।
उदयादेकादशमे भृगुगुरुबुधभास्करेषु चैकतमः ।।२६।।

नगराधिपस्य विजयं करोति नवमस्थवा लाभम् ।
उदयं यानि निमित्तं वामेषुरणमाश्रितेषु सौम्येषु ।।२७।।

नगराधिपस्य विजयं प्रवदेन्नास्त्यत्र सन्देहः ।
लग्नात्तृतीयं पञ्चमं षष्ठं वा यदि समागता पापाः ।।२८।।

नागरनृपतिपुरं यन्न चिरात्तस्य यायिनां भवति ।
क्रूरे लग्नोपगते बुधे तृतीये सुखोपगते सूर्ये ।।२९।।

युद्धं भवति नृपाणां विषये च विनश्यते तत्र ।
मानुषे च विलग्ने ततो हि दशमे तयोश्च यदि पापाः ।।३०।।

---

१ रिःफराशिगो लि.पु. । २ चापान्तर्गतः पाठः मुद्रित वसिष्ठ संहितायां नवर्तते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नगरस्येशो यायी यदि सप्तमराशिगो भवेत्क्रूरः ।
१ (क्रूरैर्लग्नगतैः क्रूरोऽपि विशिष्यते सन्धिः ॥३१॥

भवति तयोः सन्धिः स्याद् विज्ञातव्यं मनुष्येण ।
विषयी धरातिवित्तं यदि सप्तमराशिगो भवेत् क्रूरः ॥३२॥)

आपोक्लीमगते सौम्येलग्ने वा शुभयुते शुभैर्दृष्टे ।
सन्धानं प्राग्योग्रे प्रब्रूयान्निश्चये नैव ॥३३॥

उदयशीर्षोपगते पृष्ठोदयस्य पृच्छायाम् ।
संबन्धं प्रतियातो भवति – न सन्दिग्धः ॥३४॥

इति श्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने विजययात्राप्रश्नाऽध्यायः ।

अथ यात्राऽध्यायः

लल्लः—

वप्रप्राकारपात्रप्रहरणपरिखा तोय धान्यं धनाढ्यं
दुर्गं कृत्वात्म गुप्त द्विपतुरग भिषग् विप्रशिल्पाद्युपेतम् ।
लुब्धस्त्रस्ताभिमानि प्रकुपितकुभृतैर्ज्ञातिशीलैर्विहीनैः
कृत्वा शूराप्तसंस्थं परविषयमियाच् शुद्धपार्ष्णिर्नरेन्द्रः ॥१॥

उलूकस्य ध्वाङ्क्षो निशि बलिभुजा सोऽह्नि वशगः
१ (स्थले नक्रं सिंहो मृगपमुदके हन्ति जलजः ।
अबुध्वा यःकालं व्रजति नृपतिर्देशमथवा
हते दर्पे वाक्यं स्मरति विदुषां सोऽरिवशगः) ॥२॥

---

१ चापान्तर्गतः पाठ, च पुस्तके नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यात्राथ सिंहतुरगोपगते वरिष्ठा
मध्या शनैश्चरबुधोशनसां गृहेषु ।
भानौ कुलीर झष वृश्चिकगे च हीना
शस्तस्तु देवलमतेऽध्वनि पृष्ठतोऽर्कः[१] ॥३॥

श्रीपतिः—

अथ भवति विजयसमयश्चैत्रे ज्येष्ठे च मार्गशीर्षे वा ।
सद्योऽरिव्यसनेऽपि च महीपतिः शक्तियुक्तश्च ॥४॥

[२]आयुर्वृद्धिर्यात्रासिद्धिः प्रयाणकं पुर बलस्य रक्षा च ।
विनिवृत्तिश्च षडेतानि ज्ञात्वा यात्रा प्रदातव्या ॥५॥

जन्मप्रश्न यात्रादि मुहूर्तैः प्रतियानपर्यन्तमायुरस्तीति ज्ञात्वा यात्रा प्रदातव्या। आयुर्बृद्धिलक्षणम् । गर्गः—

अंशपिण्डनिसर्गाणां भिन्नविस्तारयोरपि ।
शन्यंश कालचक्राणां तारका जीव शर्मणः ॥६॥

तथा लघु वृहज्जीव शर्मणोश्च सयोगये ।
आयुर्निश्चिनुयाद् मानै श्चतुभिर्मुनि संमतम् ॥७॥

लग्न प्राबल्यादंशायुः रवि प्राबल्यात् पिण्डायुः, चन्द्रप्राबल्यात्, नैसर्गिकायुः, अनस्तमितस्य लग्नेशस्य सूर्येण केन्द्रस्थेन योगायुः ।। भिन्नाष्टक वर्गः। स चन्द्रः सूर्य उपचयस्थश्चेत् समुदायः स्वतुङ्ग स्वभवने केन्द्रे वा स्थिताः शनैश्चर इतर ग्रहेभ्योऽधिक बलस्थे चन्द्रे उच्च उच्चांशेऽवस्थिते, इतर ग्रहैरयुक्ते अदृष्टे वा युग्मभांशस्थिते च रात्र्युत्पन्नस्य नक्षत्रायुः ।

---

१ पृष्ठतोक्तः अ. प. । २ लल्ल (अथ यात्रावसिष्ठः)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सर्वेषु गृहेषु बलहीनेषु नीचोन्मुखेषूत्पन्नस्य जीवशर्मायुः। सर्वेषूच्चाभिलाषिष्वपि, अस्तगतेषु शत्रुगृहस्थितेषु बृहज्जीव शर्मायुः। जातकोक्त राजरोगादि योगेषु योगायुर्दायः। एतेष्वायुर्दायेषु आद्यमायुर्दायं मुख्यम्। अतस्तेनैवायुः परीक्षयेत्। अन्यानि तु तत्र तत्र, अपमृत्यु सूचकानि। न च मुख्यत्रये नैवापमृत्युज्ञानादन्यानीति व्यर्थानीतिवाच्यम् मुख्य प्रतिपादितापमृत्युप्रकटनार्थत्वात्॥

तत्राह गर्गः—

अंशजं लग्नवीर्येण रविवीर्येण पिण्डजम्।
नैसर्गिकं चन्द्रबलादायुस्त्रिविधमुत्तमम् ॥८॥

भिन्नादीनि तु गौणानि ततस्तं न परीक्षयेत्।
तदुक्तिस्त्रितयोक्तिः स्यात् प्रागव्यक्तमिति स्थितिः ॥९॥

अथवा द्वादशाभिधानायुर्दायानि यद्वा द्वादशभिर्भागीकृते ततोपलब्ध तन्मुख्यमायुः। तथाह गर्गः–

आयुर्दायानर्कमितान् भाजयेदर्कसंख्यया।
शुद्धायुस्तत्ततो लब्धमितिकेचित् प्रचक्षते ॥१०॥ इति

लग्नार्कयोरर्कविधोलग्नेन्दोः] सदृशे बले।
तदायुषोरैक्यदलं शुद्धमायुः प्रकीर्तितम् ॥११॥

कियत्प्रकारमित्याकाङ्क्षायां व्यास आह—
ग्रहाणामपि सर्वेषामुक्त षोडशधा बलम्
लग्नस्य तु स्वामिबलैः सह विंशतिधा बलम्॥
अत्रैतेषां बलं शून्यं चतुर्भागमितं मतम् ॥१२॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एवं जातक प्रकारेण प्रतिप्रयाणपर्यन्तमायुर्निश्चित्य यात्रां कारयेत् ।

जन्मग्रहादि संस्थानि निश्चित्यायुः प्रयत्नतः ।
प्रत्यागमनपर्यन्तं प्रयाणं कारयेद् बुधः ॥१३॥

चतुर्थाधीश्वरेण युक्तेऽवलोकिते वाऽथ चतुर्थे ।
बुध गुरुशुक्रैर्युक्ते वा वीक्षिते शशिनाऽपिवा ॥१४॥

ज्ञात्वा वृद्धि सुखस्यादौ कारयेद् गमनं बुधः
(१सुखेशः प्रबलश्चेत्स्यात् तत्तदुक्तफलं भवेत् ॥१५॥

तदीशो दुर्बलश्चेत् स्या··········
हिबुकास्तान्तरालस्थैर्ग्रहैः शुभफलप्रदैः ॥१६॥

यात्रासिद्धं विनिश्चित्य प्रयाणं कारयेद् बुधः) ।
दशमराशिवर स्वभावोऽशुभ स्वामि निरीक्षितः ॥१७॥

अशुभनिरीक्षितं वा तदा प्रयाणम् । अन्यथानेति विचार्य प्रयाणं कारयेत् । चरस्वाभावाद् दशमान शुभेश निरीक्षिताह ।

अशुभेक्षणयोगाच्च प्रयाणमितिकथ्यते । तृतीय भवनमारभ्य षष्ठ-राशि पर्यन्तं शुभग्रहाश्चेत् । तदा राज्ञो नगर वलस्यान्यस्य ग्रह बलस्य तु । अङ्गारे नगरपुरमित्यभिधानरक्षा स्यादन्यथा नेति वदेत् ।

तृतीयभवनमारभ्य यावद्राशिस्तु षष्ठगः ।
अन्तरस्थैः शुभैर्वाच्या पुररक्षा च नान्यथा ॥१८॥

ग्रहाणां मध्यगो य स्यात् सर्वोत्तम बलग्रहः ।
तत् मासैस्तुल्य संख्याकैर्निर्वृत्ति यातु निर्वृत्तिमादिशेत् ॥१९॥

---

१ चापान्तर्गतः पाठ, च पुस्तके नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तथा चोक्तं कृष्णीये--

ग्रहाः सर्वोत्तमवला लग्नाद् यस्मित् गृहे स्थिताः ।
मासैस्ततुल्यसंख्याकैर्निवृत्ति यातुरादिशेत् ॥२०॥

बल शब्देन जातकोक्त षोडशबलान्युच्यन्ते । संग्रहे यस्मिन् यादृक् संख्याभवने ग्रहस्तिष्ठति तादृक्संख्याकैर्मासैर्निवृत्तिमादिशेदित्यर्थः । विध्वंश विशेषेण निवृत्तिकालविशेषमाह–

चरांशस्थे ग्रहे तस्मिन् कालमेव विनिर्दिशेत् ।
द्विगुणा स्थिरभागस्थे त्रिगुणं च द्विरात्मके ॥२१॥

अत्रैव मतान्तरे–

यातुर्विलग्नाज्जामित्रभवनाधिपतिर्यदा ।
करोतिवक्रमावृत्ते कालं तद्ब्रुवते परे ॥२२॥

गर्ग :–

अष्टवर्ग लक्षणम्

नवोर्ध्वरेखाः संलिख्य तिर्यग्रेखास्त्रयोदश ।
एतस्मिन्नष्टके वर्गे स्थापयेद् गोलवद् ग्रहाः ॥२३॥

ज्योतिश्चक्रात्मकादस्माच्चतुर्विंशति संमिताः ।
जीवा भवन्ति ते जीवा सिद्धान्त ज्ञान हेतवः ॥२४॥

सर्वाष्टक ग्रहफलै विनियुज्य चक्रं
मूर्त्यादि गण्यमशुभं शुभ तत्समानम् ।
जन्मादि तत्फलमशेषदशा समीक्ष्य
यात्रा विवाहसमये बहुवर्ग युक्तम् ॥२५॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न चेन्नियो जातककर्मपद्धति-
नं ब्रह्मसिद्धान्त भवा नविग्रहान् ।
यात्राविवाहादिषु काल सूचको
भवेत् स मृत्युः खलु तत् स्वरूपकम्[1] ।।२६।।

अथ यात्रा नवविधा प्रोच्यते

उत्तमोत्तमा, उत्तममध्यमा, उत्तमाधमा, मध्यमोत्तमा, मध्यममध्यमा, मध्यमाधमा, अधमोत्तमा, अधममध्यमा, अधमाधमेति, तथात्रिः—

उत्तमा मध्यमा चान्या प्रत्येक त्रिविधा पुनः ।
उत्तमादि विभेदेन यात्रा नवविधा स्मृता ।।२७।।

एतेषां लक्षणमाह । स एव ।

सवीर्यो लग्नपो यस्य भास्करस्य सुहृद् यदि ।
सा यात्रा चोत्तमा ज्ञेया यातुरिष्ट फलप्रदा ।।२८।।

वर्गोत्तमे स्वतुङ्गे वा लग्नेशः सूर्यबान्धवः ।
उत्तमोत्तम यात्रा सा स्वेष्टाधिक फलप्रदा ।।२९।।

उदयेशो बली यस्यामनुक्तेस्थो रवेः सुहृत् ।
कृच्छ्रेण फलदा यातु यात्रा सोत्तममध्यमा ।।३०।।

सा यात्रा मध्य होरेशो बलबान् यस्यां शत्रुगः सूर्यबान्धवः ।
उत्तमधमयात्रा सौ शत्रु युक्तफल प्रदा ।।
(उत्तमाधमयात्रासौ शत्रुयुक्त फलप्रदा) ।।३१।।

१ समीपकं अ. प. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मध्येशो मध्यमबलो यस्यां सूर्यस्य मध्यमः ।
सा यात्रा मध्यमा ज्ञेया यातुर्मध्या फलप्रदा ॥३२॥

स एव तादृशो यस्यां स्वोच्चेवा स्वोत्तमे यदि ।
विलम्बित फलायातुः सा तु स्यान्मध्यमोत्तमा ॥३३॥

उक्त लक्षण एव स्यादनुक्तस्थानगो यदि ।
यातुः सा मध्यमा यात्रा दुःखाधिक फलप्रदा ॥३४॥

होरेशो दुर्वलो यस्यां प्रतिकूलो रवेर्यदि ।
सा यात्रा त्वधमा ज्ञेया सर्वदा फलर्वाजिता ॥३५॥

उक्त लक्षण होरेशो यस्य वर्गोत्तमे वसेत् ।
साधमोत्तम यात्रा स्याद् हानिदा तु फलप्रदा ॥३६॥

उक्त लग्नाधिपो यस्यामनुक्तस्थानगो यदि ।
प्राणापहानिदा नित्यं सा यात्राधममध्यमा ॥३७॥

होरेशस्तु द्विशो दृश्यः शत्रुस्थानगतो यदि ।
अधमाधमयात्रायां मृत्युदाऽनर्थकारिणी ॥३८॥

लग्न जन्म दशेशेषु रवीन्दुज्ञसितेषु च ।
गुरुभौमदिनेशेषु प्रस्फुरत्किरणेषु च ॥३९॥

स्वानुकूलेषु कुर्वीत यात्रा धर्मपरायणः ।
तत्फलं प्राप्यवेगेन पुनरायाद् गृहं प्रति ॥४०॥

अत्र पराशरः—

दशो बली · · · · वेश्या यात्राकाले च जन्मनि ।
यातु रिष्टार्थदा यात्रा दशाधिप दिशं प्रति ॥४१॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विचित्र लाभदा मेषे वृषे भूमि धनप्रदा ।
मिथुने श्रीप्रदा नित्यं कीटे मध्य फलप्रदा ।।
चापे सर्वार्थदा यात्रा तदन्येषु विगर्हिता ।।४२।।

वसिष्ठः—

वलक्षपक्ष प्रतिपत्प्रयाणे भङ्गप्रदा वा निधन प्रदा वा ।
यातुर्मनोऽभिष्टकरी द्वितीया संपूर्णयात्रा फलदा तृतीया ।।४३।।

तिस्रश्च रिक्तास्तिथयः प्रयातुर्मृत्युप्रदा वार्थविनाशदा वा ।
यशस्करी भूतधन प्रदा चेद् या पञ्चमी मृत्युकरीच षष्ठौ ।।४४।।

सप्तमी विजयदा ह्यथाष्टमी शोकदुःख भयदाभय प्रदा ।
सर्वदुःखशमनी यशस्करी लाभदा च दशमी निरन्तरम् ।।
एकादशी चित्रमृगप्रभूत धान्याकराद्युत्तम वस्तु दात्री ।।४५।।

भूरिभूति नाशिनी भूरि शर्म हारिणी ।
भूरिभीति दायिनी द्वादशी प्रभङ्गदा ।।४६।।

त्रयोदशी सुतप्रदा विपक्षपक्ष नाशिनी ।
विनाशता च पूर्णिमा यशः क्षयं करोति च ।।४७।।

सितेऽतराद्यवासरो विभूति सौख्य भोगदः ।
सितेतरे जघन्यके बलप्रदाश्च वासराः ।।४८।।

सुरेज्यदैत्येज्यशशीन्दुजानां वाराश्च वर्गा शुभदाः प्रयाणे ।
आदित्यभूसूनुशनैश्चराणां वाराश्च वर्गा नशुभप्रदास्ते ।।४९।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शौनकः—

धननाशो रवौ यातुः शक्तिनाश- सितेतरे ।
सोमे रक्तोद्भवो भौमे स पापेज्ञे धनव्ययः ॥५०॥

जयो गुरौ मीनलक्ष्मीः यातो भूरि वधादिकम् ।
गुणारि लाभखेटानां क्रूरा वाराः सुखप्रदाः ॥५१॥

शनौ सोमे न पूर्वाशां न यानाद् दक्षिणे गुरौ ।
प्रतीच्यां तु रवौ शुक्रे सोत्तरा बुधभौमयोः ॥५२॥

प्राचीं प्रति गुरौ यायाद् दक्षिणं शनिसोमयोः ।
वारुणी भौमबुधयोरुत्तरां सितसूर्ययोः ॥५३॥
उक्त मार्गेण यातुः स्याद् विजयादि फलप्रदा ॥

लल्लः—

उपचयकरग्रह दिने सिद्धिः क्रूरेऽपि यायिनां भवति ।
सौम्ये त्यनुपचयस्थेन भवति यात्रा शुभा यातुः ॥५४॥

योगयात्रायाम्—

दिन कृद्दिवसेऽथवांशके यात्रा लग्नगतेऽथवा रवौ ।
सन्तापयति स्मरातुरं वेश्येवार्थ विवर्जितं नरम् ॥५५॥

उदये शशिनोंशकेऽह्नि वा जयति गतो न चिरेण दुर्मनाः ।
प्रमदामिव जातयौवनां रत्यर्थं समवाप्यकर्कशः ॥५६॥

भौमोदयेंशेहनि वास्ययात्रा करोति वधनार्थनाशम् ।
निसेविता पापपराङ्मुखेन मत्तो भवान्धेन पराङ्गणे वा ॥५७॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बुधस्य लग्नांशक वासरेषु यात्रा नरं प्रीणयते प्रकामम् ।
भावानुरक्ताय वराङ्गनेव विदग्धचेष्टा मदनाभितप्तम् ॥५८॥

गुरोर्विलग्नांशदिनेषु यात्रा हितानुबन्धेप्सित कामदा च ।
जायेव भक्ता मनसानुकूला कुलाभिवृद्धा रतिदा हिता च ।५६॥

यात्रा भृगोरंशदिनोदयेषु प्रीणन्ति कामैर्विविधैरियासुम् ।
विलाशिनी कामवशोपयातं भावैरनेकैर्मदनातुरेव ॥६०॥

सुलग्नभावेषु शनेश्च यात्रा प्राणच्छिदादीन् प्रचिनोति कामम् ।
अन्यप्रशक्तावनितेव मोहान्निषेविता मन्मथ मोहितेन ॥६१॥

एकोऽपि जीवज्ञसिता . . . . नां कुजा त्रिकोणे रचितोऽथवेन्दुः ।
यत्नोद्येतंस्तत्र न याति याता तयोर्बलीयान्नयति स्वकाष्ठाम् ॥६२॥

वसिष्ठः[1]—

पौष्ण द्वयेमित्रहरिद्वये च हस्तादितीज्येषु च भेषु नूनम् ।
यानं नृणांमिष्टफलप्रदा स्या त्यक्त्वा त्रिपञ्चादिम सप्तभानि ॥६३॥

मघाविशाखानिलबन्धुसार्परुद्रान्तकत्वष्ट्रसमीरणानि ।
यानेष्वनिष्टान्यपरानि भानि नशोभनान्येव ननिन्दितानि ॥६४॥

भारद्वाजः—

ज्येष्ठायां न व्रजेत् पूर्वां नाजाङ्घ्रौ दक्षिणां दिशम् ।
पश्चिमाशां न रोहिण्यां नार्यम्ण्युदग् दिशं प्रति ॥६५॥

---

१ श्लोकोऽयं वसिष्ठसंहितायां न दृश्यते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वसिष्ठ[1]:—

सार्वद्वारिकधिष्णान्यमरेज्यादित्यदस्रमैत्राणि ।
तत्र तु यात्रा नियतं धनकीर्तिर्लभ्यते न चिरात् ॥६६॥

अत्रिः—

वस्वादि पञ्चके याम्य गतिः काष्ठादिसंग्रहम् ।
विवर्जयेत् प्रेतदाहं शयनं गृहगोपनम् ॥६७॥

वसिष्ठ[2]:—

एकार्गलहतं धिष्ण्यं पापाक्रान्तं[3] च विद्धभम् ।
उत्पात दूषितं यत्तद् यात्रायां भङ्गदं सदा ॥६८॥

तिथिनक्षत्र लग्नानामन्तरालं चतुष्पदम् ।
गण्डान्तं त्रिविधं तेषां यात्रायां निधनप्रदम् ॥६९॥

वैनासिकादिऋक्षेषु विषनाडिषु सर्वदा ।
महागणकगर्गेण[4] स्वानीतेः पात वैधृतौ ॥
यो यायाद् गमनं तस्य श्ववृक्षः पुष्पितो यथा ॥७०॥

सुबोधिः—

सार्पादि त्रयसंयुता च भरणी साग्नेयमिद्राग्निभा-
च्चात्र वाप्यक पूर्वभाद्रपदकारौ रौद्रश्च रिक्ताष्टमी ।
ऊर्ध्वाद् योजनता सह प्रथमयानैतेषु गच्छेत् सदा
श्रेष्ठा वोर्ध्वमुखी तथैव वरणे हारोश्च मूर्ध्वोदया ॥७१॥

---

१ श्लोकोऽयं वसिष्ठसंहितायां न दृश्यते । २ श्लोकोऽयं वसिष्ठ संहितायां नदृश्यते ३ क्रूराक्रान्तं पाठान्तरम् । ४ महागणितगर्गेण पाठो दृश्यते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भारद्वाजः—

ज्येष्ठा चौभ्रौ मघाश्विन्यावदितिष्यौ सदा बुधः ।
हस्तोत्तरस्य प्रागादि शूलं यात्रासु वर्जयेत् ॥७२॥

भरण्यां सप्तघटिका वह्निभे चैकविंशतिः ।
एकादश घटी पित्र्ये त्रिपूर्वासु च षोडश ॥७३॥

स्वातिसार्पविशाखासु ज्येष्ठायां च चतुर्दशः ।
वर्जयेन्च् शेष घटिका यत्तुः शुभफलप्रदा ॥७४॥

एतदावश्यकगमनविषयं तथा चोक्तं तेनैव—

निषिद्धेष्वपि ऋक्षेषु त्यक्त्वा दुष्टा घटीः क्रमात् ।
तदन्यघटिकाग्राह्या अवश्यगमने सति ॥७५॥

वसिष्ठः—

अर्कोदये चान्द्रमसीं दिशं व्रजेत्
ऐन्द्रं व्रजेदर्धदिनेऽस्तकाले ।
याम्यां व्रजेद्वारुणिमर्धरात्रे
प्यश्रीगतस्त्विष्टफलाय नित्यम् ॥७६॥

वृहद्यात्रायाम्—

विवर्जयेत्वाष्ट्रयमोरगाणामर्धं द्वितीयं गमने जयाय ।
पूर्वार्धमाग्नेयमघानिलानां स्वातिं मघां चोशनसः समास्ते ॥७७॥

वसिष्ठः—

पितृवसुतिष्य द्वयनलत्र्युत्तरभाग्यद्विदैवचित्राणि ।
देवचिकित्सककोणपसंहितान्येतानि कुलभानि ॥७८॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अजचरणादितिपूषाविधातृमरुद्विष्णुवारिशक्राणि ।
अहिर्करयाम्यजलन्युपकुलभान्यन्यानि कुलकुलानि ॥
उपकुलभेषु च याता विजयं प्राप्नोत्यसंशयं क्षिप्रम् ॥७६॥

लल्लः—

प्राच्यादि सप्तसप्तक्रमेण धिष्ण्यानि कृत्तिकादीनि ।
अनुलोमान्येतानि पूर्वोत्तरयोरितरयोश्च ॥८०॥

अनिलानिलादिग्रेखा परिघा यान्ति ये समुल्लङ्घ्यः ।
आज्ञामिव कुलिशभृतः पतन्ति नचिरेण ते व्यसने ॥८१॥

वसिष्ठः—

ईशादि कृत्तिकादीनि सप्त सप्त न्यसेत् क्रमात् ।
आग्नेयवायुकाष्ठास्थं परिघं तु न लङ्घयेत् ॥८२॥

तिथिर्वारं च नक्षत्रं संयुक्तं स्थापयेत् त्रिधा ।
यमैरामैस्तथावेदैर्गुणयित्वा तु तद्बुधैः ॥८३॥

भाजितं चाष्टमुनिभिस्तथा द्विगुण पावकैः ।
आदिशून्ये भवेत् पीडा मध्यशून्ये महद्भयम् ॥८४॥

अन्त्यशून्ये महाहानिः सर्वशून्ये न जीवति ।
पूर्वाह्णे चोत्तरां गच्छे प्राचीं मध्यन्दिने तथा ॥८५॥

दक्षिणां चापराह्णे तु पश्चिमामर्धरात्रिके ।
न तत्राङ्गारको विष्टिर्व्यतिपातो न वैधृतिः ॥
सिद्ध्यन्ति सर्वकार्याणि यात्रायां दक्षिणे रवौ ॥८६॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सूर्याच्चतुर्थे दशमे च षष्ठे विश्वर्क्षके विंशतिके नवाख्ये ।
भवन्ति षड् भानुभदृक्षयोगाः कुयोगविध्वंशकराः प्रयाणे ॥८७॥

अनुराधा प्रयातस्य ज्येष्ठापर्युषितस्य च ।
प्रातमूले प्रयातस्य कार्यसिद्धिर्न संशयः ॥८८॥

रत्नकोषे —

अभिजित्संज्ञं धिष्ण्यं श्रवणाषाढान्तरे भवति ।
तस्मिश्च संप्रयातः सर्वार्थान् साधयेन्नियतम् ॥८९॥

लल्लः—

तिथ्या यात्रा सिद्धी रविणाऽस्याभ्यागमो मुहूर्तवशात् ।
नक्षत्रात् सम्पत्ति यातुरिष्ठायुस्तथा वित्तम् ॥९०॥

वारेण सौमनस्यं शुभेन करणेन मन्त्रसंप्राप्तिः ।
सर्वेगुणाः समुदिताः शुभलग्नेन लभ्यते ॥९१॥

प्रयोजनेष्वात्यपिकेषु भूपतिर्विलङ्घ्यरेखामपि पारिघं वृजेत् ।
विहाय दिक्शूलसमाह्वयानुहुन् . . . . यद्दिग्लग्न विशुद्धिराप्यते ॥९२॥

वसिष्ठः—

नन्दाभिधान प्रवसे तु पूर्वां भद्रायु तद्रासु व्रजेद् यमस्य ।
जये जयार्थी दिशि पश्चिमायां पूर्णासु सौम्यागमनं शुभं स्यात् ॥९३॥

तिथिं च रन्ध्रं करणं च विष्ठि योगं च पातं खलु वैधृतिं च ।
विहाय यात्रा रिपुभूययाजौ हरेर्दृशं शंवरमाशुकामः ॥९४॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वसिष्ठ :—

विष्टि व्यतिपातमहेन्द्रचाप दिग्दाह धूमग्रहणं च येषाम् ।
तदा रवेः संक्रमणे च वर्षे सुदुर्निमित्ते गमनं न कुर्यात् ॥९५॥

दिगीश्वरा भास्करशूक्रभौमराह्वार्किचन्द्रज्ञसुरार्चिताः स्युः ।
दिशीश्वरे यत्र ललाटसंस्थे यानं न कार्यं न च संनिवेशः ॥९६॥

राशी एकं द्वाविनाक्रान्तराशेरप्राग्दक्षिणे न्यसेत् दिग्विदिक्षु ।
यद्दिग्राशौलग्नगे संमुखत्वं तद्दृग्यातुर्मृत्युदस्तद्दिगीशः ॥९७॥

भृगुः—

यातुर्भङ्ग प्रदोबक्री शुभो वा लग्नमाश्रितः ।
क्रुरश्चेन्निधनं सद्यः करोत्येव न संशयः इति. ॥९८॥

कपिलः—

प्रतीपगः शुभः कश्चिल्लग्नमाश्रित्य यायिनः ।
बलं हरति वेगेन पापश्चे न्निधनप्रदः ॥९९॥

वसिष्ठः—

लग्नस्थो भास्करो प्राच्यां दिश यातुर्ललटगः ।
द्वादशैकादशे शुक्र आग्नेय्यां तु ललाटगः ॥१००॥

[1] (दशमस्थः कुजो लग्नाद् याम्यायां तु ललाटगः ।
नवमाऽष्टमगो राहु नैंऋत्यां तु ललाटगः ॥
लग्नात्सप्तमगः सौरिः प्रतीच्यां तु ललाटगः ॥१०१॥

१ चापान्तर्गतः पाठः लिखितपुस्तकेषु न वर्तते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

षष्टः पञ्चमगश्चन्द्रो वायव्यां तु ललाटगः ।
चतुर्थस्थानगः सौम्य उत्तरस्यां ललाटगः ॥१०२॥

द्वित्रिस्थान गतो जीव ईशान्यां तु ललाटगः ।
ललाटयोगं संत्यज्य जीवितेच्छुर्व्रजेन्नृपः ॥१०३॥

अत्रिः—

यद्दिग्गते समुदयेद् विचरेद् यत्र गोलके ।
यद्वारम्भेषु विचरेत् त्रिविधं प्रतिभार्गवम् ॥१०४॥

भरद्वाजः—

विवर्णे विजिते नीचे शत्रुक्षेत्रस्थितेऽस्तगे ।
शत्रु गृहयुते वापि तदंशे तन्निरीक्षिते ॥१०५॥

भौमांशे भौमसंयुक्ते मन्दांशे मन्दसंयुते ।
यात्रां नैव प्रकुर्वीत लक्ष्यायुर्बलहानिदः ॥१०६॥

स्वभवनपुरप्रवेशे देशानां विभ्रमे तथोद्वाहे ।
नूतनवध्वागमने प्रतिशुक्रविचारणा नास्ति ॥१०७॥

गुरुः—

प्रतिशुक्रं प्रतिबुधं प्रतिभौमं गतो नृपः ।
बलेन शक्रतुल्योऽपि हतसैन्यो निवर्तते ॥१०८॥

नारदः—

कश्यपश्च वसिष्ठश्च भारद्वाजात्रिगौतमाः ।
एतेषां पञ्चगोत्राणां प्रतिशुक्रो न विद्यते ॥१०९॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गुरुः--

विवाहे तीर्थयात्रायां दुर्भिक्षे राष्ट्रविग्रहे ।
एकग्रामे चतुःशाले प्रतिशुक्रो न दूष्यति । ॥११०॥

पृष्ठगं दक्षिणस्थं च भृगुं कृत्वा विशेत् सदा ।
पुरतो वामगं वापि शुक्रं कृत्वा नवा विशेत् ॥१११॥

मूढस्थे भृगुजे सर्वः प्रवेशो नैव शोभनः ।
अर्वाक् क्रोशद्वयं गच्छेत् प्रतिशुक्रे तथैव च ॥११२॥

वसिष्ठः—

शुक्रेवास्तं गते यत्र चन्द्रे वास्तमुपागते ।
तयोर्बाल्ये च वृद्धे च यात्रा सा भयरोगदा ॥११३॥

पराशरः—

चन्द्रार्कौ दक्षिणगती यायाद् याम्यां परां प्रति
तौ सौम्यायनगौ यायाद् प्राचीं सौम्यां दिशं प्रति ॥११४॥

याम्यसौम्यायनगतौ रविचन्द्रौ क्रमाद् यदि ।
अह्नि तद्विपरीतौ चेद् रात्रौ यायान्न चान्यथा ॥११५॥

वसिष्ठः—

चरराशौ लग्नगते स्थिरे वा सौम्यवीक्षिते ।
यातुरिष्टार्थदा यात्रा द्विस्वभावे त्वनिष्टदा ॥११६॥

लल्लः—

चरोदये चोर्ध्वमुखे शिरोदये गृहं प्रयायादथ चाष्टमे रिपोः ।
स्ववित्तसौन्दर्य विपक्षभञ्जनेष्वनिन्दितेष्वेव सुहृद्गृहेषु ॥११७॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शीर्षोदये समभिवाञ्छित कार्यसिद्धिः,[1] पृष्ठोदये विफलतो बलविद्र-
वश्च ।
यातव्यदिङ्मुखगतेन शुभेन सिद्धि, र्व्यर्थस्तमो भवति दिक्प्रतिलोम-
लग्ने ।।११८।।

शस्तो दिवा दिनबले निशि नक्तवीर्ये, राशौ विपर्ययबले त्युभयो
प्रशस्तः ।

लल्लः—

इष्टं स्वजन्मलग्नेन जन्मराश्युद्गमस्तयोरुभयोः ।
उपचयग्रहाणि मुक्त्वा लग्ने नेष्टानि शेषाणि ।।११९।।

नारदः—

जन्मराश्युद्गमो नैव जन्मलग्नोदयः शुभः ।
तयोरुपचयस्थानं यदि लग्नं गतं शुभम् ।।१२०।।

षष्ट्यष्टमीद्वादशीषु रिक्तामा पूर्णिमासु च ।
यात्रा शुक्ल प्रतिपति निधनायाधनाय वै ।।१२१।।

पौष्णार्केन्द्वतिमित्राश्वि हरितिष्यवसूडुषु ।
सप्तपञ्चत्रिजन्मानि हित्वा यात्रा शुभप्रदा ।।१२२।।

मूढे शुक्रे कार्य हानिः प्रतिशुक्रे पराजयः ।
प्रतीन्दुजकृतं दोषं हन्ति शक्ता ग्रहा यदि ।।१२३।।

---

१ समभिवाञ्छितिकार्यसिद्धेः क. च. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भारद्वाजः—

वस्वित्याद्यादि पञ्चर्क्षे संग्रहं तृणकाष्ठयोः ।
याम्यदिग्गमनं शय्यां न कुर्याद्गृहगोपनम् ॥१२४॥

शीर्षोदये लग्नगते दिग्लग्ने लग्नगेऽपि वा ।
शुभवर्गेऽथवा लग्ने यातुर्मीनांशकेऽपि वा ॥१२५॥

वक्रः पन्था मीनलग्ने यातुर्मीनांशकेऽपि वा ।
निन्द्यास्ता निखिला यात्रा घटलग्ने घटांशके ॥१२६॥

जललग्ने जलांशेवा जलयानं शुभावहम् ।
जातकोक्तेन विधिना ज्ञेया भावाः क्रमाच्च भोः ॥१२७॥

मूर्त्यादि संज्ञका प्रोक्ता कार्याकार्य प्रसिद्धये ।
इष्टभावस्ततः पूर्वे भङ्गाः सार्धाश्चतुर्दश: ॥१२८॥

तदुत्तरे च तावन्तस्तत्सङ्घो भाव ईरितः ।
एवं द्वितीयभावादि द्वादशान्तं प्रकल्प्यते ॥१२९॥

भावयोगदलं सन्धिस्तत्रस्थोऽफलदो ग्रहः ।
सन्धेरूनस्ततः खेटः सन्धिस्थः सदृशो भवेत् ॥१३०॥

भावोन्मुखो ग्रहो दाता फलस्यात्यन्तदूरतः ।
इष्टभावस्थितः खेटः संपूर्णफलदायकः ॥१३१॥

सीमन्त चौलोपनीति यात्रा प्रवेशने ।
अभिषेके विवाहे च शस्तं भावफलं विदुः ॥१३२॥

शौनकः—

लग्नस्य भावो जीवः स्यात् षड्वर्गो देह उच्यते ।
ग्रहश्चावयवा प्रोक्ता इतिशास्त्रविदो विदुः ॥१३३॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जातकर्मादिकं सर्वं लग्नभावं प्रशस्यते ।
भावशुद्धेर्विना यत्र तत्र कार्यं विनाशनम् ॥१३४॥

पराशरः—

मूर्त्यर्थधन्विवाहाख्या भन्त्रारिपथिसंज्ञकाः ।
आयुर्लनः कर्मलाभाऽप्राप्त्याख्या द्वादशः क्रमात् ॥१३५॥

घ्नन्ति पापास्त्र्याप्तिवर्जं भावात् सूर्यमहीसुतौ ।
नद्यन्तः कर्मभावं च सौम्याः पुष्णन्त्यरिं विना ॥१३६॥

नारदः—

शुक्रोऽस्तं वन पुष्पाणि मृत्युं मूर्तिं च चन्द्रमाः ।
याम्यादिगमनं कुर्यात् सर्वकाष्ठासु यायिनः ॥१३७॥

अभिजित्क्षणयोगोऽयमभीष्टस्तेषु सिद्धिदः ।
पञ्चाङ्गशुद्धिरहिते दिवसेऽपि शुभावहाः ॥१३८॥

यात्रा योगैर्विचिन्त्यातो योगाद्वक्षे समासतः ।
फलसिद्धिर्योगवशाद् राज्ञां विप्रस्य धिष्ण्यतः ॥१३९॥

मुहूर्त शक्तितोऽन्येषां शकुनान्तस्करस्य च ।
केन्द्रत्रिकोणेष्वेकेन योगः शुक्रज्ञमन्त्रिणाम् ॥१४०॥

अधियोगो भवेद् द्वाभ्यां त्रिभिर्योगाधियोगकः ।
योगेऽपि या सतां क्षेममधियोगे जयो भवेत् ॥१४१॥

योगाधियोगे क्षेमं च विजयार्थ निवर्तये ।
व्यापार शत्रु मूर्त्ये च चन्द्रमन्द दिवाकराः ॥१४२॥
रणे गतस्य भूपस्य जयलक्ष्मीः प्रमाणिकाः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अत्रिः—

जन्मराशेर्जन्मलग्ने निधने द्वादशेऽपि वा ।
शत्रुभे लग्नगे वापि तदीशाः शत्रवो यदि ॥१४३॥

भूत्वा विलग्नगाश्चेत्स्युर्गमनं विषवद् भवेत् ।
यो ग्रहो जन्मनि शुभो यो राशिः शुभवेशिकः ॥१४४॥

तावुभौ जन्मलग्नं च यात्रायां शुभदं त्रयम् ।
यात्रायोगान् प्रवक्ष्यामि यात्रा सा फलदा यतः ॥१४५॥

यदज्ञानाद् वृथा यात्रा षण्ड संभोगवद् भवेत् ।
ब्राह्मणः क्षत्रियविशां शूद्राणामपि सर्वदा ॥१४५॥
उपकारकरा ये च ये च वर्ज्या निषेधतः ।

लग्नार्कसंक्रमेष्वर्कबुधचन्द्रेषु च क्रमात् ॥
स्थितेषु योजयेत्तस्य यात्रा सर्वफलप्रदा ॥१४६॥

वसिष्ठः—

सपापके भ्रातरि सेन्दु सप्तमे सिते ज्ञयुक्ते हिबुके च निर्गते ।
सजीवलग्ने विनिहन्त्यशत्रूंल्लब्ध्वा च शून्यात्सगृहान् प्रतीयात् ।१४७।

त्रिकोण[1] (केन्द्राश्रयगाश्च सौम्यास्तृतीयषष्ठायगताश्च पापाः ।
फलन्ति यातुः फलमिन्दुरेको लग्नं चतुर्थं गतवांश्च तद्वत् ॥१४८॥

आपोक्लीमगते चन्द्रे) केन्द्रस्थे सुरपूजिते ।
योगः केन्द्र इति ख्यातो यातुरिष्टार्थसिद्धिदः ॥१४९॥

---

१ चापान्तर्गतः पाठः क. च. पुस्तकयोर्नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जगन्मोहने

चन्द्रोदये गुरौ चास्ते लग्ने वा सुरपूजिते ।
यदा तदा प्रयातस्य कार्यसिद्धि विनिर्दिशेत् ॥१५०॥

लग्नात् पणफरे चन्द्रे केन्द्रस्थे सुरपूजिते ।
योगः पारावतो यातुः शुक्रे वा लग्नकेन्द्रगे ॥
प्रबलौ यदि योगेशौ गमने सर्वसिद्धिदः ॥१५१॥

गर्गसंहितायाम् —

लग्नगस्तापकृत्सूर्यो वित्तगो हानिकृन्मतः ।
तृतीयो वृद्धिदः प्रोक्त श्चतुर्थो मानहानिदः ॥१५२॥

पञ्चमो भेदकारी च षष्ठः शत्रुविमर्दनः ।
सप्तमो मार्ग रोधी स्यादष्टमः कायशोषकः ॥१५३॥

आधिकृन्नवमः प्रोक्तो दशमः सौम्यकृन्मतः ।
लाभगो धनदो यातु रिःफगो वित्तनाशकः ॥१५४॥

चन्द्रस्य

लग्नगो रोगदश्चन्द्रः कोशस्थः कोशदः सिते ।
तृतीये जयदो यातुः स्थिरः श्रीदश्चतुर्थगः ॥१५५॥

पञ्चमः सिद्धिदो यत्नात् षष्ठगो बहुभीतिदः ।

॥१५६॥

लाभगो धनदः शीघ्रं रिःफगः क्लेशदः स्मृतः ॥१५७॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भौमस्य

क्षताङ्गो लग्नगे भौमे कोशस्थे बन्धुपीडितः ।
दुश्चिक्ये बहुमित्रः स्याच्चतुर्थे नष्ठवाहनः ॥१५८॥

मित्रस्थ भिन्नमित्रः स्याच्छत्रुस्थो रिपुघातकः ।
जूकगे भूरिभीतिः स्यान्निधने यमसद्मगः ॥१५९॥

नवमे पापके युक्त व्यापारस्थे प्रतापवान् ।
लाभगे घनवार्यान्ता व्ययगे रिपु भङ्गवान् ॥१६०॥

बुधस्य

बुद्धिसंपत् कायपीडा सिद्धिर्धैर्यं पराजयः ।
सौख्यं यातुः शुभं भीतिः फलं ज्ञस्यादितः क्रमात् ॥१६१॥

गुरोः

गुरोर्लग्नगते सिद्ध्ये विविधा जयसंहतिः ।
कोशे मानोन्नतिर्या तु स्तृतीये बलविद्रवः ॥१६२॥

चतुर्थे रत्नलाभः स्यातपञ्चमे भूतिसम्भवः ।
षष्ठे शत्रुसमृद्धिः स्याद् मार्गे शत्रुस्त्रिये हृतिः ॥१६३॥

अष्टमे श्लेष्मसंभूतिर्नवमैश्वर्यसंभवः ।
आज्ञासिद्धिस्तु दशमे लाभस्थानार्थसम्भवः ॥
रिः फगे तु प्रमादः स्यात् फलमेवं समुच्चितम् ॥१६४॥

शुक्रस्य

अर्यध्वगसितो यातुरात्मजापापहारकः ।
स्थानेष्वन्येषु जानीयाद् बुधवत्फलमस्य च ॥१६५॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जगन्मोहने

शनेः

रविसूनौ लग्नगते यातुरायुधपीडनम् ।
अर्थगे वक्त्रविकृतिः सहजैश्वर्यसंभवः ॥१६६॥
चतुर्थे जलरोगः स्यात् पञ्चमे पुत्रनाशनम् ।

षष्ठे शत्रुक्षयो यातुः सप्तमे क्लेशसंभवः ॥१६७॥
नैधने निधनप्राप्तिर्नवमे क्रौर्यसंभवः ।

दशमे विघ्नजननं लाभने स्वर्गसमुद्भवः[1]
अन्ते याति वियोगित्वं फलमेवं हि पातयोः ॥१६८॥
प्रतिशुक्रदोष निवृत्यर्थं पूजाविधिमाह

वसिष्ठगर्गवचनम् :—

काश्यपेषु वसिष्ठेषु भृग्वत्र्यङ्गिरसेषु च ।
भारद्वाजेषु वात्सेषु प्रतिशुक्रं न विद्यते ॥१६९॥

वसिष्ठः—

इममर्थमनुक्तत्वाच्[2] शास्त्रे पैतामहे क्वचित् ।
तस्मात् संमुखदोषोऽस्ति प्रतिशुक्रस्य सर्वदा ॥१७०॥

तद्दोषशमनार्थाय शान्ति कल्पे[3] समासतः
कृत्वा शान्ति प्रयत्नेन पश्चात् सर्वं समारभेत्[4] ॥१७१॥

भृगुलग्ने भृगोर्वर्गे भृगुवारे भृगूदये ।
उपोष्यो भृगुवारेऽपि यांवच् शुक्रोदयं प्रति ॥१७२॥

---

१ लाभे स्वर्ण समुभ्दवः पा. । २ इममर्थमयुक्तत्वात् लि.पु. । ३ वक्ष्ये पा. । ४ समारभेत वा अ. प. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रजतेन च शुद्धेन कारयेत् प्रतिमां भृगोः ।
लिखेदष्टदलं पद्मं कांश्यपात्रं च तण्डुलैः ॥१७३॥

शुक्लसूक्ष्मांवरैर्वेष्ट्वा प्रतिमां तत्र पूजयेत् ।
शुक्लपुष्पाक्षतै र्गन्धैर्मुक्ताहारैर्विचित्रितैः ॥१७४॥

उपचाराणि कार्याणि शुक्रेन्ते, अन्यदिक्षु च ।
तत्तन्मन्त्रैर्जपं कुर्यात् सम्यगऽष्टोत्तरं शतम् ॥१७५॥

कर्मान्ते तेन मन्त्रेण भक्त्या चार्घ्यं प्रदापयेत् ।
श्वेतगन्धाक्षतैः पुष्पैः क्षीरमिश्रेण वारिभिः ॥१७६॥

दैत्यमन्त्री दिवादर्शी चोशना भार्गवः कविः ।
श्वेतोऽथ मण्डली काव्यो विधूस्थे भृगवे नमः ॥१७७॥

दत्त्वेत्यर्घं प्रयत्नेन प्रार्थयेदेव भक्तितः ।
अनेनैव च मन्त्रेण प्राञ्जलिः प्रणतः स्थितः ॥१७८॥

त्वत्पूजयानया शुक्र ते संमुख समुद्भवम् ।
दोषं विनाशय क्षिप्रं रक्ष मां तेजसां निधौ ॥१७९॥

इति प्रार्थ्य प्रयत्नेन प्रतिमां भूषणान्विताम् ।
दैवज्ञायैव दातव्या श्वेताश्वसहितेन च ॥१८०॥

शिष्टे[१]भ्यो दक्षिणां दद्याद् यथा वित्तानुसारतः ।
ब्राह्मणान्भोजयेत् पश्चात् स्वयं भुञ्जीत बन्धुभिः ॥१८१॥

एवं यः कुरुते सम्यक् प्रतिशुक्र प्रपूजनम् ।
न तस्य तंमुखो दोषो विजयी चार्थवान् भवेत् ॥१८२॥

---

१ चापान्तर्गतः पाठः क. च. पुस्तकयोर्नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इतरेषां ग्रहाणां च पूजांकृत्वा प्रयत्नतः
तत्र संमुखजं दोषं तक्षणादेव नश्यति ॥१८३॥

सूर्याय कपिलां दद्याच् छङ्खं चन्द्रमसेऽपि वा ।
कुजाय वृषभं दद्यात् स्वर्णं दद्याद् बुधाय वै ॥१८४॥
गुरवे पीतवस्त्रं च (सिताकिभ्यां च नैविकिम् ।

शुक्रे चास्तं गते यत्र चन्द्रे वाऽस्तमुपागते ।
तयोर्बाल्ये च वृद्धौच) यात्राऽसौ भयरोगदा ॥१८५॥

वसिष्ठः—

विष्टिर्व्यतीपातमहेन्द्रचाप दिग्दाह धूम भ्रमणाभ्रघोषाः ।
तदा खेः संक्रमणे च वर्षे सुदुर्निमित्तं गमनं न कुर्यात् ॥१८६॥

तिथिं च रन्ध्रंकरणं च विष्टिर्योगं च पातं खलु वैधृतिं च ।
विहाय यात्रा रिपुभूपमाजौ हरेद्दृढं शंवरमाशुकामः ॥१८७॥

अष्टमाधिपतिर्यस्मिन् राश्यंशे गतवान् ग्रहः ।
तदंशाधिपतिर्गेहं प्रतिष्ठे भास्करे मृतिः ॥१८८॥

मृतपक्षजीवपक्षज्ञानम्

वसिष्ठः—

[१]राहुस्थितर्क्षं तस्यास्यं पुच्छं पञ्चदशं ततः ।
तदेव केतुर्विज्ञेयः सदा राहुः प्रतीपगः ॥१८९॥

आस्यम् अ भ कृ रो मृ आ पु ति अ म पू उ ह चि
स्वा. पुच्छम्
रे उ पू श ध श्र उ पू मू ज्ये. अ. वि.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्रयोदश त्रयोदश धिष्ण्यान्युभय पार्श्वयोः ।
मुखभागो मृतपक्षो जीवपक्षस्तु पृष्ठगः ॥१९०॥

रविः स्थायी शशी यायी तद्वशाच्च जयाजयम् ।
जीवपक्षगते सूर्ये मृतपक्षगते विधौ ॥१९१॥

यायिनां विजयस्तत्र स्थायिनां च पराजयः ।
जीवपक्षगयोः सूर्यचन्द्रयोः सन्धिमादिशेत् ॥१९२॥

उभौ पराजितौ ज्ञेयौ मृतपक्षगयोस्तयोः ।
भिन्नायनगयोरह्नि निशिचेदन्यथा वधः ॥१९३॥

स्वाष्टांशकं लग्नगते राशौवा लग्नगे सति ।
यातुर्भङ्गो भवेत्तत्र द्वादशे वाऽथ लग्नगे ॥१९४॥

जीवपक्षः

अष्टलग्नाधिपे यात्रा लग्नगे राशिपेऽथवा ।
दुःखशोकभयं यातुरथवा निधनं भवेत् ॥१९५॥

जन्मराशौ लग्नगते तदीशेवा विलग्नगे ।
अर्थलाभप्रदा यात्रा लग्नेशश्चेच् शुभग्रहः ॥१९६॥

शीर्षोदये लग्नगते तदीशे वाथ लग्नगे ।
अत्यन्तफलदा यात्रा तदीशश्चेच् शुभग्रहः ॥१९७॥

शुभग्रहे लग्नगते तदीशे वापि लग्नगे ।
अर्थलाभप्रदा यात्रा लग्नेशश्चेत् शुभग्रहः ॥१९८॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वर्गोत्तमांशगे लग्ने अथवापि सुधाकरे ।
यात्रा कामदुघा यातुर्माता पुत्रस्य वै तथा ॥१९९॥

दिग्द्वारभे लग्नगते तदीशे वा तदीश्वरे ।
अर्थलाभप्रदा यात्रा अथवा विजयप्रदा ॥२००॥

जन्मराशि विलग्नाभ्यां लग्ने चोपचये गृहे ।
संपूर्णफलदा यात्रा, अथवा विजयप्रदा ॥२०१॥

दिग्द्वारभेषु यात्रोक्तेष्वथवा सार्धभेषु वा ।
यात्रा रक्षति कर्तारं माता पुत्रमिवानिशम् ॥२०२॥

स्वराशिगे लग्नगते स्वांशगे मित्रगेऽपिवा ।
यात्रा रक्षति कर्तारं वत्स गौरिव सर्वदा ॥२०३॥

स्वोच्चगे खचरे लग्ने स्वस्थे तुङ्गांशगेऽपि वा ।
यात्रा रक्षति कर्तारं पितेवानुगतं सुतम् ॥२०४॥

स्वाधिमित्रगते सौम्ये लग्नगे वा तदंशगे ।
यात्रा रक्षति कर्तारं सुधियेवातुरं द्विजम् ॥२०५॥

वसुधिष्ण्योत्तरार्धाच्च पञ्चधिष्ण्येषु सर्वदा ।
याम्यदृग्यायिनां नृणां दुःखदा भङ्गदाथवा ॥२०६॥

अष्टमस्त्वभिजिन्नाम मुहूर्तो भङ्गदः सदा ।
याम्यदिग्यायिनां सन्ति गुणाश्च वहवो यदि ॥२०७॥

अन्यदिक्षु प्रयायिणां सुमुहूर्तो जयप्रदः ।
प्राक्तनं सुकृतं यद्वन्नराणां पुण्यकर्मणाम् ॥२०८॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यात्रा संपूर्णफलदा शुभैस्तुङ्गैस्त्रिकोणगैः ।
मध्यमा स्वसुहृद्भागैरधमा शत्रुनीचगैः ॥२०९॥

बलप्रदस्य खेटस्य वारवर्ग शुभप्रदः ।
इतर ग्रहवारादिर्यात्रायामशुभप्रदः ॥२१०॥

पञ्चाङ्ग दुष्टदिवसे लग्ने च दोष दूषिते ।
सा यात्रा भयदा यातुश्चोरभीति प्रदाऽथवा ॥२११॥

यात्रा लग्नेर्क संक्रान्ति दूषिते त्वयनेऽथवा ।
यातु र्मासत्रयादेव शत्रुरोग भयप्रदा ॥२१२॥

केन्द्रत्रिकोणगैः सौम्यै स्त्रिभवारि गतैः परैः ।
अलग्न रिःफ चन्द्रेण यात्रामीष्टफलप्रदा ॥२१३॥

यात्रा लग्नस्यकेन्द्रेषु शून्येषु शुभखेचरैः ।
निष्फलं गमनं तस्य जारजातस्य पिण्डवत् ॥२१४॥

त्रिकोणे द्वित्रि राशौ वा शून्ये यस्य शुभग्रहैः ।
निष्फला तस्य यात्रा स्यान्निन्दावादस्य वाग् यथा ॥२१५॥

यस्मिन् वारे दुर्मुहूर्ते लग्नं भङ्गप्रदं नृणाम् ।
रुक्प्रदं वारदोषं यत् तस्मात्तद् विफलं त्येजेत् ॥२१६॥

पश्चादभ्युदिते शुक्रे यायात्प्राचीं तथोत्तरम् ।
प्राच्यामभ्युदिते तस्मिन् प्रतीचीं दक्षिणादिशम् ॥२१७॥

घ्नन्ति क्रूरास्त्रिषष्ठाया भावान् हित्वा परान् सदा ।
पुष्णन्ति सौम्यखचरा षष्ठाष्टान्त्य विना परात् ॥२१८॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लग्नषष्टाष्टमं हन्ति चन्द्रषष्ठाष्टगः सदा ।
मृत्युलग्नस्थित श्चन्द्रो यातुर्मृत्युप्रदः सदा ॥२१९॥

एवमुक्त प्रकारेण नूनं यात्रां करोति यः ।
सर्वान्कामानवाप्नोति त्वरितान् तु न संशयः ॥२२०॥

इति श्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने केन्द्रत्रिकोणाश्रितयोगाऽध्यायः ।

अथ समरयात्राऽध्यायः

अथ राजाधिराजयोग्यः समरयात्रा प्रारभ्यते तत्र वसिष्ठगर्गयवनच्यवनमतानुसारेण—

उक्त्वा साधारणीं यात्रां युद्धयात्रां ब्रवीमि ताम् ।
व्रजन्ति ये नृपाः सूक्ष्म लग्ने ते जयिनः सदा ॥१॥

फलसिद्धिर्धिष्ण्यगुणैरग्रजानां भवेत् सदा ।
योगलग्नैः क्षितीशानां चोराणां शकुनैः भृशम् ॥२॥

मुहूर्तशक्तितोऽन्येषां निमित्तैश्च फलोदयः ।
तत्तद्युक्तप्रकारेण तस्माद् यात्रां करिष्यति ॥३॥

तिथिवासरनक्षत्र योगेषु करणेष्वथ ।
यात्रानुकूलेष्वेतेषु चन्द्रताराबलेऽपि च ॥४॥

योगलग्नयुते राज्ञां यात्रा च विजयप्रदः ।
विचित्रा योगलग्नान्ताः सम्यग् वक्ष्ये समासतः ॥५॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गुरौ वीर्ये केन्द्रगते बुधे वा भृगुनन्दने ।
विजयो नामयोगोऽयं यातुः स्याद् विजयप्रदः ॥६॥

लग्नदोषं बुधो हन्ति सितो लग्न द्वयं बली ।
कोटि दोषान् गुरुर्हन्ति एकोऽपि केन्द्रगो यदा ॥७॥

स्वराशिगे बुधे लग्ने सिते वा सुखनन्दिते ।
नन्द्यावर्ताह्वयो योगो यातुरिष्टार्थसिद्धिदः ॥८॥

स्वांशसंस्थे बुधे लग्ने शुक्रे वा देवपूजिते ।
शङ्खसंज्ञाह्वयो योगो यातुः कीर्तिप्रदः सदा ॥९॥

स्वराशौ स्वांशगे सौम्ये लग्नस्थे वा भृगोः सुते ।
जीवे वा वक्रयोगो[१]ऽयं यातुः शत्रुविनाशकृत् ॥१०॥

अधिमित्रांशगे सौम्ये सिते वाथ सुरार्चिते ।
लग्नगे मातृयोगोऽयं शत्रूणां नाशकृत् सदा ॥११॥

अधिमित्रगृहे स्वाधिमित्रांशस्थे भृगोः सुते ।
गौरवानन्दयोगोऽयं यातुरायुःप्रदः सदा ॥१२॥

उच्चांशगे लग्नसंस्थे बुधे वाथ गुरौ सिते ।
जयसंज्ञो महायोगो यायिनां शुभदः सदा ॥१३॥

स्वोच्चस्वोच्चांशगे सौम्ये लग्नस्थे वा भृगोः सुतेः ।
आर्ये वा कीर्त्तियोगोऽयं यायिनां श्रीप्रदः सदाः ॥१४॥

---

१ वज्रयोगो क. च. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शुभग्रह द्वये लग्नसंस्थे वा त्रितयेऽपि वा ।
योगोऽधियोगसञ्ज्ञोऽयं विजयी खलु भूप्रदः ॥१५॥

त्रिषष्ठलाभगेष्वेषु रविमन्दकुजेषु च ।
पूर्णचन्द्रो महायोगः पूर्णभद्रप्रदः सदा ॥१६॥

यत्रैकादशगे चन्द्रे भानौ वा प्रबले शुभे ।
अभयो नाम योगोऽयं भूरि भूति विनाशकृत् ॥१७॥

त्रिकोणगे शुभे खेटे सुबले वा द्वितीयगे ।
कल्याणसंज्ञो योगोऽयं यायिनां मङ्गलप्रदः ॥१८॥

यत्र सोच्चगते चन्द्रे लग्नादेकादशे स्थिते ।
जयन्तिनाम योगोऽयं शत्रुपक्ष विनाशकृत् ॥१९॥

वर्गोत्तमगते लग्ने शुभे वाथ बलान्विते ।
सिद्धिसंज्ञो महायोगो यायिनां सिद्धिदायकः ॥२०॥

लग्ने गुरौ विधौ षष्ठे शनौ षट्केऽथवा रवौ ।
पद्मयोगः शत्रुपक्ष क्षयकारी रणे सदा ॥२१॥

सौम्येष्वाप्यन्तकेन्द्रेषु परेष्वायधनत्रिषु ।
प्रभञ्जनो महायोगः शत्रुवादप्रभञ्जनः ॥२२॥

धर्मायगेषु सौम्येषु त्रिबन्धुषु परेषु च ।
कवचो नामयोगोऽयं शत्रुमस्तकभेदकृत् ॥२३॥

दशयोगं शत्रुजिह्वोत्पाटनं दीर्घदर्शना ।
भवारिस्थेषु सौम्येषु त्रिबन्धुषु परेषु च ॥२४॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शृणियोगः शत्रुपक्षं मत्तेभेन्द्रं श्रृणिः स्वयम् ।
शुभेनैकेन योगः स्यात् केन्द्रधर्मात्मजेन च ।।२५।।

तस्मिन् यातुरतिक्षेमं गमनागमनं सदा ।
त्रिकोणकेन्द्रसंस्थानं शुभाभ्यामतिसंज्ञकः ।।२६।।

योगस्तस्मिन् सदा याता जित्वा शत्रून् रणाङ्गणे ।
सिते केन्द्रगते सूर्ये लाभगे हरसंज्ञकः ।।२७।।

योगो महद्रणः शत्रुपक्षच्छेदकरस्तदा ।
लग्ने सौम्ये रवौ षष्ठे लाभगे देव पूजिते ।।
महापाशुपतो योगः शत्रुवर्गं विनाशकृत् ।।२८।।

स्वराशि संस्थिते शुक्रे लग्नलाभगते विधौ ।
ललाट लोचनं शम्भोस्तद्वद्दहति मन्मथम् ।।२९।।

उच्चस्थे लाभगे शुक्रे त्रिषष्ठे देव पूजिते ।
सुदर्शनो महायोगः शत्रुध्वंसकरो रणे ।।३०।।

शुभद्वयान्तरगते लग्ने चन्द्रेऽथवा गुरौ ।
लग्नगे वक्रयोगोऽयं शत्रुसंघविनाशनः ।।३१।।

लग्नान्त्यकेन्द्रगे चन्द्रे लग्नस्थे देवपूजिते ।
महाशङ्खाह्वयोयोगः प्रतिपक्षावमानतः ।।३२।।

भूसुते स्वोच्चगे लाभे मृगकुम्भगते यमे ।
नन्द्यावर्ताह्वयो योगो शत्रुकाष्ठा नलोरणे ।।३३।।

मेषगे भास्करे षष्ठे लाभगे स्वोच्चगे यमे ।
नक्षत्रपदयोगोऽयं शत्रुमेघानिलो रणे ।।३४।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भौमे स्वराशिगे लग्ने सौम्ये केन्द्रत्रिकोणगे ।
पुष्पयोगोऽरिविपिने कुठारः संगराङ्गणे ॥३५॥

चतुष्टयगते सौम्ये स्वतुङ्गे[१] वा स्ववर्गगे ।
रत्नयोगः शत्रुवन महादावानलः स्वयम् ॥३६॥

मित्रवर्गगते सौम्ये केन्द्रवर्गगतेऽपि वा ।
कल्याणयोगो वै पक्ष लाक्षारस हुताशनः ॥३७॥

शुभग्रहेषु केन्द्रेषु पापेषु त्रिभवारिषु ।
कुमुदो नाम योगोऽयं शत्रुसं भज केशरी ॥३८॥

पूर्वार्धगेषु सौम्येषु पापेष्विन्दु व्ययान्त्यगे ।
चक्रस्य योगः सापत्न्यत्रिपुराणां त्रिलोचनः ॥३९॥

परार्धगेषु सौम्येषु पापेष्विन्दौ भवस्थिते ।
शूलयोगस्त्वतिर्जाति पूतना केशवः स्वयम् ॥४०॥

एकान्तरगते लग्नात् सुखे खेटेऽथवा शुभे ।
वापीयोगस्त्वरिव्रात तिमिरौघ दिवाकरः ॥४१॥

यात्रायोगा मया प्रोक्ता यात्रा साफल्य दायिनः ।
यदज्ञानाद् वृथा यात्रा षण्ढ संभोगवद् भवेत् ॥४२॥

ब्रह्मक्षत्रियवैश्यानां शूद्राणामपि सर्वदा ।
उपकारकरा ये च ये च वर्ज्या निषेधतः ॥४३॥

---

१ स्वोच्चगे ग्र. प. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अयोगकाले – सिद्धेत्प्रोक्तकाले तु लक्षणम् ।
योगश्च प्रोक्तकालश्च यात्रिणां तौ समौ फले ।।
राजानो राजकार्यस्था योगैर्याता श्रियं ययुः ।।४४।।

अथ यात्राफणिचक्रम्

यात्रा चक्रं प्रवक्ष्यामि श्रृणु श्रीकण्ठभाषितम् ।
लभन्ते येन राजानो यात्रारम्भे शुभाशुभम् ।।४५।।

नाम्ना फणीश्वरं चक्रमष्टाविंशतितारकाः ।
अश्विन्यादीनि ऋक्षाणि धर्ममार्गादि योजयेत् ।।४६।।

तिष्याश्वाहिविशारवाश्च मित्रं शतभिषग् वसुः ।
एतानि सप्तऋक्षाणि धर्ममार्गे नियोजयेत् ।।४७।।

अजपाद मघास्वाति याम्यज्येष्ठा तुनर्वसूः ।
श्रवणं सप्तताराश्च, धनमार्गे प्रकीर्तितः ।।४८।।

अहिर्बुध्न्याभिजिन्मूलभगत्वष्टार्द्रकृत्तिकाः ।
एतावत्यः सप्ततारा रतिमार्गे प्रतिष्ठिताः ।।४९।।

विधीन्दुविश्वहस्ताश्च, उत्तरावरिपौष्णकाः ।
तारकाः सप्तसंख्याका मक्तिमार्ग व्यवस्थिताः ।।५०।।

रविधर्मे धने चन्द्रो मार्ग योर्यदि संस्थितौ ।
यायिनो विजयः प्राप्तः स्थायी भङ्गमवाप्नुयात् ।।५१।।

रविधर्मे शशीकामे र्तवने फललीदृशम् ।
कार्ये बन्धुजनैर्वैरं युद्धे भङ्गमवाप्तुयात् ।।५२।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रविधर्मे शशी मोक्षे मार्गयोर्यदि संस्थितौ ।
सर्वलाभमवाप्नोति ग्रहाः सौम्ये यथा स्थितिः ॥५३॥

रविचन्द्रौ स्थिते धर्मे सर्वकार्यं विचारयेत् ।
समयुद्धं भवेत्तत्र किञ्चित् स्थायी बली भवेत् ॥५४॥

रविर्धने शशी कामे सौम्ये सार्धं सुनिश्चितम् ।
राजा सन्धिं प्रकुर्वीत पश्चात् स प्रबलो भवेत् ॥५५॥

रविर्धने शशीमोक्षे संगरे तु यदा तदा ।
क्षितिलाभो भवेत्तत्र भृगुजीवबुधान्वितः ॥५६॥

सूर्यो रजोगतश्चैव सत्वमार्गे शशी तथा ।
हयलाभो भवेत्तस्य गुरुर्मार्गस्थितो यदि ॥५७॥

सूर्यो रजोगतश्चैव[1] चन्द्रे तत्रैव संस्थिते ।
कलहश्च महाघोर उभयोर्निधनं भवेत् ॥५८॥

(रजोगतःकाममार्गःसत्वगतो मोक्षमार्गगः ।)
रतिमार्गस्थितो भानुश्चन्द्र युक्ते तथैव च ॥५९॥

अर्थलाभो भवेत्तत्र बुधोमार्गस्थितो यदि ।
रविस्तमसि संयुक्तश्चन्द्रःसत्वेस्थितो यदि ॥६०॥

योषितश् चात्र लाभश्च सौम्यमार्गस्थितो यदि ।
रविस्तमसि संयुक्तश्चन्द्रो रजोगतस्तथा ॥६१॥

---

१ रतिगतः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्थायिनो मरणप्राप्तिर्यायी विजयमाप्नुयात् ।
रतिमार्गं गते सूर्ये चन्द्रे तत्रैव संस्थिते ॥६२॥

असौ भङ्गमवाप्नोति हतसैन्यैः पलायनम् ।
शुभमार्गगते भानौ शशी सत्वे स्थितो यदि ॥६३॥

संभवेत् तस्य रत्नानि सौम्यायुक्तःसुनिश्चितम् ।
शुद्धमार्गे गते सूर्ये चन्द्रे रजसि संस्थिते ॥६४॥

निष्फलाश्च प्रवर्तन्ते भक्षपानादि वर्जिता ।
शुद्धमार्गे सहस्रांशौ मदने संस्थिते विधौ ॥६५॥

सन्धिस्तस्य प्रजायेत युद्धं तत्र नविद्यते ।
चन्द्रे भानौ स्थिते मोक्षे लोके ख्याति प्रवर्तते ॥६६॥

यदि स्यात् गमनं राज्ञःप्रत्यावृत्तिर्न विद्यते ।
चन्द्रार्कयोःप्रचारेण फलाःषोडश कीर्तिताः ॥६७॥

चन्द्रभास्करयोर्योगात् फलाश्चत्वारि दूषिताः ।
सफलाःशुभसंयुक्ता मध्ये फलमवाप्नुयात् ॥६८॥

अफलाःक्रूरसंयुक्ताःकष्टं दोषमवाप्नुयात् ।
सौम्याश्चेत्तत्र संयुक्ताःसंपूर्ण फलमादिशेत् ॥६९॥

ईशोपदिष्टानि बहुनि तानि केचिद् विदां चक्रु रतीव शोभितम्[१] ।
फणीश्वरं नाम दिने दिने च प्रयाणकालेषु फलं त्वसाद्यम् ॥७०॥
धर्मार्थकामसंज्ञं च सत्वं रजस्तमःक्रमात् ।

१ केचिदिदं चक्रमतीव शोभितम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यात्रारम्भे पुरग्रामे अभिषेकक्रियासु च ॥७१॥
पणीश्वरमिदं चक्रं सर्वकार्येषु साधयेत् ।

इष्टनाड्यो हता धिष्ण्यैः षष्टिभागावशेषितैः ॥७२॥
अश्विन्यादिषु भुक्तेन युते यत्काल चन्द्रमा ।

यथा चन्द्रस्तथा सूर्यः कर्तव्यश्चेष्टकालिकः
अहोरात्रस्य मध्ये तु भ्रमन्तौ धिष्ण्यमण्डले ॥७३॥

अथसमरयात्रायोगो भूयोऽपि लिख्यते

वसिष्ठः—

द्व्यन्तरान्तरिते सौम्ये पापे चाथ विलग्नतः ।
वल्लरिर्दाम सा ज्ञेया विपक्षवनपावकः ॥७४॥

त्र्यन्तरान्तरिते सौम्ये पापे वा हिमदीधितेः ।
लाभगे चापयोगोऽयं शत्रु व्याल भुजङ्गभुक् [२] ॥७५॥

चन्द्रेप्येकादशे संस्थे येषु केषु परेषु च ।
मुशलो नाम योगोऽयं शत्रुदैत्यौघराघवः ॥७६॥

सौम्ये लग्नगते चन्द्रे लाभगे सुतभे शने ।
अन्यस्थानेषु सर्वेषु शत्रुपक्षाशनिःस्वयत् ॥७७॥

चरराशिषु संस्थेषु निखिलेषु ग्रहेषु च ।
लग्ने च रज्जुयोगोऽयं शत्रुणामशनिःस्वयम् ॥७८॥

---

२ शत्रुयोग भुजङ्गभुक् लि. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्थिरराशिषु संस्थेषु वैचरेष्वखिलेष्वपि ।
लग्ने चानलयोगोऽयं प्रतिपक्षकुलान्तकः ॥७९॥

द्विःस्वभावेषु सर्वेषु ग्रहेष्विन्दौ विलग्नगे ।
संवर्तयोगाःसापत्न्य गोवृन्दद्वीपिरुद्धतः ॥८०॥

लग्ने चन्द्रे च चरभे खेटेषु स्थिरभेषु च ।
यमदण्डो महायोगः शत्रु प्राणापहारकः ॥८१॥

चरराशौ लग्नगते ग्रहेषु स्थिरभेषु च ।
व्रह्मदण्डो महायोगःशत्रुप्राणापहारकः ॥८२॥

स्थिरराशौ लग्नगते सद्ग्रहेषु चरेषु च ।
योगःसंजीवनो ज्ञेयो विपक्षाधिक शूलधृक् ॥८३॥

स्थिरभेषु च पापेषु चरभेष्वितरेषु च ।
द्विस्वभावे लग्नगते योगःशत्रु विनाशकृत् ॥८४॥

केन्द्र द्वितीययोःसौम्येष्वितरेषु स्थिरेषु च ।
केशारयोगः सापत्न्य मेषसंघवृकः स्वयम् ॥८५॥

केन्द्र द्वित्रिषु सर्वेषु सत्सु खेटेषु यत्र वै ।
वीणायोगस्त्वरीयान मृत्युकं न रणाङ्गणे ॥८६॥

त्रिषष्ठगेषु पापेषु लाभगा जीवभार्गवौ ।
सिद्धियोगः सपत्नौघ मूषकानां च जाहकः [१] ॥८७॥

---

१ विडालः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सहजैकादशे पापे केन्द्रगे स्थिरभेषु च ।
अरविन्दो महायोगस्त्वरि संघारिणो कुल ॥८८॥

दशमस्थे शुभे लाभे चन्द्रेन्येषु च वन्धुषु ।
गोत्रयोगःशत्रुपक्ष गोत्राणां गोत्रभित् स्वयम् ॥८९॥

तत्वन्त्यगेषु सौम्येषु परेष्वरिभवेषु च ।
जीमूतयोगो वैपक्षपावके सप्तसागरः ॥९०॥

जन्मभे जन्मलग्ने वा तयोरीशे विलग्नगे ।
ताभ्यां केन्द्रत्रिषष्ठे त्रा यातुः शत्रुक्षयःसदा ॥९१॥

[1] शत्रुरष्टमलग्ने वा राशौ वा यदि लग्नगे।
तदीशराशौ लग्ने वा यातुः शत्रुक्षयः सदा ॥९२॥

कर्केऽर्के लग्नसंस्थे च चन्द्रे बन्धुस्थिते यदा ।
गतो राजा रिपून् हन्ति केशवो दनुजानिव ॥९३॥

षष्ठाष्टगेषु सौमेषु लग्नेष्वन्येषु तत्र तु ।
गतस्य रिपुसेनेशं तमुपैत्येभिसारिका ॥९४॥

लग्ने सौम्येऽष्टगे चन्द्रे लाभगेषु परेषु च ।
गतस्याग्रे वैरिचमूःखलमैत्रिवन स्थिरा ॥९५॥

यमे तृतीयगे लग्ने कुजे चन्द्रशुभे स्थिते ।
गतस्य शत्रुधरणीहस्तस्या निखिला तदा ॥९६॥

---

१ श्लोऽयं क. च. पुस्तकयोर्नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्विड्राशिगे लग्नजीवे शुक्रे वा प्यथवा बुधे ।
दहत्यरिगतो राजा कृष्णवर्त्मा यथा वनम् ॥९७॥

धिष्ण्ये चोपकुले लग्ने शुभे लाभस्थिते शनौ ।
शुष्यत्यरीन्गतो राजा सूर्यरश्मिर्यथा ह्रदः ॥९८॥

दिग्वर्गराशिलग्नस्थे दिगीशेवा भवस्थिते ।
गतो राजा रिपून् हन्ति पापं यद्वद् हरिस्मृतिः ॥९९॥

इन्दौ स्वक्षेत्रगे लाभे स्वोच्चगे लग्नगे रवौ ।
गतो राजा रिपून्हन्ति पापं पञ्चाक्षरी यथा ॥१००॥

गुरुवाक्यम्:—

लग्ने गुरौ बले दीप्ते विना नृत्युंनिशाकरे ।
षष्ठे दिवाकरे यातुर्यात्रा योगःशुभप्रदः ॥१०१॥

आरो वा सूर्यजोवापि लग्नगे दशमे रवौ ।
कर्मण्याये शिते ज्ञे वा योगोऽयं यातुरुत्तमः ॥१०२॥

यमारौ त्रिषडायस्थौ बुधजीवसिता तथा ।
महाबलयुतो योगो यातुरिष्टार्थदः सदा ॥१०३॥

गुरौ च लग्ने चन्द्रे वा षष्ठे चैव यमेश्वरः ।
सिते गृहे बुधे पुत्रे योगोऽयं यातुरर्थदः ॥१०४॥

त्रिषण् नवान्त्यगे चन्द्रे लग्ने च सबले बुधे ।
गुरौ केन्द्रे तदा याता राज्ये लक्ष्मी भवेन्नृपः ॥१०५॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आत्राय गृहगे शुक्रे केन्द्र देवगुरौ स्थिते ।
सप्ताष्टनवराशिस्थाः पापा यातुः शुभप्रदाः ॥१०६॥

अर्कोदये गुरौ वारे यात्रा यातुः शुभप्रदा ।
अर्कवर्ज्या ग्रहाः सर्वे तनये यदि संस्थिताः ॥१०७॥

निरन्तरगता योगा यात्रा यातुः शुभप्रदा ।
जीवे शुक्रे यदेकांशौ लग्नगौ गमने शुभौ ॥१०८॥

बुधशुक्रौ गुरो ज्ञो वा यात्रा योगास्त्रयः शुभा ।
चन्द्रे ज्ञसितयोर्मध्ये जलगे लग्नगेऽपि वा ॥१०९॥

प्रयातः श्रियमाप्नोति जित्वा शत्रून् महीमिमाम् ।
ज्ञशुक्रौ जलगौ चन्द्रः स्मरगो यदि गच्छति ॥११०॥

प्रयाति शुभदा, लग्नं यदि पश्येत् सुरार्चितः ।
गृहगेशे सूते चन्द्रे सप्तमे भार्गवे तथा ॥१११॥

तस्य कार्यस्य सिद्धिः स्याल्लग्ने गुरुदृशा युते ।
क्रमाद्राशौ नवांशे वा यात्रायां शुभदो गुरुः ॥११२॥

एवं भौमयुतादंशादशमांशे स्थितेऽथवा ।
तदंशर्क्षाद्दशर्क्षे वा सिते यात्रा शुभप्रदा ॥११३॥

एकान्तरगतौ भौमामरज्यौ केन्द्रगौ यदा ।
तदा यातुः शुभा यात्रा लग्ने शुभदृशायुते ॥११४॥

यदा गुरुसितौ तारामेकतायान्तै र्यदागतौ ।
अभिप्रेतमवाप्याशु सुखी यायात् स्वमन्दिरम् ॥११५॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बुधजीवौ यदा युक्तौ ज्ञशुक्रौ वा यदा तदा ।
गतौ त्युपेक्षिते भेन स्वगृहे प्राप्यतेप्सितान् ॥११६॥

यात्रा दिगीशयुक्तर्क्षे पञ्च पक्षे बली शुभा ।
यदि तिष्ठेत्तदा याता सर्वसंपदमाप्नुयात् ॥११७॥

गुरौ विलग्नगे क्रूरे कर्मगे लाभगेऽथवा ।
चन्द्रे नष्टगते चापि यात्रा शोभनदा भवेत् ॥११८॥

मन्दारार्कामराचार्येष्वेकः स्वोच्चेऽपि लग्नगः ।
कर्कटस्थे निशानाथे यात्रा नृणां शुभप्रदा ॥११९॥

चन्द्रे लग्ने चतुर्थस्थः शुभकर्म गतो यदि ।
विना योगेन यात्राय यातुः शुभफल प्रदा ॥१२०॥

चन्द्रस्य द्वादशे कश्चिद् रविवर्ज्येषु शोभनः ।
द्वितीये चोभयत्रापि यात्रा योगः शुभाश्रयः ॥१२१॥

गुरूदय भवेत्पापा कर्मगे च निशाकरे ।
पञ्चमे च न कश्चित् त्वेता यात्रा सर्वार्थसिद्धिदा[१] ॥१२२॥

जीवशुक्रबुधेज्येको बली केन्द्र त्रिकोणगः ।
योगोयं ब्रह्मणा प्रोक्तो यात्रायां शुभदः स्वयम् ॥१२३॥

अतियोगस्तथा द्वाभ्यां त्रिभिर्योगोऽधियोगकृत् ।
एभिः फलं पृथग् ज्ञेयं यथोवाच चतुर्मुखः ॥१२४॥

---

१ त्वेतायात्रा सर्वसिद्धिदा प. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एकं देवप्रदिष्टेषु[१] बहुयोगेषु लक्षणैः ।
तदा योगातियोगः स्याद् यदि चोक्तं स्वयम्भुवा ॥१२५॥

अतियोगगता याने क्षेमेनायाति संयुगे ।
जित्वा रिपून् धनं लब्ध्वा यशसा च जयश्रिया ॥१२६॥

योगातियोगे ये यातास्ते वाऽऽयान्ति धनैर्युता ।
जित्वा रिपूञ्श्रियं धात्रीं लब्ध्वा क्षेमेण सद्मगाः ॥१२॥

गरु :—

चन्द्रोऽष्टमे स्वजन्मर्क्षादष्टमे वा तयोर्यदि ।
शत्रुभे लग्नगेहस्थे यदि यात्रा गरासन ॥१२८॥

लग्नचन्द्रर्क्षयोः षष्ठराशीशौ यदि लग्नगौ ।
तदा तु गमनं नृणां तुल्य स्याद् विषभक्षणैः ॥१२९॥

सौम्यग्रहा विलग्नस्था यदा वीर्य विवर्जिता ।
केन्द्राणि शुभयात्राणि तदा यत्रा विषोपमा ॥१३०॥

एवं भावफलं प्रोक्तं यातुर्यात्रोदयर्क्षगः ।
अनर्थप्रोक्तभावेऽपि केचिद्दद्युः शुभग्रहाः ॥१३१॥

तानहं संप्रवक्ष्यामि यथा प्रोक्तं स्वयम्भुवा ।
शुभवर्गे शुभैर्दृष्टा मित्रदृष्टा शुभप्रदा ॥१३॥

स्वकीयाष्टक वर्गे यो बहुविन्दुगता ग्रहाः ।
ते चापि शुभभावस्था अपि शोभनदा ग्रहाः ॥१३३॥

---

१ दैवप्रतिष्ठेतु क. च. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तथाहः काश्यपः —

सर्वाष्टकग्रहफलैर्विनियुज्य चक्रं
मूर्त्यादि गण्यमशुभं शुभतत्समानम् ।
जन्मादि तत्फलमशेषदशां समीक्ष्य
यात्रा विवाहसमये बहुवर्ग युक्तम् ॥१३४॥

श्रीपति :—

जननसमयलग्नान्नैधने जन्मभाद् वा
निजरिपुभवनाद् वा शत्रुभे लग्नयाते ।
पतिभिरुततदीयैर्लग्नगैः पार्थिवानां
गमनमथ विषं वा भक्षितुं तुल्यमेव ॥१३५॥

अस्यार्थः । निजरिपुभवनाद् वेति शत्रु जन्मराशेः षष्ठराशौ लग्नगेऽथवा जन्मलग्न जन्मराशितो यावष्टमौ राशी तत्पतिभ्यां शत्रुलग्नाढ्यः । लग्ने राशिस्तत्पतौ वा लग्नगे, एवं विधयोगे गमनं विषभक्षणतुल्यम् ।

दैवज्ञवल्लभेऽपि—

जन्मर्क्षलग्नाष्टमराशि लग्नं षष्ठोदयं शत्रु विलग्नतो वा ।
तद्राशिनाथैरथवोदयः स्थितैः करोति नूनं विषभक्षणं वा ॥१३६॥

वसिष्ठ :—

क्षुते मार्जारसमरे गृहदाहेक्षतौ स्त्रियः ।
दुरुक्ते माहिषे युद्धे कुटुम्बकलहादिके ॥१३७॥

सुवलिते वारादीनां प्रत्यह्वाने च मैथुने ।
वृषवत्कटकादीनां यात्रा युद्धे त्वनिष्टदा ॥१३८॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विविधानि निमित्तानि बहूनि शकुनानि च ।
एतेषामधिका यातुर्मनः शुद्धिर्जयप्रदा ॥१३९॥

उद्वाहे व्रतबन्धे च प्रतिष्ठायां महोत्सवे ।
असमाप्ते न गन्तव्यं मृतके सूतकेऽपिवा ॥१४०॥

मार्जार युद्धे कलहः कुटुम्बे रजस्वलास्त्री दहनं गृहेषु ।
अकालवृष्ट्युत्सवसूतकानि प्रयाणकाले ष्वशुभं वदन्ति ॥१४१॥

पराशर :—

जीवः शशाङ्कः शुक्रो वा मामर्गध्येऽस्तगो यदि ।
तत्रैव निवसेद् राजा यावदभ्युदितो भवेत् ॥१४२॥

विजयतुरगभीतान् पुण्यलोकाभिलाषी
विरथशिथिलवस्त्रान् मुक्त शस्त्रास्त्रकेशान् ।
तृणमुरवगतसत्वान् प्राञ्जलि युद्ध मानान्
क्षतपतितननारीन् युद्धभूमौ न हन्यात् ॥१४३॥

दिग्भक्षणमाह गुरु :—

कृतान्नं कृशरान्नं च मत्स्यान्नं पायसं तथा ।
पूर्वादिषु क्रमाद्भुक्त्वा यात्रासिद्धिमवाप्नुयात् ॥१४४॥

अथ वारभक्षणम्

माञ्जिकां परमान्नं च काञ्जिकं च पयोदधि ।
दधिमत्क्वथितं क्षीरं तिलोदनमनुक्रमात् ॥१४५॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कुल्माषांश्च तिलान् साज्यतण्डुलान् घृतगोघृतान् ।
पायसं मृगमांसं च तत्सारं घृतपायसम् ॥१४६॥

प्रियङ्गुकमपूपं च मण्डकान् कदलीफलम् ।
कुर्माश्वा विद्रतो गोधान् शलं नीबारकोदनम् ॥१४७॥

कृशरं मौद्गिकान्नं च यवान्तं मत्स्यभोजनम् ।
चित्रान्तं च सदघ्यन्नमश्विभाच्च यथाक्रमात् ॥१४८॥

भुक्त्वा सम्यग् व्रजेत् याता यात्राफलमवाप्स्यति ।
ग्रहयज्ञं ततः कृत्वा पूर्वोक्तविधिना ततः ॥१४९॥

दिगीश्वराकृतिं कृत्वा सुवर्णेन स्वमन्त्रकैः ।
स्वस्वमन्त्रैः सुगन्धाढ्यैर्धूपैर्दीपैर्मनोरमैः ॥१५०॥

तद्वर्गवस्त्रैर्नैवेद्यैर्भक्त्या सम्यक् प्रपूजयेत् ।
ऐरावतस्थं देवेन्द्रं वज्रपाणिं शचीपतिम् ॥
स्वर्णवर्णं सहस्राक्षं दिव्याभरणभूषितम् ॥१५१॥

अथ पावकस्य

स्वाहाप्रियं मेषसंस्थं षडक्षस्त्रुक्स्त्रुवायुधम् ।
सप्तजिह्वं सप्तहस्तं रक्तवर्णं हुताशनम् ॥१५१॥

अथ यमस्य

रक्तवर्णञ्च कृष्णञ्च यमं महिषवाहनम् ।
दण्डपाणिं लोहिताक्षं सर्वाभरणभूषितम् ॥१५३॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ निर्ऋते

खड्गचर्मधरं नीलनिर्ऋतिं नरवाहनम् ।
ऊर्ध्वकेशं विरूपाक्षं दीर्घग्रीवायुतं विभुम् ॥१५४॥

अथ वरुणस्य

वरुणं कालिकानाथमनर्घमणि भूषितम् ।
नागपाशधरं पीतवर्णं मकरवाहनम् १५५॥

अथ पवनस्य

वायुं कृष्णमृगासीनमञ्जनापतिमव्ययम् ।
दण्डपाणिं शुक्लवर्णं जन्तूनामन्तरात्मकम् ॥१५६॥

अथ कुवेरस्य

अश्वारुढं दण्डपाणिं चित्रलेखापतिं प्रभुम् ।
धनाशीशं स्वर्णवर्णं यक्षगन्धर्वनायकम् ॥१५७॥

अथ रुद्रस्य

गौरीपतिं चन्द्रमौलिं शुद्धस्फटिकसन्निभम् ।
देवान् गुरून् पितॄन् विप्रान् स्वस्तिवाचन पूर्वकम् ॥
नत्वा तुष्टः प्रीतमना व्रजेन्मङ्गल निश्चलैः ॥१५८॥

तस्मिन् महूर्ते स्वयमप्रयाते प्रयोजना पेक्षितया यदैव ।
तत्रैव तन्निर्गमनं च कार्यं स्वात्मासमानं च तदुच्यमानम् ॥१५९॥

श्वेतातपत्रध्वजचामाराश्च विभूषणोष्णोष गजाम्बराणि ।
आदोलिकारन्तरथाश्ववारा शय्यासनाद्यं मनसस्त्वभीष्टम् ॥१६०॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कस्तूरिका गन्धफलाक्षतौघ कर्पूर ताम्बूल सुलक्षणानि।
विचित्रपारावतपक्षिसंघं प्रचालयेद् गन्धचयप्रबन्धम् ॥१६१॥

चित्रांणि रम्याणि गृहाणि हेममयीति रौप्यानि घटानि यानि।
चालयेन्मुख्य पुरोहिताश्च भिषग्ग्रहज्ञैश्च हितोपदिष्टान् ॥१६२॥

प्रस्थानं धनुषां पञ्च शतान्युत शतद्वयम्।
स्वदे शेवदनान्नत्वा दशभिः प्रस्थितो गतः ॥१६३।

आरम्भ निर्गमाद् यायाद् क्षितिपो दश वारतः।
मण्डलीकः सप्तरात्रौ प्राकृतः पञ्चरात्रकः ॥१६४।

अत ऊर्ध्वं व्रजेद् भूपो भद्रेण दिवशे नृपः।
राज्ञोऽन्ये प्राकृता ज्ञेया विप्रवैश्यादयो भुवि ॥१६५॥

सुबोधिः—

यात्राकाले विवाहे च वस्त्रालङ्कार भूषणे।
शुभेसन्धौ प्रवेशे च चन्द्रचारः[१] प्रशस्यते ॥१६६॥

विग्र ः द्यूतयुद्धे च स्नानभोजनसंगमे।
व्यवहारे भये भङ्गे भानुनाडी प्रशस्यते ॥१६७॥

वामाचार प्रवाहे च नगच्छेत् पूर्वमूत्तरम्।
दक्षचार प्रवाहे तु नगच्छे् याम्यपश्चिमम् ॥१६८॥

परिपन्थि भयं तत्र गतो सौ न निवर्तते।
वामे वा दक्षिणे वापि यत्र वायुः प्रवर्तते ॥१६९॥

---

१ चन्द्रनाडी।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आदौ तत्पादमुद्धृत्य यो गच्छेत् कार्यसिद्धये ।
कृत्वा तु मैथुनं रात्रौ प्रभाते योधिगच्छति ।।
नासौ फलमवाप्नोति कृच्छ्रेण न निवर्तते ।।१७०।।

तत्रमनुः—

यात्राकाले तु संप्राप्ते मैथुनं यो निषेवते ।
रोगार्तः क्षुत्पिपासश्च[1] स निवर्तेत वा नवा ।।१७१।।

वसिष्ठः--

शस्ता वाग् वामभागे शिवगुरुरुरुच्छुच्छुन्दरी कुम्भकाकः
स्वर्णाक्षीणा प्रयाणे विहगगणपतिर्दक्षिणाः क्षिरवृक्षा ।
कृष्णादन्यच्चतुष्पादति शुभकरो दक्षिणान् वामभागे
व्यस्तं सर्वं प्रवेशे खरदिनविदृशो' पूर्ववद् वाक्प्रशस्ता ।।१७२।।

चाषवभ्रुभरद्वाजाश्छागो बर्हि तथैव च ।
एतेषां दर्शनात् सिद्धिर्विजयश्च प्रदक्षिणात् ।।१७३।।

अर्चास्त्वभिमुखं यान्ति छत्रचामरदीपकैः ।
नृत्यमङ्गल घोषाद्यैः सहिता राज्य लाभदा ।।१७४।।

दृष्टे शवे रोदनवर्जिते च संपूर्णयात्रा फलमेव तत्र ।
प्रवेशकाले तु शवः शव त्वं करोनि तद्रोदनवर्जितेऽपि ।।१७५।।

विडालसर्पशशक गोधाशूकर कीर्तनम् ।
शुभमालोकनं नेष्टं तदुक्तं वा शुभप्रदम् ।।१७६।।

---

१ क्षुधितः पिपसितश्च ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कन्या गोवाद्यशङ्खं दधिफलकुसुम पावक दीप्यमानं।
यानं वा गोप्रयुक्तं हयगजवृषभं पूर्णकुम्भं द्विजं वा ।।
उद्धृत्याज्यं च मांसं[1] जलचरयुगलं सिद्धमन्नं शवं वा
वेश्यास्त्री मद्यभाण्डं प्रियहितवचनं मङ्गलं प्रस्थितानाम् ।।१७७।।

गुडलवणवसास्थिक्लीव कार्पास पङ्क
प्रहरणरिपुमत्तोन्मत्तपङ्गवङ्गहीनैः।
पतित जटिलमुण्डैर्व्याधिताभ्यक्ततैलै–
रखिलफलविनाशः क्षुत्पिपासार्तभूतैः ।।१७८।।

शाखामृगाख्यभल्लूक दर्शनं स्वरमिष्टदम् ।
एतयोः कीर्तनं यत्र यातुः कार्यं विनाशनम् ।।१७९।।

नग्नान्धमुक्तकेशास्थि कुब्जवन्ध्या विरूपकेः ।
कषायेन्धन नास्तिक्यरजकैः कार्यनाशनम् ।।१८०।।

आयुर्वृद्धि जनयति तिथिः स प्रतापा च लक्ष्मीं
दुःस्वप्नोत्थं दुरितहरणं दुर्निमित्तं च चारः।
नक्षत्रं वा नयतु सकलान्याशु पापानि दूराद्
योगो वृद्धि दिशतु करणं वाञ्छितार्थस्य सिद्धिः ।।१८१।।

इति श्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्षमणाचार्यविरचिते जगमोहवे महाराजधिराजयोः समरयात्राऽध्यायः ।

वसिष्ठः—

अथ प्रतिष्ठां कथयामि सम्यक् शिवस्य विष्णोश्च तथा परेषाम् ।
सौम्यायने देवगुरौ च शुक्रे संदृश्यमानेय दिवारकाणाम् ।।१।।

---

१ उद्धृत्याज्येन मांसं पाठान्तर ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अपरेषामितिन मातृभैरव वाराह नारसिंह त्रिविक्रम दुर्गा व्यतिरिक्तानामेषामुग्रदेवतानां प्रतिष्ठादक्षिणायने कर्तव्या । तथा च वैशंपायन संहितायामभिहितम्—

मातृभैरव वाराह नारसिंह त्रिविक्रमाः ।
महिषासुर हन्त्री च स्थाप्या स्युर्दक्षिणायने ॥२॥

कुम्भे भानौ न प्रशस्ता प्रतिष्ठा कुम्भं पश्येच्चेद् बलीयान् न जीवः ।
पश्येत् संस्था सा प्रतिष्ठेति चोक्ता देवाचार्यागस्त्य गर्गादिभिश्च ॥३॥

नारदः—

श्रीपदं सर्वगीर्वाणस्थापनं चोत्तरायणे ।
गीर्वाण पूर्व गीर्वाण मन्त्रिणो[1] दृश्यमानयोः ॥४॥

कालविधाने—

नक्रिया निमिषगे मिथुनाधिरूढे
पद्माकर प्रणयिनि प्रवले शशाङ्के ।
शुद्धे नभस्यमरमन्त्रिणि दैत्यपूज्ये
स्फूर्जद् द्युनामभिहिता त्रिदश प्रतिष्ठाः ॥५॥

श्रीपतिः—

सप्तर्षयो यत्र चरन्ति धिष्ण्ये कुर्यात् प्रतिष्ठां खलु तत्र शेषात् ।
श्रीव्यासवाल्मीक पुरोद्भवानां तदा स्मृता वाक्यतिभे ग्रहाणाम् ॥६॥

---

१ बृहस्पति शुक्रयोः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वसिष्ठः—

मासे तपसे तपसि प्रतिष्ठा धनायुरारोग्यकरा च भर्तुः[२]।
चैत्रे महारुग् भयदा च शुक्रे समाधवे पुत्रधन प्रदासा ॥७॥

सौम्येन पौषे बलदुःखदा सा वलक्षपक्षे शुभदः समस्ता ।
सदैव तत्राद्यदिनं विहाय, अन्त्य त्रिभागं परि हृत्य कृत्स्नम् ॥८ ।

पक्षोऽपि शस्तः खलु पक्षयोश्च त्यजेदवश्यं नवमी चतुर्थी ।
चतुर्दशीपर्वतिथिप्रतिष्ठा तास्वेव कुर्वीत यदि प्रतिष्ठा ॥९॥

विशेत्तदेवं न लभेत पूजां तेजोवृद्धि क्षेमवृद्धचह्निदग्धा ।
शान्ताकारा सुप्रसन्ना दृढा च आद्यं चन्द्रात्स्थापनीयं नितान्तम् ॥
सूर्यादीनां वासरे तु प्रतिष्ठा··················॥१०॥

कालविधाने—

तिष्यादित्य शशाङ्के पौष्ण पवन प्राजेशहस्तोत्तरा
पूज्या वैष्णव मूलमैत्रवसवः केचित् प्रतिष्ठां बुधाः ।
रिक्तां छिद्रतिथिं च पर्वविरहर्यादौ प्रतिष्ठा विधौ
देवानां गुरुचन्द्र भार्गवविदां वारांशकाः स्युः शुभाः ॥११॥

देवानां स्थिरराशयः शुभकराः श्रेष्ठाः प्रतिष्ठाविधौ
देवीनामुभयो दयाश्च कथिता क्षुद्रात्मना वां चरेत् ।
सौम्याः केन्द्रसुतार्थ धर्मनिरतास्त्यक्त्वा शशाङ्कं रिपौ
पापाः शत्रुभवत्रिगाश्च सकलाः शुद्धेष्टमे स्युः शुभाः ॥१२॥

---

२ कर्तुः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विघ्नाधीशं क्षेत्रपालं मृडानीं दुर्गां ज्येष्ठां भद्रकालीं च मौनीं ।
भक्त्या चापि प्रक्षणेऽपि प्रबुद्धे राज्ञः कर्तुः स्थापयेच्चानुकूले ॥१३॥

वसिष्ठः—

हस्तत्रये मित्रहरित्रये च पौष्णद्वयादित्यसुरेज्यभेषु ।
तिस्रोत्तरा धातृशशाङ्कभेषु सर्वामरस्थापन मुत्तमं स्यात् ॥१४॥

नारदः—

कुजवर्जित वारेषु कर्तुः सूर्यं बलप्रदे ।
चन्द्रतारा बलोपेते पूर्वाह्ले शोभने दिने
शुभलग्ने शुभांशे च कर्तुर्न निधनोदये ॥१५॥

वसिष्ठः—

सूर्येन्दुभौमार्क्यहिकेतवश्च लग्नस्थिता नैधनगाश्च कर्तुः ।
सौम्यग्रहा लग्नगताः सदा ते त्वायुर्धयारोग्यकराश्च नूनम् ॥१६॥

नारदः—

राशयः सकला श्रेष्ठाः शुभग्रह निरिक्षिता ।
(शुभग्रहयुते लग्ने शुभग्रह युतेक्षीते ॥)
राशिः स्वभावजं १ हित्वा फलं ग्रहजमाप्नुयात् ॥१७॥

वसिष्ठः—

लग्न द्वितीयेश भरवचरेन्द्राश्चन्द्रश्च पुत्रार्थ सुखप्रदाः स्युः ।
तत्रैव पापाः प्रतिपक्ष दुःख शोक प्रदा व्याधिकरा सदैव ॥१८॥

---

१ राशीशो भावजं ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

असौम्यसौम्या ह्रीमदीधितिश्च तृतीयगा लाभकरा नितान्तम् ।
चतुर्थगा लाभकराश्च सौम्या विधुश्च पापा विसुखप्रदाः स्यु ॥१९॥

आनन्ददाः पञ्चमगाश्च सौम्या विधुश्च पापा रिपुभीतिदाः स्युः[१] ।
शत्रुस्थिताः शत्रुविनाशदाः स्युः क्रूराः सचन्द्रा भयदास्तु सौम्याः॥२०॥

द्यूनस्थिताः सेन्दुशुभा दिशन्ति लाभं परे प्रीतिकराः सदैव ।
सर्वे ग्रहा नैधनदा सौम्यास्त्वसौम्याः खलु मृत्यु संस्थाः ॥२१॥

नवम स्थानगाः सौम्याः सेन्दवो[२] विजय प्रदाः ।
[३](असौम्या नवमस्थाने[४] दुःखशोकभय प्रदाः । ॥२२॥

दशमस्थानगाश्चन्द्र सहिताः सौम्यखेचराः[५] ।
अर्थलाभकराः पापा व्याधिशत्रुभयप्रदाः ॥२३॥

लाभस्थानगताः सर्वे खेचरा बहुलाभदाः ।
व्ययदा व्ययगाः पापाः सेन्दवः क्लेशदाः शुभाः ॥२४॥

एकोऽपि जीवो बलवान् तनुस्थः सितोऽपि सौम्योऽप्यथवा बलीचेत् ।
दोषानशेषान् विनिहन्ति सद्यस्कन्दो यथा तारक दैत्यवर्गम् ॥२५॥

[६]विष्णोः प्रतिष्ठोपनमङ्गलाया स्वस्तं घटेभैः कमलासनस्य ।
पिनाकपार्णेमिथुने विलग्ने सिंहेपतङ्गस्य तदंशकेन ॥२६॥

इति वसिष्ठः ।

---

१ सौम्यास्त्वसौम्याः खलु मृत्यु संस्था लि. पु. । २ सदैव लि. पू. ।
३ चापान्तर्गतः पाठः च. प. पुस्तकयोर्नास्ति । ४ स्थापने तत्र अ. क. ।
५ सौम्याः सहिताः शुभखेचराः अ. क. । ६ श्लोकोऽयं वसिष्ठसंहितायांन वर्तते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ श्रीपतिः—

सिंहोदये दिनकरे मिथुने महेशो नारायणस्य युवतौ घटभे विधातुः ।
देव्यो द्विमूर्तिभवनेषु तिथेशनि या क्षुद्रा स्थिरश्चरगृहे निखिलाश्च देवाः ॥२७॥

केन्द्रत्रिकोणभवमूर्तिषु सद्गृहेषु चन्द्रार्कभौमशनिषु त्रिषडायगेषु ।
सांनिध्यनेति नियतं प्रतिमासदेव कर्तुः सुखार्थसुतसंपदरोगता च॥२८॥

हन्त्यर्थं हीनं त्वमरप्रतिष्ठा कर्तारमृत्विग्वरविप्रमुख्यम् ।
मन्त्रैर्विहीना त्वथ कर्तृभार्यां यदा तदा लक्षण हानि तश्च ॥२९॥

इति श्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने सकलदेवप्रतिष्ठाऽध्यायः ।

अथोत्तमराजलक्षणानि

दुष्टस्य दण्डः सुजनस्य सेवा न्यायेन कोषस्य च संप्रवृद्धिः ।
अपक्षपातोऽर्थिषु राष्ट्ररक्षा पञ्चैव यज्ञाः कथिता नृपाणाम् ॥१॥

दैवज्ञविप्र सुहृदाप्तवचांसि राजा येन प्रियस्य मति वेष्टित हृष्टबुद्धिः।
सेनाधिपेन रहितान्ध इवाचिरेण हास्यं समेति वशमापततो द्विषां स ।२।

कनकमयविताने नैकरत्ने विचित्रे
दशशतकिरणश्चेद् विद्धवेधव्यसूर्यः ।
विविधवर वधूनामङ्कशायीनिपश्यत्
स्तनसुखवर लक्ष्मीस्वर्गलोकं सुखाय ॥३॥

राजेन्द्रोत्तर पौष्णमित्रदिनकृत्प्राजेशतिष्यादिति
श्रीनाथेषु सितार्यसौम्यशशिनां होरांशवारादिषुः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रिक्तामन्त्यतिथिं विहाय वनिता तौली मृगं वृश्चिकं
कुर्याच्छुद्धि युतेऽष्टमेऽह्निविमले राजाभिषेक क्रियाम् ॥४॥

इति कालविधाने ।

श्रीपतिः—

विलग्न जन्मेश दिनाधिनाथ मार्तण्ड धात्री तनयैर्बलिष्ठैः ।
गुर्विन्दुशुक्रैः स्फुरदंशुजालैर्महीपतीनामभिषेक इष्टः ॥५॥

वसिष्ठः—

मूलत्रिकोण स्वगृहोच्च मित्रगृहस्थितैर्वाऽपि तदंशसंस्थैः ।
शुभे विलग्ने सततं ग्रहेन्द्रा दिशन्ति लक्ष्मीं विपुलां च कीर्तिम् ॥६॥

स्वनीचगैः वैरिगृहादिगैर्वा ह्यस्तं गतैर्वक्रमुपागतैर्वा ।
परोदये शोकभयं त्वकीर्तिं दिशन्ति राज्ञां भृशमम्बराटाः ॥७॥

शीर्षोदये चोपचये गृहे वा स्वजन्मलग्नादथ लग्नगेऽपि ।
शुभग्रहैर्युक्तनिरीक्षते वा पदंस्थिरं स्यात् सततं च राज्ञाम् ॥८॥

शुभेषु चन्द्रयोगेषु स्वयोगेषु शुभेषुच ।
राजयोगेषु यो राजा त्वभिषिक्तः क्षीतीश्वरः ॥९॥

[१]श्रीमान् कुलिनो व्यसनेऽतिशूरः श्रुतिस्मृतिज्ञः सुतवान् सुदक्षः ।
धर्मस्वरूपस्त्वगतस्त्वलुब्ध : शुचिः स्थिरो नीतिपरः सुरूपः ॥१०॥

रणे प्रत्याशन्ने सदसि नृपतिर्मन्त्रिविदितं बलोत्साहं कुर्यादखिलबल-
विद्रावणक ...... ।

१श्लोकोऽयं च पुस्तके नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रयत्नाद्दैवज्ञः कथयति जनैः सत्यवचनो निमित्तानिष्टानि
द्विपतुरगयोगादिषु च मे ।।११।।

अर्थाभिलाषी निपुणः कलासु दक्षः सुवेशः प्रियवान् कृतज्ञः ।
वृद्धोपसेवी गुणवान् गभीरः स्वरन्ध्रगोप्ता पररन्ध्रवेत्ता ।।१२।।

दाता सहिष्णुर्विजितेन्द्रियश्च मानी समस्ताङ्गयुतो विनीतः ।
उत्साहमन्त्रप्रभुशक्तियुक्तो नानाविधोपाययुतः सुभीतः ।।१३।।

पञ्चाङ्गमन्त्रे कुशलः प्रगल्भः काहष्कवृन्दो विजयी सदा सः ।
पञ्चाङ्गमन्त्र त्वथ षड्गुणानां नामानि वक्ष्ये त्वथवा पृथक् च ।।१४।।

वृह्मयामलेनोक्तम्--

बाधाशक्ति स्वपरबलयोः सामभेद प्रधानं
दानै......कृत्वोपायैः सर्वदा सर्बभेदैः ।
साम्ना साधून्धनविरहितानर्थलध्वंश दानैर्नानाभेदै स्त्रिभिरपिनयैः
साधयेत् तानदण्डैः ।।१५।।

वाक्पारुष्यं दण्डपारुष्यमिर्ष्या द्रोहस्तद्वत् पैशुनं साहसं च ।
अर्थस्यैवं दूषणं चाष्टसंख्यः क्रोधोद्भूतो वर्ग एष त्व नष्टः ।।१६।।

दुर्गस्थितं फलमपक्वमनल्प यत्नात्[१]
स सिद्धिमेत्युपकरोति गुणै र्न पुंसाम् ।
साधारणं स्वपतितं च भवेद् यतो यत्
काले नियुक्तपतितं रसवत्सुखाय[२] ।।१७।।

स्वाम्यमात्यं च राष्ट्रं च दुर्गं कोशो बलं सुहृत् ।
एतावदुच्यते राज्यं सर्वबुद्धिव्यपाश्रयम् ।।१८।।

---

१ सत्वम् लि. पु. । २ रसवत् सुखाप्तं लि. पु. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सवेणुवीणापटहस्वनेन गीतेन पूर्वं व्यपनीतनिद्रः ।
शय्यां त्यजेत् सूर्यरवरावसाने श्रृण्वन् गिरो मङ्गलपाठकानाम् ॥१९॥

प्रणम्य देवांश्च पूर्वं दत्वा च गां वत्सयुतां द्विजाय ।
दृष्ट्वा मुखं सर्पिषि दर्पणे च नक्षत्रमादौ श्रुणुयात् तिथिं च ॥२०॥

श्रुत्वा तिथिं भं ग्रहवासरं च प्राप्नोति धर्मार्थयशांसि सौख्यम् ।
आरोग्यमायुर्विजयं सुतांश्च दुःस्वप्नघातं प्रियतां च लोके ॥२१॥

दुर्गा१ भिवानीं जनतीर्थतोयमृद्रोचना सर्षप पुष्पगन्धाद् ।
सिताम्बरोष्णीषसुवर्णरत्नान्यसेव्य कुर्याद् भिषजां वचांसि ॥२२॥

आचारस्थः सागरान्तां धरित्रीं भुङ्क्ते दीर्घ कालमुत्खातशत्रुः ।
यात्राचारस्तत्र धर्मस्य वृद्धिः धर्माद् भोगान् देहभेदेऽपि भुङ्क्ते ॥२३॥

अभिमतगुणसंयुतेन राज्ञा कथितगुणव्ययसंयुतोऽभियोगः ।
उपहतमुपलभ्य वास्यदेशं वलमथ निरुपद्रवोऽभियोज्यम् ॥२४॥

इति श्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने राजाभिषेकाऽध्यायः ।

अथ सेव्यसेवकचक्रं लिख्यते

स्वामिनो भृत्यभाद् गण्यं भृत्यस्य स्वामिनस्तथा ।
धनाधनं विचिन्त्याथ, इत्युक्तं ब्रह्मयामले ॥१॥

साधकर्क्षात् समारभ्य यावत् साध्यं चतुर्गुणम् ।
सप्तभिर्हरते भागं तच्छेषे स्वमृणं भवेत् ॥२॥

१ दूर्वा अ. प. ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वर्णायांशक तिथ्यादि राश्यादिघटिकादयः ।
छेदाप्तं शेषशून्यं च छेद तुल्य फलं [1] भवेत् ॥३॥

नरनाम्नि भवेद्यत्र संयोगाऽक्षरसंभवः ।
ग्राह्यसूत्रादिनो वर्ण इत्युक्तं ब्रूम्हयामलं ॥४॥

साध्यवर्गं पुरस्थाप्य साधकस्य तु पृष्ठतः ।
अष्टभिर्हरते भागं तच्छेषं स्वमृणं भवेत् ॥५॥

अथ शारावल्याम्—

सन्ध्यार्धयाम कुलिकोदय दुष्टवेला
गण्डान्तविस्टि विषनाड्युदयेषु वर्ज्याः ।
भैषज्यभोजन महोत्सवराजसेवा
मातङ्गयान तुरगासनमन्यदिस्टम् ॥६॥

वसिष्ठ :—

पौष्णद्वयेन्दु श्रवणत्रये च हस्तत्रये पुष्यपुनर्वसौ च ।
शस्तं नृपाणामवलोकनं तद्विशेषतस्तिग्मरुचेश्च वारः ॥७॥

शुभलग्ने दशमभवे रवौ कुजे वाथ तद्वशे वर्गे ।
आयुधविद्या कार्या नृपसेवा वैर विग्रहः कार्यः ॥८॥

सेवाचक्रं शिरः सप्त पृष्ठे सप्त तथोदरे ।
पादयोः सप्त ऋक्षाणि साभिजिद् विन्यसेद् बुधः ॥
निष्फलं पादपृस्ठस्थं फलदं च शिरोदरे ॥९॥

इति सेवाचक्रम् ।

---

१ छेदयेत् सफलं ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रेखान्विताक्षरं यत्र नामानि नृपभृत्ययोः ।
घनाधनानि संपत्यो र्ग्राह्यं फलमनुत्तमम् ॥१०॥

अथान्दोलिकारुक्षचामरादि गजबन्धन निर्णयानि तुरगनिर्णयश्च

पुष्यार्द्राश्रवणत्रयेषु विधिभेदित्याश्विनीचक्रभेष्वारार्कार्किजवासरेषु
रहिता रिक्ताश्च पर्वाष्टमी ।
निन्द्याः पूज्यतमा गुरुभृं गुबुधौ लग्नस्थिताः केन्द्रगा आन्दोलादि
सुवाहनादि सुभवा वासिष्ठमुख्यैः स्मृताः ॥११॥

कालविधाने—

आन्दोलक्षत्रशय्या रजतमणिगृहापूषणास्वर्णयात्रा क्षत्रादीनां प्रशस्ता
भवति सुरगुरौ केन्द्रगे दैत्यपूज्ये ।
क्रूराः षष्ठतृतीयलाभसहिताश्चन्द्रे व्ययाष्टंरिपुं हित्वा चाम्बरचारि-
णो निधनगा वर्ज्या मुनीन्द्रा जगुः ॥१२॥

इत्यान्दोलादि निर्णयः ।

अथ गजकर्म

तिष्याश्विधातृकरसौम्यमधानुराधा
पौष्णोत्तरादितिमनुद्वय वैष्णवेषु ।
वागीशशुक्र शशिसौम्य दिनर्क्षलग्ने
रिक्तां विहाय निगदन्ति गजाख्यकर्म ॥१३॥

शुभतारा शुभे लग्ने शुभांशे शोभने तिथौ ।
अङ्कुश करिणां योज्यः शनि लग्ने शनेर्दिने ॥१४॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ तुरगकर्म

साधारणस्थिरमरुद्द्वयचन्द्रसूर्यं
दस्रासुरेज्य सुरमातृषु भेषु विस्याम् ।
तौरङ्गकर्म कुलिके च तथार्धयामे
कर्तुः सुखार्थ शुभदं च चरोदये च ॥१५॥

स्वात्यारुढे भास्करे जायतेऽस्मिल्लोके पीडा स्वातिसंपातसंज्ञा ।
शान्ति कुर्याद् भूसुरैस्तत्र भूपः कुर्याद् रक्षामश्वजातेर्विशेषात् ॥१६॥

इत्यश्वकर्म ।

अथ गोकर्म

प्राशेजमित्रश्रवणोत्तरासु चतुर्दशीदर्श दिनाष्टमीषु ।
गवां न कुर्यात् क्रयविक्रयें च स्थानं प्रवेशं गमनं कदाचित् ॥१७॥

अथ महिष्यादिनीराजनम्

याम्यत्वाष्ट्र भुजङ्गमूलहरिभे रुद्राग्निशक्र ध्रुवे
सूर्यारार्कजवासरेषु चरभे रिक्तां च मध्यं विना ।
दासीमेषखरोष्ट्रपोत्रमहिषीश्येन द्विपानां तु वै
कार्या सिद्धिधरा धनादि सुखदा श्रेयस्करा भूभृताम् ॥१८॥

अथ नीराजनम्

कार्तिकमासे यदि वाश्विनर्क्षे सिते च पक्षे भवसूर्यतिथ्यौ ।
शुद्धे लग्ने कर्म नीराजनाख्यं कार्यं पुष्टिर्मर्त्यवाजि द्विपानाम् ॥१९॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथेश्वराभिषेकः

हस्तब्राह्ममघाद्विदैव गुरुविद् विष्णोडुतारा शिव
स्नानं मङ्गलदायकार्य शशिभृद् वागीश वर्गादयः ।
प्राजेशादृशुरक्त'चन्द्र हरिका मेषाधिपा वासराः
सर्वे विक्रममृत्यु षष्ठरहिता वृद्धं भृशं वर्जयेत् ॥२०॥

मित्रादित्यमघोत्तरा शतभिषक् स्वाती विरञ्च्यच्युत—
स्वर्गाधीश्वर पूज्यपौष्णरविषु स्फीते तुषारत्विषि ।
रिक्ता पर्वसु मध्यमा तिथि मयाष्कत्य प्रयुंजी नृणां
भूत्यै शान्तिकपौष्टिकानि गुरुविच्छुक्रेन्दुवारेषु च ॥२१॥

शान्तिकर्म प्रकुर्वीत रोगे नैमित्तिके तथा ।
गुरुभार्गवमूढोऽपि दोषस्तत्र न विद्यते ॥२२॥

व्यासेनाहृत्य दीर्घाङगुलनवमी गजनागाग्निनन्दैश्च ।
हत्वा शैलव्योमाग्नि तारा द्युमणि गजगजै भक्त शेषा भवन्ति ।
वाराहश्च ऋक्षं धनमृणमूदितं वा यमित्याहुराचार्य वर्या
दिछत्रयानाशनशयनगृहाभार्वनस्पन्दनानाम् ॥२३॥

इति दोषषड्वर्गः ।

यानासने भवेत् सिंहः शय्यायां वृषभः स्थितः ।
ध्वजाभियाने भार्यादौ सिंहे वेधां गजायतः ॥२४॥

दोलान्दोलविधानधान्यसुरा विवर्धनं नृणाम् ।
क्षिप्रचरस्थिरमृदुभे प्रोक्तं मुनिभिश्चरोदयेशं शुभम ॥२५॥

१ रार्क ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सर्पाविविधविधुत्तरदेवमातृ मित्रार्य सूर्यवसुपूर्व जलातिलर्क्षे ।
चित्राश्विनीश्रवणभे स्थिरभोदयेषु कर्तुः सुबिष्टर विधिविधो
देत्यभीष्टम् ॥२६॥
इतिशय्याविस्तरविधिः ।

भेर्यादिषु विधाने च चरक्षिप्रमृदुस्थिराः ।
शस्तो भृग्विन्दुसौम्ये वर्गश्छत्ररथादिषुः ॥२७॥
इति भेर्यादिकर्म ।

हस्तादित्यमघोत्तरा मृगशिराश्चित्रासु पौष्णाच्युत—
प्राजेशानिलमित्र शूरिषु तिथौ नन्दाप्रपूष्णाह्वयौ ।
कुर्याद् भार्गवशीतरश्मिदिनकृद्विन्मन्त्रिणां वासरे
राशौ नूतनयानवाहनसुरामन्त्रप्रशस्ताह्वया ॥२८॥
इति यानवाहनविधिः ।

आदित्यसौम्यवसुवैष्णवपौष्णपुष्य
त्वष्ट्राश्वि चण्डकिरणेषु दिवा प्रशस्ताः ।
स्थानि विधातृवरणोत्तरभानिमन्या
आहुर्निशासु दमनांकुरकर्मकार्यः ॥२९॥
मघौ वैशाखे वाऽति विमले शुभे लग्ने कुर्याद् वरद मणकारोपणविधिः ।
आषाढादिष्वपि सितपक्षेऽष्टमतिथौ चतुर्दश्यां वा रोहनामपि पवित्रस्य
कथितम् ॥३०॥

अथ भूप्रवेश

पुष्योत्तरापवनरुद्रमघानुराधा चित्रायमेषवृषवृश्चिककन्यकासु ।
चित्रां विहाय नेत्रमी कुजजीवचन्द्र सौम्योदयांश दिवसेषु विशोद्धरित्रीम्
॥३१॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ कृष्यारम्भणम

पौष्णादित्योत्तरार्का सुरगुरुविधिषु ज्ञार्यशुक्रेन्दुवारे
रिक्तां छिद्रं च पर्वद्वयमपिरहः संप्रवृद्धिः शशाङ्के ।
कृष्यारम्भं विदध्याज् झषवृषमृगयुक् कर्कटेषु प्रशस्तं
स्नात्वा संपूज्य धात्रीं जलकुसुमफलै द्वोहलौमन्त्रयुवतै ।।३२।।

अथ बीजवापनविधिः

कालविधाने—

हस्तस्वाति विरञ्च्यसुरपितृमुरजिन्मित्रपौष्णार्यमार्या—
यादोनाथोत्तरासु क्रिययुवतिधनुर्वृश्चिकान् भद्ररिक्ताः ।
हित्वा पर्वाऽसुरेज्यामरगुरुशशिविद्वारलग्नांशके स्या—
दुक्ततौ बीजवापं दशितर महर्षाष्टमे शुद्धियुक्ते ।।३३।।

लतावृक्षरोपणम्

सावित्रतिष्याश्विन वारुणाति मूलं विशाखानिमृदु ध्रुवाणि च ।
लतौषधीभूरूहरोपणेषु प्रोक्तानि चैतानि शुभानि भानि ।।३४।।
विष्णुप्रजेश यमवारदिनोदयेषु कुर्याच्छनैश्चर बले लवणं प्रशस्तम् ।।

अथोद्यानवनौषधादिरोपणम्

वसिष्ठः—

रक्तचन्दनपुष्पाद्यैर्दध्योदनबलिं यथा ।
क्षेत्रपालाय वै दत्वा मौनीभूत्वा समाचरेत् ।।३५।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पौषे धनिष्ठास्वथ चाश्विनीषु हस्तत्रयत्र्युत्तरमित्रभेषु ।
धातृद्वयकोणपपैत्रपुष्याबीजोप्तिरुत्कृष्टफलप्रदा स्यात् ॥३६॥

मित्रेन्दुपौष्णोत्तररोहिणीषु देवेज्यवारीश्वरवारिभेषु ।
प्रारम्भणं सर्वजलाशयानां कार्यं सितेन्द्वंशक वारलग्ने ॥३७॥

द्विदैववारीश शशाङ्कमूल ध्रुवेषु धिष्ण्यार्यमपौष्णभेषु ।
धान्यौषधीगुल्मलतादिकानामारोपणं नूनमतीव शस्तम् ॥३८॥

मृदुध्रुवक्षिप्रचरेषु मूलमघाविशाखासु हलप्रवाहम् ।
धान्याभिवृद्ध्यै प्रयतश्च कुर्यात् समुष्क संपूर्णगणैवृषैश्च ॥३९॥

शशाङ्कतोयेश करार्यमित्रं ध्रुवाम्बुपित्र्ये वसुदैवकेषु ।
उद्यानवाप्यादि तडागकूपकार्याणि सिध्यन्ति जलोद्धृतं यत् ॥४०॥

अथ धान्यसंग्रहणम्

रोहिण्यार्द्रामघाहस्तभरणीश्रवणेषु च ।
मन्ददृष्टे स्थिरे लग्ने धान्य संग्रह इष्यते ॥४१॥

अथाग्रहायणं कालविधाने—

तिष्यादित्याश्वि दैत्याधिबसु यवसुकटं श्रीशचित्राविशाखा
पौष्णप्राजेशसार्का श्वसनपितृ निशानाथं मित्रोत्तरासु ।
रिक्तापर्वानिमध्यं झषगृहमहायोष्टमस्थं शशाङ्कं
कुर्यादाग्रयणं—वित्सितगुरुदिबसेष्वन्नभुक्त्युक्ततिथ्याम् ॥४२॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ नवान्नभोजनम्

नवान्तभोजनं नृणां मृदुक्षिप्रचरैः शुभम् ।
शुभेक्षितयुते लग्ने विषनाडी विवर्जयेत् ॥४३॥

अथ गृहग्रामभूतबलिः

निधनभवनलग्ने भोजनं पौष्णिपाणि
क्षितिपतिनिधिसर्वा सांपराय प्रयोगः ।
रथतुरगगजेन्द्रारोहणं शस्त्रशिक्षा–
मपिशुभकरमन्यद् वर्जयेज्जीवितार्थी ॥४४॥

चतुर्दस्याष्टमी चैव प्रतियन्नवमी तथा ।
गुरुर्भार्गव भौमाश्च देवा मां प्रतिदायकाः[1] ॥४५॥

हस्तमूलाग्नि पौष्णेज्य पुनर्वस्वपि मित्रभे ।
ध्रुवाणि सशिवं विष्णुस्त्रयो योगाः शुभावहाः ॥४६॥

विभूत्यै पापराक्षस्यै वृद्ध्यैकाल्यै श्रियै तथा ।
सुप्रित्यै च उषायै च विधायै च बलिं क्षिपेत् ॥४७॥

तत्तत पदार्थ पक्षेण दिग्विदिक्षु विनिः क्षिपेत् ।
मध्ये धात्र्यै बलिं देयमुषायै वोर्ध्वतः क्रमात् ॥४८॥

भूतप्रेतपिशाचाश्च डाकिन्यो ये निशाचराः ।
सुप्रसन्ना ग्रहासर्वे वृद्धि कुर्वन्तु सर्वदा[1] ॥४९॥

अथ वर्षास्थापनम्

मासे ज्येष्टे माधवे चाथषाढ[2] वर्षास्थानं भूपतिनां विधेयम् ।
रौद्रे धिष्णे चानुकूले विलग्ने मध्ये वाऽऽह्नः पूर्वभागेन रात्रौ ॥५०॥

देवी मां प्रतिदायकाः क. च. । २ आषाढे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ शुभकुट्टनम्

महालक्ष्मीं गणाधीशमुमां वागीश्वरीं यजेत्
हरिद्राक्षतताम्बूल पुष्प चन्दनशोभनैः ॥५१॥

मृदुध्रुवक्षिप्रचरर्क्षेषु शशिभृद्वीज्य[1] वासरे।
चन्द्रतारावलोपेते कुट्टनं कारयेद् बुधः

अथ विभागः

मृदु ध्रुवक्षिप्रमघा स तोय रविज्यशुक्रार्कदिनादि शस्ताः।
अनस्तगे भार्गवदेवपूज्ये रिक्तां सदेशां रहिता त्रिभागे ॥५३॥

अथ क्रयविक्रय विधौ

रोहिण्युत्तर मूलपौष्णवरुण ज्येष्ठाविशाखामघा·
तिष्यादित्यकराश्च सौम्य शशभृद् भागोष्टरिक्ते तिथौ।
देवेन्द्राचित सौम्यशुक्र शशभृद् वारोदयांशे शुभे
गोसिंहाद्य तुला नृयुग्मभवने कुर्याद् क्रयंविक्रयम् ॥५४॥

पूर्वात्रयंपुष्य पुनर्वसौ च मित्रत्रयंपौष्णचमूद्वये च।
दस्त्रेन्दुहस्त त्रितयेषु[2] तेषुगवां प्रकुर्यात्क्रयविक्रयं हि ॥५५॥

अथ पशुसंग्रहणम्

शुभरवचरलग्न गते शुभवर्गे वा नैधने शुद्धे।
पशुसंग्रहणं कार्यं रक्षावृष्टिर्विशेषतस्तेषाम् ॥५६॥

---

१ शशभृदिज्य। २ हस्तयुतेयेषु।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ शय्याशनानि

शय्याशनयुवति जनवस्त्राभरणानुलेपनं निखिलम् ।
सितवासरवर्गेष्वपिकर्तव्यं शशिजजीवयोर्वाऽपि ॥५७॥

अथाग्निपरिग्रहः । कालविधाने —

प्राजापत्येन्द्र पौष्णोत्तर दहन विशाखा शशाङ्केषु हित्वा
रिक्ता नक्रं कुलीरं घटनिमिषमारार्क पुत्रार्क वारे ।
मित्रोच्च स्वर्क्षगेषु त्रिदशगुरुर्महिपुत्र चन्द्रे विशुद्धे
भृत्यै वेदोक्तनित्या[1] हुतवहवरणं विप्रमुख्यो विदध्यात् ॥५८॥

अथाग्न्याधानम्

वन्हिद्वैदैवस्थिरशक्रपूषा पुष्या विरिक्ता बुधजीवच न्द्राः।
अतोयराशि त्रिषडाय पापाः शस्ता कृता व्यन्त वनाष्ट[2]गान्ये ॥५९॥

अग्न्याधानोक्तनक्षत्रे लक्षहोमं तथा विदुः
कोटिहोमं च शुक्रार्य चन्द्रेषु प्रबलेष्विह ॥६०॥

शत्रुपक्षक्षयं वाजौ मनोऽभिष्टफल प्रदाः।

अथ दन्तधावनविधानम्

वसिष्ठः-

शास्त्र प्रदिष्टं विगतवृणंयत् त्वचान्वितं स्निग्धमनर्थशुष्कम्
ऋजुं मनोज्ञं च वितस्तिमात्रं तद्दन्तकाष्ठं सुखवित्तदं स्यात् ॥६१॥

---

१ वेदोक्तरीत्या । २ नवाष्ट ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विप्रादीनां दश काष्ठा सप्त संख्या प्रकीर्तिता: ।
चतूरङ्गुलमानं तु नारीणां विधिरुच्यते ॥६२॥

आयुर्बलं यशो वर्चः प्रजापशुवसूनि च ।
बृह्म प्रज्ञां च मेधां च त्वं नो देहि वनस्पते ॥६३॥

भृग्वर्कवारसंक्रान्तिपातवैधृतिपर्वसु ।
द्वादशीनवमीनन्दे न कुर्याद् दन्तधावनम् ॥६४॥

विधिशिंन्यलीपर्णत्रिणानित्यभि नित्यजा ।
न जातु दोषो दन्तस्य धावनं सर्वसम्मतम् ॥६५॥

गुरु:–

प्रतिपत्पर्वषष्ठी च नवमी द्वादशी तथा ।
दन्तानां काष्ठसंयोगाद् दहत्यासप्तमं कुलम् ॥६६॥

अथ तैलाभ्यङ्गविधिः

तैलाभ्यङ्गस्तापमर्के विदध्यात् कान्ति चन्द्रे भूमिजे मृत्युमाशु ।
सौम्ये लक्ष्मीं हानिमिज्ये विपत्ति शुक्रे शौरे भोज्यसौख्यं च
पुंसाम् ॥६७॥

पक्षादिमध्यान्त शिवार्क भूत षष्ठी निशावैधृति पात विष्टी ।
जन्म त्रिसप्तार्यम विष्णु रुद्र जेष्ठां विनाभ्यङ्ग विधिः प्रशस्तः ॥६८॥

चन्द्राष्टमं विषघटीं यमघण्ट केन्दु
सूर्योपरागमयनं रविसंक्रमं च ।
हित्वा सुखं वितनुते सुखवांश्च तैलं
चौलातुर प्रवयसांतु सदा प्रसस्तम् ॥६९॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सुखाभ्यङ्गो न कर्तव्य सौलिपरामलकादिभिः[1] ।
द्रव्यान्तरयुतं तैलं नदोषो ग्रहणं विना ॥७०॥

विप्रादेशाद् भूपते राज्ञया वा बन्धुप्रीत्या बन्धमोक्षे व्रतादौ ।
सर्वेष्वेवं शोभनेषु प्रशस्तं तैलं हित्वा सोमसूर्योपरागम् ॥७१॥

दीपावली चतुर्दश्यां स्वातौ कज्जलतैलयोः ।
गङ्गाश्रियौ स्थिते यस्मात् स्नातव्यं भूतिकामुकैः
तिथौ स्वात्यर्क्षयुक्ताया पाते पर्वणि संक्रमे ।
दीपावर्लिनिमित्तो हि तैलाभ्यङ्गः शुभावहः ॥७३॥

अथ रोगनिवृत्तिस्नानम्

कुजवारे कुजांशे च कुजलग्ने कुजोदये ।
रोगिणामभिषेकेण सर्वव्याधि विनाशनः ॥७४॥

कालविधाने —

आदित्यरोहिणि मघोत्तर वायु पौष्ण
सर्पान् विहाय शशिशुक्रदिनं विलग्नम् ।
रिक्तान्तमध्यमृतपर्वसु रोगमुक्त
स्नानं वदन्ति मुनयः शुभदे मुहूर्ते ॥७५॥

अथ शताभिषेकः

दश हत वसुसंख्ये (८०) चाष्टवर्षेष्टमासे
दशशतशशि दृष्टे जायते [2](मानवानाम्) ।
रविशशिगतिभेदैः पञ्चमे पञ्चमेऽब्दे
भवति यदधिनास द्वन्द्व भे तत्प्रमाणम् ॥७६॥

---

१ सौस्थिरामलका दिभिः । २ चापान्तर्गतः च पाठः पुस्तके नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुण्ये मासि सहस्रचन्द्रसहिते संवत्सरे वा शते) ।
वृद्धे राशिशताभिषेकमखिलां सिद्धि विधत्ते नृणाम् ॥
रोहिण्युत्तर रेवती शतमख श्रिकान्त हस्ते तिथौ ।
वारे जीवसितज्ञचन्द्र .. दिवसां –सर्वघ्नवात्मभे ॥७७॥

अर्के चरे देवगुरौ विलग्ने गुरौदिने पूर्णविधौ चतुर्थौ ।
शुभानि कार्याणि महीपतीनामन्त्राभिषेकः कथितो मुनिन्द्रै ॥७८॥

इतिमन्त्राभिषेकः

इति श्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने कतिपयकर्म–महीपतीनां मन्त्राभिषेकाऽध्यायः ।

अथ नवचित्रवस्त्र लक्षणविधानम्

नववस्त्रफलान्याहुर्वसिष्ठगौतम नारदादयः ।
चित्रवस्त्र धृतिस्त्रीणां द्वे सुरेभव शोभना ॥१॥

कौशेय वल्कल धृति वित्तेनान्नकपोभिघे ।
क्षौमं भौमदिने वस्त्रं धौतधार्यं विधोर्दिने ॥२॥

रक्तचित्रितमर्के तु धार्यं काषायमर्कजे ।
भ्रातुर्भौमदिने नूनं वल्कलाम्बर धारिणाम् ॥
प्रशस्तं केचिदित्युचुरारक्तपट्टधारणम् ॥३॥

प्रीत्यादत्तं भूभृतो वा ...... विप्रादेशे चौलमौञ्जी व्रतादौ ।
निन्द्ये धिष्ण्ये वासरे वा क्षणे वा नूनं वस्त्रं धार्यमित्याहुरार्याः ॥४॥

निवसन्त्यमरा हि वस्त्रकोणे मनुजाः पार्श्वं धरान्तमध्ययोश्च ।
अपरेऽपि च रक्षसां त्रयांशाः शयने चासनपादुकासु चैवम् ॥५॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लिप्ते मसीगोमयकर्दमाद्यै छिन्ने प्रदग्धे स्फुटिते[1] च विन्द्यात् ।
पुष्णं चेत्पाल्पतरं न भुङ्क्ते पापा शुभं वादिकमुत्तरीये ॥६॥

स्याद् राक्षसांशेष्वथवा सुमृत्युः पुञ्जन्मतेजश्च मनुष्यभागे ।
भागेऽमराणामथ भोगवृद्धिः प्रान्तेषु सर्वत्र वदन्त्य निष्टम् ॥७॥

कङ्कप्लवोलूककपोतकाकक्रव्याद गोमायु खरोष्ट्र सर्पाः ।
शुष्कद्रुमे प्रेतसमानशस्ता छदाकृतिर्दैवत भागगाऽपि ॥८॥

छत्र ध्वजस्वस्तिकवर्धमान श्रीवत्सकुम्भाम्बुजतोरणानाम् ।
छेदाकृतिर्नैहृतभागगानां पुंसां विधत्ते नचिरेण लक्ष्मीम् ॥९॥

अथ नववस्त्रधारणम्

जीर्णमार्द्रमभद्रं च धनं ज्ञानं सुहृत्प्रियम् ।
मालिन्यं रविवारादौ फलं वस्त्रस्य धारणम् ॥१०॥

शुभे च करणे योगे दग्धयोग विवर्जिते ।
रिक्तादिहीनदिवसे वृषेसिंहे च वृश्चिके ॥११॥

स्वस्वेष्टदेवाता स्मृत्वा प्राङमुख संतुष्टमानसः ।
हरिद्रा लाञ्छितं वस्त्रं धृत्वा वृद्धान् नमेद् बुधः ॥१२॥

पुष्यादिति त्र्युत्तराश्च रोहिणी करपञ्चकम् ।
धनिष्ठारेवती दस्त्र शुभा वस्त्रस्य धारणे ॥१३॥

अश्विनी च धनिष्ठा च रेवतीकर पञ्चकम् ।
रविपूर्वोक्तवाराश्च धारणे चित्रवाससाम् ॥१४॥

---

१ स्फुटके ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उत्तरा त्रितयं पुष्यो रोहिणी च पुनर्वसुः ।
ऋक्षाण्येतानि निन्द्यानि स्त्रीणां वस्त्रस्य धारणे ॥१५॥

अश्विन्यां वस्त्रलाभो नव्यवस्त्रस्य धारणात् ।
भरण्यां चोरहरणं वह्निदाहश्च वह्निभे ॥१६॥

रोहिण्यामर्थसिद्धिः स्यात् सौम्यर्क्षे मूषिकाभयम् ।
आर्द्रायां मरणं प्रोक्तं धनप्राप्तिः पुनर्वसौ ॥१७॥

अर्थागमश्च पुष्ये स्याच् शोको ज्ञेयश्च सार्पभे ।
मघायां रोग संप्राप्तिः पूर्वायां नृपतेर्भयम् ॥१८॥

उत्तरायां तु संपत् स्यात् कार्यसिद्धिश्च हस्तभे ।
चित्रायामिष्ट सिद्धिः स्यात् सत्पुत्रं स्वातिऋक्षभे ॥१९॥

विशाखायां जनप्रीतिर्मित्राप्तिर्मित्र ऋक्षभे ।
ज्येष्ठायांवस्त्रहरणं मूलभे सलिल प्लुतिः ॥२०॥

पूर्वाषाढानुरागः स्यात् सीदन्ति विश्वभे पुनः ।
चक्षुरोगो विष्णुभे तु धान्यर्द्धि वसुभे पुनः ॥२१॥

जलभीतिर्वारुणभे पूर्वाभाद्रे तथैव च ।
धनं चोत्तरभाद्रायां रत्नप्राप्तिश्च पौष्णभे ॥२२॥

विप्राज्ञया विवाहादौ राज्ञादत्तं नवांशुकम् ।
निषिद्धेऽपि च वारादौ धार्यमेव न संशयः ॥२३॥

वस्त्रं तु त्रिगुणीकृत्य प्रागग्रमवनौ क्षिपेत् ।
शुभाशुभं विजानीयान्नूतनेऽपि विशेषतः ॥२४॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ब्रह्मस्थाने ध्रुवं मृत्युर्ब्रह्माग्न्योः पुत्र संपदः
इन्द्रांशे पदमाप्नोति इन्द्राग्न्योर्गृहिणी स्मृतः ॥२५॥

अग्नावग्निभयं कुर्याद् ब्रह्माग्न्यो निधिरुत्तमः ।
यमाग्न्यो र्गो विनाशः स्याद् यमे बन्धुविनाशनम् ॥२६॥

ब्रह्मान्तके महाव्याधिर्व्याधिरन्तक नैर्ऋतौ ।
नैर्ऋतौ पुत्रसंपत्तिः संपत्तिर्वरुणैर्ऋतौ ॥२७॥

पर्यन्तनैर्ऋत पुत्री पर्यन्ते निधिरुत्तमः ।
मरणं ब्रह्मपर्यन्ते पर्यायेण ब्रह्मवारुणे ॥२८॥

वायौ वध्वागमः प्रोक्तः संपत्तिर्ब्रह्म यक्षयोः ।
कुवेरवाट्वोर्नाशः स्यात्कुवेरे पुत्रनाशनम् ॥२९॥

कुवेरब्रह्मणो व्याधिर्धनदेशानयोर्निधिः ।
ईशाने तुष्टि, प्राप्नोति, ईशानब्रह्मणोः सुत ॥३०॥

इन्द्रांशयोः संपदश्च अग्निमूषककण्टके ।
हते वस्त्रे गोमयादिचिह्निते वा फलं स्मृतम् ॥३१॥

अथवा नवधा कृत्वा दग्धवस्त्रादिकं बुधः ।
तत्तद्देशादिकं ज्ञात्वा फलमुक्तं विनिर्दिशेत् ॥३२॥

चतुष्केपि च कोणेषु निवसन्ति च देवता ।
कोणयोः पाप दशयोर्मध्ये तिष्ठन्ति मानवाः ॥३३॥

शेषेषु त्रिषु भागेषु नित्यं रक्षितकर्मणाम् ।
भोगप्राप्तिर्देवभागे पुत्रप्राप्तिश्च मानवे ॥३४॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मृत्युश्च राक्षसे दिक्षु सर्वांशेषु न शोभनम् ।
ध्वजछत्र स्वस्तिकाभसन्निभो राक्षसे शुभम् ॥३५॥

कङ्कलोलूककपोतकाककर्दमसंनिभः ।
अग्न्यादिदग्धभागस्तु देवादावशुभप्रदाः ॥३६॥

रोहिणीषु करपञ्चके शुभे त्र्युत्तरेऽपि च पुनर्वसु द्वये ।
रेवतीषु वसुदैवते च भे नव्य वस्त्र परिधानमिष्यते ॥३७॥

इति श्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते
जगन्मोहने वस्त्राध्यायः ।

अथ रात्रिविधिः

कृत्वा पिष्ठमयं दीपं स्नेहवर्त्यान्वितं शुभम् ।
पत्रपुष्पान्वितं स्थाप्य,[1] एलाश्च सहसर्षपात् ॥१॥

प्रियङ्गुञ्शतपुष्पाणि दुर्वाश्चैव शतावरीः ।
विष्णुक्रान्तां च सुरसां सहदेवीं स्तथैव च ॥२॥

उदङमुखो द्विजो भूत्वा सन्ध्यायां नृपमूर्धनि[2] ।
भ्रामयेदमलं दीपं पठेन्मन्त्रं विशोभनम् ॥३॥

क्षौम्यतामीतयो रोगो ग्रहविष्णु विनायकाः ।
स्वस्त्यस्तु नृपराष्ट्रेभ्यः स्वस्ति गोब्राह्मणस्य च ॥४॥

---

१ स्थापयित्वा । २ नृपमस्तके ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ भूषणम्

रोहिण्याश्विशशांकपौष्णदिनकृन्त्वाट्रार्यमैत्रेषु च ।
वागीशेन्दु सितज्ञभानुदिवसे नन्दासु पूर्णासु च ॥

कन्यागोमिथुनान्त्यपापभवने धार्यं भवेद् भूषणम् ।
कन्यायाः करसङ्गमोक्तसमये वक्त्रांकुरालंकृते ॥५॥

चित्राविशाखाश्विकरानुराधापौष्णा श्रविष्ठानिलतारकासु ।
प्रवालरक्ताम्बररत्नशंखचामीकराणां धृति सुप्रशस्ता ॥६॥

अथ देवतादि नमस्कारः

नत्वा देवानथ गुरुवरान् ब्राह्मणेभ्यः सवत्सां
धेनुं दत्वा तदनु वदनं दर्पणे वा घृते वा ।

दृष्ट्वाऽस्पृष्ट्वातिथिमुनि मुदा दत्त ताम्बूलदानात्
सद्दैवज्ञान्मङ्गलं श्रृणुयाद् घर्मशीलो नृपालः ॥७॥

अथ ताम्बूलभक्षणम्

सुष्टुभ्यस्ताम्बूलं दद्याद् ब्राह्मणेभ्योऽति भक्तिमान् ।
मेधावी सुभगः प्राज्ञो दर्शनीयः स जायते ॥८॥

फलैस्तु तृप्यते ब्रह्मा पत्रेण भगवान् हरिः ।
चूर्णमांश्चर तृप्तिस्तु[1] ताम्बूलं दत्तमक्षयम् ॥९॥

एकपूगं भवेच्छ्रेष्ठं द्विपूगं निष्फलं भवेत् ।
अतिश्रेष्ठं त्रिपूगं च, अधिकं ते हरिष्यति[2] ॥१०॥

१चूर्णेन पितरस्तृप्तास् । २ तं हनिष्यति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एकद्वित्रि चतुष्पञ्च षड्भिः पूगफलानि च ।
लाभालाभे सुखं दुःखमायुर्मरणमादिशेत् ॥११॥

अशास्त्रविधिना पूगं पत्रं खादति यो नरः ।
सप्तजन्मदरिद्रत्वमास्ते विष्णुं च नस्मरेत् ॥१२॥

पर्णाग्रं पर्णपृष्ठं च चूर्णपर्ण द्विपर्णकम् ।
रात्रौ खादिर ताम्बूलं शक्रस्यापि श्रियं हरेत् ॥१३॥

पर्णमूले भवेद् व्याधिः पर्णाग्रे च न शंसयः ।
चूर्णपर्ण हरत्यायुः शिवा बुद्धिविनाशिनी ॥१४॥

कामं प्रदीपमतिरूपमेति सौभाग्ययुक्तं च सुगन्धतां च ।

उर्जं करोति कपलान् विनिहन्ति रोगान् ।
ताम्बूलमेव ममरांश्च गुणान् करोति ॥१५॥

सन्ध्यार्धयाम कलिकाष्टमदुष्टवेला
गण्डान्त विष्टि विषनाड्युदयेषु वर्ज्यम् ।

भैषज्यमङ्गलमहोत्सव राजसेवा
यानं गजाच्च तुरगामनन्यदृष्टम् ॥१६॥

अथ निक्षेपः

ध्रुवोग्रसाधरणदारुणर्क्षे निक्षिप्तमर्थंह्यथवा प्रणष्टम् ।
चोरैर्हृतं दत्तमुपप्लवं वा विष्टयां च पाते तु न लभ्यते तत् ॥१७॥

शुभखचरा घटराशि विसृज्य धनलाभ लग्नकर्मस्थाः ।
अव्यायोगस्त्वशुभखगा वाक्पतिदिवसेन्दु भार्गवेयोगे ॥१८॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

धर्मात्मजनैधनभे चर वर्गे अर्थ संग्रहः कार्यः ।
बुधलग्ने दशमगते भौमे चौरस्य मुख्यकालः स्यात् ॥१९॥
इति चौरसमयः ॥

अथ सर्पदष्टम्

मघा विशाखानलसार्पयाम्य नैर्ऋत्यरौद्रेषु च सर्पदष्टम् ।
सुरक्षितो विष्णुरथेन सोऽपि प्राप्नोति कालस्य मुखं मनुष्यः ॥२०॥

सुरगुरुलग्ने हिबुके भानौ वारे च सुकृतवृद्धिः स्यात् ।
इतिसुकृतवृद्धिः ।

अथाभिचारप्रसंगः

गुरुलग्नेर्कदशमे कर्तव्यं त्वाभिचारमखिलानाम् ॥२१॥

अथ रससंग्रहकालः

उदयगते शुक्रेन्दौ जीवे भास्करे च दशमगते ।
हिमकिरणे लग्नगते केन्द्रे चन्द्रमसि सितवारे ॥२२॥

रससंग्रहणं कार्यं सस्यारामादिनिखिल जलकर्म ॥

अथ रोगोत्पत्तिः वसिष्ठः–

उरगवरुणरुद्रावासवेन्द्रत्रिपूर्वा–
यमहुतवहतारा: पापवारेण युक्ता ।
तिथिषु नवमि षष्ठी द्वादशीभिश्चतुर्थी
सहित वरुणयोगो रोगिणां मृत्युरेव ॥२३॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पूर्वात्रयं स्वातिभुजङ्गरौद्रसुरेश्वरर्क्षेषु च यस्य रोगः।
स्याद् रक्षितुं देवचिकित्सकोऽपि क्षितावशक्तः खलु रोगिणं तम्।२४।

कृच्छ्रात् स्फुट प्राणिनिमित्त पौष्ण धिष्ण्याश्च मासा शशि विष्णु धिष्ण्या।
रोगस्य मुक्तिः पितृदैव धिष्ण्य वारैर्भवेद्विंशतितस्तु नूनम् ॥२५॥

पक्षादिदैवेन्द्रकरेषु भेषु नैर्ऋत्य एकादशभिर्दिनैश्च।
पुष्ये त्वहिर्बुध्न्यपुनर्वसौ च ब्रह्मार्यभृत्येषु च सप्तरात्रम् ॥२६॥

गुरुः—

इति निगदितरोगेऽप्युक्तरोगस्य शान्त्यै
कथयति चतुरास्ये कल्पमिन्दौषधानाम्।
घरणदलन शस्त्र क्षार लेपादिपानं
प्रबर दह महातिथिर्यदि जायते ॥२७॥

दिनकर शनिक्ष्माकालमथोच्यते।
विषत्व२ करणादीनां मृतसञ्जीवनादिषु।
सन्धान करणादीनामपि कालाद् विना फलम् ॥२८॥

अथ भैषज्यकर्म

गुरुः—

रुद्रेन्द्रसूर्यज्वलनेषु सौम्ये याम्ये स्वातित्रिपूर्वा वसुरोहिणीषु।
तिष्याश्विपौष्णोदितिहस्तमैत्रेषूक्तं वरांशे शुभमौषधीनाम् ॥२९॥

१रात्राम। २विशत्व लि.पु.।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गारे निशिस्वग्रहसं ज्ञितश्च रिक्तासु नन्दासु जयासु योगे ।
लग्नेचरे चन्द्रनिरीक्षिते च क्रिया विदध्यादपि चौषधीनाम् ॥३०॥

पूर्वार्कान्तक नक्षत्रे गुरोवारार्कदिनैर्युते ।
तद्दिने शशांकरिक्ते रोगार्तानां प्रतिक्रियाम् ॥३१॥

दर्शे वापि शुभं दद्याद् गुह्यरोग प्रशान्तये ।
क्षिप्रोग्रचरनक्षत्रे मेषकर्कटकोदये ॥३२॥

चरग्रहदिने स्वांशे चित्रास्वात्योत्तरे तिथौ ।
नन्दायां स्थिरलग्ने वा कण्टके शुभसंयुते ॥३३॥

सर्वव्याधिविनाशाय विदध्यादौषधंबुधः ।
शुभवारे तिथौ चोक्ते शुभांशे कर्कटोदये ॥३४॥

स्वामिक्षेत्रे विष्टयामश्विन्यां चित्रपुष्ययोः ।
ओषधेः स्याद् विनाशाय कुर्यात् क्रिय कुलीरयोः ॥३५॥

शुभर्क्षशुभवारेषु शुभनक्षत्र संयुते ।
अरोगिणां तु तुष्ट्यर्थं कुर्यात् तत्रौषधं बुधः ॥३६॥

शुभयोगेन्दुवारेषु शुभतिथ्यंशके शुभे ।
लग्ने शुभग्रहयुते रसायन मुदा हरेत् ॥३७॥

कालविधान—

मार्तण्डाश्विसमीर मित्रवरुणादित्योत्तरारेवती
चित्राविष्णुशशांकतिष्यवसुषु राजेशभे भैषजम् ।
कुर्यादर्कबुधार्यशुक्रशशभृद् वारोदये मङ्गले
रिक्तायां वरभेङ्गनासमुदये शुद्धे विधावष्टमे ॥३८॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रोद्रेन्द्रोरगमूलभेषु दिनकृत्पुत्रार वारोदये
रिक्तायां कर्किर्तौलिवनिता लग्ने विशुद्धे शुभे।
क्रूरेषु प्रवलेषु कर्तुरनुकूलर्क्षेषु काले द्विजैः
कृत्वाशीर्विधिमन्त्रशस्त्र हुतभुक् क्षराग्नियोगो बुधैः ॥३९॥

अथोक्त कालविधाने—

भैषज्यादिति चित्रार्क वसुमूलोत्तरात्रये।
आर्द्राभौमार्कवारौ च मेषकर्की च शोभनाः ॥४०॥

वसिष्ठः—

हस्तत्रये पुष्यपुनर्वसौ च विष्णुत्रये वाश्विन् पौष्णभेषु।
मैत्रेन्दुमूलेषु च सूर्यवारे भैषज्यमुक्तं शुभवासरे वा ॥४१॥

क्रूराश्मर्क्ष क्रूरवारांशलग्ने रिक्ता षष्ठी द्वादशी वा यदि स्यात्।
रोगार्तविध्वसनं[1] तत्र कार्यं रोगान्मुक्तः स्नानमप्यत्र कुर्यात् ॥४२॥

वसिष्ठः—

अदितिस्थिर मरुदहिधिष्ण्यं शुक्रेन्दुवासरं त्यक्तम्।
परवासररक्षभेदं स्नानं च रोगमुक्तानाम् ॥४३॥

कालदीपः—

त्रिषुत्तरेषु रोहिण्यां वसुसोमाश्विनीषु च।
गुरुशुक्रेन्दु वारेषु स्नातो नीरोगतामियात् ॥४४॥

---

१ रोगार्तारिध्वसनं क. च.।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रिक्तातिथौ चन्द्रबले विहीने जन्मत्रिभे प्रत्यरिनैधनर्क्षे।
भौमार्कमन्देषु च वासरेषु पीडाकराणां स्नपनं विदध्यात् ॥४५॥

श्री पतिः—

विषमरणधिष्ण्यं भद्रातिथिर्यदि जायते।
दिनकरशशिनि क्ष्मापुत्राणां कथञ्चन वासरान् ॥४६॥

मुनिभिरुदितः—

सोऽयं योग स्त्रिपुस्करसंज्ञ स्त्रिगुण फलदो
बृद्धौ नष्टे च मृते च हुते तथा ॥४७॥

साधारणध्रुवोग्रैमैत्रेण सस्यते मनुष्याणाम्।
प्रेतक्रिया कथंचित् त्रिपुष्कर यम न धिष्ण्ये च ॥४८॥

अथ पुनर्दहनम्

चतुर्दशी तिथिर्निन्द्या भद्रा शुक्रारवासरौ।
सितेज्ययोरस्तमय ..... विषमाङ्घ्रिभम् ॥४९॥

शुक्लपक्षं च संत्यज्य पुनर्दहनमुत्तमम्।
वसूत्तरार्धतः पञ्चनक्षत्रेषु त्रिजन्मसु ॥५०॥

पौष्णब्रह्ममयोः पौनर्दहनात् कुलनाशनम्।
दिनोत्तरार्धेन तत्कर्तुश्चन्द्रतारा बलान्विते ॥५१॥

पापग्रहे बलयुते शुक्रलग्नांश वर्जिते।
समौ तिथौ भद्रतिथौ प्रयुक्ते त्रिपादभे भौमसितेज्यवारे।
करोति चेदस्थिचयं स मूढ विना समायाति सहस्रबन्धुभिः ॥५२॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नारदः—

सपिण्डीकरणं कार्यं वत्सरे वार्धवत्सरे ।
एकादशे त्रिमासे वा त्रिपक्षे द्वादशेऽहनि ॥५३॥

एष्वेव कालेष्वेतानि, एकोद्दिष्टानि षोडश ।
कृत्तिकासु च नन्दायां भृगोर्वारे त्रिजन्मसु ॥५४॥

पिण्डदानं नकर्तव्यं कुलक्षयकरं यतः ।
त्रिजन्मसु त्रिपादेषु नन्दायां भृगुवासरे ॥
धातृपौष्णेषु यच्छ्राद्धं न कर्तव्यं कदाचन ॥५५॥

अथ महालयश्राद्ध प्रसङ्गः। तत्र संवर्तः—

सकृन्महालयं कार्यं नूनं श्राद्धेऽखिलेषु च ।
अतीत विषयं चैवमेतत्सर्वं विचिन्तयेत् ॥५६॥

यद्वा संहिताया कमलासनः—

नभस्यमासि संप्राप्ते कृष्णपक्षे समागते ।
तत्र श्राद्धं प्रकुर्वीत सकृदावेद शक्तिमान् ॥५७॥

वसिष्ठ दिवसे कर्तुश्चन्द्रताराबलान्विते ।
नन्दाः स्युस्तिथयो निन्द्या भूतायां शस्त्रघातिनाम् ॥५८॥

द्वितीया मध्यमा ज्ञेया तृतीया भरणीयुताः ।
पूज्या यदि चतुर्थी वा श्रीप्रदा पितृकर्मणि ॥५९॥

आनन्दयोगे पञ्चम्यां याम्यर्क्षस्थे निशाकरे ।
भोजयेद् यः पितृंस्तत्र पुत्रपौत्र धनं भवेत् ॥६०॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यशस्करी सप्तमी स्यादष्टमी भोगदायिनी।
श्राद्ध कर्तुश्च नवमी सर्वकामफलप्रदा ॥६१॥

सूर्ये कन्यागते चन्द्रे रौद्रनक्षत्रगे कदि।
सप्तम्यामथवाष्टम्यां नवम्यां वा तिथौ युते ॥६२॥

योगोऽयं पितृकल्याणं पितॄन् योऽस्मिन् समर्चयेत्।
इहसंपदमाप्तोति पश्चात् स्वर्गमवाप्स्यति ॥६३॥

दशम्यां पुष्यनक्षत्रे संयोगोऽमृतसंज्ञकः।
अर्चयेद् यः पितॄंस्तत्र नित्यं तृप्तास्तु तस्य ते ॥६४॥

सर्वसंपत् प्रदा कर्तुर्द्वादशी तिथिरुत्तमा।
त्रयोदशी महाहानि धनपुत्र विनाशिनी[१] ॥६५॥

कश्यपः—

मासि भाद्रपदे कृष्णे पक्षे श्राद्धे विशेषतः।
तत्रश्राद्धं बुधैः कार्यं भक्तिमान् पितृतत्परः ॥६६॥

तिथयस्त्वखिलाः श्रेष्ठा पक्षश्राद्धं चतुर्दशी।
त्यक्त्वा तथैव तत्कार्यं श्राद्धं शस्त्र हतोक्तितः[२] ॥६७॥

पुत्रपौत्रधनंधान्यमिह संपदमाप्नुयात्।
तृतीया श्रीपदा तस्य याम्यधिष्ण्यं भवेद् यदि ॥६८॥

---

१ अमाश्राद्धस्य फलं नोक्तं मन्ये तत् त्रुटितं स्यात्।
२ शस्त्रहतोतियः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चतुर्थी भोगदा तत्र याम्यधिष्ण्यं भवेद् यदि ।
पुत्रप्रदा पञ्चमी स्याच्चन्द्रतारावले यदि ॥६९॥

स्वस्तिको नाम योगोऽयं तत्र यश्चार्चयेत् पितॄन् ।
गयायां यत्फलं प्रोक्तं तत्फलं लभते नरः ॥७०॥

यशस्करो सप्तमी तु सर्वसंपत्प्रदाष्टमी ।
श्राद्धकर्तुश्च नवमी सर्वकामफलप्रदा ॥७१॥

कन्यायां संस्थिते सूर्ये सप्तम्यादि चतुर्ष्वपि ।
दिवसेषु यदा चन्द्रः शेष ऋक्षे भवेद् यदि ॥७२॥

पितृकल्याण योगोऽयं पितॄणां दत्तमक्षयम् ।
दशम्यां पुष्यनक्षत्रे योगस्तु प्रीतिसंज्ञकः ॥७३॥

तत्रार्चयेत् पितॄन् भक्त्या पुत्रपौत्र समृद्धये ।
अनन्तपुण्यफलदा गजच्छाया त्रयोदशी ॥
पितृकर्मण्यमावास्या पक्षश्राद्ध फलप्रदा ॥७४॥

मनुः—

नन्दायां भार्गवदिने कृत्तिकासु त्रिजन्मसु ।
महालयं न कुर्वीत कुलक्षयकरं स्मृतम् ॥७५॥

यमः—

भानुवारे भौमवारे नन्दाभृगुमघासु च ।
महालयं न कुर्वीत कुलक्षयकरं स्मृतम् ॥७६॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कश्यपः—

दस्रद्वये पुष्य चतुष्टये च हस्तत्रये मैत्र चतुष्टये च।
सौम्यद्वये च श्रवणत्रये च श्राद्धप्रदाता धनपुत्रवान् स्यात् ॥७७॥

आरोग्यं तिग्मरोचिष्कलयतु सततं चन्द्रमाश्चारुकान्ति
भौमो भूरिप्रतापं हिमकरतनयः सर्वविद्या पटुत्वम्
बुद्धि देवेन्द्रमन्त्री दनुजकुलगुरुः सौख्यसन्तान वृद्धि
लक्ष्मीमादित्यसूनुर्भुवनमपि तमः केतुरिष्टार्थसिद्धिम् ॥७८॥

इति श्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने सर्वकर्माध्याऽयः।

योगवासिष्ठः। मन्त्रग्रहण योग्यमासादयो लिख्यते।

मधुमासे भवेद्दुःखं माधवे रत्नसंचयः।
मरणं भवति ज्येष्ठे चाषाढे बन्धुनाशनम् ॥१॥

समृद्धिः श्रावणे नूनं भवेद् भाद्रपदे क्षयः।
प्रजानामाश्विने मासे सर्वतः शुभमेव हि ॥२॥

ज्ञानं स्यात् कार्तिके सौख्यं मार्गशीर्षे भवेद् यदि।
पौषे ज्ञानक्षयो माघे भवेन् मेधाविवर्धनम् ॥३॥

फाल्गुनेऽपि समृद्धिः स्यान्मलमासं विवर्जयेत् ॥
रवौ गुरौ सिते सोमौ कर्तव्यं बुधशुक्रयोः ॥४॥

अश्विनीरोहिणीस्वातिविशाखाहस्तभेषु च।
ज्येष्ठोत्तरा त्रयेष्वेव कुर्यान्मन्त्राभिषेचनम् ॥५॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पौर्णिमा पञ्चमी चैव द्वितीया सप्तमी तथा ।
त्रयोदशी च दशमी प्रशस्ता सर्वकामदा ॥६॥

पञ्चाङ्ग शुद्धि दिवसे स्वोदये तिथितारके ।
गुरुशुक्रोदये शुद्धे लग्न द्वादश शोधिते ॥७॥

चन्द्रतारानुकूले च सस्यते सर्वकर्मसु ।
सूर्यग्रहणकाले तु नान्यदन्वेषितं भवेत् ॥८॥

सूर्यग्रहणकाले (न) समानो नास्ति कश्चन ।
तत्र यद्यत्कृतं कर्म तत्वन्तं फलदं भवेत् ॥९॥

न मासतिथिवारादि शोधनं सूर्यपर्वणि ।
तदादिष्टं गृहीतव्यं सर्वकामार्थ सिद्धये ॥१०॥

इति श्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते
जगन्मोहने मन्त्रग्रहणाऽध्यायः ।

गृहगोधिकाशकुन्यां तत्र जावालिः —

अथातः संप्रवक्ष्यामि शृणुशौनक यत्नतः ।
पल्याः प्रपातनं चैव सरटस्य प्ररोहणम् ॥१॥

शीर्षे राज्यं श्रियावाप्तिर्ललाटैश्वर्यवर्धनम् ।
गण्डयोर्भूषणावाप्तिनेत्रयोर्बन्धु दर्शनम् ॥२॥

नासिकायां सुशौभाग्यं वक्त्रे मिष्टान्नभोजनम् ।
कण्ठे नित्यं प्रियावाप्तिः स्कन्धयोविजयो भवेत् ॥३॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

धनलाभो बाहुयुग्मे करयोर्धनसंपदः ।
स्तनयुग्मे सुशौभाग्यं हृदि सौख्यविवर्धनम् ॥४॥

कुक्षौ सत्पुत्रलाभं च नाभौ सत्कीर्तिवर्धनम् ।
पृष्ठे नित्यं महाहानिः पार्श्वयो बन्धुनाशनम् ॥५॥

कटि द्वये वस्त्रलाभं गुह्ये मृत्युसमागमम् ।
जघने चार्थहानिः स्याद् गुदे समागमम् ॥६॥

उरु युग्मे धनावाप्ति र्जानुयुग्मेऽर्थसंपदम् ।
निरुद्योगे जंघयोश्च पादयोर्भ्रमणं भवेत् ॥७॥

इत्थं पल्याः प्रपातस्य फलं ज्ञेयं विचक्षणैः ।
एतदेव फलं ज्ञेयं शरठस्य प्ररोहणे ॥८॥

पल्याः प्रपातने चैव शरठस्य प्ररोहणे ।
तदेव फलमित्यासान्नं तं देवं प्रपूजयेत् ॥९॥

पल्याः प्ररोहणं रात्रौ शरठस्य प्रपातनम् ।
निधनार्थाय भवति व्याधिपीडा विवर्जयेत् ॥१०॥

पतनानन्तरे तस्य रोहणं यदि जायते ।
पतने फलमुद्दिष्टं रोहणे निष्फलं भवेत् ॥११॥

आरोहणं चोर्ध्वमुखं अधोवक्त्रश्च पातने ।
भवेद् यदि सुशीघ्रेण तत्फलं जायते ध्रुवम् ॥१२॥

मृत्युयोगे दग्धदिने पाते च यमघण्टकें ।
चन्द्राष्टके नैधने च जन्मर्क्षौं विषनाडिके ॥१३॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

क्रूरलग्ने क्रूरयुक्ते क्रूरेण च निरीक्षिते ।
दुर्निमित्ते तयोर्जाते निधनं जायते ध्रुवम् ॥१४॥

स्पृष्टमात्रेण च तयोः सचैलं स्नानमाचरेत् ।
पञ्चगव्यं प्राशयित्वा[1] कुर्यादाज्यावलोकनम् ॥१५॥

अशक्तो वापि शक्तो वा यदीच्छेदात्मनः शुभम् ।
पुण्याहवाचनं कृत्वा शान्तिकर्म समाचरेत् ॥१६॥

प्रतिरूपं सुवर्णेन कुर्याद्वित्तानुसारतः ।
रक्तवस्त्रेण संवेष्ट्य गन्धपुष्पैः प्रपूजयेत् ॥१७॥

तस्याग्रे मृण्मयं रम्यं कलसं जलपूरितम् ।
वस्त्रमाल्यैरलङ्कृत्य स्थापयेत्तण्डुलोपरि ॥१८॥

पञ्चामृतं पञ्चगव्यं पञ्चरत्नं सपल्लवम् ।
पञ्चवृक्ष कषायाणि क्षिपेत्कलशमुत्तम्[2] ॥१९॥

पूजयेद् गन्धपुष्पाद्यैर्लो कपालान् क्रमेण च ।
स्वेन स्वेनेति मन्त्रेण मृत्तिकादि विनिः क्षिपेत् ॥२०॥

इन्द्रादिलोकपालांश्च तत्तन्मन्त्रैः प्रपूजयेत् ।
अग्निसंस्थापनं कृत्वा होमकर्म ततः परम् ॥२१॥

मृत्युञ्जयेति मन्त्रेण सप्तभिः रवादिरैः शुभैः ।
तिलैर्व्याहृतिभिर्होमं चाष्टोत्तर सहस्रकम् ॥२२॥

---

१ च संप्रास्य । २ कलश उत्तम ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अष्टोर रशतं चाथ कृत्वा सम्यक् समाहितैः ।
जायायेति च मन्त्रेण जपहोमादि कारयेत् ॥२३॥

अभिषेकं ततः कुर्यात् सुरास्त्वांमन्त्र वारुणैः ।
द्यौः शान्त्यादि शुभैर्मन्त्रैः पुराणोक्तैः क्रमेण च ॥२४॥

इत्थं कृत्वाभिषेकं च विधिनाभ्यर्चयेत्ततः ।
धौताम्बराणि कृत्वाथ कुर्यान्नारी कथाविधिः ॥२५॥

स्वणदानं तिलदानं स्वशक्तितः ।
दोषोपशमनार्थाय कुर्यादाज्यावलोकनम् ॥२६॥

अभिषेकं शङ्कराय अश्वत्थस्य प्रदक्षिणम् ।
अतः परं प्रवक्ष्यामि कुर्याद् ब्राह्मणभोजनम् ॥२७॥

एतद् विधानं यः कुर्याद् गण्डदोषं विनश्यति ।
शौभाग्यशान्तिमाप्नोति सत्यं सत्यं न सशयः ॥२८॥

इति श्रीसारङ्गसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने गृहगोधिका शान्तिकर्माऽध्यायः ।

समाप्तश्चाऽयंग्रन्थः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शुद्धिपत्रम्

अशुद्धम्	शुद्धम्	पृष्ठसंख्या	पङ्क्तिः
चतुङःगुर	चतुरङ्गुल	२	२
विस्तिर्णं	विस्तीर्णं	२	१३
त्वापोहिष्टा	त्वापोहिष्ठा	४	१३
न्पृच	त्यृच	५	१८
समर्पयेत्	समर्चयेत्	६	५
नर्गतः	तर्गत	१८	२१
भुक्त्वा	भुक्त्वा	१९	५
चतु चत्वारिंश	चतुश्चत्वारिंशः	२१	१३
अष्टवग	अष्टवर्ग	२३	१
जन्मान्यदत्र	जन्मान्यदन्यत्र	२३	१०
षीडितं	पीडितं	४२	७
कल्पियम्	कल्पितम्	४२	१७
विशतिपलं	विंशतिपलम्	४३	२
रण्यहि	हिरण्य	४३	१७
मातृहा	भ्रातृहा	५०	२
त्यजेत	त्यजेत्	५१	१५
ज्येष्ठान्यपाद	ज्येष्ठान्त्यपाद	५३	१८
निर्णयऽयायः	निर्णयाऽध्यायः	६३	१३
ग्रह्या	ग्राह्या	६४	१७
पुराणवं	पुराणोक्तं	६५	२०
चतुर्थ्यं	चतुर्थ्यां	६७	१२

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अशुद्धम्	शुद्धम्	पृष्ठसंख्या	पङक्तिः
दागतान	दागतान्	७१	१६
अत्त्या	भक्त्या	७६	२१
दुवांम	दुर्वा	७६	२१
विनवा न्वितम्	विनयान्वितम्	६४	१२
प्रतिर्षधः	प्रतिषेधः	११५	१७
रित्ताराशयः	रिक्ताराशया	११७	८
स	सा	११९	१४
रववण	खर्वेण	११९	१७
लैग्नगे	लग्नगे	१२२	२
तास्बूलम्	ताम्बूलम्	१२५	३
पुष्पावती	पुष्पवती	१२७	१४
रसानयवम्	रसायनम्	१३३	१६
गलक	गणक	१४२	९
नकुर्वी	नकुर्वीत	१४३	१६
मृदनि	मृदूनि	१४४	२०
जानक	जातक	१४७	१
वलवान्जीव	बलवान्जीव	१५४	६
केंचिद	केचिद्	१५८	१६
सूर्याशिके	सूर्यांशके	१६३	२०
निधन	निधने	१६८	१६
अथ	अथा	१७६	११
शषाणां	शेषाणां	१८१	९
	६२	१८३	१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अशुद्धम्	शुद्धम्	पृ. सं.	पङ्क्तिः
शषो	शेषौ	१८८	७
मत्युं	मृत्युं	१८८	१४
पाल	नृपाल	१८८	२३
कन्द्रे	कंन्द्रे	१८६	१८
अथान्यद्रज	अथान्यद्राज	१६१	४
मृगन्द्रेषु	मृगेन्द्रेषु	१६१	२०
दस्युनवक:	दस्यु नायक:	१६४	१६
योगाऽध्वय:	योगाऽध्याय:	१६५	१
क्रूरचष्ठ:	क्रूरचेष्ठं	१६५	२
येषां त	येषां ते	२००	६
ज्ञानविच्छर	ज्ञानविच्छूर:	२०३	७
सुखग	सुखगे	२०८	६
विपरितं	विपरीतं	२१२	१८
गग	गर्ग:	२१२	२४
त्वे तद्विपरितं	त्वे तद्विपरीतं	२१३	५
मूर्त्यादीन्	मूर्त्यादीन्	२१३	१२
फलोऽध्याय:	फलाऽध्याय:	२१३	१७
स्वच्चस्थो	स्वोच्चस्थो	२१४	२
यो र्भर्गा	योनिश्च दुर्भगा	२१७	१६
स्वरांशक	श्वरांशक	२१६	२
व लौ	वर्तुलौ	२४६	१८
परिपूर्ण	परिपूर्ण	२५०	२०
सयुक्नं	संयुक्तं	२५४	१४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अशुद्धभ्	शुद्धम्	पृ. स.	पङक्तिः
मानि	इमानि	२५४	१६
द्वभ्यां	द्वाभ्यां	२६२	८
बाह्य दैवतम्	व्राह्म दैवतम्	२६३	१८
गहितः	गर्हितः	२६५	९
विट्शूद्राणां	विट्शूद्राणां	२६५	१७
ब	बहु	२८१	६
वणशयो	वर्णशयो	२८१	१२
तदवा	तदैवा	२८३	२
कुहूतिथै	कुहूतिथे	२९१	१५
आयुवदे	आयुर्वेदे	२९३	१३
यणाधिप	गणाधिपः	२९४	१७
ऋएिसन्निभा	ऋषिसन्निभा	२९५	११
कृकत्थां	कृकट्यां	३०१	१६
कुलदूपयन्ती	कुलदूषयन्ती	३०२	१२
कुवीत	कुर्वीत	३११	१५
कूरटिद्ध	कूरविद्ध	३१४	१९
स्यूद्रेक्पाणेषु	स्युद्रेक्काणेषु	३१८	१९
विद्धुम	विद्धम्	३२४	१०
जानानन्द	जनानन्द	३३१	१४
स्याद्रू	स्याद्	३५५	९
भुखानि	मुखानि	६५९	१६
मर्वेषां	सर्वेषां	३६०	१७
संत्यजेत्	त्यजेत्	३६८	१४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अशुद्धम्	शुद्धम्	पृ. सं.	पङ्क्तिः
भगनादि	भगणादि	३७१	१०
सुपर्णस्य	सुवर्णस्य	३७२	८
र्भति	र्भवति	३७५	१३
पापऽऽशक्ति	पापाऽऽशक्ति	३७६	४
विवक्षितो	विविक्षितो	३८३	१६
दिवसात्‌	दिवसात्	३८७	३
द्धुनम्	द्धनम्	३९८	१२
यद्रव्यं	यद् द्रव्यम्	४००	६
पष्टचाङ्गलो	षष्टचङ्गुलो	४०८	२१
स्यर्शे	स्पर्शे	४०९	१७
क्रमात	क्रमात्	४१७	५
धनष्ठा	धनिष्ठा	४२०	८
क्छक लग्न	प्रच्छकलग्न	४३६	७
ललटग	ललाटग	४५१	१६
भृग्व ध्यङ्गिरस	भृग्वत्र्यङ्गिर	४६०	११
समुभ्दव	समुद्भव	४६०	२१
सज्ञोयं	सज्ञोऽयं	४६८	३
कामेतंवने	कामे वर्तने	४७१	२०
८ ८ समर यात्राऽ—			
ध्यायः	जगन्मोहने	४७४	१
पणीश्वर	फणीश्वर	४७४	३
यत्रा	यात्रा	४८०	१४
मामर्गध्ये	मार्गमध्ये	४८२	६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अशुद्धम्	शुद्धम्	पृ. सं.	पङ्क्तिः
स्वदेशेव	स्वदेवशो	४८५	७
पिपसित	पिपासित	४८६	२१
वाक्यति	वाक्पति	४८८	१९
साथु	साधु	४९२	६
नवान्त	नवान्न	५०३	३
ज्येष्टे	ज्येष्ठे	५०३	२१
जगन्ममोहने	जगन्मोहने	५०६	१
थारणे	धारणे	५१०	३
वाट्टो	वायो	५११	११
कृन्त्वाट्रा	कृत्त्वष्ट्रा	५१३	३
स्वणदानं	स्वर्णदानं	५२७	८

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection